ऋग्वेदसंहिता

श्रीकपालिशास्त्रिविरचितवेदगुप्तार्थ-

सिद्धाञ्जनाख्यभाष्यसमेता

प्रथमाष्टकम्

प्रथमो भागः

(१-३२ सूक्तानि)

प्रकाशकः-

माधव पुण्डलीक पण्डित
श्री अरविन्दाश्रमः
पाण्डिचेरी (भारत)

शके १९५०

६०
मूल्यम् ३५ रु.
भागद्वयात्मकप्रथमाष्टकस्य

मुद्रणम्-

भूमिकातः प्रारभ्य आद्वितीयाध्यायसमाप्ति
शिरसि नन्दिनी मुद्रणालये, शिष्टं सर्वं
श्री अरविन्दाश्रम मुद्रणालये।

RIGVEDA SAMHITA

WITH THE COMMENTARY ENTITLED

SIDDHĀNJANA

BY

SRI T. V. KAPALI SASTRY

FIRST ASHTAKA

Vol. I—Part I

(1-32 Suktas)

PUBLISHER'S NOTE

IT is a valued privilege for me to be associated with the publication of this profound and sacred work. The printing and the publication of this volume has been planned, promoted and seen through by my revered brother Sri Sunderrao P. Pandit, Advocate, Sirsi. It was under his close supervision and guidance the first part of the present volume was completed at the Nandini Mudranalaya, Sirsi, by which time it was found possible, with the gracious approval of the Mother, to shift the work to our Ashram Press where it is being continued from the second part onwards.

Printing of a Vedic work has always its special difficulties and in this case a series of unexpected obstacles had to be surmounted which have delayed publication of the book and necessitated considerable alteration in the plan of the work. It has been possible to persevere and proceed with the undertaking because of faith in the cause of the Veda, the immortal bequest of the ancients to our land, because of the encouraging response and keen interest evinced by circles of progressive thought and aspiration in this substantial contribution to the resuscitation of the nation's culture and above all because of the blessings of the finder of the Light that has inspired and permeated the entire work, the Master, Sri Aurobindo.

It is not necessary to repeat here what I have stated in the Circular issued recently in this connection regarding the need, nature and scope of the work, and its esteemed author. Opinions of learned Pandits and scholars on this work have been included in the Circular and thanks are due to them for their warm-hearted response actuated, among other things, by their innate love of Sanskrit learning, esteem for the Vedic wisdom, and reverence and fealty to the Rishis of the Rig Veda.

14-1-1950

Sri Aurobindo Ashram,
Pondicherry.

M. P. PANDIT

FOREWORD

THIS Commentary on the Rig Veda of which the First Ashtaka is now published starts with the *Bhumikā*—a long introduction in which the line of esoteric interpretation as shown by Sri Aurobindo is expounded. A summarised version of the same in English was published some time ago. In this Foreword I should like to explain how I happened to undertake this sacred task. In the Translator's Preface to my Tamil rendering of the *Hymns to the Mystic Fire* I made a statement the substance of which I give below.

In the nineties of the last century when, according to the family custom, I was being taught the chanting of the Veda—*sāma gāna* with the Rik-texts, I had a vague idea, a strong belief characteristic of old style orthodoxy that Veda means Veda-Purusha, it is God as Veda, eternal, the sound-body of God. Beyond this I did not think and could not. When a few years later, I grew in knowledge of Sanskrit just enough to read and understand the simple and lucid commentary of Sayana, I was curious to know at least the meaning of those Riks which I had already got by heart. When I turned to the pages of Sayana-bhashya I did not find any difficulty in understanding the word-for-word meaning given therein, but in some places I vaguely thought there was something more than what was written there, but I was not able to go further, what little I could sense was that it was dark to me and the darkness was visible; in effect my eyes could not see. A few years afterwards it was the late Vasishtha Ganapati Muni—Kavyakantha Ganapati Sastri whom we adored and addressed as *Nayana*, beloved father—who in a way first opened my eyes. It was he who since 1907-1908 took me as his own and guided me in many branches of Sanskrit study and laid in me the foundations for spiritual life which in later years grew to claim me in its entirety. It was in 1910 that he favoured me with instructions regarding the Deities of the Rig Veda and depth of thought in the Vedic hymns.

But from 1914, ever since the *Arya* began to appear I have closely followed Sri Aurobindo's approach to the study of the Rig Veda and whole-heartedly, with sufficient reasons, accepted it. It is not that I rejected Vasishtha Muni's method in order to accept Sri Aurobindo's. There was no occasion or room for following the former. For while it is a fact that he took up stray hymns on occasions, explained them, taught us to appreciate the grandeur, beauty and wealth of ideas in the hymns, he did not write a commentary on even an *anuvāka* or a small portion of the Rig Veda. Nor did he work out a method of interpretation. There was indeed enough of original thinking and inspired talks he gave us in plenty. One remarkable fact is this: both Sri Aurobindo and Sri Vasishtha Muni came to extraordinary conclusions about the Vedic Gods and Vedic Secret independently without the one knowing the other. Their methods are not identical, their views are not the same, though both regard the Veda in supreme esteem as a Scripture of secret Wisdom. The latter closed his earthly career without committing to writing the results of his Vedic studies. Since I have made reference to these Vedic studies of Vasishtha Muni in some of my Sanskrit works including his biography and commentaries on his poems, since I am also closely associated with the Teachings of Sri Aurobindo and in particular am commentator on the Rig Veda along his lines, there is likely to be a misconception. To make the position clear is the relevancy for this personal note.

Nearly ten years ago some friends here asked me to give word-for-word meaning in simple Sanskrit for Rig Vedic hymns so that they could be rendered easily in Hindi afterwards. I thought it could be done, but thought also that it would not be acceptable to scholars in the absence of necessary explanations, grammatical notes, justification for departure where necessary from old commentaries or modern opinion. So I placed the matter before Sri Aurobindo with my submission that I would undertake the task only if he would be pleased to go through what I write. This he graciously agreed to do and added that I could write the commentary keeping close to his line of interpretation and using the clues he has provided to unveil the symbolic imagery for arriving at the inner meaning that is the secret of the Veda.

With his blessings, then, I started the work. As it was proceeding, I placed it before him in convenient parts for perusal at his pleasure.

This Commentary has received his general approval and the benefit of his occasional suggestions and remarks that have enabled it to keep more and more close to the spirit of his interpretation. But I am fully responsible for all that is written in the commentary, including details, regarding the fixing of meanings for certain words which lend themselves to different interpretations. I have generally taken Sayana for my model, in regard to word-for-word meaning, grammar, accent, etc., though necessarily there is departure in regard to the drift of the hymns and in some places, the construction of sentences. I have not mentioned the *viniyoga*, the application and use of the Mantra in particular rites; for that would be necessary if the present work were to explain the symbolic character of the Vedic rites. But that is beyond the scope of this commentary.

I had thought of recording and comparing the opinions of other commentators as far as available and at one time thought of making references to the opinions of modern scholars, especially of the West, who have made no mean contribution to Vedic studies, with the help of Comparative Philology with all its shortcomings, particularly in regard to the fixing of the meaning of words. But after deliberation and consultation in proper quarters, I found it advisable to confine myself to what I had to say positively, in view of the purpose of the commentary which is to expound the inner sense and not to encumber the work with the views of other authorities, and increasing it in bulk involving enormous labour that might entail the risk of not completing the printing even of the First Ashtaka.

As the commentary was progressing, the thought occurred to me that in the absence of a background to proceed with the modern scholar and the old type Pandit, both alike would be at a loss to follow the meanings and explanations given in the commentary. Therefore the *Bhumikā* was written explaining the position and examining it in the light of scriptural texts ranging from the Vedas down to the Puranas.

Thus the first hundred pages of the book were separately taken out from the printed formes and sent out to Pandits and scholars for opinion. The response was generous, almost unanimous and encouraging. If there was a note of hesitancy anywhere in the opinions, it was this: can all the hymns or the majority be shown to bear

out the esoteric sense? This is certainly a genuine doubt, revealing at the same time a certain openness to accept the esoteric interpretation if the hymns are systematically shown to contain the sense we plead for.

This Commentary, it is hoped, answers to the demands of the discerning mind.

Sri Aurobindo Ashram,
Pondicherry.

T. V. Kapali Sastry

Dedicated

To

Sri Aurobindo

In Adoration and Gratitude

ऋग्भाष्यभूमिका

प्रथमः खण्डः

जयति श्रीजुषामेको भुवनानामधीश्वरः ।
पुरुषाणामशेषाणा मात्मा यस्तमसः परः ॥
जयत्युत्तमशब्दार्थः शब्दमूर्तिधरः पुमान् ।
निःश्वासेन सृजन् विश्वं प्राणवान् तपसा प्रभुः ॥
तदृचां जयति व्योम स्थानं परममक्षरम् ।
यतो विसृष्टं भुवनं सार्थकं परमेष्ठिना ॥

वरेण्यं वरणीयानां वेदगुप्तार्थवेदिनाम् ।
भावं भावं महाभाम मरविन्दपदं महः ॥
तत्सम्मत मसम्बाध मबोधैः कर्मबन्धनैः ।
कुर्मो गूढार्थबोधाय वेदमर्मविभेदनम् ॥

वेदानां ऋग्यजुःसाम्नां साङ्गानां विवृतिः क्वचित् ।
कृता पूर्वैः पुराणानां गाथाभिरुपबृंहिता ॥

धर्मानाहु र्वेदमूलान् सामयाचारिकानपि ।
तदेव मतमेकेषां प्राचामाचारशासिनाम् ॥
दिव्यज्ञानतपोनिष्ठा-निधीन् वेदान् विदुर्बुधाः ।
एके क्रियाकलापाना मालवालं प्रचक्षते ॥

तदत्र समयाचार्याः सर्वे भारतभूजुषः ।
काण्डद्वयात्मकं वेदं धर्ममूलं च मेनिरे ॥
आधारः कर्मणां काण्डं पूर्वं ज्ञानस्य तूत्तरम् ।
कीर्त्यते पूर्वतत्रस्य ब्राह्मणान्युपजीवनम् ।
तथोपनिषदो मूलं परज्ञानस्य चक्षते ॥

ऋचो यजूँषि वा मन्त्राः प्रयोगसमवायिनः ।
क्रियासु विनियोगार्था यागार्था इति निर्णयः ।
तस्मादङ्गत्वमापन्ना मन्त्राः कर्मसु निश्चिताः ॥

प्रसादनाय देवाना मन्तरङ्गस्य शुद्धये ।
इष्टप्राप्तेरनिष्टस्य निवृत्तेरपि सिद्धये ॥
जपादिषु प्रयुज्यन्ते पावना इति यद्यपि ।
तथाऽपि कर्म परमं मन्त्रास्तस्योपसर्जनम् ॥
मन्त्रब्राह्मणयोस्तस्माद् वेदाख्या धर्मशास्त्रतः ।
सूत्रकारैः समाख्याता कर्मधर्मपरैः पुरा ॥

एतादृशं पुरस्कृत्य समयं साम्प्रदायिकम् ।
व्याख्यानं वेदमन्त्राणा मकार्षुर्भागशः क्वचित् ॥
याजुषाणां तु मन्त्राणा मुव्वटश्च महीधरः ।
ऋचामन्ये तथा स्कन्दस्वामी वेङ्कटमाधवः ॥
सब्राह्मणानां सम्पूर्णाः संहितानां सविस्तरम् ।
व्याख्याश्चतसृणां चक्रे सुधीः सायणमाधवः ॥
यस्यैव भाष्यं सर्वत्र प्राप्तप्रसरणं परम् ।
बुधैराद्रियते प्राच्यैरपि पाश्चात्यपण्डितैः ॥

नव्याः पश्चिमभूखण्डे वेदवाह्या अपि स्वयम् ।
नवाभ्युदयसम्पन्नाः सर्वतो ज्ञानमीप्सवः ॥

कौतुकाद् भारतीयानां विमृशन्तः पुराकथाः ।
प्राच्यपाण्डित्यसाहाय्याद् वेदान् केचन लेभिरे ।
यथाप्रतीच्यसंस्कारं चक्रुर्वेदार्थनिर्णयम् ॥

सायणोऽभवदेतेषां सुमहानुपकारकः ।
समादृत्याशयान् तस्य स्वेषां यावदपेक्षितम् ॥
एते वेदोक्तदेवानां मन्त्राणामपि सर्वशः ।
निरणैषुः स्वरूपाणि तथा मन्त्रदृशां मतम् ॥

प्राप्तं परिश्रमादेषां वैदुष्यस्याविशेषतः ।
समासेनोच्यते ज्ञेय मेतन्नव्यविचारिणाम् ॥
एक एव परो वेदः स ऋग्वेदः पुरातनः ।
ऋषयो मन्त्रकाव्यस्य कर्तारः कवयः स्मृताः ॥
सूक्तात्मकानि काव्यानि न्यबध्नन् यज्ञकर्मणे ।
मरुत्पर्जन्यभूताग्नि-भानवोऽन्याश्च देवताः ॥
ऋषिभिः प्राकृतैर्भीत्या प्रायः प्रीत्या च सन्नुताः ।
निसर्गसिद्धा अन्येऽपि भूतात्मानो जडा अपि ।
देवाः प्रकल्पिताश्चान्ये स्तूयन्ते चेतना इव ॥
रागिभिर्द्वेषिभिः पूर्वैः प्राकृतैरेव मानुषैः ।
देवा अभिष्टुताः सूक्तै र्नानाभीष्टार्थसिद्धये ॥

यज्ञकर्मकलापेषु चीयमानेषु कालतः ।
यजुषामपि मन्त्राणां ब्राह्मणानां च कल्पना ॥
अयमूह्यश्च भूतार्थः ऋग्भ्योऽर्वाक्कालभाषया ॥

अतीन्द्रियार्थविज्ञानं आत्मज्ञानमथापि वा ।
यदि सूक्तेषु दृश्येत तदकिञ्चित्करं भवेत् ॥
दशमे मण्डले ज्ञान-प्रशंसा दृश्यते स्फुटम् ।

भवत्यन्यत्र वेदे चेत् तदर्वाचीनसम्भवम् ॥
इदं तु सर्वथा ज्ञेयं ऋषयः प्राकृता जनाः ॥
ज्ञानस्यारण्यकग्रन्थाः शरणं न तु संहिताः ।
तस्मान्मन्त्रेषु न ज्ञानं न रहस्यं न वा तपः ॥
जडानां भूततन्मात्र-देवानां वा नभस्सदाम् ।
सृष्टानां ऋषिभिः सोम-मदवैभवतोऽपि वा ॥
अदृश्यानां च दृश्यानां असतां वा सतामिव ।
स्तुतयः परिदृश्यन्ते प्रणीतास्तु पृथग्जनैः ॥

एतादृशैरभिप्रायैः पाश्चात्येभ्यः समाहृतैः ।
आक्रान्ता बहवोऽस्मासु बुद्धिमन्तोऽपि भारते ॥
अनुयान्ति नवं मार्गं नव्यविद्यावशंगताः ।
*अविमर्शनपाण्डित्यैः प्राचीनैरपि नादृताः ॥

एवं स्थितेऽत्र भगवान् अरविन्दो विदां वरः ।
अप्रतीक्षितमध्वानं अपश्यत् तपसि स्थितः ॥
प्रकाशमभवत्तस्य रहस्यं वेदगूहितम् ।
मन्त्रार्थमार्गणायास्य न कदाऽप्यभवन्मतिः ॥
तथाऽपि योगनिष्ठायां तिष्ठतोऽन्तरचक्षुषः ।
प्रत्यक्षतां गताः ख्याता वेदे काश्चन देवताः ॥
तदाप्रभृति वेदार्थ-विचारेऽभिरुचिः स्थिता ।
वेदे रहस्यं विज्ञाय किञ्चिद्वा ज्ञापयन्मुनिः ॥
ऋचां ऋषीणां देवानां तत्त्वानि गहनान्यपि ।
यथादृष्टं समाचख्यौ जिज्ञासूनां प्रबुद्धये ॥
दर्शनान्मतिमुत्पन्नां निर्विकल्पां महामनाः ।
प्रत्यायनार्थमन्येषां युक्तिभिः प्रत्यपादयत् ॥

---

* प्रायद्र्शनाभिप्रायेणेदमुक्तम्, सन्ति तु विरलाः प्राचीनपण्डिताः विमर्शरसिकाः ॥

तद्दर्शनमुपाश्रित्य तदुक्तीः परिभाव्य च ।
ऐतिह्यमपि चावेक्ष्य सम्प्रदायान् पुरातनान् ॥
अपि प्राचीनतन्त्राणां सुदूरपरिशीलनैः ।
रहस्यं वेदभाषायां भिद्यतेऽत्र चिरन्तनम् ॥

ब्राह्मणेष्वपि मन्त्रेषु तथा चोपनिषत्स्वपि ।
नैरुक्तेष्वपि वाक्येषु प्राक्तनेष्वितरेष्वपि ॥
पुराणेष्वितिहासेषु तथा शास्त्रान्तरेष्वपि ।
वेदे रहस्यमस्तीति भावः सर्वत्र दृश्यते ॥

ऋक्संहितायां तत्रादौ गोप्यं द्रष्टव्यमुल्बणम् ।
तत्तु भाषाविशेषेण सङ्केतात्मतया स्थितम् ॥
सङ्केतार्थे तु विज्ञाते गच्छेद् गोप्यं प्रकाशताम् ॥
ऋषिदृष्टेषु मन्त्रेषु तस्योद्घाटनसाधनम् ।
अस्ति चेच्चक्षुरस्माकं लभ्यते निर्विकल्पतः ॥
निरूपिते तद्रहस्ये मन्त्रान् मन्त्रदृशः प्रति ।
पलायिता स्याद्दुर्भ्रान्तिरधिकृत्यापि देवताः ॥
यच्चिरन्तनमार्षं च तदस्मन्मतमिष्यते ।
मन्त्रो मूलं ततः शाखा ब्राह्मणोपनिषत्ततिः ॥

मधुच्छन्दःप्रभृतयः सूरयो मन्त्रदर्शिनः ।
येषां चक्षुष्मतां प्राचां देवाः प्रत्यक्षतां गताः ॥

न पाण्डित्यप्रकर्षेण चमत्कारेण वा गिराम् ।
काव्यशोभारता एते सूक्तकाव्यानि निर्ममुः ॥
अन्तरद्भुतशक्तीनां समुल्लासादनर्गलम् ।
सम्प्रसादाच्च देवानां श्रवणादीक्षणादपि ।
मन्त्राह्वयं स्वयं ब्रह्म साक्षाच्चक्रुर्महर्षयः ॥

श्रुत्या च दृष्टिसम्पत्त्या दिव्यया वाऽथ सूक्ष्मया ।
सिद्धया देवताभक्त्या मन्त्रान् प्रापुस्तपोधनाः ॥
तस्मादेतानि सूक्तानि गीयन्ते मन्त्रदृष्टयः ।
अन्तर्दर्शनसम्पन्ना ऋषयः कवयः श्रुताः ॥
देवास्तु बहवः स्तुत्याः पृथङ्नामानि बिभ्रतः ।
एक एव परो देवः सूर्यात्मा परमः पुमान् ॥
यस्यैव बहुधावृत्ति र्नानादेवात्मतास्थितिः ॥
सत्यं बहूनि नामानि परस्यैकस्य देवताः ।
शक्तयो मूर्तयोऽप्येता नामान्येव न केवलम् ॥
तस्मादेकः परो नाना-मूर्तिनामस्वरूपभृत् ॥
पृथक्त्वेऽप्यपृथग्भूतं देवताभ्यः परं महः ।
मुखतो देवताभेदः पृष्ठतः सर्वदेवताः ॥
एकैकोऽपि ततो देवो व्यापारस्य विशेषतः ।
पृथङ्मूर्तः पृथङ्नामा सर्वदेवमयः परः ॥
भवत्यङ्गिन एकस्य बहून्यङ्गानि वा यथा ।
भिन्नप्रवृत्तयो देवाः परस्य ज्योतिषस्तथा ॥
सन्नुता ऋषिभिस्तस्मात् पृथक्छन्दसि देवताः ।
न केवलं नामभिदा व्यक्तिवृत्तिभिदा अपि ।
विज्ञेयाः परमस्यैता एकस्यैवेह देवताः ॥

आभ्यन्तरे वा बाह्ये वा विश्वस्मिन् बहुभूमिके ।
नियुक्ता अधिकारेषु बहवो लोकपालकाः ॥
अधीनं देवतास्वेव जगदन्तर्बहिस्तथा ।
इदं रहस्यं विदितं पूर्वेषां मन्त्रदर्शिनाम् ॥

तस्मात्प्राणेन मनसा गात्रेणापि महर्षयः ।
सर्वात्मना च यजनं देवेभ्यो निरवर्तयन् ॥

अन्तर्यागसमर्थानां विरलानां महात्मनाम् ।
गोप्यान्यप्रभवो वेत्तुं पामरास्तु सहस्रशः ॥
देवान् बाह्येन यागेनाराधयन् मन्त्रपूर्वकम् ।
मन्त्रस्तु भाषाविच्छित्त्या द्विधाऽप्यभवदर्पकम् ॥
ऋषिदृष्टस्य मन्त्रस्य देवस्याराधितस्य च ।
यज्ञस्य यजमानस्य होत्रादेश्च फलस्य च ।
स्वरूपं पुरतः स्पष्टं विचारेऽत्र भविष्यति ॥

सोऽयमस्माकं पक्षः सङ्ग्रहश्लोकैरादौ सङ्क्षेपेणोपन्यस्तः । तमिमं यावदपेक्षं विस्तरशस्तत्र तत्र पुरस्ता दुपपादयिष्यामः । सेयं वेदगुप्तार्थगामिनी पद्या श्रीमदरविन्दपादैः प्रदर्शिता । सैवेयमस्यां प्रवर्तमानायां ऋग्भाष्यभूमिकाया मवलम्ब्यते, येन निष्कण्टका स्या दनुसर्तव्या सरणि र्मन्त्रार्थ-मीमांसकानाम् । तदिह प्रथमं तावद्विपक्षोद्धारः कार्यः । को नामायं विपक्षः कुतःप्ररोहो वा, यस्योद्धारः प्रतिज्ञायते? तमेव साम्प्रतं विमृशाम नाम ॥

पाश्चात्यपण्डितै र्यथावसरं प्राच्यपाण्डित्यसाहाय्य मुपादाय वेदानधिकृत्य केचन प्रत्ययाः किल विक्षिप्ताः । प्राधान्येन तानेवोपाश्रित्य भारताभिजनानां बहवो नव्यविद्याप्रपञ्चसञ्चारिणः प्रज्ञावादान् प्रभाषन्ते । तथा चाहुः— पश्चिमभूखण्डे यावज्जीवं वेदविद्याविचारिणः प्रमुखाः पण्डिता एवं किल निरणैषु र्वेदानुद्दिश्य— ऋग्वेदसूक्तेभ्यः प्राकृतानामार्याणां शैशवदशा विस्पष्टा भवति । तेषां प्रार्थनानि सूक्तात्मकानि बालानामिव विनोदनिर्भर-निर्व्याजवचनानि दरीदृश्यन्ते । यद्यप्यपरिष्कृता बालिशावस्था च तेषां समयधर्मव्यवस्था, तथाऽपि प्राकृतदशा एकेश्वरवाद एवैषां मतमिति वक्तव्यम् । अस्मद्भारतीयेषु पुनरुज्जीवनसमयाचार्याः राममोहनो दयानन्दस्वामिनोऽपि एकेश्वरवादमेव वैदिकं समयमभिप्रशन्ति स्म । एवमेषां मतं पाश्चात्यवैदिकसिद्धान्तेन सङ्गच्छते । यद्यपि, पाश्चात्यानामभिप्रायेषु विप्रतिपत्तयो लक्ष्यन्ते, तथाऽपि तत्र सुलभं संवादं अत एव विरोधपरिहारं पश्यामः । तथा चैक आहुः— 'ऋग्वेदकविभिः प्राकृतै र्यज्ञार्थं सूक्तानि प्रणीतानि इति, कर्मविधिपारम्ये बद्धश्रद्धा एते यथाजाता इति च, अन्ये

पुनः वेदे वर्ण्यमानाः देवताकथाः रूपकदृष्टान्तादिभिः गौण्या वृत्त्या वा जगन्निसर्ग-व्यापारान् वर्णयन्तीत्याहुः । सुप्रसिद्धः सायणो वेदभाष्यकारस्तत्र व्याख्याने वृत्र-वधादिवर्णनं प्रकृतिकार्यविलसितं सूर्योदयवर्षकर्मादिकं प्रदर्शयति । इदं च सङ्गच्छते पाश्चात्यपण्डिताना मभिमतेनाभिप्रायेण । अर्वाक्कालिक-ब्राह्मणग्रन्थानुरोधेन ऋगर्थान् विवृणोति सायणः । एवं विविधोक्तीना मवकाशो लभ्यते वेदे । एवमापाततो दृश्य-मानानां विप्रतिपत्तीनां मूलं न केवलं ग्रहीतृजनबुद्धिस्थं, परं तु विविधाशयाधिकरणं वेदग्रन्थ एवेति ग्राह्यम् । उच्चावचाभिप्रायगर्भितस्तथाविधः सूक्तानां सन्दर्भ ऋक्संहि-तायां लक्ष्यते ॥

एवं प्राज्ञकोटि मारूढानां नव्यानां वैदिकेतिहास-मार्गणपराणां मत माश्रित्य स्थितानां भारतीयाभिजनाना मग्रसरः कोऽपि विख्यातवैदुष्य आह– 'वेदरहस्यवादी विबुधः श्रीमान् अरविन्दः यदाह वेदे रहस्यमस्तीति तन्नादरणीयम् । अत्यन्तप्राचीनयवनेष्वपि रहस्यवेदिन आसन्, तथा वेदर्षयोऽपीत्याह, तदसत् । कुतः? नव्यविद्याविमर्शविरुद्धं हि तत् । वैदिकेतिहास-मन्त्रार्थ-देवतास्वरूपादि-विचारे यावज्जीवं कृतपरिश्रमाणां पाश्चात्य-पण्डितानां तन्नाभिमतं स्यात् । कथं नु खलु तत्तादृशमहाशयोल्लङ्घनजङ्घालो भवितुमर्ह-त्यरविन्दीयो वेदरहस्यवादः? यथाकथञ्चि दङ्गीकृते वेदगूढार्थसिद्धान्ते, न केवलं पूर्वोक्तानां प्रामाणिकानां वाणी तिरस्कृता स्यात्, अस्मत्प्रमाणभूत-सायणसम्प्रदाय-व्याख्याविरोधोऽ-प्यापद्येत । किञ्च, वेदार्थविचारे प्रमाणभूतस्य मीमांसकसिद्धान्तस्यापि रहस्यार्थवादः परिपन्थी भवति । तस्मादेष नूतनो वादः श्रीमतोऽरविन्दस्य दूरापास्तः स्यात्, आपात-रमणीयश्चतुरो लक्ष्यमाणोऽपि न परीक्षणक्षमकोटिं प्रवेष्टुमीष्टे । अथ यदि कोऽपि चिरन्तन-आर्षाभिमान-प्रेरणया ऋग्वेदर्षयो महान्तो गुप्तविद्या-सम्पन्ना इति प्रतीयात्, सोऽनृतमेव सेवितवान् भवेत् । अभूतार्थे अतथ्यकल्पने रमतां नाम । यदि पुनर्वेदर्षय-स्तादृशी मध्यात्ममहोन्नतिं देवताप्रसादसम्पत्तिं वा अलप्स्यन्त, कथं तर्हि तल्लक्षणानि कान्यपि उत्तरत्र ग्रन्थेषु सम्प्रदायेषु वा नोपालप्स्यन्त? अपि च भूखण्डवासिनामितरेषां प्राकृतवर्गाणां इतिहास-संशोधनादिदं किलावगम्यते, यत् क्रमशः सर्वेषां अभिवृद्धिः, न पुनः पुरातनाना मादिमदशायामेव महोन्नतिः समपद्यत, ततः परं क्रमेणाधोगमनमिति । तस्मात्परं सत्यं अध्यात्मरहस्यं सर्वं वैदिक-प्राकृतदशा मतिक्रम्य परिणतधिया मौपनिषद-

र्षीणां वाक्येष्वेव द्रष्टव्यम् । ऋग्वेदसंहितायां तु क्वचित्तद्बीजं लक्षितमपि तदल्पं अकिञ्चित्करं अर्वाचीनं अस्थानसन्दब्धं वेति बोध्यम् । एवं सर्वथा अनुपपन्नो वेदरहस्यार्थ-सिद्धान्तो निरसनीयः' ॥

एष सारांशो विपक्षस्य । एवं कथयतां अधुनातनपाश्चात्य-विद्यासंस्कारपारम्य-वादिनां भारताभिजनानां उद्घोष उपेक्षां न क्षमते । यदि एतादृशं वचनं अबुद्धादश्रुताद्वा निर्गतं स्यात्, किमपि वदति वैधेय इत्यलक्षयित्वा न्यक्काराहमिदं नास्मद्दृष्टिपथ-मारोढुमर्हतीति मन्येमहि । अत्र तु प्रकृतः पुरुषो बहुश्रुतः, पाश्चात्याभिज्ञसङ्घेषु विश्रुतमस्य कूलङ्कषं पाण्डित्यं, सर्वजनीना अस्य विविधजनमनःसमावर्जनधुरन्धरा सरस्वती । यद्यपि पूर्वोक्तभङ्गीं आलम्ब्य भाषमाणोऽयं न स्वयं वेदविद्याविमर्शी, नापि वेदार्थविज्ञं-मन्यः, तथाऽपि नास्य वाचोयुक्ते रवीर्यता फलह्रासापत्तिर्वा । यतो न हि सर्वः सर्वं जानातीति न्यायेन सत्यजिज्ञासया भूतार्थान्वेषणश्रद्धया पाश्चात्याननुगच्छन् तत्र वेद-विचारभूमिषु प्रामाणिकवाणी माश्रयते , वेदार्थविचार-चतुरधियां वैशिष्ट्यविख्याति मुद्वहतां पश्चिमभूखण्ड-पण्डितानां मतं स्वयं स्वीकृत्य अन्यांश्च तथा ग्राहयतीति नात्र दोषं पश्यामः । दोषस्त्वन्यविधो भवति, यस्यैव परीक्षा मुपक्रमामहे । अवश्या फलवती च भवेदिह दोषनिरीक्षा । यतोऽसौ प्राज्ञो यन्मन्यते वेदानधिकृत्य, तत् प्रायशः सर्वेषां नव्यमार्गं अवलम्ब्य वेदविचारप्रसक्तानां भारतीयाना मधुनातनं मतम् । तदिह प्रधान-मल्लन्यायोऽवलम्ब्यते, अस्यैवोक्तिं प्रतिनिधीकृत्य पाण्डित्यपल्लवग्राहितां उत्सार्य निर्मत्सर-दृष्टीनां वेदरहस्य-जिज्ञासायै प्रकल्पतां नाम सैषा तद्दोषपरीक्षा ॥

तत्र वेदगूढार्थवादे सारतस्त्रयः किल दोषा उद्भाविताः । तत्र आद्यः पाश्चात्ये-तिहासविदां निर्णयः अस्मदीय-वेदगुप्तार्थ-सिद्धान्तस्य प्रत्यर्थी इति । द्वितीयः सायणीय-सम्प्रदाय-वेदव्याख्या-प्रत्यवस्थानम् । तृतीयः मीमांसकसिद्धान्तस्य प्रतिद्वन्द्वी भवत्य-स्मत्पक्ष इति । तदत्र क्रमश इमान् निर्धूलितान् विधाय एकैकशः सारांशग्राहं निस्सार-यिष्यामः ॥

तत्र प्रथमं तावद्यदुक्तं, सर्वत्र भूमण्डले बहूनां मानुषवर्गाणां इतिहाससंशोधनेन यदवगम्यते, तस्य विरुद्धमिदं कथनं यदृग्वेदर्षिकालात्प्रभृति क्रमशः अधःपतनमेव

भारतीयमानववर्गस्य, मानुषाणां व्यष्टेरिव समष्टेरपि क्रमाभिवृद्धेरिति । अत्रेदं वक्तव्यम् । असदुक्तिं अन्यथा सम्भाव्य प्राज्ञेनेयं चतुरोक्तिरुपस्थाप्यते । न वयं वेदर्षयः सर्वेऽपि तत्समकालिकाः सामान्या जनाश्च सर्वतोमुखीं समृद्धि मध्यात्म मधिलोकं च सम्पादयाञ्चक्रुरित्यवोचाम । अस्मदुक्तिरन्या, प्रतिपक्षिणाऽन्यथाग्रहणादारोपितोक्तिरन्या । मन्त्रद्रष्टार ऋषयोऽध्यात्मनिष्ठा अतीन्द्रियगोचरान् मार्गान् तपोबलेनाधिगम्य बहुधाऽऽभ्यन्तराभिवृद्धिं प्रापुः, बहुरहस्यविदस्ते गोप्यानि गूढभाषया मन्त्रदृष्टिषु निचिक्षिपुरिति ब्रूमहे । अनेन सर्वे जनाः पूर्वं महोन्नतिं प्राप्ता इति न मन्यामहे, न हि तथोक्तम् । न वा वेदर्षयः सर्वविधं ज्ञानं समग्रं अधिजग्मु रित्यभिहितमस्माभिः ॥

इदं त्ववधेयम् । तदादिमं ऋग्वेदयुगं योगविदां अध्यण्ड मधिपिण्ड च देवताव्यापारस्वरूप-बोधवतां गोप्याध्वदर्शिनां महर्षीणां युगम् । न तावतोक्तेन सर्वेऽपि जनास्तदानीन्तनाः आभ्यन्तर-गोप्यमार्गविदो नैष्ठिकाः सर्वथा दिव्यसत्त्वसम्पन्ना इति वक्तुं युक्तम् । नैवं ऋषिदृष्टानां रहस्यानां देवतासाक्षात्कार-पद्यानां अन्येषां वा तपोनिष्ठालभ्यानां सत्यानां अभिज्ञोऽभूत् सर्वोऽपि तत्समकालिको लोक इत्युक्तं स्यात् । साम्प्रतं अस्मत्कालिकं एकं निदर्शनं उदाहरामः । विश्वजनीनमेतद् यदद्यतने युगे भौतिकप्रकृतिविज्ञानस्यैव साम्राज्यमिति । बहुरहस्यान्तर्वर्ती चेयं प्रकृतिरनुदिन मनुमुहूर्त मचिन्त्यान्यद्भुतानि आविर्भावयतीति प्रत्यक्षं पश्यामः । तादृशे बुद्धिप्रधानेऽस्मिन् काले कति वा बुद्धिमद्वर्याः? न खलु बहवः, विरला एवेति वक्तव्यम् । विरलानामपि तेषां बुद्धिमतां कति वा सन्ति प्रकृतिविज्ञानधाटीं अनुगम्य तद्गोप्यानि साक्षादधिगन्तुं अधिकारिणः? तादृशाधिकारिणां मध्ये कति वा पुनः प्रभवन्ति प्रवेष्टुं भौतिकप्रकृतिगूढव्यापारविधिप्रपञ्चम्? यस्मात् अणुगर्भसुप्ताः पृथुलब्रह्माण्डशक्तिविसराः प्रबोध्य विप्रमोक्ष्यन्ते । विरला अत्यन्तविरला अङ्गुलिपरिगणनीया एवेति वक्तव्यम् ।

यस्मिन् कस्मिंश्चिद्युगे किमप्यस्तु प्रबलाधिकारस्वरूपम्, भवतु तत् अध्यात्मविद्याद्यधिभूतविज्ञानान्तं धीविलसितं, साम्राज्यशासन-विक्रमसचिवं बाहुबलं वा, द्रव्योत्पादन-विभजन-विनिमयाद्यर्थनयानुशिष्टं वाणिज्यवैभवं वा, समुदायजीवन-व्यवस्थापनक्रियादाक्ष्यं वा, सर्वदा तत् परिमितसङ्ख्याकैर्मानुषैर्द्वारैव स्वयं आविर्भूय सर्वं समुदायमनुशास्तीति नेदमास्पदं विचिकित्सायाः । तस्मात्, ज्ञानबलैश्वर्य-क्रियादाक्ष्यादीना-

मन्यतमेनैकेन वा नैकेन वा जनसामान्यसमुदाये विनीयमाने, नेतारः सत्त्ववृद्धाः अत्यल्पगणना एवेत्यवधार्यम् ॥

एवमेव वेदर्षीणां अध्यात्मविद्यारहस्यज्ञानादिकं नाभूत् सर्वजनसाधारणं, अपि तु जनसामान्यस्य बहिर्यागाद्यनुष्ठानद्वारा देवताराधनसामग्री सम्पादिता । तस्मात् सर्वेऽपि जना वेदकालिका अध्यात्ममहोन्नतिं गुप्तविद्याध्वनश्च अधिजग्मुरिति नैतत्तथ्यं अस्मदुक्तिष्वारोपितं भवति । अपरं च वेदकालिक-विज्ञानमहोन्नते रधःपतनपद्यायां प्रादुर्भूतानि दार्शनिकशास्त्राणीति न कदाऽप्यवोचाम । वेदविज्ञानाधिगम-पद्धतिरन्या, दार्शनिक-शास्त्र-विचारसरणिरन्या । आद्या साक्षाद्दर्शन-श्रवणजन्या बाह्यसाधनैरशिक्षिता सहज-बोधविशेषा, अपरा तु बुद्धिबलात् प्रत्यक्षानुमानादिप्रयुक्ताभिस्तर्कयुक्तिभिः साधितैः विचारैर्लब्धा निश्चयविशेषात्मिका सिद्धान्तभावना । उभयोरपि मार्गयोः युगयोरिव बृहदन्तरं वर्तते । न हि अध्यात्मानुभूतिः कामपि तत्त्वकल्पनाविचारजन्यां बुद्धि-माश्रित्य सम्भवति, नापि सा शरीरयात्रासाधनोपचय-वैभवद्रव्यसमृद्ध्यादिकं अपेक्षते । न वा गुप्तविद्यावैचक्षण्यं बाह्यबुद्ध्युत्कर्षायत्तं भवति । यां वयं इतिहासविन्मतानुरोधेन प्राकृतदशां मन्यामहे तस्यामेव बहवः पुरातनाः अधुनातनानां आश्चर्यजनकानि गहनानि प्रकृतेस्तत्त्वान्यवजग्मुरिति ज्ञायते । न ह्यन्तश्चक्षुरधुनातनत्वायत्तम् ॥

ननु अध्यात्मसमृद्धिर्वेदर्षीणां वस्तुतश्चेदासीत् तत्कथं न तल्लक्षणं तदुत्तरयुगेषु लक्षणीयतया विसृष्टमिति चेद्ब्रूमः । वेदर्षिप्रभावलक्षणानि उत्तरत्र दृश्यन्ते न वेति, दृष्टानि चेत् केन प्रकारेणेति च, प्रचलत्यस्मिन् विचारे पुरस्तात्प्राधान्येन प्रसक्तो भविष्यति । अत्र त्विदं वक्तव्यम् । वेदयुगभाषाबुद्धिविलासः बहुतरां विपरिणतिं प्राप्त इति प्रत्यक्षमिदं उत्तरकालिकग्रन्थावलोकनेन । यद्यपि महदन्तरं वेदयुगस्य ब्राह्मणा-रण्यककालस्य चाभवत् तथाऽपि वैदिकं ऐतिह्यं देवतादिरहस्यं वा ब्राह्मणेष्वारण्यकेषु च किञ्चिद्वा रक्षितं रिरक्षिषितं इत्यद्भुतमेवेदं पश्यामः । आस्तां तावदेतत्, ननु कथं पुनः तादृशं पावनं पुरातनं वैदिकं युगं अकृतार्थमेव नष्टमिति चेन्नैतच्चोद्यम् । प्राचीनयवनेषु रहस्यवेदिनां युगमिव, वेदर्षीणां युगमप्यस्तमितम् । यः कोऽपि भवतु अदर्शनप्रकारः, सर्वथा कालस्य पर्यय एवेति वक्तव्यम् । प्राचीनयवनादिषु रहस्यवेत्तृयुगं आसीदिति प्रतियन्ति ऐतिहासिकाः । तदत्ययादधुना नैवासीत्तादृशं युगमिति न कोऽप्याह । एवं

वैदिकयुगात्यये नासीदार्षरहस्ययुगमिति शक्यं वदितुम् । अथवा सम्भावयामस्तावदिदं, यत् साम्प्रतिकी भुवनोत्तर-प्रकृतिविज्ञानविद्या-विजृम्भिता मानवजातीया सभ्यता संस्कृतिर्वा केनाप्युत्पातेन प्रायः प्रध्वंसमापादिता भवेत्, भूमण्डलविध्वंसावहेन घोरास्त्र-विसर्जन-धुरीणेन अणुगर्भभेदनेन वेति । कथमस्मदुत्तरकालिकैर्नैवासीत् प्रकृतिविज्ञान-साम्राज्यधुरन्धरं युगमिति वक्तुं शक्यम्?

रन्ध्रबहुलोऽयं पाश्चात्यैतिहासिकानां वादः, यत्पुरातनेषु युगेषु सर्वत्र मानुषाणामतिबालिशा बुद्धिरिति । स्याद्वा, प्राकृतभूतसर्गादौ अत्यन्तमपरिपक्वा यथाजातावस्था मानुषस्य । न तु सा प्राचीनयवनादिषु वेदर्षिषु वा अर्पणीया भवति । तावान् दृश्यते तेषु परिपाकः, यावता महर्षीणां मन्त्रदृष्टिषु धीप्रसादः अन्तर्दृष्टिश्रवणादिगोप्यसम्पत्ति-सचिवः प्रकाशो भवति चक्षुष्मताम् ॥

इदं चेह स्मारयामः यदरविन्द आचार्य आह— "भारतवर्षे, अन्यत्र भूखण्डेष्विव, मानुषसामान्यस्य अभिवृद्धिरतिमन्दक्रमा, विरलानां केषाञ्चिदेव अध्यात्म-सम्पद् रहस्यविद्याकौशलं च सिद्धे अभूताम् । अत्र प्रथमं अन्तर्दृष्टिप्रधानं वैदिकयुगमागतम् । तत्त्वकल्पनाविचारजन्य-धीविशेषप्रधानं शास्त्रीययुगं ततः परमनुगतम् । वैदिके युगे ऋषीणां अन्तर्दर्शनमेव मुख्यं साधनं, शास्त्रीये तु प्रत्यक्षादिप्रमाणैर्विचारः साधनम् । यत् साक्षात्साधनजन्येन आन्तरेण साधितं महर्षिभिः, तदेव विचारबुद्ध्यादिद्वारेण साधयितुं प्रवृत्ताः तत्परं योगाध्वानः । एवं कालान्तरेषु उत्तरत्र अन्तःकरणेन प्राणेन शरीरेणापि क्वचित् तं परमं पुरुषार्थं साधयितुं उद्यताः अर्वाचीनाः (वेदयुगापेक्षया) पन्थानः । एवं तान्त्रिकसाधनानि राजयोग-हठयोगादयश्चेति बोध्यम् । न चैतानि वैदिक-गुप्तमार्गादधःपतनक्रमेण यदृच्छया वा समुद्भूतानि साधनानि, किं तु वैदिकादैतिह्याद्दृढं परमप्रयोजनमुद्दिश्य, स्वतन्त्रतया अन्तःकरणादिशोधनैरुपायैः प्रवृत्तानीति ग्राह्यम् । इदमेव भारतीयमध्यात्मचरित्रम् । यत्र प्रथमं वेदयुगे अध्यात्मशिखरं प्राप्ता प्रज्ञा ततः परं पदे पदे कालान्तरेषु अन्तःकरण-प्राणादीन्यवराण्यङ्गानि उद्धृत्य यावदाविष्कृतां प्रज्ञां उत्तमसिद्धिमुपलम्भयितुं प्रतिष्ठन्ते" इति ॥

कथं पुनः पाश्चात्येषु प्राज्ञा ऋजुमार्गं मिच्छन्तोऽपि बह्वृचार्षसमयस्य प्राकृतावस्थां निश्चिन्वन्तीति चेदस्त्यत्र कारणम् । भूमण्डले मानवजन्मिनः प्रादुर्भावः कतिपय-सहस्रवार्षिकः न तु बहुशतयुगकालिक इति कञ्चन काल्पनिकं पाश्चात्यं ऐतिहासिक-सिद्धान्तमवलम्ब्य वेदर्षीणां कालं निरणैषुः । अत एव द्वित्रैः सहस्रवर्षैः परिमितशत-वर्षैर्वा आर्यजनोदयाभ्युदयादिकथास्तैः परिसमापिताः । इयं च पूर्वकथा तेषाम् । भूगोलेतिहास-गवेषणारम्भे शैशवावस्थायां तथाविधा मतिरासीत्तेषाम् । साम्प्रतं वर्धमाने चेतिहासविज्ञाने तादृशी प्रतीतिः प्रायेण विपर्यस्ता । अपरं च, भौतिकविज्ञानाभ्युदय-समये लोकायतिकसिद्धान्ते पाश्चात्यबुधमण्डले साम्राज्यं शासति, वेदार्थविचारद्वारेण पूर्वेषां भारतभूजुषां साङ्घिक-समयधर्मादिव्यवस्थां जिज्ञासन्ते स्म । तत्र नानामानुष-वर्गाणां पुरावृत्त-समयधर्म-भाषातत्त्वादि-पर्यालोचनया यावद्विदितं उपादाय यावदभिमतं भावनाबल-साहाय्येन च भारतीय-वेदेतिहासधर्म-व्यवस्थामकल्पयन् । तथा सति तेषां संस्कारे सामर्थ्ये च, नेदमाश्चर्यं यदभिहितं तैर्वेदर्षयः प्रायेण पामराः पृथग्जना वा, तेषां कवित्वानि बालभावसुलभानि, तेषां देवताः प्रकृतिव्यापारावेक्षण-विस्मयसम्भाव-नादि-सञ्जाताश्चेत्यादि । वेदविचारप्रारम्भे तल्लब्धा सामग्री न पुष्कलेति तु तथ्यम् । मानुषप्रादुर्भावाभिवृद्धि-सङ्घनय-धर्मस्थापनादिषु तेषामुक्तपूर्वं मतमधुना यातयामं भूयिष्ठ-भागशो गतरसं च । तस्माद्वेदानधिकृत्य सावधानं पुनर्विचारः करणीय इति तथ्या-न्वेषणपराणां धीरुत्साहश्चात्यन्तमपेक्षिताविस्यलं विस्तरेण ॥

तावता भवतु विसर्जनं तावत् पश्चिमखण्ड-पाण्डित्यविलसितस्य । तदनुसारिणां भारतीयानां नव्यसंस्कारोपस्कृतधियां वेदार्थविचारसरणिरद्यापि सारतो न परिवृत्तेति चेन्नेदमपलपितं स्यात् । यद्यपि बहवोऽस्मासु मेधाविनः प्रतिभाशालिनः ऋजुमार्गगामिनः विविधविद्याप्रस्थानेषु प्राच्येषु प्रतीच्येषु वा पुरातनेषु नूतनेषु वा व्यवसायिनो जेजी-यन्ते, तथाऽपि वेदविद्याविचारे तथाविधाः सन्तीति नालं स्मो वदितुम् । सन्तोऽपि विरलाः पाश्चात्यपुराणसिद्धान्तेषु पूर्वोक्तविधेषु बद्धश्रद्धाः चालयन्ति परिश्रमं, यस्य फलितेषु तु न लक्ष्यते वैशिष्ट्यम् । अथ सन्ति चेद्विशेषाः ते च विषयविस्तरेष्वप्रधान-तथ्योपलब्धिषु वा दृश्यन्ते । सारांशेषु तु सैव पाश्चात्यानां दृष्टिः, तैः प्रकल्पित एवाध्वा, तैर्विभावित एव वेदर्षि-धर्मसमय-सिद्धान्तः, तेभ्यः समुद्भूतमैतिह्यमेव शिष्ट-

सम्मतम् । इदं सर्वमवलम्ब्य वेदमन्त्र-पद-पदार्थ-चरित्रविचारः क्रियतेऽस्मदीयैर्नव्यैः विद्वद्भिः । तैः प्रतिपादिताः बर्बरप्राया एव वेदर्षयः, प्राकृतेषु अग्निवाय्वादित्य-पर्जन्यादिषु देवताभिमान-जडबुद्धयः, शिशुजनता-कल्पनाकल्पानि कवित्वानि । अहरहरुदयत्यप्यरुणे अहरहराश्चर्यचकिता उषोदर्शने, रात्रिस्मरणमात्रेण साध्वसावेशः तेषामृषीणाम् । एवमादयोऽभिप्रायाः सामान्येनाद्यापि न जहति वेदविचारप्रवृत्तिम् । अत्रैकं निदर्शनं उदाहरामः । अयं च अधुना शिष्टाचारप्राप्तः सम्प्रदायः सञ्जातः, यत् सर्वैरपि नव्यमार्गेण वेदार्थविचारे क्रियमाणे वेदकवित्वस्य रामणीयकं कीर्तनीयमिति । तत्रापि उषस्सूक्तानि पाश्चात्त्यैर्दर्शितपूर्वाण्यपि श्रेयोविषये शतशोऽपि वक्तव्यमिति उदाहृतानि भवन्ति । सन्त्येव बहूनि सूक्तानि काव्यशोभावहानि वेदे, तत्रापि विशेषतः उषस्सूक्तेषु । नात्र विवदामहे । परं तु तथा वर्ण्यमानानां चारुकवितासूक्तानां तैः प्रतिपाद्यमानं तदभिमतं तात्पर्यं क्वचित् सायणभाष्यानुरोधेन साधितं तथाविध-सङ्कीर्तनानुगुणं समुत्कर्षं नावहति, प्रत्युत, ते च कवयः बालिशबुद्धयः, सर्वसाधारण-व्यतिकरेषु लब्धाल्पतुष्टयः क्वचिदुन्मत्तप्रलापालङ्कृतवदना इति च निरूपयेदित्यसंशयम् ॥

"अतारिष्म तमसः पारमस्य" (१-९२-६) ऋषौ कुत्स आङ्गिरसे एवं कृतज्ञतया सम्मदेन च देवतास्तवमातन्वति, एषां वेदार्थविमर्शिनामर्थाविष्कारनये केवलमभिधा-वृत्त्यैव भावो ग्राह्यः, न पुनस्तमसस्पारस्य तरणेन अज्ञानस्यान्तो लक्ष्यते, व्यतीतायां रात्रौ अहरहःसुप्तोत्थानमेव कीर्त्यते । ऋषिपदेन विश्रुतानामेषां तपस्विनां सन्तमसान्धा रात्रिः प्रतिभयजननी किल भूतप्रेतपिशाचभूयिष्ठा । अन्यदस्ति चित्रम् । ऋषिषु यजनायोपविष्टेषु, उदित एव सूर्ये पुनरुदयाय प्रार्थयन्ते । एषां प्रार्थनाबलेन वेद-पारायणमहिम्नैव सूर्य उदेत्य दिवमारूढ इति तेषां प्रत्ययः किल! स्यान्नाम तादृशो जनसामान्यस्याप्यचिन्त्यो मूढविश्वासः, किं ते नाज्ञासिषुरिदं यद्रात्रेरपाये प्रभातं, तच्च परिणतं दिनं, दिनस्यान्ते रात्रेरागम इति? नाविदितं तेषामिति शक्यं वदितुम्, "न दैव्यानि प्रमिनती व्रतानि" "ऋतस्य पन्थामन्वेति साधु" (१-१२४-२,३) एव-मादिमन्त्रदृष्टिषु जाग्रतीषु । एवञ्जातीयकान्यसङ्गतजल्पितानि मन्त्रद्रष्टृष्वारोपितानि भवन्ति पाश्चात्यवैदुष्यविनीतानां नव्यभारतीय-वेदविद्याविचारिणां मन्त्रार्थग्रहणसरणिं चेदनु-गच्छेम ॥

अथ यदि वयं वेदमन्त्रान् मन्त्रदर्शिनो महर्षींश्चाधिकृत्य बहोः कालादागतं चिरन्तन-मैतिह्यं अविस्मरन्तो विवेकसनाथया विचारदृष्ट्या वेदान् पश्येम, सद्यः प्रध्वंसो भवेद् भ्रमस्य, वेदसूक्तानि न बालकल्पनादेश्यानि बालिशकविरुतानीति स्पष्टतामीयुः, मन्त्र-द्रष्टारः 'सत्यश्रुतः' कवय इति च। यदि च श्रीमदरविन्दचरणैः प्रदर्शितमध्वानं प्रविशेम, द्वेधा भवति लाभ इति ध्रुवम्। मन्त्रेष्वारोपितानि अनुपपत्तिप्रचुराणि प्रलपितानि पलायितानि स्युः। दुरवगाहानि दुर्निर्णेयानि बहूनि स्थलानि मन्त्रेषु सुगमानि भवेयुः। अयमन्वयतो लाभः, व्यतिरेकतस्तु अयम्। मन्त्रदर्शिनामध्यात्मसमुन्नतिः, सूक्तमन्त्रेषु निक्षिप्तं गहनं तत्त्वं, देवतानां स्वरूपं, इत्यादीन्यधिकृत्य लभ्यते ज्ञानम्। उपनिषत्सु क्वचिल्लक्ष्यमाणाः दुरवगमांशाः स्पष्टा भवन्ति। अन्ते चेदम्, पुराणेतिहास-तन्त्र-शास्त्रादीनां वेदमूलत्वकीर्तनं, वेदसारांशोपबृंहणमेव मुख्यं प्रयोजनं इति च उद्घोषयन्ति तत्तद्ग्रन्थ-प्रमाणवाक्यान्युपपन्नानीति निश्चयश्च लभ्यते। तस्मादसन्मूलानां बहुधा अनृतप्रायकल्पनाविद्धानां पाश्चात्यमतावलम्बि-वेदवादानां निरासो न्याय्यः। वेदविचारे यावज्जीवं कृतविद्यानां सिद्धान्तस्य मूलतो विरोधादरविन्दपादीयो वेदगुह्यार्थवाद उपेक्षा-क्षम इति वादः प्रत्युक्तः॥

अथ द्वितीय आक्षेपो विचार्य समाधीयते। सायणीयसम्प्रदाय-व्याख्याविरोधात् परिहरणीयो वेदरहस्यवाद इति ह्युक्तम्। किमियं अनादेः कालादागतं कमपि सम्प्रदाय-मवलम्ब्य मन्त्राणां सायणीयव्याख्या प्रवृत्ता, उत, व्याख्याता सायण आचार्यः स्वयमेव वेदभाष्यविरचनेन मन्त्रार्थविचारसम्प्रदायं नव्यं नवीकृतं वा प्रारेभे? सम्प्रदाय-पदश्रवणादुद्गतो भवत्ययं प्रश्नः। यतो मन्त्रव्याख्यानेष्वयं व्याख्याता वेदानां कर्म-परत्वं उद्घोषयतां सम्प्रदायमवलम्बते प्रायशः। क्वचित् पौराणिकं ऐतिहासिकं वेदान्त-शास्त्रीयमन्यं वा सम्प्रदायमाश्रयते। मन्त्रव्याख्यानेन वेदानां कर्मैकपरत्वं निरूपयितुं परिकरबन्धः कृतः सायणेनेति निर्विवादम्। तस्माद्यत्र आरादपि कर्मसम्पर्कराहित्यं ज्ञानमोक्षाक्षरप्रशंसा च दृश्येते, तत्र कर्मपरत्ववादिनां प्रयोजनाभावमालक्ष्य तदनुरोधेन अर्थविवृतिं साध्नोति। यत्र पूर्वैर्यास्कादिभिः ज्ञानप्रशंसापरं किमपि सूक्तमुदाहृतं तत् परिहर्तुमक्षमः तादृशमन्त्राणां अस्फुटार्थेषु स्वरसत्वाभावमुपदिशन् स्फुटेषु शब्दार्थेषु गत्य-न्तरविरहाद् अध्यात्मपरतया व्याख्याय कथञ्चित् कृतकृत्यो निर्गच्छति। अत्रेदं दृष्टान्तेन

प्रदर्शयामः, सर्वेषां वेदानां आम्नायपदवाच्यानां यज्ञादिकर्मैव प्रयोजनम् । ये च न क्रियार्थास्ते निरर्थका इति प्रतिपादयति जैमिनेराचार्यस्य "आम्नायस्य क्रियार्थत्वात् आनर्थक्यं अतदर्थानाम्" इति सूत्रम् । ज्ञान-मोक्षाक्षर-प्रशंसा-विश्रुतानामपि मन्त्राणां कर्मसु विनियोग मामनन्ति सूत्रकाराः। तथा च सुप्रसिद्धस्य दैर्घतमसस्य 'अस्य वामस्य' इति सूक्तस्य विनियोग उक्तः । "महाव्रते वैश्वदेवशस्त्रे वैश्वदेवं निविद्धानं द्विप्रतीकम् । तत्र 'अस्य वाम'स्येत्यादिकं एकचत्वारिंशदृचं प्रथमं प्रतीकम्" इति सूत्रितम् । कर्मप्रधाने सायणीयभाष्ये अस्य सूक्तस्य प्रथमर्चो व्याख्यानस्यान्ते एताः पङ्क्तीः पश्यामः । "एवं उत्तरत्रापि अध्यात्मपरतया योजयितुं शक्यम् । तथाऽपि स्वरसत्वाभावात् ग्रन्थविस्तर-भयाच्च न लिख्यते । यत्र 'द्वा सुपर्णा' इत्यादौ स्फुटमाध्यात्मिको ह्यर्थः प्रतीयते तत्र प्रतिपादयामः । अयं मन्त्रो यास्केन व्याख्यातः (नि. ४-२६.)" इति । 'अस्य वामस्य' इत्यस्या ऋचः अध्यात्मपरता अस्फुटार्था किल, 'द्वा सुपर्णा' इत्यादिस्तु अन्यथा शरणं नास्तीति अध्यात्मपरतयैव व्याख्यायते । ऋक्षु कर्मपरतयैव व्याख्यातव्यासु एतादृशाध्यात्मिकार्थो न स्वरसतां आवहतीत्यभिप्रायः सायणीयः स्पष्टः । एवमादिषु स्थलेषु वेदान्तिनां तत्रापि अद्वैत्येकदेशिनां साम्प्रदायिकं मतमवलम्ब्य व्याचष्टे, क्वचित् पुराणकथाः क्वचित्पुरावृत्तान्यवलम्ब्य च । एवं बहुशः कृतेन प्रयासेनापि वैदिककर्म-पारम्यवादिनां वेदवादरतानां पक्षः न समग्रतः समवलम्ब्यते । निजोक्तिषु पूर्वापर-विरोधानलक्षयन् पूर्वतन्त्रसिद्धान्तविरोधं चादर्शयन्नपश्यन् वा मन्त्राणां ऐतिहासिक-पक्षाश्रयणेन करोति व्याख्यानम् । कथं वेदमन्त्रवर्ण-नित्यत्व-स्थापनपरेषु जैमिनीयेषु सूत्रेषु जाग्रत्सु गौणीं वृत्तिमनाश्रित्य पुरावृत्तपक्षः शक्योऽवलम्बितुम्? सायणस्तु राजर्षिवृत्तानि युद्धकथा अन्यानि च पुरावृत्तानि मन्त्रेष्वङ्गीकृत्यैव तात्पर्यमाचष्टे । विश्रुताश्च वासिष्ठ-वैश्वामित्रमण्डलीय-शपथाभिशाप-सूक्तर्चोऽत्र निदर्शनम् । अथवा शतशः स्थलेषु दृश्यमानेषु स्थालीपुलाकन्यायेन एकां सायणभाष्यपङ्क्तिं उदाहरामः । "अवोचाम रहूगणाः अग्नये मधुमद्वचः । द्युम्नैरभि प्रणोनुमः ॥" (१-७८-५) अस्या ऋचो व्याख्याने सायण आह– "ऋषिः कृतं स्तोत्रं अनया उपसंहरति । रहूगणस्य पुत्राः वयं गोतमाः" इति । अत्र वेदापौरुषेयत्व-वादपक्षोच्छेदः कृतः । अयमेव व्याख्याता वेदनित्यतासिद्धान्तिनां पूर्वतन्त्राचार्याणां मतमभिमान्य वेदार्थस्य प्रकाशिकां व्याख्यां निबद्धवान् ॥

तदिह परीक्षितव्यम् । को वा सम्प्रदायः सायणेनावलम्बितः? सङ्कीर्ण एवेति वक्तव्यम् । सायणाद्बहोः कालात्प्रागेव कर्मपारम्यवादिनां सम्प्रदायो विदितचर इति नात्र संशयः । परं तु अन्येऽपि वेदार्थविचार-सम्प्रदाया अत्यन्तप्राचीना आसन्निति सन्देहगन्धोऽपि न भवति । यास्केनोल्लिखिताः सन्ति बहवः पक्षाः । अधिभूताधिदैवताध्यात्मवादिनः, ऐतिहासिकाः, याज्ञिकाः नैरुक्ताश्चेत्येवमादयः । अधियज्ञ-अधिदैवत-अध्यात्माख्यं त्रिविधं ज्ञानं वेदाल्लभ्यत इति यास्कनिरुक्ता दवगम्यते । न केवलं यज्ञपरमेव भवति मन्त्राणां व्याख्यानमिति मन्यते यास्कः । सप्रमाणमेतं पुरस्ताद् उपपादयिष्यामः । इदमत्रावधेयम् । निरुक्त-बृहद्देवतादिग्रन्थान् अवलोक्यैव सायणीयं वेदभाष्यं विरचितम् इति निर्विवादम् । निरुक्तकार मुदाहरता भाष्यकृता नातपस्काय मन्त्ररहस्यं देवतारहस्यं वा प्रत्यक्षं भवतीति यास्कोक्तं न लक्षितं, नोल्लिखितं, कर्मपर-व्याख्यानाय तदङ्गीकारो नापेक्षित इति विशदं भवति । तस्मात् सायणीयवेदभाष्येण अध्यात्मदेवतातत्त्वादि-रहस्यानां निक्षेपो वेद इति चिरन्तन मैतिह्यं तिरस्कृतम् । सायण-भाष्यादेवोद्गतो नूतनः सम्प्रदायः, येन ऋचः सर्वाश्च यज्ञकर्मैकपरा इति प्रत्ययः सर्वजनीनः सञ्जातः । यद्यपि यज्ञपरत्ववादो मन्त्राणां ब्राह्मणेभ्यः समुद्भूतः, तथाऽपि अध्यात्मरहस्यादिपरतया मन्त्राणां ग्रहणं आसीत्पुरेति विश्वासो विदितचरः प्राचां विदुषाम् । अत एव मन्त्राणां वेदपुरुषात्मतया पावनत्व-वीर्यवत्त्व-पूजनीयत्वादिकमैतिह्यं पुरातनभारताभिजनेषु पुराणेतिहासेषु साक्षात्कृतपरतत्त्वानां महामनसां निबन्धेषु निरूढमभवत् । प्राक् सायणीयवेदभाष्यात् न केनापि वेदानां सम्पूर्णं व्याख्यानं प्रणीतम् । प्रणीतमिति न श्रूयते, सर्वथा नोपलभ्यते । यत्र क्वचिन्निबद्धमपि, भागशः उपलभ्यते, भागश एव निबद्धं वा स्यात् । चतसृणां सब्राह्मणारण्यकानां वेदसंहितानां व्याख्यानं ब्रह्माण्डप्रयासेनाबध्य कर्मैकपरतां वेदानां समर्थयामास व्याख्याता सायणाचार्यः । तस्मादस्य चतुर्वेदभाष्यं समस्तपण्डितमण्डल मावर्जयतीति नात्र चित्रम् । किं तु सायणीयः सम्प्रदाय एक एव चिरन्तनो वेदार्थविचारसम्प्रदाय इतीदं अपलपितं प्रतिपक्षधूर्वहेणेत्यलम् ॥

अथ जघन्योऽयं तृतीय आक्षेपः । यद्वेदार्थविचारे प्रामाणिकानां पूर्वमीमांसकानां सिद्धान्तस्य विरुद्धत्वादनादरणीयो वेदगुप्तार्थपक्ष इति । वयमादिवेदसंहितासूक्त-

तात्पर्यावगाहे प्रवृत्ताः, तस्मात् मन्त्रार्थविचारोऽत्र विषयोऽस्माकम्, न ब्राह्मणवाक्यार्थ-विचारः यत्र तु पूर्वतन्त्रविचक्षणाः प्रामाणिका भवन्तु नाम । ब्राह्मणानि मन्त्रार्थ-विवरणानि तत्र तत्र यज्ञोपयोगीनि भवन्तीति हेतोरेव सायणः प्रथमं ब्राह्मणं व्याख्याय ततः परं तदनुसारेण ऋचां व्याख्यानमारेभे । आह च भाष्यारम्भे– "ब्राह्मणस्य मन्त्र-व्याख्यानोपयोगित्वात् आदौ ब्राह्मणं आरण्यकाण्डसहितं व्याख्यातम्, अथ तत्र तत्र ब्राह्मणोदाहरणेन मन्त्रात्मकः संहिताग्रन्थो व्याख्यातव्यः" इति । तदत्र अस्म-त्सिद्धान्तः सायणीयसम्प्रदायविरुद्ध इति वादः सुबोधः । मीमांसकास्तु न क्वापि मन्त्रसंहितानां व्याख्यां चक्रुरिति श्रूयते, न वाऽस्त्यवसरः । ब्राह्मणवाक्यान्यादाय तदनुसारीणि स्मृतिवाक्यानि वा क्वचिदालोच्य वाक्यार्थनिष्कर्षाय समीचीनः पन्थाः परिकल्पितो मीमांसकैः । तेषां धर्मजिज्ञासा मुख्या, न मन्त्रार्थमीमांसा । अत एव न कैश्चिदपि पूर्वतन्त्राचार्यैः वेदसंहिता व्याख्याता, व्याचिख्यासिता वा । सूत्रकारो जैमिनिर्न प्रवृत्तो मन्त्रार्थमीमांसायाम् । न वा शबरस्वामी तद्भाष्यकारः । नापि भट्ट-पादाः । किमु वक्तव्यं अर्वाचीनैर्मीमांसकैर्न चिन्तितमिति । उत्तरत्र प्रसक्तौ मीमांसक-सिद्धान्तमधिकृत्यास्ति वक्तव्यमित्येतावतैव विरमामः । धर्ममीमांसकानां मन्त्रार्थ-मीमांसायां आदरोऽधिकारो वा शशविषाणसोदरतां भजत इत्यत्र सङ्क्षेपः । परि-हृतोऽविचारित-रमणीयः कनिष्ठ आक्षेपः ॥

अथ सायणीयभाष्यगत-गुणदोषस्मरणपुरस्सरं वेदार्थविचारप्रवृत्तानां सायणो न केवलमत्यन्त मुपयुक्तः, अपि त्वनिवार्य एवेत्युपपाद्य सिद्धान्तपक्ष माचक्ष्महे । भरतखण्ड-गत-नानाविषयवास्तव्य-विद्वन्मण्डलीपाण्डित्य-निर्मथितं वेदार्थसार मुपादाय वेदान् व्या-चख्यौ सायणः । महानयमुपकार उत्तरकालिकवेदविद्याविचारिणां इत्यसंशयम् । पद-पाठसहितानां संहितास्थमन्त्राणां व्याख्यानावसरे बहवोऽनर्घा विषया उल्लिख्यन्ते— प्राचीनप्रमाणग्रन्थवाक्यानां उदाहरणं, विविधान्यैतिह्यानि, निघण्टुः, सूक्तमन्त्र-पद-तत्समु-दायानां अर्थः, क्वचिदर्थान्तराणां सम्भवः, ऋचां छन्दोव्याकरणस्वरप्रक्रिया-इत्येवमादिषु सायणीयभाष्यानुगृहीतेषु सत्स्वेव, तत्परं तात्पर्यगुणदोषविचारस्यावकाशः सम्भवति । अर्थविचारशून्यैरपि वैदिकैरध्ययन-पारायणपरैः पदपाठयुक्ताः संहिताः कण्ठस्थाः कृता न चेदरक्षिष्यन्त सायणभाष्यस्यैव नाभविष्यदवकाशः । एवमेव सायणीयभाष्यं न चेद्

अभविष्यत्, अन्धकारबन्धुरो दुरवगाह एवाभविष्यत् वेदशब्दसमुदायोऽस्माकम्, वेदगुप्तार्थपक्षपरीक्षाऽपि दुर्घटाऽभविष्यत् । तस्मात् प्रशंसनीयः कृतज्ञतया प्रयोजन-गरिमा सामान्यतः मन्त्रपदपाठ-शब्दरूपावतार-वाक्यान्वयप्रसङ्गेष्वित्यलं विस्तरेण । परं तु याज्ञिकपारम्यं द्रढयितुं प्रवृत्तेऽस्मिन् व्याख्याने छिद्रबहुलः स्वप्रयोजनस्यापि अनावश्यकः अनृजुः पन्थाः स्फुटास्फुटरहस्यार्थमन्त्रेषु कर्मपरतया व्याख्यानाय अव-लम्बित इति पुरस्तात्तत्र तत्र मन्त्रार्थविचारेषु स्पष्टीभविष्यति । अयमप्यकिञ्चित्करो लोपः सायणीय-भगीरथप्रयत्नसाधित-वेदमन्त्रतात्पर्यापेक्षया । कीदृशं मन्त्रतात्पर्यं साधि-तम्? सर्वेषां मन्त्राणां प्राधान्येन कर्मसु विनियोज्यत्वं अर्थात् कर्माङ्गत्वं अत एव कर्मैक-परत्वं साधितम् । अथ किं फलितम्? वेदानधिकृत्य यत्पुरातनमैतिह्यं तदसत्, वेद-पावनतायाः प्रतिष्ठैव निर्मूलिता, अध्यात्मतत्त्व-देवतास्वरूपसाक्षात्कारादि-बहुरहस्य-निक्षेपो वेदराशिरिति विश्वजनीनविश्वासस्य निराधारता । निगमागम-पुराणेतिहासो-द्घोषिता वेदमूलकातिगहन-तपोज्ञाननिष्ठा-रहस्यादिकथा सर्वाऽपि ब्रह्माण्डपरिमाणकल्पा काल्पनिकी केवलं गाथा । नेह अध्यात्मनिःश्रेयसादिकं द्रष्टव्यम्, तत्तु वेदान्ताख्यासु उपनिषत्सु । मन्त्रात्मके मूलवेदे कर्मसाधनमेव लक्षणीयम्, येन त्रिविधं धनं बलं प्रजाः पशवः गवाश्वादयः पुष्टिः तुष्टिः हिरण्यं भृत्याः विजयः अरातेर्वधः तद्धनहरणं प्रतिस्पर्धिनां निन्दकानां विनष्टिः— एवमादिफलावाप्तिः सिद्ध्यति । एतादृशफल-प्राप्त्युपायभूतो यागो वेदे विधीयत इति सायणीय-मन्त्रव्याख्या-बलावलम्बनेन नव्याः प्राचीनर्षीणां पृथग्जनतां निर्णेतुं प्रवृत्ता इति कथमिदं अन्याय्यं भवितुमर्हति? यद्यपि स्वल्पशः सायणेनाङ्गीकृता अध्यात्मतत्त्वसत्ता मन्त्रेषु, यद्यपि तस्य महर्षिषु पूज्यताबुद्धिः, देवतासु अस्तित्वप्रत्ययः, मन्त्रेषु पावनत्व-वीर्यवत्त्वादिविश्वासश्चासन् । तथाऽपि प्रतीच्याः वेदबाह्यास्तदनुयायिनो नव्याः भारतीयाश्च, सायणो व्याख्याता स्वीयकालिक-मूढ-विश्वासभागस्वामीति पूर्वोक्तपरप्रत्ययनेयताविशिष्ट-मनीषारूपस्तस्यापराधः क्षन्तव्य इति औदार्यं प्रदर्शयन्तीति नेदमाश्चर्यम् । तेन हि महानुपकारः कृतः सम्पूर्णवेदव्याख्यानदानेन । यतो यावदपेक्षं स्वकल्पनासिद्धान्तस्य सामग्री सम्पादिता । परं तु पशुप्रायजीवन-सुख-भोगैश्वर्यप्रसक्तानि अहङ्कार-ममकारमूलक-ईषणपोषणादिमहाफलानि याज्ञिककर्माण्येव वेद तात्पर्यहृदयमिति सहस्राधिकसूक्ते अयुताधिकमन्त्रे ब्रह्मकोशे निर्लज्जं निर्विचारं निर्भयं च प्रतिपादयन्त्येवैके पूर्वेषाम् । तथा सति, तेषां मतं पूर्वतन्त्रसिद्धान्तं वा ईश्वरगीता—

"सर्वैश्च वेदैरहमेव वेद्यः वेदान्तकृद्वेदविदेव चाहम्" इति वेदपारम्यमुद्घोषयन्त्यपि ईदृशान् वेदवादरतानविपश्चितो निन्दतीति किमत्र चित्रम्?

अथास्मत्पक्षस्सारत उपन्यस्यते । ऋग्वेद एवात्र विचारविषयः । अन्येषां वेदानां स्थानं अन्यत्र विचिन्त्यते। मन्त्राणां रहस्यार्थो वर्तते। स एव वेदसूक्तानां वैदिकयजनस्य च आन्तरः परमार्थश्च भवति । अनेन सायणप्रतिपादितो वेदानां बाह्यार्थोऽस्माकमभिमत इति प्रतीतं भवति । सायणव्याख्या क्वचित्पदस्य वाक्यस्य ऋचो वा स्वीयकर्मपरतासाधनायापि नोपयुक्ता भवतु, नावश्या वा भवतु, कतिपयेषु स्थलेषु तेन निष्पीडिता अर्था असङ्गता वा भवन्तु । तथाविधानि स्थलानि यथावसरं दर्शयिष्यामः । परं तु इदं सर्वमस्माकमुपेक्ष्यम् । विस्तरशस्तत्र तत्र अर्थानुपपत्तयो दृश्यमाना अपि समासेन बहिर्याग-तदनुरुद्ध-देवतादिपक्षसमर्थकं तदीयं मन्त्रव्याख्यानमतमभ्युपगच्छामः। मन्त्राणां आन्तरार्थस्तु गुप्तः, यस्य बाह्यार्थः कञ्चुकवदवतिष्ठते। आरण्यकसहितानां ब्राह्मणानां युगादत्यन्तप्राचीनं मन्त्रद्रष्टॄणां युगम् । तेषां गहनतत्त्वविदां गूढभाषया गोपितानां गोप्यानां कोश ऋग्वेदः। तेषां ऋक्सूक्तानां समुदायमेव ऋग्वेदसंहितामाचक्ष्महे । तानि पुनः सूक्तानि नास्मत्परिचितानीव कवित्वानीति बोध्यम् । प्रत्युत, साक्षात्कृतधर्माणां ऋषीणां श्रवणाद्दर्शनाच्च निर्गता ऋचो मन्त्रदृष्टय इति चिरन्तनं व्यपदेशं भजन्ते । प्रादुर्भावप्रभावतः शब्दतोऽर्थतः नादपरिष्पन्दविशेषतश्च मन्त्राणां वीर्यवत्त्वं दृष्टफलकत्वं च सुप्रसिद्धे। ऋषेर्मन्त्रद्रष्टु रन्येषां च पुरुषार्थसाधनायालौकिकोपायभूतो मन्त्र इति प्राचामाचार्याणां मतं अस्मदभिमतम् । एषां मन्त्राणां द्वावर्थौ भवतः इति प्रागुक्तम् । तत्र अन्तरर्थ आन्तरङ्गिक आध्यात्मिको वा परमार्थसत्यः । इदं च रहस्यमृषीणां विदितं, तच्छिष्याणां च । ये च गुरुभ्यो महर्षिभ्यो दीक्षां लब्ध्वा अन्तरङ्गशोधनसाधनादिभिः अन्तर्यजनाय शिक्षिताः । देवेभ्यः स्वीयं सर्वस्वं समर्प्य तैः प्रतिदत्तमादाय अध्यात्माभ्युन्नत्या अधिलोकाधिदैवतसम्पत्तिं प्रापुः ॥

अन्योऽर्थो बाह्यः स्थूलश्च जनसामान्योपयोगायावस्थितः, देवताराधनार्थं मनुष्ठीयमानेषु यागेषु प्रयोजनवान् भवति । एवं अर्थद्वयवान् प्रयुक्तः शब्दो मन्त्रेषु । स चोपाय आवश्यकोऽभूत्, येन वेदरहस्यज्ञानादिकं अनधिकारिभ्यो रक्षितम् । अपक्वः

संस्कारशून्यः साधारणो जनः अज्ञानाद् दुर्विनियोगाद्वा विपत्तिशरव्यतां मा गमदिति रहस्यार्थस्तस्मात् संवृत्य गोपितः । कथं नु खलु अपरिपक्कं दुर्बलं जनसामान्यं अध्यात्मनिर्व्यवसायं आत्मार्थजीवनाय देवार्थशरीरयात्रायै वा साधिकारं भवेत् ?

एवं अर्थद्वयवच्छब्दप्रयोगव्यवस्था विचारपूर्वकं साधिताऽपि अनायासेन स्वभावतो निष्पादितेति बोध्यम् । विचारपूर्विका प्रयोगव्यवस्थेति चेत् कथं स्वभावतः श्रमविरहं साधिता स्यादिति वक्तुं युक्तमिति विरोधशङ्का मा भूत् । अत्र आदिकालिकभाषास्वरूपोदयोपचयान् विमृशेम । यद्यपि चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यवाक्यानुसारेण जातिक्रियागुणद्रव्येषु वा जातौ वा शब्दः सङ्केतितो भवति, तथाऽपि आदिकाले मानुषाणां भाषा न यदृच्छया सङ्केतमूला अर्थप्रत्यायिकाऽभूदिति मन्तव्यम् । स च सङ्केतः नियतशब्दार्थसम्बन्धरूपः ईश्वरेच्छेत्येके । अस्य शब्दस्य अयमेव नियतोऽर्थः इत्यस्य सारांशाभिप्रायः । यद्यपि शब्दार्थसम्बन्धो नियत इति व्यवहारसिद्धः सर्वसम्मतोऽङ्गीकर्तव्यः, तथाऽपि महाजनैः तेषां प्रमुखैर्वा सम्भूय अस्य शब्दस्य अयमर्थ इति सङ्केतो निर्णीतो बहोः कालादागतः इति नोपपन्नम् । वृद्धपरम्परागतः सङ्केत ईश्वरेच्छा वा भवतु, महाजननिर्णीतो वा भवतु, उभयथाऽप्यनुपपत्तिर्दृश्यते निरङ्कुशस्य यदृच्छानिर्णयस्य निर्युक्तिकस्यासम्भवात् । नियतस्य शब्दार्थसम्बन्धस्य रूढत्वादेव सङ्केतसिद्धिर्द्रष्टव्या । सास्ना-लाङ्गूल-खुर-ककुद्-विषाणार्थरूपे गोशब्दः सङ्केत्यते । अस्मिन्नर्थे इदं गोपदं प्रयोक्तव्यमिति न केनापि नियमो विहितः । यदनुसारेण सिद्धः सङ्केत इति शक्यं वदितुम् । रूढत्वात् सिद्धः सङ्केत इत्यत्र न कस्यापि स्यादाक्षेपः । कथं पुनर्नियतेष्वर्थेषु रूढाः शब्दा इति न्याय्यः प्रश्नः । रूढिर्नाम नियता प्रसिद्धिः । क्षुण्णे वर्त्मन्यभ्यासबलात् प्रसिद्धौ सत्यां, नियतत्वं प्रयोगबाहुल्यादनर्थान्तरं भवतीति बोध्यम् ॥

कथं तर्हि नियतः प्रयोगविशेषः लब्धप्रचारो भवति, किं वा मूलं निर्दिष्टस्य नियतप्रयोगस्य ? अस्योत्तरं शब्दमूल-स्वरूपज्ञानायत्तं वक्तव्यम् । बाह्याभ्यन्तरेन्द्रियार्थाद्यनुभवानां शारीराग्निवायुसंयोगज-निर्माथेन नाडीप्रत्युद्बोधस्याविष्कृतिरेव मानुषी वाक् श्रोत्रग्राह्या अर्थोद्बोधाय प्रभवति । आदौ पुरायुगेषु मानुषी भाषा न सङ्केतपदं आरूढा ।

सामान्यजनानां बहिर्भुवनप्रत्यक्षानुभवानां, तथा महर्षीणां आभ्यन्तरसाक्षात्कार-दर्शन-श्रवणाद्यनुभवानां च शारीरकनाडीप्रत्युद्बोधस्य कण्ठध्वन्यात्मना निर्गमनमेव पुराकालिक-मानुष्यकभाषितमिति ग्राह्यम्। बहिरन्तर्वा कस्मिन्नप्यर्थेऽनुभूते, तद्ग्राहिण्या हृदयस्थया बुद्ध्या (अप्राकृतानां) केवलनाडीमयान्तःशरीरस्थया कयाऽपि प्रज्ञया (प्राकृतानां वा,) प्रेरिता प्रतिबोधाविष्कृतिः अकारादिवर्णात्मिका वागिति कीर्त्यते। नानन्तरकालेष्विव अस्मिन्नर्थे अयं शब्दो वर्तत इति बुद्धिस्थः सङ्केतः परिनिष्पन्न आद्येषु युगेषु। प्राणिनां यथा "जायते अस्ति" इत्यादिषड्भावविकारो लोकसिद्धः, तथा भाषायाश्च उद्भवाभ्युदयादिषु प्रवृत्तेषु शब्दार्थसम्बन्ध-नियमजन्या रूढिः सिद्धा भवति। सूक्ष्मविचारसापेक्षोऽयं विषयः भाषातत्त्वविदां सुगमः। अन्यत्रास्माभिः "स्फोटसिद्धिप्रकाशे" विचार्यत इत्यत्र यावदवश्यं सारांशमेव ब्रूमहे। वेदयुगे प्राणवीर्यसम्पन्नः शब्दः धात्वर्थमजहत् स्वजातिगुणादिकं प्रत्याययन् एव प्रवृत्तः। एकस्मिन्नर्थे बहवः शब्दाः एकस्य शब्दस्य बहवोऽर्थाश्च पदानां यौगिकत्वादेव प्रयोगवशात् परिनिष्ठिताः। अस्मादेव हेतोर्धातूनां बह्वर्थत्वं भणन्ति। 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता प्रकरणम्" इत्यादिभिर्वाचकत्वे नियन्त्रिते, व्यवहारसौकर्यं सम्पादितम्, अस्यालङ्कारिकशासनस्य मूलं वेदे द्रष्टव्यम्। यद्यपि वैदिकपदानां प्रयोगवशात् काचन रूढिश्च निष्पन्ना, तथाऽपि यौगिकत्वं न केवलं न व्याहतम्, किं तु तदेव शब्दस्य प्राणवदवस्थितम्। अपरं च, गत्यर्थादिषु धातुषु शतशो वर्तमानेषु वस्तुतः गतिविशेषादिष्वर्थेष्वेव वर्तन्ते। यथा वा सम्प्रति संस्कृतभाषायां व्यवहारे "ब्राह्मणं भोजय, गां चारय" इति वक्तव्ये, चरणभोजने समानधात्वर्थे इति कृत्वा 'ब्राह्मणं चारय, गां भोजय' इति अविशेषेण न प्रयुञ्ज्महे। एवं विशेषतः पदप्रयोगवैशिष्ट्यं द्रष्टव्यम्। वैदिकपदानां समानधात्वर्थानां सूक्ष्मो भेदः प्रायेण विनष्टः इत्यद्धा। तथा बहुस्थलकुशलपरीक्षणेन यावल्लब्धानि ग्राह्याणि। एवं व्यवहारसौलभ्यसम्पादिकां काञ्चन रूढिं प्राप्तान्यपि वैदिकानि पदानि प्राधान्येन यौगिकान्येवेति अत्र भवति रहस्यांशः। अग्नीन्द्रादीनि पदानि देवताविशेषेषु रूढान्यपि बहुषु स्थलेषु गुणवाचकानीव प्रयुज्यन्ते। 'अङ्गिरस्तमा' 'इन्द्रतमा' इत्यादयः शब्दाः पदानां यौगिकत्वं द्योतयन्ति। यानि संज्ञापदानि रूढानि, तान्यपि गुणवैशिष्ट्यं व्यञ्जयन्ति। एतादृशी वेदभाषादशैव अनन्तरकालेषु संस्कृतभाषायाः श्लेषबाहुल्याय अकल्पिष्ट। वेदे अयत्नसिद्धः क्वचिद् द्व्यर्थो बह्वर्थो वा प्रायः शब्दः।

संस्कृतभाषायां तु प्रायो बुद्धिपूर्वकं निष्पाद्यन्ते श्लिष्टाः शब्दाः । एवं ऋग्वेदसंहिता-भाषाया आद्या दशा ऋचां द्व्यर्थतासमर्थनाय अनुकूलाऽभूदिति बोध्यम् ॥

सैषा किल तेषां ऋषीणां ऋग्भाषायाः प्रक्रिया । यया मन्त्राणां अन्तर्बहिश्चार्थः शक्योऽभवदुपपादयितुम् । यथा स्थूलो बाह्यश्चार्थः प्राकृतान् पदार्थान् आवेदयति, तथा आन्तरः सूक्ष्मोऽर्थः आन्तरङ्गिकान् आध्यात्मिकान् प्रकृतिगतोत्तमांश-सम्बद्धान् गूढभावान् लक्षयति । यतो बाह्या सर्वाऽपि सत्ता आन्तरसत्तायाः सङ्केतभूतेति प्राचां आसीद् दृष्टिरिति पूर्वोक्त मवधेयम् । नेयं केवलं वेदर्षीणामेव बहिर्भुवने सङ्केतबुद्धिः आसीत्, अपि तु अन्यत्रापि भूमण्डले मानुष्यकस्य आदिमायां दशायां परिदृश्यमाने स्थूले जगति सङ्केतदृष्टिरासीद् इत्यवगन्तव्यम् । यदि पुरावृत्तसंशोधनमतबलेन पर्यालोचयेम तदा निस्संशयमिद मवगतं स्यात् । अधुनातन-विज्ञानाभ्युदयावस्थापेक्षया अपक्वा प्राकृतदशा भवतु नाम सा आद्यानां मानुषाणां, भवन्तु वा ते यथाजातावस्थायां निष्ठिताः, भवन्तु वा पुनस्ते वाणिज्यव्यवसायादिवार्तं प्राप्ता अप्राप्ता वा – इदं तु सर्वत्र तेषु पश्यामः । तस्यां आदिमावस्थायां मानवस्य सङ्घस्य गाढा दैवचिन्ता, सामयिके धर्मे भावनाबलं अतुल्यं, देवतास्तिक्यव्यापारेषु कश्चन अशिक्षितः सहजबोधः, भावनावैशाल्यसनाथं अन्तस्संवेदनं वा परिदृश्यते । यदा कालपरिपाकवशान्मानुष्यके तर्कनिविष्टा मतिः विचारशीलता धीव्यवसायश्च पदं लभन्ते, तदा बौद्धं व्यक्तिस्वातन्त्र्य-युगं प्रवर्तते, निवर्तते च अन्तस्संवेदन-अशिक्षितबोधभावनाप्रधानं साङ्केतिकं युगम् । तच्च निवृत्तमाद्यं प्राकृतं वा युगं साङ्केतिकं ब्रूमः । यतः समस्तं बाह्यं भुवनं पृथक् कृत्स्नशश्च अन्तरस्य प्रपञ्चस्य सङ्केतभूतं विलोकितम् । नेह सङ्केतपदं शास्त्रमर्यादानुसारेण शब्दार्थसाक्षात्सम्बन्धरूप-वृत्तिपदवेदनीयं ईश्वरेच्छापरं वा प्रयुज्यते । सामान्यार्थे लोकव्यवहारसिद्धे प्रायशो गौण्या वृत्त्या लभ्ये लक्ष्यलक्षणसम्बन्धे प्रयुज्यते । यथा आयुर्घृत मित्यादौ घृतं बल्यमिति विवक्षा पूर्वेषाम्, तथा अश्वादयः बलादीनां लक्षका भवन्तीति सङ्केतार्थविवरणे स्पष्टीभविष्यति । तस्मात् आदिपुरुषाणां सर्वाणि वस्तूनि सर्वं च जगत् (सर्वे तेषामाचाराः, सामायिकधर्माः, सामुदायिकोत्सवाश्च) सङ्केतभूतानी त्युक्तेरय माशयः । यो यः पदार्थः स्थूलरूपतया बहिरवस्थितः तस्य तस्य सदृशः प्रतिरूपकोऽन्तरर्थो वर्तते, यस्यैव सूक्ष्मस्य बाह्यं स्थूलं सङ्केतपदवाच्यं ब्रूमः । सङ्केतार्थ-

निर्णयस्तु भूयो वैदिकपदानां यौगिकत्वादेव लभ्यते। क्वचिद्रौण्या वृत्त्या, क्वचिन्मन्त्रेषु मन्त्रकृतां देवतादिदर्शनविधानिर्वर्णनाद् अवगतैर्बिम्बविशेषैश्चेत्यलम्। सङ्केतव्यवस्थां अधिकृत्य पुरस्ताद्द्वितीयखण्डे विचारः प्रसङ्क्ष्यते ॥

बहिः सर्व मन्तरर्थस्य सङ्केतभूत मित्युक्तम्। तस्माद् बहिर्यागोऽपि सङ्केतो भवति अन्तर्यजनस्य। तर्हि प्रथमं यागस्य सङ्केतार्थं प्रतिपाद्य ततः परं साङ्केतिक-समयानुसारेण के वा लोकाः कानि स्वरूपाणि देवानां व्यापाराश्च इत्यादीनि विचारयामः। चत्वारो भवन्ति यागस्य मुख्यांशाः, यजमानः, ऋत्विजः, द्रव्यत्यागः, फलानि यजनस्य चेति। तत्र यजमानो यजनाय प्रवृत्तः मूर्तिमान् जीव आत्मा। ऋत्विजो याज्ञिकानि कर्माणि यथास्थानं यथाकालं निर्वहन्तो यज्ञस्य प्रारम्भात् समाप्तिं यावत् यजमानं उपकुर्वन्ति। ऋतौ काले यजन्ते यष्टारः इत्यवयवार्थ उपपद्यते। होत्रध्वर्यूद्गातृ-ब्रह्माख्याः चत्वार एषां गणाः सोमयागे। एकैकस्मिन् चत्वार ऋत्विजस्तस्मात् ते षोडश भवन्ति सर्वेऽप्याहृत्य। अस्य विस्तरस्य इह अनुपयोगात्तेषां प्रधानर्त्विङ्नाम्नां पदार्थोल्लेखनद्वारेण तद्व्यापारान् गूढार्थपक्षे व्याहरिष्यामः। चतुर्णां गणाना माद्यो होतृगणः। ऋचः शंसति होता। ऋग्भिराह्वानं देवानां अनेन निर्वर्त्यते। तस्मादाह्वाता होतेत्यनर्थान्तरम्। दैवीं वाचं आविष्कुर्वाणानां ऋचां उच्चारणात् देवानुपस्थापयति सः। अन्तर्यजने सुगमोऽयं भावः। तादृशो होता देव एव न मानुषः पुरोहितः। देवमेव यथार्थं पुरोहितं मन्यन्ते ब्राह्मणानि। त्रीन् भूरादिलोकान् पुरोधातॄन् अग्निवाय्वादित्यान् पुरोहितांश्च याज्ञिकाः पठन्ति। तथा च ऐतरेयिणः समामनन्ति—"यो ह वै त्रीन् पुरोहितान् त्रीन् पुरोधातॄन् वेद स ब्राह्मणः पुरोहितः" (ऐ. ब्रा. ८-२७) देवानामेव वस्तुतः पौरोहित्यमिति यो जानाति तस्यैव मानुषस्य पौरोहित्याधिकार इति भावः। एवं कर्मतन्त्रपरेषु ब्राह्मणेषु तत्र तत्र ज्ञानैकगम्यानि रहस्यानि निक्षिप्तानीति निदर्शनमात्रमत्र प्रसक्तिवशात् सूचितम्। अत एव अग्निं "पुरोहितं देवं ऋत्विजं होतारम्" गायति आदिवेदस्यादिमा माधुच्छन्दसी मन्त्रदृष्टिः। स ह्यग्निर्देवानां दूतः मर्त्येष्वमर्त्य इति शतकृत्वो वेदे गीतः ॥

अध्वर्युर्द्वितीयः यजुर्वेदाधारः, स हि यजुर्भिर्याजयति यज्ञतन्त्रानुसारेणान्यान् ऋत्विजो नयति, यजनक्रियानिर्वाही क्रियादक्षः तदधीनमेव सर्वथा यज्ञनिर्वर्तनम्।

अयमपि देवो मातरिश्वा वायुर्येन जगत्प्राणेन सर्वक्रियाणां सम्भवः । अन्तरर्थः सुगमः प्राणदेवपरः, सर्वदेवताकार्यानुकूलक्रियां अन्तर्यजने साधयत्यन्त रध्वर्युर्वायुः । यद्यपि अध्वरशब्दो यज्ञपर्यायत्वेन प्रसिद्धः, तथाऽपि अवयवार्थमजहत् अध्वानं राति दत्ते इति यात्रारूपतयाऽध्वरो वर्ण्यते वेदे । तथाविधमध्वरं गच्छति कामयते वा अध्वर्युः क्रिया-दक्षः । सर्वेषु देवेषु ऋत्विग्रूपेष्वयमेव अध्वरपद-वाच्ययात्रायां सर्वकार्यनिर्वाहकः ॥

उद्गाता– साम गायति । अयं देवान् आनन्दयति साम्नां गानेन । गूढार्थपक्षे, अयं आदित्यो देवः उद्गीथेन सर्वदेवप्रीणनेन गानेन स्वरन् यजमानस्य विविधसङ्कटा-पायदोषादीन् निवारयन् तं स्वस्थं विधाय समुन्नयत्यमृतं सत्यं आनन्दम् । अन्ते ब्रह्मा– स साक्षी सर्वस्यापि यज्ञकर्म-कलापस्य, ददात्यनुज्ञां कर्मणां प्रवर्तने, यथाकालं अनुज्ञाक्षरं उच्चरति स्थाने, न स्थानाच्चलति, मौन मास्थाय आकर्मपरिसमाप्ति मन्त्रतन्त्र-क्रियालोप-न्यूनातिरिक्तेभ्यो रक्षति याज्ञिकं कर्मेति ब्रह्मार्त्विज्य-संक्षेपः । आन्तरस्तु भावः सुघटः । निरावरणः स्पष्टश्च सङ्केतार्थः । अयं च देवो मन्त्राणां अभिमानी, मन्त्राश्च वेदे ब्रह्माणीति प्रसिद्धिः । अत एव ब्रह्मणस्पतिर्मन्त्राधिदेवता । छन्दसां मन्त्राणां मूल-प्रकृतिः प्रणवः अनुज्ञाक्षरपदवेदनीयः ओङ्कारपदवाच्यः स एव सर्वमन्त्रप्रादुर्भाव-मूल-स्थानभूतां आद्यां वाचं आविष्करोति । तस्मात्तदायत्त-समस्त-दैवतमन्त्राधिदेवता ब्रह्मण-स्पतिरेव आदौ अन्ते च सर्वत्र परमेण मौनेन यजमानस्यान्तर्यजनं एकेन अक्षरेणानु-गृह्णातीत्यवगन्तव्यम् ॥

अथ द्रव्याण्यपि सङ्केतभूतानि ग्राह्याणि । यथा ऋत्विङ्नाम-निर्वचनादिभिः तेषा मन्तर्यजने देवतादि-सङ्केतार्थो ज्ञायते, तथा कर्मणि देवेभ्योऽर्प्यमाणानि द्रव्याणि यजमान-स्वभूतानि घृतादीन्यपि सङ्केतात्मकानि अवयवार्थानुगमाद् अन्वेतव्यानि । गौः इति धेनुः रश्मिनाम च भवति । तस्माद्गव्यं कान्तिमत् प्रकाशं ज्ञानलक्षणं बोध्यम् । गव्य-घृत-हविरादय एवमेव देवार्थे दीयमानाः यजमान-स्वभूताः ग्राह्याः । ऊष्म-दीप्त्य-र्थात्समानधातोर्निष्पन्नानि घृतधर्मघृणिपदानि । "घृतम्" अन्तःप्रसादरूपः प्रकाशः । दाने अदने च वर्तते जुहोतिर्धातुः । यद्दीयते यजमानेन देवेभ्यः, यच्च देवानां आस्य-भूतेन मर्त्येष्वस्मासु प्रथमजेनामर्त्येन अग्निना अद्यते, तद्धविः स हवः । एवमन्यानि

द्रव्याणि बाह्यानि यजमानोपार्जित-ज्ञान-क्रिया-सुख-भोग-साधनानां सङ्केत-भूतानि देवेभ्यो दीयन्ते ॥

एवं फलान्यपि सङ्केतार्थ-वेदनीयानि भवन्ति । कर्मफलात्मकः गवाश्वलाभः शश्वत् कीर्त्यते । गौः प्रकाशलक्षणं ज्ञानं, अश्वश्च बलोपलक्षणं क्रियाशक्तिसामर्थ्यं सङ्केतयतः । अन्यानि वैदिकपदानि सङ्केतार्थेषु वर्तन्ते । यज्ञः सर्वोऽपि साङ्गः सङ्केतार्थेषु ग्राह्य इत्यावेदयितुं उक्तान्युदाहरणान्यलम् । सूक्तमन्त्रस्थपदानां यौगिकत्वं चैतन्मतं पोषयतीत्यवधेयम् । अन्यानि कानिचित्पदानि अन्तःकरणसम्बन्धीन्येव प्रथन्ते । कर्मपरतया मन्त्राणां व्याख्याने बहुत्र बाह्य-स्थूलार्थोपपत्तिर्दुर्घटा । अन्तरर्थे तु सर्वत्र सुतरां उपपत्तिरिति पुरस्ता दन्यत्रोदाहरिष्यामः ॥

वेदसङ्केतार्थ-पक्षोपन्यासः समासेनाधियज्ञं समाप्तः । अथाधिलोकं पश्यामः । तत्र प्रथमं त्रयो लोकाः भूर्भुवस्सुवरिति व्याहृतित्रयेणाभिहिताः । भूरिति पृथ्वी, भुव इत्यन्तरिक्षम्, सुव इति द्यौः स्वर्गापरपर्याया । तदूर्ध्वं मह इति चतुर्थी व्याहृतिं बृहद्-दिवमामनन्ति । ततः परमपि जन-तपः-सत्याख्यास्तिस्रो व्याहृतीरकृतक-लोकत्रयाभिधायिनीः कीर्तयन्ति । यद्यपि वेदे सप्ततत्त्वात्मकं सत्त्वं सद्वस्तु वा, सप्ततत्त्वात्मिका ब्रह्माण्डव्यवस्थेति सप्तधा सत्तां चित्तिं शक्तिं चिच्छक्तिं वा लोकान् लोकाध्यक्षान् वा सप्तसानवः सप्तसिन्धवः सप्तस्वसारः सप्तरश्मयः सप्तर्षय इत्यामनन्ति, तथाऽपि प्रथमं भूरादिव्याहृतित्रयलक्षितं लोकत्रयं तत्सम्बन्धिनीर्देवताश्च शश्वत् कीर्तयन्ति । यतस्त्रय इमे लोकाः पृथिव्यादय एव प्राधान्येनास्माकं सम्बन्धिनः, ऊर्ध्व-लोकापेक्षया सन्निकृष्टाश्च भवन्ति । इदं च त्रैलोक्यं अपरार्धमिति व्यपदेशं भजते । अत एव नेदिष्ठं भुवोऽधिष्ठातारं अग्निं भूयस्य ऋचः स्तुवन्ति । सर्वेषामस्य त्रैलोक्यस्य देवानां राजानमिन्द्रं भूयिष्ठा ऋचः कीर्तयन्ति । एतेभ्यो लोकेभ्यो देवेभ्यश्च परस्तात् परमे परार्धे भ्राजमानः सूर्य एक एव सर्वेषां देवानां लोकानां च देवः वेदे प्रतिपादितः, यमधिगन्तुं सर्वाणि तपांसि तप्यन्ते, यज्ञाश्च इज्यन्ते । तत्तादृशं भगवन्तं सवितारं स्तुवन्त्य ऋचः स्वल्प-सङ्ख्याका एव भवन्ति । अस्मदीयत्रैलोक्यदेवा एव प्राधान्येन यज्ञभागस्वामिनो भवन्ति ॥

आर्षोऽयं त्रैलोक्यविभागः भूमिरन्तरिक्षं द्यौरिति । इदं च बाह्यं भुवनत्रयं तत्सदृशस्य अन्तरस्य त्रिकस्य सङ्केतभूतं अवगन्तव्यम् । तत्र भूरित्ययं लोकः भौतिक इन्द्रियार्थैः

अन्नमयाख्य-स्थूलजाग्रत्प्रज्ञाविशेषभूमेः सङ्केतो भवति । बहिर्भुवनानपेक्षस्य स्वतन्त्रतयाऽवस्थितस्य शुद्धमनस्तत्त्वप्रधानस्य प्रज्ञाविशेषस्य द्यौः सङ्केतो भवति । उभयोर्द्यावापृथिव्योः मध्यवर्ती उभयोरन्नमय-मनोमय-प्रज्ञाविशेषयोः सन्धिभूतः प्राणः प्रज्ञागर्भितशक्तिविशेषः भुव इत्यन्तरिक्षेण सङ्केतितो भवति । एवं अन्न-प्राण-मनस्तत्त्वानां विलसितान्येव अध्यण्डं अधिपिण्डं च भूर्भुवस्सुवरिति व्याहृतित्रय-प्रतिपादितं त्रैलोक्यं इति लोकसङ्केतसार-व्याहार इत्यलम् ॥

अथ देवानधिकृत्य, विश्वस्यां प्रकृतौ अस्मास्वन्तर्वा बहिर्ब्रह्माण्डे वा यानि शक्ति-विलसितानि सृष्ट्यादिकार्यनिर्वाहीनि लक्ष्यन्ते तानि सर्वाणि देवानां वर्तनानि भवन्ति । अर्थात् देवास्सर्गे शक्तिविशेषा इत्युक्तं भवति । स्थूलपक्षे इन्द्रः पर्जन्यात्मा देवः, सखायस्तस्य मरुतो वायव्याः, सूर्यस्तेजःपिण्डमण्डलात्मा, उषः अरुणोदयस्वरूपिणी, अग्निरूष्म-तेजस्तत्त्वात्मको भूतेषु पञ्चसु तृतीय इति सामान्यप्रत्ययः । अन्येषामपि देवानां स्वरूपाणि सन्दिग्धान्यपि क्वचित् कीर्त्यन्ते । यथा मित्रावरुणयो रहोरात्रात्म-कत्वम् । अन्तरर्थस्वीकारे त्वेतेषां देवानां अध्यात्मवृत्तिविशेषप्रेरण-पोषण-प्रकाशनादयो व्यापारास्तत्तन्नाम-निर्वचनादवगन्तव्याः । अपि च तत्र तत्र सूक्तेषूल्लिखितानां तत्तद्-वृत्तान्वाख्यानानां रूपक-दृष्टान्तात्मकतया लाक्षणिके वर्णने परीक्षिते, तेषां यथार्थ-स्वरूपव्यापाराः स्पष्टाः स्युः । देवाः सर्वेऽपि परस्यैकस्य देवस्य नामानीति निर्वि-वादम् । अपि तु न ते केवलं नामानि, शक्तयो मूर्तयश्च भवन्ति परमस्य देवस्य । अग्निर्नाम जडधियः सामान्यजनस्य केवलं भूताग्निः, तेजस्तत्त्वात्मकं घर्मधर्मं प्राकृतं द्रव्यं स्यात् । अथवा याज्ञिकाग्निः अमानुषः पुरुषः कश्चन यजमानस्याभीष्टदायिनां एकः, यस्यानुग्रहाद्गावः, अश्वाः, प्रजाः, अन्नं, यशः, कान्ता, कनकं एवमन्यानि च भोग्यानि लभ्यन्ते । अन्तर्यजनदीक्षितस्य गूढार्थवेदिनस्तु अग्नेर्नामनिर्वचनानुसारेण दीप्तिशक्त्या-त्मिका देवतेति विदितं भवति । देवानां प्रथमोऽय मस्मासु प्रबुद्धः । तस्य व्यक्ति-स्वरूपं मन्त्रवर्णेभ्योऽवगम्यते । सोऽग्रे तिष्ठन् नयत्यस्मान् पुरस्तात् पुरोहितः । स दूतो देवानां येन पुरो गच्छता अध्वगामिना वयं देवान् यथास्थान मधिगच्छेम । स मुखं देवानाम् । मुखमेव प्रथमं दृश्यते, अन्यानि पुनः परस्यैकस्याङ्गभूतानि दैवतानि पर-स्तात् स्थितानि । तस्मादग्निमुखेनैव विश्वदैवतसम्प्राप्तिर्भवति । स आस्यं भवति देवानां,

अस्माभिरर्प्यमाणं सर्वं तेन मुखेन देवाः स्वीकुर्वते । स कविक्रतुरस्मासु हृदये । साध्यवसायप्रज्ञारूपोऽयं हृदि स्थितोऽस्मासु । स साक्षात् सर्वदैवतप्रतिनिधिः हृद्गुहायां निहितः । यदा सुप्तोत्थितो ज्वलत्यूर्ध्वरेताः तदा यजमानस्य कर्तव्यभारं स्वयं परिगृह्य तस्य सर्वस्वं देवेभ्यो दीयमानं यथाभागं देवान् प्रापयति । इदं चावधेयम् । सर्वं अध्यण्डं अधिपिण्डं वा देवतायत्तम्, देवतास्वाम्यम् । अस्मासु प्रत्येकं सङ्कीर्णं च वर्तमानाः मनः-प्राण-अन्नाद्यास्तदवान्तरभेदाश्चांशाः ब्रह्माण्डोपादानाः ब्रह्माण्डान्तर्भूताः ब्रह्माण्डाधिकारिकेषु देवेष्वधीना इति स्मर्तव्यम् । तस्माद्यजमानेनार्प्यमाणं सर्वं ज्ञान-क्रियादाक्ष्य-भोगसाधनादिकं वस्तुतो देवस्वतयैव देवेभ्यो दीयते, यन्न कोऽप्यंशः यजमानस्य वस्तुतः स्वीयो भवति, विश्वस्यापि देवस्वत्वात् । तस्मादन्ते यजमानः स्वात्मानं एव अर्पयति । ब्राह्मणान्यपि क्वचिद्यूपं यजमानं आह । आलभ्यः पशुरपि यजमान-प्रत्याम्नाय इत्यामनन्ति । यजनेन सर्वाभ्यो देवताभ्य आत्मानमेव निष्क्रीणीते यजमान इत्येवमर्थानि वाक्यानि ब्राह्मणेषु द्रष्टव्यानि । तथा चाहुरैतरेयिणः "यजमानो वै यूपः । यजमानः प्रस्तरः । अग्निर्वै देवयोनिः । सोऽग्नेर्देवयोन्या आहुतिभ्यः सम्भूय, हिरण्यशरीरः ऊर्ध्वः स्वर्गं लोकमेष्यति "॥ (२. ६. ३.) कौषीतकिनश्चामनन्ति "अग्नीषोमयोर्वा एष आस्यमापद्यते यो दीक्षते तद्यदुपवसथे अग्नीषोमीयं पशुमालभते आत्मनिष्क्रयणो हैवास्य तेन आत्मानं निष्क्रीयानृणो भूत्वाऽथ यजते" (१०. ३.) इति । तथैव ऐतरेयब्राह्मणेऽपि "सर्वाभ्यो वा एष देवताभ्य आत्मानमालभते यो दीक्षते, अग्निः सर्वाः देवताः । स यदग्नीषोमीयं पशुमालभते सर्वाभ्य एव देवताभ्यः यजमानः आत्मानं निष्क्रीणीते" (२. ६. ३) इति पठ्यते ॥

स एषोऽग्निर्विश्वेषां देवानां दूतो यथास्वं यज्ञभागान् भुञ्जतां मुखं भवति । स यजमाने प्रथमं प्राप्तजन्मा यज्ञे पुरोहितोऽग्रणीः, सर्वेश्वरस्य सनातनकुमारः, कामो हृच्छयः सर्वभूतानां ज्वलन्नूर्ध्वं आरोहत्यारोहयति च यजमानम् । एवमिन्द्रो मित्रो वरुणः सोमोऽश्विनौ मरुत ऋभवः अन्ये च देवा यथास्थानं यथाधिकारं स्वानि कार्याणि निर्वहन्ति सवितुः परस्यैकस्य देवस्य । यस्यैतानि दैवतानि बहूनि नामानि व्यक्तान्यङ्ग-भूतानि मूर्तान्यमूर्तस्य । इह कानिचिदेषां निदर्शनार्थमुदाहरामः । यदि हृदि कवि-क्रतुरस्मास्वग्निः सप्तजिह्वः सप्तधामाधिगामी मर्त्येष्वमर्त्यः सततगमनशीलः अतिथिः

अस्माद्भूधाम्नः प्रस्थाय दिवमारोहति, दिवस्पतिरिन्द्रोऽपि बृहद्बलं देवानां दिव्यमनोमयाधिराजः विद्युद्भिरवरोहन् अभीष्टजीवनदानैः पर्जन्यात्मना वर्षन् वृषा जीवन-प्रकाशावरण-प्रतिबन्धान् वृत्रादीनसुरान् निहत्य आवृतानि बन्धितानि च सत्यानि निरावरणानि निर्मुक्तानि विधाय परं सत्यं भगवन्तं सूर्यं साक्षात्कारयति ॥

सोमो रसाधिदेवता अमृतस्यानन्दस्य अधिष्ठाता । सर्गे सर्वेषामपि भूतानां यः सारांशः रसः आनन्दमयः तं अमृतमादाय देवाः अमृतत्वं भजन्ते । तस्माद् अमृतान्धसां देवानां आहाराय स्वीयं सर्वज्ञान-क्रियाबल-भोगसाधनं सारांशं सोम-पदसङ्केतितं रसं यजमानः सुनोत्यर्पयति । तच्चामृतमानन्दं सोमपदवाच्यं अन्नं भवति देवानाम् । अन्नादस्तु सर्वदेवास्यभूतोऽग्निरिति बोध्यम् । एवमुपपद्यते च ब्राह्मणम्— 'सोमो वा अन्नं अग्निरन्नादः' इति । "अग्निः सर्वा देवताः सोमः सर्वा देवताः" इत्येवं-जातीयकस्य वाक्यस्यापि तात्पर्यं गूढार्थपक्षे सुगमम् । एवमन्येऽपि देवाः वरुणः सर्वा-वरणो विभुः समग्रपावनताविधायकः पापापनोदनः । मित्रः प्रेमसौहार्दभरितया भ्राज-मानया शक्त्या बाह्याभ्यन्तरानुभवप्रेरणक्रियादिवृत्तीनां संवादस्य निष्पादयिता, सम्मदस्य विधाता देवः । अन्यानि च तत्र तत्र यथावसरं देवानां स्वरूपाणि विचारयिष्यामः । न केवलं पुमांसो देवाः स्त्रियश्च देव्यो गीयन्ते वेदे । अग्नीन्द्रवरुणादीनां शक्तयः अग्नायी इन्द्राणी वरुणानीत्यादयो देव्यः । स्वतन्त्रतया स्त्री-देवताश्च काश्चन गीयन्ते । यथा वा, अदितिः अखण्डस्वरूपिणी सर्वभूत-प्रकृतिर्माता देवानां आद्या देवी । इळा मही सरस्वती सरमा इत्याद्याश्च लक्षणीयाः । पुंसां स्त्रीणां च देवतानामेष विशेषः अवधेयः । कार्याणां कारयितारश्चोदयितारो वा पुमांसो देवाः । कार्याणां निर्वाहिकाः स्त्री-देवता इति सङ्ग्रहः ॥

तदत्र अधियज्ञं अधिलोकं अधिदैवतं च सङ्केतमर्यादावलम्बिनं वेदगुप्तार्थसिद्धान्तं सङ्क्षेपेण व्याहार्ष्म । यदिदं मत्यल्पं दिङ्मात्रप्रदर्शनमेव भवति, तदपि न्यूनं स्याद्यदीह सारतो वा नोदाहरेम मुख्यानि वाक्यानि श्रीचरणानां वेदरहस्यार्थदर्शिनां इति तानि इमान्यनूदितानि भवन्ति—

'अथ क इह वेदार्थसारांशः गुप्तार्थदर्शनाल्लभ्यते? उच्यते' । अयं प्रथमो मुख्यश्च भवति । सत्यस्यामृतस्य ज्योतिषोऽधिगमायोद्यम एव मुख्योद्देशः, यस्यानुरोधेनैव सर्वे

वेदार्था उपलभ्यन्ते । अस्त्येकं सत्यं, तत् प्रत्यक्षभूताज्जगदात्मकसत्यात् गहनतरं परतरम् । अस्त्येकं ज्योतिः, तच्च मानुषज्ञानप्रकाशान्महीयो वरीयश्च असामान्याद् अमानुषाद् दर्शनश्रवणविशेषाल्लभ्यम् । अस्ति च अमृतं, तदुद्दिश्यमानुषो जीव उद्गच्छेत् । तत्सम्प्राप्तये अध्वानं प्रविशेम, ऋतस्यामृतस्य सम्पर्कं साधयेम । सत्ये नव्यं जन्म सम्प्राप्य वर्धमानास्सन्तः सत्यलोकं आत्मना अधिरुह्य तत्र जीवेम । तादृशी सिद्धिरेव मर्त्यत्वादमृतत्वप्राप्तिः परदैवतसायुज्यं च भवति ॥

अथ द्वितीयो गुप्तवेदिनां सिद्धान्तः । अनृतस्य भूरेः सम्मिश्रणादिदं जगत् अवरं सत्यम् । अन्यदस्ति परं सत्यं ऋतस्य सदनं 'सत्यं ऋतं बृहत्' इति मन्त्रवर्णोपदिष्टम् । तत्र सत्यज्ञानं 'ऋतचित्' इति कीर्त्यते । अन्ये च सन्ति लोकाः । परमो लोकस्तु सत्यज्योतिर्लोकः । अयमेव स्वराख्यः बृहद्द्यौरित्याम्नायते । तस्मादन्वेष्टव्यो बृहद्दिवः पन्थाः ॥

अथायं तृतीयः सिद्धान्तसारः । लोकयात्राया मस्माकं जीवितं देवासुरयोर्युद्धरङ्गम् । देवाश्च सत्यस्य ज्योतिषोऽमृतस्य विभवाः, असुरास्तु तद्विरोधिनस्तमसो विभवाः । इमे वृत्र-वल-पणिदस्यवः, तेषां राजानश्च भवन्ति । प्रकाशावरकानां एतेषां अन्धकारविभवानां विनाशाय साहाय्यं देवानां अपेक्षितव्यमस्माकम् । अन्तर्यजने मन्त्रवीर्यसम्पन्नया वाचा देवाना मागमनं प्रार्थयेमहि । तेभ्यः समर्पणीय मस्मदीयं अर्पयित्वा तैः प्रतिदीयमानं सर्वं स्वीकृत्य गन्तव्यं धामाधिरोढुं शक्ताः साधिकाराः स्याम ॥

अन्ते चेदं वेदर्षीणा मुत्तमं रहस्यम् । सर्वरहस्यशिखरायमाणं 'एकं सत्' 'तदेकम्' इतीद मेवोत्तरकालेषु औपनिषदर्षिभिर्मुख्यलक्ष्यतया विवृत्य विस्पष्ट मुपदिष्टम्' ॥

अयं गुप्तार्थवेदसारः भगवदरविन्द-श्रीचरणैः प्रदर्शितां मन्त्रार्थविवरणपद्धतिं वृण्वतां उपयोगायात्र प्रतिपादितः । अयं अनर्घो मार्गदर्शी स्यात् तेषां, ये च न पश्यन्त्युपपत्तिं सायणीयवेदार्थ-निर्णयप्रवचनेषु, ये वा न तृप्तिं लभन्ते स्वकपोलकल्पना-सम्मिश्र-पाश्चात्यपाण्डित्य-निर्णीत-वेदोक्तमन्त्रार्थ-देवतास्वरूपादि-सिद्धान्तेषु । ये पुनः सायणसाहाय्येनैव रहस्यार्थं सूक्तानां जिज्ञासन्ते, अध्यात्मदेवतादिरहस्यनिक्षेपं सङ्केत-

...दित मधिगन्तु मध्वानं गवेषयन्ति, तेषां दिग्दर्शनायात्यन्त मुपयुक्तो भूयादयं सङ्क्षेप इति शिवम् ॥

अथ द्वितीयः खण्डः

आधुनिक-नव्यविद्याविचार-संस्कारायत्त-पूर्वपक्षाक्षेप-समाध्युपन्यासमुखेन वेदरहस्यार्थ-सिद्धान्तपक्षः समासेन प्रत्यपादि प्रथमे खण्डे । स्वपक्षस्य परीक्षा चिरन्तनभारतीय-पाण्डित्यदृष्ट्या प्रवर्तते । अत्र ऋग्वेदादि-ब्राह्मणोपनिषदन्ताः श्रुतिग्रन्थाः निरुक्त-बृहद्देवतादीन्यन्यानि प्रमाणग्रन्थवचनानि धर्ममीमांसकानां उक्तयश्च कियद्दूरं वेदरहस्य-सिद्धान्तं पोषयन्तीति निरीक्ष्यते । तत्र प्रथमं तावत् केचन प्रश्ना उद्गच्छन्ति । तेषां सविमर्श-प्रतिवचनद्वारेण ऋग्वेदसङ्केतपदार्थ-समालम्बं गूढार्थमन्त्रसिद्धान्तं निरूपयिष्यामः ॥

कथमयं चतुर्णां वेदानां सतां ऋग्वेद एव विचारायादीयते? किं पाश्चात्यैः उक्तविधया युष्माकमपि अयमेक एव प्रमाणभूतो वेदः? न चेत् कथम्? किं धर्ममीमांसापक्षस्याधार एवासाधुः? तथा कथमसौ मीमांसकसिद्धान्तो बहोः कालाल्लब्ध-प्रतिष्ठः? किमत्यन्तपुरातनत्वादेव मन्त्राणां माननीयत्वं पावनताप्रतीतिर्वा? को वा मुख्यो विषय ऋगर्थमीमांसया साध्यते? बहुविधा हि मन्त्राः प्राचीनैर्निरुक्तकारादिभिः अङ्गीक्रियते, कथं तर्हि सर्वाऽपि मन्त्रसंहिता अध्यात्माधिदैवतादि-रहस्यविद्यानिधान-भूतेत्युच्यते? अथ चेत् सङ्केतपदार्थग्रहणेन आपाततः उच्चावचाभिप्रायाणां मन्त्राणां वस्तुतो रहस्यप्रकाशनेन विरोधपरिहारो भवतीत्युच्येत, के ते सङ्केताः कथं न ते स्वकपोल-कल्पिताः, अस्ति किं तथाविधसङ्केतगूढार्थ-व्याख्यानमार्गस्याधारो वेदे? सन्तु तावदृचः । वैदिकं समयधर्मं वैदिकं यजनं वैदिकं मन्त्रं च अधिकृत्य वैदिकग्रन्थेषु रहस्यार्थप्रतिपाद-कानि सन्ति वा प्रमाणवचनानि? किं वा यथार्थस्वरूपं देवानाम्? अस्मत्परिचिताधुना-तन तत्त्वसिद्धान्तापेक्षया को वा भवति तत्त्वनिर्णयो वेदर्षीणाम्? अपि नव्यं पाश्चात्यं पन्थान मवलम्ब्य वेदार्थविमर्शप्रवृत्तानां प्रशंसनीयविद्वच्चरितानां भारतीयानां परिश्रमः सर्वोऽपि विफलो वक्तव्यः? अपि नासीद्वेदर्षीणा मस्माकं चान्तरे दीर्घयुगे कोऽप्युद्यमो

वेदमन्त्राणां गोप्यं प्रवेष्टुम्? त इमे प्रश्नाः सावधानं विचार्य प्रत्युक्ताः सङ्केतरहस्यार्थं सिद्धान्तं द्रढयेयुरिति अनयोर्द्वितीय-तृतीयखण्डयोः विचारयिष्यामः ॥

॥ ऋग्वेदः ॥

तथ्यमिदं यच्चतस्रः संहिता वेदानामिति । कथं तर्हि वेदानां त्रयीत्वं उपपद्यते? मन्त्राणां त्रित्वं, मन्त्रसमुदायरूपसंहितानां चतुष्ट्वम् । के वा मन्त्राः? अयं मन्त्रः अयं नेति निर्णायकं लक्षणं कैश्चिदुक्तप्रायमपि प्रायिकमेव स्यात् । स एव मन्त्रः 'यमृषयस्त्रयीविदो विदुः ऋचः सामानि यजूंषि' इति । ये अभियुक्तैर्मन्त्रा नोच्यन्ते न ते मन्त्रा इति शबरस्वामी । अभियुक्तानां वागेव प्रमाणं मन्त्रत्वपरिज्ञाने इति सारांशः । मन्त्राणां ऋग्यजुस्साम्नां स्वरूपाणि सूत्रितानि जैमिनिना 'तेषां ऋग् यत्रार्थवशेन पादव्यवस्था । गीतिषु सामाख्या, शेषे यजुःशब्दः' (२. १-३५-३६-३७) । इदं पर्यवसन्नम् । ऋचो मन्त्राः छन्दोबद्धाः, ऋचो गेयाः सामानि, शिष्टाः गद्यरूपाः मन्त्राः यजूंषीति त्रिधा वेद-व्यवस्थितेर्वेदत्रयं त्रयीशब्दवाच्यतां भजते । ऋचां समुदायः ऋग्वेदसंहिता, यजुषां यजुस्संहिता, साम्नां च सामवेदसंहितेति व्यवहारः । चतुर्थी अथर्ववेदसंहिता अन्या च वर्तते । तत्र ऋचो यजूंषि च वर्तन्ते । ऋक्संहितापठिता ऋचो बह्व्यो दृश्यन्ते । तथा यजूंष्यपि क्वचित् सांहितिकानि, ये च मन्त्रास्त्रय्यामाम्नातास्तेषां यज्ञोपयोगित्वं सिद्धम् । केवलाथर्वणिकानां मन्त्राणां पुरुषार्थसाधकानि प्रयोजनान्तराणि कीर्त्यन्ते । तावता न वेदमन्त्रत्वहानिः । यतः चतुर्थी संहिताऽपि वेदसंहितैव भवति । अस्यां भूयिष्ठा ऋचः ऋग्वेदस्था इत्युक्तम् । तथा यजुर्वेदेऽपि क्वचित् । तस्मादृक्संहितायां व्याख्यातायां अथर्व-संहितास्थानामृचामपि तात्पर्यं उक्तं भवति । अवशिष्टानां आथर्वणिकमन्त्राणां व्याख्यानाय नावसरः, यज्ञानुपयोगित्वात्,यज्ञस्य अस्मत्सिद्धान्तानुसारेण सङ्केतरूपत्वाच्च । याज्ञिक्यां त्रय्यामेवाभिनिवेशोऽत्रास्माकम् । यद्यपि ऋग्वेदीयसङ्केतरहस्यं अथर्वमन्त्राणामप्यर्पकं भवेत्, तथाऽपि स नेह विचारोऽपेक्ष्यते । सामवेदसंहितास्था ऋचः प्रायः सर्वा अपि ऋक्संहितास्था इति सामवेदः पृथङ् न विचार्यते । अवशिष्टं यजुः । यदि यजुर्वेदोऽत्र न विचार्यते, तस्यास्ति कारणम् । अस्मदुद्देशस्य यजुर्वेदविचारात् सम्भाव्यं फलं सन्दिग्धम् । उद्दिष्टो विषयस्तु ऋषीणां सङ्केतपदार्थव्यवस्था-प्रकाशनम्, तद्वारेण मन्त्र-

रहस्यार्थविवरणम्, देवतानां तत्त्वं, मानुषस्य प्राप्तव्यतया अस्मत्पूर्वैर्महर्षिभिर्निर्दिष्टं लक्ष्यम् । सर्वमेतदद्भ्यत्र भाषास्वरूपपरिशीलनात्सुलभो भवति । यजुर्वेदीयभाषासङ्केतादयो न सर्वत्र समानाः सुगाह्या वा भवन्ति । अन्यदस्ति कष्टं यजुर्विचारे । तैत्तिरीयाणां कृष्णयजुर्वेदः मन्त्रब्राह्मणात्मकः, अस्माकं तु केवलमन्त्रार्थस्य विचारः प्रवर्तते । न तु उपनिषदा रहितस्य सहितस्य वा ब्राह्मणस्य । यजुर्वेदे तु कर्मोपयोगिभिर्ब्राह्मणैः युक्ताः पठ्यन्ते मन्त्राः । अन्या ऋगादिसंहिता इव नेयं तैत्तिरीयाणां मन्त्राणामेव संहिता । मन्त्रब्राह्मणानां समुदायोऽपि संहिताव्यपदेशं भजते ॥

ब्राह्मणानि कर्मपरतया मन्त्राणां विवरणाय प्रवर्तन्त इति न विवादः । यद्यपि तेषां विवरणप्रकारोऽपि सङ्केतार्थमेव स्पष्टं विद्योतयति, तथाऽपि याज्ञिककर्मसु विनियोगायैव सन्ति मन्त्रा इति तेषां मतमिति विशदं भवेच्चिन्तकानाम् । अत एव सायणः ब्राह्मणान्याश्रित्य मन्त्रार्थविवरणं चकार । तथा सति मन्त्रब्राह्मणात्मके कृष्णयजुर्वेदे अस्मदीयविचारस्य मन्त्रार्थपरस्य नास्त्यवकाशः । ब्राह्मणानि हि मन्त्राणां कर्मोपयोगितां एव निरूपयन्ति, न मन्त्रगुप्तार्थान् । अन्यदस्ति चित्रम्, यदि स्मरेम याज्ञवल्क्यचरितम् । तदिदं समासेनोच्यते । स हि गुरोर्वैशम्पायनादधीतं यजुर्वेदं गुरवे प्रत्यर्पितवान् । प्रत्यर्प्यमाणो वेदस्तित्तिरिरूपतया निर्गतः । ततस्स तपस्तेपे । वाजिरूपतया भगवानादित्यः प्रसन्नस्तस्मै शुद्धमन्त्रात्मकं ब्राह्मणैरसम्मिश्रं शुक्लं यजुर्वेदं ददौ । ततस्स वाजसनेयसंहिता विश्रुता । विस्तरभयादियं कथा नेहोच्यते, विष्णुपुराणे सविस्तरा द्रष्टव्या (३. ५.) । याज्ञिकपक्ष-प्रोद्दलक-ब्राह्मणानां वेदसंहितासु स्थानं न स्यात् इत्याशयो याज्ञवल्क्यस्येति मन्यामहे । याज्ञिकेषु कर्मसु मन्त्राणां विनियोगाय ब्राह्मणानि सन्तु नाम, किं तु पृथक् सन्तु यथान्यशाखीयब्राह्मणानि तत्तन्मन्त्रसंहिताभ्यः पृथगेव वर्तन्ते । यदि कर्मपरं ब्राह्मणं कृष्णयजुस्संहितायां स्थानं अलभत, ब्रह्मपरोपनिषदपि कुतो न संहितायां स्थानमियादिति स्पर्धमानेव ईशावास्याख्या एकैव संहितोपनिषत् शुक्लयजुस्संहितायां पदं भेजे । एवं एकेषां पूर्वेषां मन्त्रसंहितायां ब्राह्मणस्यान्तर्भावो न युक्त इत्यासीन्मतिरित्युपपन्न ऊहः । तैत्तिरीयसंहितायां ब्राह्मणान्तर्भावस्य फलितं दूरप्रसरमभूत् । येनोत्तरकालिक-भारतीयसमयधर्मव्यवस्थायां मन्त्रब्राह्मणात्मको वेद इति सौत्रसिद्धान्तः प्रतिष्ठां प्राप्त् । अत्रैव बीजं द्रष्टव्यं अनन्तरकालेषु फलितस्य

कर्मपारम्यसिद्धान्तस्य, यदनुसारेण कर्म-ज्ञानकाण्डात्मको वेदः, कर्मकाण्डः सब्राह्मणो वेदमन्त्रसंहिताग्रन्थः, ज्ञानकाण्ड उपनिषदिति सर्वेषां सूत्रकाराणां तदनन्तराणामाचार्याणां चाङ्गीकार इति निर्विवादम् ॥

एवं हि पाश्चात्यास्तदनुसारिण इव वयमपि यजुर्वेदस्य प्रामाण्यं न गणयाम इति मा भूच्छङ्का । यजूँष्यपि मन्त्राः, नैव न्यक्कुर्मो वेदं बह्वृचं याजुषं आथर्वणिकं वा । तर्हि कुतो न याजुषो मन्त्रभागो वा विचार्येत इति चेदुच्यते । अस्मदुद्देशस्योपायभूतो न स विचारः । न तावता यजुर्मन्त्राणां वेदत्वमस्माभिर्न लक्ष्यते । यथा अस्मत्पूर्वैः वैदिकैः शैवाद्यागमिकैरपि रुद्राध्यायादिमन्त्रभागा जपपारायणादिषूपयुक्ता दृष्टचराः भवन्ति, तथा अस्माकमपि मन्त्रभागेषु पावनत्व-पूज्यत्वादि-दृष्टिर्ध्रुवेत्यसंशयम् । अत्र विश्रुताः पञ्चाक्षराष्टाक्षरादयो मन्त्रा याजुषा एवेति स्मार्यम् ॥

अथ बह्वृचानां संहितैव विषयो विचारस्य । न तावता वेदशाखान्तराणामवरं प्रामाण्यम् । किं तु अस्माकं अपेक्षिता सर्वा सामग्री ऋग्वेदादेव लभ्यते । यत्र शब्दस्वरूपं अत्यन्तप्राचीनम्, न च दुर्गमा आर्षसङ्केतपदार्थ-व्यवस्था । ऋषीणा मध्यात्मज्ञानबलसम्पत्तिश्च न दुर्ग्रहा । देवतानां तत्त्वं च विवेकग्राह्यम् । अन्यदस्ति मुख्यं कारणम् । यजुर्वेदो यज्ञार्थः प्रसिद्धः, अत एव तं अध्वर्युशाखामाहुः । यज्ञार्थं ऋचां प्राधान्यं याजुषा एवामनन्ति– "यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद् यदृचा तद् दृढम्" इति (६. ५. १०.) । इदं चेह द्रष्टव्यम् । ऋग्भिस्सह यजूंषि सामानि च यज्ञार्थे वर्तन्ते । ऋग्वेदात्परं यजुर्वेद इत्याधुनिकं ऐतिहासिकं मतं असत् । ऋक्संहितायामेव यजुषां साम्नां चोल्लेखोऽवधेयः । त्रयीं विना नास्ति यज्ञः । त्रय्यां एकं वा विहाय न कोऽपि यागोऽनुष्ठातुं शक्यः, अवियोज्या सा यज्ञे । बहिर्यागे त्रय्या उपयोगो वर्तते, तथा तत्प्रयोक्तृणां स्थानानि च भवन्ति । अन्तर्यागेऽपि त्रय्याः स्थानं अस्ति । इदं च सम्प्रत्याचक्ष्महे । सर्वथा स्मृतावुपस्थाप्यं त्विदम् यत्र केवलं तैत्तिरीयसंहिता सर्वाण्याध्वर्यवाणि ब्राह्मणानि यज्ञाधिकारविचारे यज्ञकर्मदेवताफलादिरहस्येषु ऋचां प्राधान्यमभिज्ञाय 'तदृचाऽभ्युक्तम्' इति शतशो घोषयन्ति । किमु वक्तव्यम् ज्ञानैकलक्ष्या उपनिषद ऋचां प्राधान्यं ज्ञानाधिकारे प्रशंसन्तीति । "तदुक्तमृषिणा, तदेष श्लोकः, अत्रैते

मन्त्रा भवन्ति, एतदधिविधाय ऋषिरवोचत्, तदेषाऽभ्युक्ता" एवमादीनि वचनानि प्रत्यक्षं मन्त्रदृष्टीनां ऋचां पारम्यं प्रशंसन्तीति दिक् ॥

अथ त्रयीपदवाच्यस्य ऋग्यजुस्सामाख्य-वेदत्रयस्य सङ्केतार्थोऽन्तर्यजने व्याख्यायते । 'अस्य महतो भूतस्य ब्रह्मणो निःश्वसितं' वेदा इति श्रूयते । ऐतरेयशतपथादिब्राह्मणेभ्यः इदमवगम्यते यद् भूर्भुवःस्वराख्य-व्याहृतित्रयलक्षित-त्रैलोक्यस्याध्यक्षैरग्निवाय्वादित्यैः क्रमश ऋग्यजुःसाम्नां प्रादुर्भावः सम्पादित इति । किं विवक्षितम्? प्रथमे खण्डे यज्ञस्य सङ्केतार्थविवरणप्रसङ्गे होत्रादय ऋत्विजो देवा इत्युक्तम् अत्र त्रय्या देवानां वृत्तयः प्रतिपाद्यन्ते । अग्निर्होता देवानामाह्वाता, स वाचोऽधिदेवता सर्वासामृचां तस्यां वाच्युपसंहारः यया देवानां प्रभावः कीर्त्यते, तत्त्वानि प्रकाश्यन्ते, उज्ज्वलन्त्या यया देवानामालयः स्वर्लोकोऽधिगम्यते । आदित्यः साम्नामाधिपत्यं वहति, स उच्चैर्गायति, सत्य-सम्मद-लय-विधायकैर्गानैर्नादस्पन्दैर्यजमानमुन्नीय देवेषु मध्ये विराजयति । उभयोः द्यावा-पृथिव्योस्तदध्यक्षयोरग्नि-सूर्ययोरन्तरे अन्तरिक्षपतिर्वायुः क्रियाध्यक्षो यजुर्भिर्यजनकार्यं साध्नोति । स एवाध्वर्युः देवानाम् । अत एव यजुषां प्राधान्यं याज्ञे कर्मणि । ऋग्भिः प्राज्ञाभिर्वाग्भिः अर्चनं विधीयते, सामभिर्यजमानः परं स्वरं उद्गीथाख्यं भजनीयसम्मदपदं उन्नीयते, यजुर्भिः कर्मणा यजनं निर्वर्त्यते— तत्तदृत्विग्रूपैर्देवैरिति सङ्ग्रहः । एवं तिस्रो देवताः अग्निर्वायुरादित्य इति । याश्च होता अध्वर्युरुद्गाता, इति क्रमशः ऋग्यजुस्साम्नां प्रयोक्त्र्योऽन्तर्यजने । अयमेव परमार्थो यज्ञः सङ्केतात्मतया बाह्ययज्ञे रहोविद्यानधिकारिणां उपयोगाय पूर्वैर्महर्षिभिर्व्यवस्थापित इति बोध्यम् ॥

धर्ममीमांसा

मन्त्र-ब्राह्मणयोर्वेदनामधेयं, न केवलं मन्त्राः वेदव्यपदेशं भजेरन् इति ब्रुवाणाःपूर्वमीमांसकाः वेदरहस्यार्थमतं नाभिमन्येरन् । तेषामस्माकं च दक्षिणोत्तरवदन्तरं द्रष्टव्यम् । यानि तत्त्वान्युपाश्रित्य गूढार्थसङ्केतपक्षोऽस्माकं ध्रियते तेषां परिपन्थी तदीयः सिद्धान्तः । वयं मन्त्राणां प्राधान्यं आश्रयामहे, ब्राह्मणानां तु कर्मोपयोगित्वं अभ्युपगच्छामः । मन्त्रसंहितैव वेदशब्दमुख्यार्थ इति वयम् । मन्त्रार्थविचारद्वारेण वेदरहस्यनिरूपणमस्मल्लक्ष्यम् । मीमांसकास्तु ब्राह्मणवाक्यार्थविचारिणः, यद्यपीह नास्माकं प्रवृत्तिस्तत्सिद्धान्तविस्तर-परी-

क्षायां, तथाऽपि तेषां मूलभूत-धर्मजिज्ञासामधिकृत्य त्वस्ति किञ्चिद्विमृष्टव्यम् । वेदोऽखिलो धर्ममूलमिति न्यायतो धर्मजिज्ञासायां प्रवृत्तास्ते वेदविचारं कुर्वन्ति । वेदानां धर्ममूलत्वोक्तौ नास्ति विवादः। धर्मशब्दार्थस्तु कुत्र पर्यवस्यतीत्येव चिन्त्यम्। सामयाचारिकं धर्ममेव मनसि निधाय वेदस्य कर्मपरतापक्षमेव परमं सिद्धान्तं मन्यन्ते । अयं च तेषां वादः – वेदादेव धर्मस्य ज्ञानं, स च परमो धर्मः यज्ञस्वरूपो वेदे प्रतिपादितः । यजमानेन देवार्थं द्रव्यत्यागः क्रियते, सर्वस्वमपि दीयते विश्वजितीव । कर्मणा स्वर्गफलं प्राप्नोति यजमानः । अपूर्वं फलदातृ, तच्च किमप्यदृष्टं कर्मजन्यफलदायकमित्याद्याहुः । अलमेतावता अस्माकं धर्मविषयकचर्चायाः । मीमांसकानां कैश्चिद् अतिचित्रवादैः सह न विद्यते कोऽपि नः सम्बन्धः । स्वर्गमुद्दिश्य तेषां अभिप्रायः, तथा देवानधिकृत्यापि, मन्त्रस्वरूपम्, वेदवर्णानां नित्यत्वम्, शरीरस्थः कोऽपि जीवो देहव्यतिरिक्तो गत्यन्तरविरहाद् अभ्युपगन्तव्यः, जगतो जीवानां वा ईश्वरनिरपेक्षता, जगत आत्यन्तिकस्वतन्त्रसत्ता-याथार्थ्यादि निदर्शनं भवति निरङ्कुशवादवैचित्र्याः ॥

अथ पश्यामस्तावत्, को नामायं धर्मः यस्य ज्ञानं वेदादेव लभ्यते? याज्ञिकं कर्मैव परमो धर्मो वेदैरुपदिष्ट इति चेत् स न सर्वेषामविशेषेण पुरुषाणां सर्वेषु युगेषु उपयुक्तोभवत्यभूद्वा । एकत्र कोणे भूमण्डलस्य कतिपयमानुषवर्गीयाणामेव उपयोज्य इति स्पष्टम् । एवं तथाविध-यज्ञकर्मात्मको धर्मः सामयाचारिक एव, न सार्वलौकिकः, न सनातनो वेति प्रत्यक्षम् । एतादृशं धर्मस्वरूपमेव सूत्रकारैर्निर्णीतम् । तर्हि ब्राह्मणानि उपादाय साम्प्रदायिक-वैदिक-यजनोत्सवादीनां व्यवस्थापनकाम्यया वेदविधीन् निश्चित्य वेदो विधिश्चोदनेति सिद्धान्तितम् । अतः परमस्मात् श्रौतरूपाद् धर्मात् स्मार्तगृह्यादयः सामयाचारिकाः राजधर्मादयश्च चातुर्वर्ण्यादि-साम्प्रदायिकवृत्तिव्यवस्थायै अकल्पन्तेति वेदमूलताधर्मस्य न्याय्या भवतु नाम । तथा हि पूर्वेषां सङ्घे समष्टेर्व्यष्टेश्च धर्मास्तित्वप्रत्ययो विश्वतोमुखो निष्पन्न इति प्रशंसाभाजनमेवैतत् । परं तु मन्त्र-ब्राह्मणयोर्वेदनामधेयमिति कृत्वा आद्या व्यवस्था उत्तरकालेषु बहुसङ्कटदशा-प्रसवित्री समजायतेति नात्र संशयः । स चादिमः सूत्रकारकृतो व्यतिक्रमो नाभिज्ञातः, न शोधितः । स हि व्यतिक्रम एव, येन कर्मसु विनियोगार्था एव मन्त्राः, मन्त्राणां कर्मपरतया व्याख्यानं

एव साधु नान्यथेति प्रत्ययो वेदार्थविचारिणां हृदयेषु पदं लेभे । इदानीमिदं विशदं भवेत् यत् सतीषु ऋग्वेदादिसंहितासु तैत्तिरीयसंहितायामेकस्यामेव ब्राह्मणानामन्तर्भावः अभवदनर्थकर इति । परमस्य वैदिकधर्मस्य यज्ञस्य रहस्यार्थः एवमुपरक्तः क्रमशः श्रौत-धर्मस्य बाह्ययज्ञात् नान्यत्रोपपत्तिरिति स्थितिः सम्पादिता । अत एव कालक्रमेण प्रादुर्भूताः आचार्यपुरुषाः सर्वेऽपि श्रुतिं काण्डद्वयात्मिका मभ्युपगम्य मन्त्रसंहितानां कर्मकाण्डान्तर्गतत्व मभिमान्य उपनिषदामेव ज्ञानकाण्डत्वं चाख्यापयन् ॥

अथ याज्ञिकं कर्म स्थूलसङ्केतरूपतया पृथक् स्थापयित्वा अन्तरर्थो यज्ञस्य चेत् निरीक्ष्येत, तदा तस्य सार्वलौकिकत्वं स्पष्टतां गच्छेत् । परः स्रष्टा सर्वस्य जगतः पुरुषः स्वमात्मानं अर्पयित्वा यज्ञधर्मेण सृष्टिं व्यधत्तेत्यस्य तत्त्वमपि सुबोधं भवेत् । अतोऽन्या का वा विवक्षा पुरुषसूक्तमन्त्राणाम्? यद्यपि पुरुषसूक्तभाषा अन्यसूक्ततारतम्यापेक्षया प्रायेण सुगमा अत एव स्पष्टार्था च भवति, तथाऽपि नेदं एकाकि सूक्तं सहस्राधिक-सूक्तायां दाशतय्यां, यत्र यज्ञेन परमधर्मेण सृष्टिर्विधीयत इत्याशयो लक्ष्यते । इदं च शतशो बह्वृचानामाम्नायेषु पश्यामः– ऋषिर्यदा देवेभ्यः स्वात्मीयं किमपि ददाति, स वेद तावता त्यागेन तावन्तं मर्त्यांशमुज्झित्वा अमर्त्यांश मादत्त इति । देवा हि तस्य यजमानस्य अर्पणाङ्गीकारेण स्वयं यावदवकाशं तं स्वीकृत्य तत्र प्रादुर्भवन्ति । यज्ञेन मर्त्यः अमर्त्यतां व्रजति चेत् जगद्व्यापाराय सृष्टौ प्रथमं जन्म प्राप्तानां अमर्त्यानामपि मर्त्ये द्वितीयं जन्म भवति । इदमन्योन्यपरिवर्तनमेव यज्ञस्य यथार्थं स्वरूपम् । अनेनैव सृष्टिः सर्वत्र निर्वाह्यते । अस्मिन् विनिमयधर्मे यज्ञरहस्यं प्रतिष्ठितम् । येन दानादान-रूपेण इतरेतरव्यवहारेण व्यष्टि-समष्ट्योः ब्रह्माण्ड-पिण्डाण्डयोर्जीव-देवयोरैहिकामुष्मिकयोः वा सम्बन्धो ध्रियते, वृत्तयश्चाल्यन्ते, स्थितिरेव सिध्यति । "सखायस्त्वा ववृमहे" इति ऋषिषु सख्येन देवतां सम्बोधयत्सु, उभयेषामन्योन्यसम्प्रवेशरूपः साक्षात्सम्बन्धः कश्चन प्रवृत्त इति ज्ञायेत । चिरन्तनमिदमार्षं यज्ञतत्त्वं कालेन गलता धूलिधूसरैः कर्म-पारम्यवादैराच्छादितं शोचनीयदशं परामृश्य तत् शुभ्रमुज्जीवितं विवृतं विधातुमुद्यता हरिगीता । "सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वं एष वोऽस्त्विष्टकामधुक् ॥ देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ" ॥ (३. १०, ११.) इति हि गीयते ॥

एवं स्थिते, केचन विवदेरन्नेवम्— उत्तरकालेषु अध्यात्मतत्त्व-सिद्धान्ताभ्युदयानुसारेण यज्ञस्यैवंविधं सूक्ष्मं व्याख्यानमाविष्कृतम्, भगवद्गीतासु प्रतिपादितो यज्ञतत्त्वार्थो न वस्तुतो वैदिके यज्ञ उपपद्यत इति । नैवं मन्तव्यम् । तथ्यमिदं यद्विविधानां दार्शनिकसिद्धान्तानां वेदान्तेषु समन्वयं समर्थयति वेदान्तसारभूता भगवद्गीता । एवंविधनानासिद्धान्तसामरस्य-सम्पादनाय अपेक्षिता गाढा प्रज्ञा, प्रसन्नो विवेकः, दृढः सत्यग्रहः, आर्जवं च तत्त्वप्रतिपादने गीतासु भासन्त इत्यद्धा । यद्यत्र प्रतिपादितं यज्ञस्वरूपं न वस्तुतो वेदोक्त-यज्ञतत्त्वमित्युच्येत, तदा गीतासु मृषावादं तत्त्वाग्रहणं वा आरोपितवन्तः स्याम । तथाविधमन्याय्यं साहसं आस्थातुं को वा सन्नद्धः स्यादृजुधीः? यद्यपि सर्वत्र सामरस्यपरायणो गीतोपदेशः, तथाऽपि दूषणीयेऽर्थे न माध्यस्थ्यमवलम्बते । दूष्यान् दूषयति पोषयति च पोष्यान् । कर्मणो नान्यदस्तीति वादिनः पुष्पितां वाचं अविपश्चितो वदन्तीति निन्दति । (२. ४२) कर्मबद्धश्रद्धानां वेदरहस्य-प्रवेशानधिकारिणां अज्ञानां न बुद्धिभेदं जनयेदित्युपदिशति, (३. २६) मन्त्रदृष्टीर्मानयति, सर्वेषां वेदानां सर्वेश्वरपदप्राप्तिरेव मुख्योपदेश इति साधयति (१५. १५.) । अपि च, न केवलं मोक्षपरं गीताशास्त्रमेवं यज्ञतत्त्वं विवृणोतीति मन्तव्यम् । समयाचार-कर्मविधानपरेषु धर्मशास्त्रेष्वपि वैदिककर्मणां ज्ञानरहस्यगर्भितत्वं प्रतिपाद्यमानं पश्यामः । मनुस्मृतौ "वेदाभ्यास" इत्यारभ्य "वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः । अन्तर्भवन्ति क्रमशः तस्मिन् तस्मिन् क्रियाविधौ" ॥ (१२. ८३-८७) इत्युक्तम् । कर्मणां योगसाधनसङ्केतभूतत्वमेव विवक्षितमिति कः सन्देहः? गीताप्रयुक्तः कर्मयोगशब्द एव स्मृतौ प्रयुक्तः । स्मृति-गीतयोः पौर्वापर्यविचारो नावश्यकोऽत्र । बाह्यानि कर्माणि आभ्यन्तरस्य साधनस्य कञ्चुकानीव स्थितानीत्युभयोराशय इत्येतावदसन्दिग्धम् ॥

एवं वैदिकस्य कर्मात्मकस्य यागस्यान्तरर्थः सर्वत्र पुरातनग्रन्थेषु ब्राह्मणेषु पुराणेषु महाभारते च प्रथित इति का नाम विचिकित्सा? यदा तु कर्मपराः ब्राह्मणानां वेदे परमं स्थानं तेषां मुख्यवेदत्वं विश्वस्य तादृशं मतमतिष्ठिपन् तदा आरब्धः कर्मात्मको यज्ञ एव परो धर्म उपदिष्टो वेद इति वादः । येनात्यन्ततिरोधानं वेदयज्ञरहस्यस्यापादितम् । मन्त्राणां कर्मैकप्रयोजनत्वं अर्थशून्यपौरोहित्याधीनत्वं च फलितम् । पूर्वमीमांसकैर्भगीरथप्रयासेन मन्त्रब्राह्मणात्मकस्य कर्मपरतायां प्रतिष्ठापितायां, समया-

चार्यपुरुषैरर्वाचीनैरपि उपनिषत्स्वेव ज्ञानाधिकार इत्यभ्युपगतः । अयं च परीक्ष्य प्रागुक्तः । यद्यपि शास्त्रीयेषु व्यवहारेषु यज्ञकर्मपारम्यमेव वेदे प्रतिपादितमिति ब्रवीति, दिष्ट्या न कोऽपि मीमांसकः कर्मणा परमः पुरुषार्थः साधयितुं शक्य इति तृप्यति । अत एव कर्मपारम्यवादिनः शास्त्रत एव पूर्वमीमांसकाः श्रद्धया तु वेदान्तिन आस्तिकाश्च भवन्ति । एवं द्वैधीभावजन्यं विरोधं गीतोपदिष्ट-निष्कामकर्म-सिद्धान्ताश्रयणेन परिहरन्ति । बाढम्, परं तु शुद्धः पूर्वतन्त्रसिद्धान्तस्तु, धर्मात्परतरं नास्ति, स च धर्मो यज्ञः, तस्य ज्ञानं वेदाल्लभ्यते, तस्याचरणात् स्वर्गप्राप्तिरूपं फलमवाप्यते, कः कुत्र किमर्थो वा ईश्वरः परमात्मा वा, कर्मस्तुतिपरा एवोपनिषदः विधिशेषा इत्येव ब्रूयात् ॥

अथेदं वक्तव्यम् । पूर्वतन्त्रविदां सूक्ष्मविचार-विवादवैदग्ध्यं सर्वपण्डितमण्डली-सम्मानितमिति नात्युक्तिः । अयुक्तेषु क्लिष्टेषु वा स्थलेषु तेषां स्वपक्षसमर्थन-धोरणी चतुरतरेति निर्विवादम् । वेदवाक्यपदवर्ण-नित्यतासिद्धान्तः तेषां सुप्रसिद्धः । तत्र वेद-नित्यत्व-स्थापनप्रसक्तौ, अकाराद्याः सर्वेऽपि वर्णा नित्या इति प्रतिपादयन्ति । तथा सति, वेदे पुरावृत्तविषयाणां सृष्टवस्तु-व्यक्तिविशेषनिर्देशक-संज्ञावाचकानां नास्त्यवकाशः । अपि तु प्रत्यक्षं बहुशो वर्तन्ते संज्ञापदानि, तथा वृत्तान्तान्वाख्यानानि । कथं तादृशेषु स्थलेषु नित्यत्वं वेदानामुपपद्यत इति चेदुपपद्यत एव गौण्या वृत्त्या तात्पर्य-ग्रहणादित्याहुः । "बबरः प्रावाहणिरकामयत" इत्यादौ प्राग्बबरजन्मनो नायं ग्रन्थो भूतपूर्वस्तस्मादनित्यता वेदस्येति चेत् न बबरपदं संज्ञापदमित्युच्यते शबरस्वामिना । आह चैवम्– "यः प्रवाहयति स प्रावाहणिः बबर इति शब्दानुकृतिः, तेन यो नित्यो अर्थस्तमेवैतौ शब्दौ वदिष्यतः" (जै. सू. भा. १. १. ३१.) । शब्दानुकृतेः संज्ञाशब्दः भ्रम इति व्याख्यातम् । वृत्तान्तान्वाख्यान-प्रसङ्गे भाष्यकार-विवरणचातुरीं निरीक्षामहे । 'प्रजापतिरात्मनो वपामुदक्खिदत्' इत्यामनन्ति तैत्तिरीयाः (२. १. १.) । अत्र भाष्यपङ्क्तिः– "प्रजापतिरात्मनो वपामुदक्खिददिति ...... नित्यः कश्चिदर्थः प्रजापतिः स्यात् वायुराकाश आदित्यो वा । स आत्मनो वपामुदक्खिददिति वृष्टिं वायुं रश्मिं वा । तामग्नौ प्रागृह्णात् वैद्युते आर्चिषे लौकिके वा । ततोऽज इत्यन्नं बीजं वीरुद्वा । तमालभ्य तमुपयुज्य प्रजाः पशून् प्राप्नोतीति गौणाः शब्दाः" (२. १. १०.) इदं च निदर्शनं भवति मीमांसकानां सूक्ष्मविचारकौशलस्य । यतो वेदनित्यता-समर्थनक्लेशे समुपस्थिते, गौणीं

वृत्तिमाश्रित्य पुरावृत्तं काल्पनिकीं गाथां वा चातुर्येण नित्यार्थपरतया व्याख्याय कृत-कृत्यतां भजन्ते । इदं त्वत्र चित्रम् । रूपकदृष्टान्तावलम्बनेन अन्वाख्यानानां सङ्केत-रूपतामेव गौण्या वृत्त्या प्रतिपादयन्ति । वेदगुप्तार्थसिद्धान्तेऽपि वेदपदानां यौगिकत्व-प्राधान्येन सङ्केतार्थ-निरूपणे गौणी वृत्तिराश्रीयते । एष तूभयोर्विशेषः । पूर्वस्तु बाह्यः स्थूलः कर्मप्रतिपादनपरः सङ्केतार्थः, अपरस्तु आन्तरः सूक्ष्मः गुप्तविद्यासाधनपरः सङ्के-तार्थः । ब्रह्माण्डनिर्माणप्रायेण प्रयासेन "पर्वतो रन्ध्रितः मूषको लब्धः" इति लोकोक्तेः दृष्टान्तभूतमरसं फलं सम्पादितं पूर्वतन्त्रविद्भिरिति सङ्ग्रहः ॥

पूर्वमीमांसकसिद्धान्तमधिकृत्य इदमवश्य-वक्तव्यमासीत् । यन्नव्यविद्या-संस्कार-सम्पन्नैः प्राज्ञैरपि मीमांसकानां मन्त्रार्थविचारप्रामाणिकता विश्वस्यते । ते हि पूर्वतन्त्र-सिद्धान्तमूलमज्ञात्वैव वेदे नास्ति रहस्यं सङ्केतार्थो वेति स्वयं प्रतियन्ति, अन्यानपि प्रत्याय्य अपथं प्रापयन्ति । तस्मादिदं बोध्यम् । यदि वेदो नाम प्राधान्येन ब्राह्मणं, मन्त्रसहितं ब्राह्मणं भवति, तदा तदायत्तश्रौतसूत्रधर्मशास्त्रादीन्युपजीव्य प्रवृत्ता पूर्वमी-मांसैव वेदविचारे प्रमाणं स्यात् । यदि पुनर्वेदो नाम प्राधान्येन मन्त्रदृष्टय ऋचो यजूंषि वा यत्प्रभावा एव ज्ञानकर्मपर-विवरणग्रन्थेषु सारण्यकब्राह्मणेषु दृश्यन्ते, तदा मन्त्रा-त्मक-वेदार्थविचारे पूर्वमीमांसा नैव प्रमाणं भवितुमर्हति । अध्यात्मविचारदूरा सैषा ब्राह्मणार्थमीमांसा ईश्वरसाक्षात्कारसाधनादि-रहस्यविद्यास्तित्व-संस्कारशून्या सार्वलौकिक-परमपुरुषार्थ-चिन्तादविष्ठा वेदरहस्यार्थपरीक्षायां कथं प्रामाणिकीं वाणीमास्थातुं अधि-कुरुताम् ?

मन्त्रः

ऋचो मन्त्राश्छन्दोबद्धा ऋषीणां दृष्टयो भवन्ति । यमर्थमाध्याय यदर्थं शरीर-यात्रामचालयन् ऋषयः, यं च निजानुयायिनां उत्तरकालिकानां च निःश्रेयसाय लक्ष्य-त्वेन प्रत्यपादयन्, सोऽर्थः तत् प्रयोजनं तल्लक्ष्यं च ऋक्सूक्तसंहिताग्रन्थात् शक्यानि अवगन्तुम् । इमाश्च कवितापदवाच्याः सन्तु नाम, अपि तु नेमाः कविताः असत्-परिचितसाहित्य-सन्दर्भविशेषा इति मन्तव्यम् । न वा ते कवयः सर्वजनीनाः सर्वेषु देशेषु कालेषु अद्यापि दृश्यमाना इव काव्यनिर्मातारः इति युक्तं मन्तुम् । नेदमैतिह्य-

मात्रम् । चर्मचक्षुरगोचरान् लोकान् लोकाध्यक्षान् देवान् तत्सम्बन्धिनः सूक्ष्मान् धर्मान् कुशाग्रधीगम्यानि सत्यानि च सूक्तेषु गर्भितानि मन्त्रवर्णा एव बोधयन्ति । मर्यादाविशेषनिबद्धान् सूक्ष्मानिमान् लोकान् तद्देवांश्च साक्षादधिगन्तुं मानवः शरीरस्थ एव पारयेद् यदि गुप्तमध्वानं प्रवेष्टुमधिकारः सम्पाद्येतानेनेत्यार्षोऽयं रहस्यसम्प्रदायः । ऋच इमाश्च मन्त्रदृष्टयः कीर्त्यन्ते । ऋषिं मन्त्रद्रष्टारमाहुः । ऋषिर्न केवलं पश्यति, शृणोत्यपि । दृष्टमर्थं सत्यमाविष्कर्तुमपेक्षितं शब्दमप्यधिगच्छति । तस्मादृषिरतीन्द्रियार्थदर्शी कविपदवाच्यो भवति वेदे । सः क्रान्तदर्शी कविः श्रोताऽपि सत्यस्य । तस्मात् कवयः "सत्यश्रुतः" इति प्रसिद्धिर्वेदे । नेदमृषेर्दर्शनं श्रवणं वा लोकसामान्यं भवति । ऋषेरेषा दृष्टिरासाधारणी तथा श्रुतिरपि, याभ्यां प्रकाशिता कवितापि असाधारणी । रमणीयार्थप्रतिपादक-शब्दगुम्फितरसभावभरित-वीर्यवत्तमायाः सर्वोत्कृष्टाया अपि कवितायाः विलक्षणा मन्त्रकविता । अत एव न युक्तं वेदसूक्तकाव्यानां रसोत्तरसाहित्य-कविता-कोटावारोपणम् । अन्यादृशोत्कर्षो वेदसूक्तकवितेत्यस्यास्ति कारणम् । स च उत्कर्षः सूक्तानां मन्त्रात्मकत्वे प्रतिष्ठितः । विशिष्टा मन्त्रस्य शक्तिः । भवतु मन्त्रार्थो नातिगरीयान् असदृष्टेः, भवतु मन्त्रशब्दोऽपि नात्यन्त-काव्यशोभावहः, भवतु व्यञ्जितो भावो नातिगाढः । माऽस्तु परिस्फुटा छन्दोवाचकभङ्गी । तथाऽपि शक्तेर्न हानिः मन्त्रस्य । सेयं श्रद्धा वेदर्षिकालादारभ्य अद्यावधि भारतीय-आस्तिकजनहृदयेषु लब्ध-प्रतिष्ठेति नेह सन्देहगन्धोऽपि विद्यते । मन्त्रमधिकृत्येदमैतिह्यं उत्तरकालेषु आचार्यपुरुषैः तदनुयायिभिश्च रक्षितम् । तावती श्रद्धा मन्त्रमहिमनि रूढमूला यावत्या मन्त्रस्यार्थ-विचारो नावश्यकः, यतो मन्त्रशक्तिविजृम्भणं मन्त्रतात्पर्यग्रहणाधीनं न भवतीत्यपि मन्यन्ते चैके । सर्वपुरुषार्थसिद्धेरलौकिक उपायो मन्त्र इति बहोः कालादागतमिदं आर्षं मतम् । तथा चाहुः– "इष्टप्राप्त्यनिष्टपरिहारयोरलौकिक उपायो वेदः" इति । अत्र वेदशब्देन मन्त्र एव मुख्यो बोध्यः । कुत एवं मन्त्रमहिमा वर्ण्यते ? वेदर्षिभिरध्यात्म-विद्यैक-निरतैरपि गुप्तविद्यासु रहस्यतन्त्रेषु विचक्षणैश्चास्थितम् । अन्तरङ्गीयैरुपायैः बाह्यार्थाः साधयितुं शक्या इति तेषां मतम् । सह धीवृत्त्या शब्दस्तथा प्रयोगयोग्यः यथा सकलविधाः पुरुषार्थाः साधिताः स्युरिति सिद्धान्तस्तेषाम् । अत एव प्रायः सर्वेऽपि मन्त्रा याज्ञिके विनियोगे प्रथमाना अपि बहवः यज्ञादन्यत्र फलावाप्तये प्रयुज्यन्ते । एवं मन्त्राणां माहात्म्यं न केवलं चिरन्तनत्वे प्रतिष्ठितम्, किं तु ऋषिदृष्टत्वे शक्तिमत्त्वे

स्थितिरहितानां अनिवेशनानां उपवेशनरहितानां (प्रवहणस्वभावत्वात्) काष्ठानां अपां मध्ये निहितं निक्षिप्तं वृत्रस्य निण्यं निर्णामधेयं शरीरं आपः विचरन्ति विशेषेण पर्याक्रम्य प्रवहन्ति । इन्द्रशत्रुः वृत्रः (जलमध्ये प्रक्षिप्ते सति) दीर्घं तमः दीर्घनिद्रात्मकं मरणं यथा भवति तथा आशयत् सर्वतः पतितवान् । अत्र अप्सु मग्नत्वेन गूढत्वात् तदीयं नाम न केनापि ज्ञायते । तस्मात् निण्यं निर्णामधेयमिति सायणीयं विवरणम् । का नाम विवक्षा? पश्यामस्तावत् । इन्द्रो वृत्रं जघान, तस्य देहपाते तमः शरीरं तस्य दीर्घनिद्रामवाप । तददृश्यमभवत् । गाढमधः पतने उपरि निरन्तरं अपां प्रवाहे, तच्छरीरमन्तर्हितम् । अत्र अदृश्यमभवदित्युक्तौ ऐतिहासिकपक्षस्य आधिभौतिकपक्षस्य वा का हानिः? मेघेषु इन्द्रायुधेनाहतेषु तत्र बन्धिता आपो निर्मुक्ता भवन्ति । तासामावरकं वृत्रशरीरमधः पतति, उपर्यापः प्रवहन्ति, तस्मादन्तर्हितमदृश्यं एव तच्छरीरम् । कुतस्तर्हि नामशून्यमित्यभिप्रैति स सायणः? सरलेनैव पथा अर्थसामञ्जस्ये सिद्धे "गूढत्वात् तस्य नाम न केनापि ज्ञायते" इति कुतोऽयं द्राविडप्राणायामः? न वा निण्यपदस्य निर्णामधेयपर्यायत्वं निघण्टुपठितम् । यास्क एनामृचं उदाहार्षीत्, तत्र "निण्यं निर्णामम्" इत्याह । निर्णामपदार्थः दुर्गाचार्य-व्याख्यानाद् अवगम्यते "येनासौ नीचैर्नमति" तं प्रदेशं विचरन्तीति दुर्गः । नीचैर्नमनेन गन्तव्यं निम्नं स्थलं निण्यमिति विवरणं अनुस्वारान्तस्य "निर्णामं" इति पदस्य युक्तं भवति । नामधेयार्थे तु "निर्णाम" इति नकारान्तनपुंसकलिङ्गं स्यात्, न तु निर्णामं इति अनुस्वारान्तम् । तस्मादत्र यास्कमेवं भ्रमादुदाजहार सायणः । एवं व्याख्याय कथं निर्णामधेयोऽभूद् वृत्र इति चेत् सोऽत्यन्तं तथा मृतः यथा तस्य नामापि स्मृतिपथादपगतं किल! एवं स्वपक्षस्यानपेक्षितमपि क्लिष्टं व्याख्यानं शतशो दृश्यते सायणभाष्य इत्यलं विस्तरेण ॥

निण्यं अन्तर्हितमित्यसन्दिग्धम् । सर्वत्र सायणः निघण्टुपठितार्थमेव स्वीकृत्य यास्कं च प्रायश उदाहरति । अन्तर्हितपदार्थः गूढरहस्याद्यपर-पर्यायो बोध्यः । कौत्सस्य अग्निसूक्तस्य व्याख्याने 'निण्यं' रहस्यं 'अन्तर्हितं' इत्येवाह— 'क इमं वो निण्यं आचिकेत वत्सो मातॄर्जनयत स्वधाभिः" (१. ९५. ४.) । ऋषिः पृच्छति, युष्मासु को वा रहस्यमग्निं जानाति यो वत्सः स्वधापदवाच्य-स्वधारणसामर्थ्यधर्मैः मातॄरजनयदिति । एवं न केवलं असुरे वृत्रे अन्तर्हिते निण्यपदं प्रयुक्तम्, अपि तु अप्सु वनेषु वा गूढमग्निमावेद-

यितुमपि प्रयुज्यते । क्वचित् किमपि स्थानं कमपि लोकं वा गूढं अभिधातुं निण्यपदं प्रयुक्तम् । काश्यपः सोमं सम्बोधयति– "तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः" (९. ९२. ४.) । अत्र रहस्यं स्थानं सोमस्योल्लिखितं यत्र त्रयस्त्रिंशद्देवाः स्वधाभिस्तं मृजन्तीति मन्त्रस्य उत्तरार्धे पठ्यते । जीव आत्माऽपि अन्तर्हित उक्तः । अत्र दीर्घतमसो मन्त्रदृष्टिर्भवति– "न विजानामि यदि वेदमस्मि निण्यः सन्नद्धो मनसा चरामि" (१. १६४. ३७.) । वासिष्ठमण्डले शाखा-सहस्रात्मतया विततं तद्रहस्यं 'निण्यं' हार्दसाक्षात्कारैः सत्यदर्शनैरुपायैरधिगम्यत इत्युक्तम् । "त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभिसञ्चरन्ति" (७. ३३. ९.) । वसिष्ठः मारुते सूक्ते मरुतां रूपवाहनादीनि साश्चर्यं पश्यन् धीर एव इमानि (निण्यानि) रहस्यानि जानाति इत्याह– "एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार" (७. ५६. ४.) । पुनश्चान्यत्र वसिष्ठः मित्रावरुणौ सम्बोध्य प्राह– 'अस्माकं रहस्यानि स्तोत्राणि युवयोर्विदितानि' इति । 'न वां निण्यानि अचिते अभूवन्' (७. ६१. ५.) । "निण्यानि रहस्यान्यपि स्तोत्राणि" इति सायणः । यत्र प्रत्यक्षं गूढं उद्देशपूर्वकं गोपितं रहस्यं वा तदभिधातुं निण्यपदं प्रयुक्तं वेदे इति निदर्शनायोक्तान्युदाहरणानि पर्याप्तानि । "अमूरा विश्वा वृषणा" इत्यस्या ऋचः (७. ६१. ५.) तात्पर्ये परीक्षिते, रहस्यं मन्त्रार्थं विजानन्ति देवाः यन्न किमपि तेषां दृष्टेरपवारयितुं शक्यं, यच्च रहस्यं जनसामान्याद् बहिर्मुखबुद्धेः रक्षणाय आच्छादितं इति तात्पर्यं स्पष्टं भवति । अरविन्दश्रीचरणैः वामदेवसूक्तस्तथा "निण्या वचांसि" इति वाक् निस्संशयं वेदभाषारहस्यमुद्धाटयतीति निरूपितम् । सेयं मन्त्रदृष्टिः भवति वामदेवस्य– "एता विश्वा विदुषे वेधो नीथानि अग्ने निण्या वचांसि । निवचना कवये काव्यानि अशंसिषं मतिभिर्विप्र उक्थैः" (४. ३. १६.) । सायणीयविवरणार्थानि पदान्युपयुज्य अस्यार्थोऽत्र समस्यते । वेधः विधातः हे अग्ने, विदुषे कवये (तुभ्यं) नीथानि (फलप्रापकाणि, सुप्रणीतानि वा) "निण्या" गूढानि निवचनानि नितरां वक्तव्यानि काव्यानि कविभिः क्रान्तदर्शिभिः मेधाविभिः कृतानि "एता विश्वा वचांसि" एतानि सर्वाणि वाक्यानि "मतिभिः उक्थैः" मननीयैः स्तोत्रैः शस्त्रैश्च (सहितः) विप्रः प्राज्ञोऽहं अशंसिषं अवोचं, तानि सेवस्व । अन्यश्च मन्त्र इह वामदेवस्योदाहार्यः । तत्र इन्द्रेण क्रियमाणं सोमपानं रहसि निर्वर्त्यत इति दृष्टान्तोदाहरणेन प्रतिपाद्यते, यथा ऋषिः वेदितव्यानर्थान् रहसि साधयति, तथा सोममन्यैरविदितमेव रहसि पिबतीन्द्रः

१३२ अविज्ञानप्रदिष्टं हि हविर्नेहेत दैवतम् ।
तस्मान्मनसि संयम्य देवतां जुहुयाद्धविः ॥
१३३ स्वाध्यायमपि योऽधीते मन्त्रदैवतविच्छुचिः ।
स सत्रसदिव स्वर्गे सत्रसद्भिरपीड्यते ॥"

अथेदमवधारणीयम् । यद्यपि वेदमन्त्रस्य पवित्रत्वशक्तिमत्त्वादिकं मन्त्रदृष्टेः गूढार्थभूत-आध्यात्मिकादि-तत्त्वमूलकमेव भवति, तथाऽपि बाह्यार्थपक्षेऽपि यज्ञादन्यत्रोपयोगाय कल्पते । इदमेव मूलं भवति तस्य ऐतिह्यस्य, येन अलौकिकेनोपायेन लौकिका अर्था अपि साध्यन्त इति रूढा प्रतीतिः । इदमेव मूलं शौनकीयऋग्विधानादिग्रन्थस्य, यत्र विविधपुरुषार्थसाधनोपयोगित्वेन कल्पाः प्रोक्ताः । इदमपि तथ्यं यद्यास्केनोच्यते— "उच्चावचैरभिप्रायै ऋषीणां मन्त्रदृष्टयो भवन्ति" इति । तदेव बृहद्देवताप्याह । 'अर्थेप्सवः खल्वृषयः छन्दोभिर्देवताः पुरा । अभ्यधावन्निति च्छन्दोमध्ये तत्त्वाहुर्महर्षयः' (८. १३७) इति । यद्येवं लौकिकार्थानुद्दिश्यापि मन्त्राः प्रवृत्ताः, कथं तर्हि परमपावनो वेद अध्यात्मनिष्ठाविशेषरहस्यानां निक्षेप इत्युच्यत इति चेन्नेहासङ्गतिः । प्रागेवोक्तम् गूढार्थ एव परमार्थो वेदानां स्थूलार्थस्तु कर्मसु प्रयोजनवान् पुरुषार्थसाधनेषु वेति । यद्यप्यापातत ऋषीणां अभिप्रायेषु उच्चावचत्वं स्पष्टमेव भवति, तथाऽप्यन्तरर्थविमर्शे शपथाभिशाप-निन्दा-प्रशंसादीनां आध्यात्मिकनिष्ठाचरित्रसम्बन्धित्वमवदातं भवेत् । स्थूलविचारिणां पाश्चात्यानुयायिनां वा पक्षे ऋषीणां वैमत्यमेवोपस्थितमिति नात्र चित्रम् । यद्यपि न वयं सर्वेऽपि मन्त्रद्रष्टारः समकालिकाः समाननिष्ठादशाः मन्त्रान् अदर्शन्निति ब्रूमहे, तथाऽपीदं तथ्यं प्रतिपादयामः । ऋषयः सर्वेऽपि समानमेव सङ्केतपदार्थसमुदायं समानमेव बाह्याभ्यन्तरयागं समानमेव भूरादिलोकसंस्थानं समानमेव देवतातत्त्वं समानमेव परमं पुरुषार्थं च विज्ञाय स्वनिष्ठादशा-विशेषापेक्षितार्थ-साधनाय देवान् अयजन्निति सङ्केतरूपगूढार्थ-तत्त्वान्वेषणपराणां प्राज्ञानां अयं समीचीनः पन्थाः परिस्फुटो भवेदिति दिक् ॥

ऋचः प्रमाणं वेदरहस्ये

अथ तां रहस्यभाषामधिकृत्य विचार्यते, यत्र गोपितो भवति मन्त्रार्थः । तच्च रहस्यं सङ्केतरूपेण केन वाऽप्याकारेण तथाऽऽच्छादितं यथा स्थूलधियां सङ्केतार्थोपस्थिति-

शङ्काऽपि न जायते, यत् सङ्केतशब्दाः बाह्यार्थाभिधायकाः सुतरां उपपन्ना एव प्रायो लक्ष्यन्ते । सङ्केताश्च यागसम्बन्धिनः लौकिकाः पदार्थाः ब्रह्माण्डप्रकृति-विलासितानि वा भवन्ति । अथवा कश्चन मूढधीः मन्त्रप्रतिपादिता अग्न्यादयो देवाः केऽप्यमानुषाः पुरुषा भूताग्नि-वाय्वादित्य-मरुत्-पर्जन्यादिवेषेण प्रत्यक्षदृश्येनावस्थिता इति वा प्रतीयात् । तदिह प्रथमं किं तद्रहस्यं भाषितं वेदे द्रष्टव्यम्? यदि वेद एव रहस्यवागुल्लिखितेति निश्चयो लभ्यते, ततः परं कथं तद्गोपनं साधितमिति सङ्केतपदार्थव्यवस्थां परीक्षामहे ॥

तपोनिष्ठानामृषीणां देवताभिः सह व्यवहारे तदर्थप्रकाशने च रहस्यभाषाव्यवस्थापितेति निर्णेतुं प्रमाणमस्ति चेत् तत् प्रथमं मन्त्रदृष्टिष्वेव स्यात्, ऋषिवाक्येषु एव द्रष्टव्यम् । ऋग्वेदसंहितायां रहस्यपदार्थप्रसङ्गेषु किमुद्दिश्य रहस्यार्थपरं पदं प्रयुज्यत इति विचार्यमाणे, कोऽप्यसुरो देवो वा किमपि स्थानं कोऽपि लोको वा तिरोहितो न दृश्यत इति वक्तव्ये अन्तर्हित-गूढ-रहस्य-अदृश्याद्यपरपर्याय-निण्यपदं प्रयुज्यते । क्वचिद्देवतासान्निध्यसम्पादिकां वाचं निर्दिश्य प्रयुज्यमानं "नाम" अपि हृदि गुहायां गूढमन्तर्हितं रहस्यं इति वा कीर्त्यते । वेदितव्यानि ज्ञानानि स्तोत्रपराणि वचांसि च निण्यपदार्थभूत-रहस्यानीत्युच्यते । निरुक्तपठितानां षण्णां अन्तर्हितनाम्नामेकं निण्यपदम् । इदं च प्रसङ्गवशात् गोपितं अन्तर्हितं तिरोहितं अदृश्यं रहस्यं इति प्रायः समानार्थेषु वेदे प्रयुक्तमीक्षितव्यम् । इदं च पदं सम्प्रति परीक्ष्य वेदर्षयः स्वप्रयुक्तभाषायां किमपि रहस्यं निक्षिप्य बहिर्मुखमतिभ्योऽपक्वेभ्यश्च गोपायाञ्चक्रुरिति निरूपयिष्यामः । इदं चात्र नः सुदैवम्, यत् सन्दर्भवशात् सविमर्शमविमर्शं वा इच्छानुसारेण वेदपदानां अर्थान् व्याचक्षाणः सायणः निण्यपदस्य एकरीत्या अन्तर्हितं अदर्शनं गतं वेत्यर्थं व्याचष्टे । निण्यपदार्थं साधु व्याकुर्वन्नपि प्रसक्तवाक्यतात्पर्यं स्वोद्देशस्यानपेक्षितमपि यथेच्छं प्रतिपादयतीति प्रथमं दर्शयिष्यामः । निण्यपदप्रयोगस्थलेषु एकत्र अन्यथा व्याख्यासीत् । तथा व्याख्याने प्रमाणं न दत्तम्, नापि प्रयोजनम् । प्रमाणं दत्तं चेत् तत्प्रमाणवचनं अन्यथा गृहीतम् । "निण्यम्" निर्णामधेयमित्याह । हिरण्यस्तूपस्य ऐन्द्रेषु सूक्तेषु इयं ऋग्भवति– "अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् । वृत्रस्य निण्यं विचरन्त्यापः दीर्घं तम आशयदिन्द्रशत्रुः" (१. ३२. १०.) । अत्र स्थूलोऽर्थः सायणीयपदप्रयोगानुपयुज्य दीयते । अतिष्ठन्तीनां

चेत्यवगन्तव्यम् । अपरं च, मन्त्राणां पावनत्व-वीर्यवत्त्वादि-धर्मास्तेषां नादसत्त्वात्मक-देवताशरीरभूतत्वादित्याहुरेके । एवमपि स्यान्नाम । वस्तुतस्तु महिमा मन्त्रस्य तत्प्रादुर्भावप्रकारायत्त इति मन्त्रवर्णेभ्य एवावगम्यते । ऋचां स्थानं अक्षराख्यं परमं व्योम यत्र विश्वेषां देवानां आवासः, यस्तन्न जानाति तस्य ऋचा कार्यं न भवतीत्येवमर्थका दीर्घतमसो मन्त्रदृष्टिर्भवति– "ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते" (१. १६४. ३९.) । तस्मिन्नेव सूक्तेऽन्यत्रेयमृग्भवति– "चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति" (१. १६४. ४५.) । गहनार्थोऽयं मन्त्रः । मन्त्रद्रष्टा कविः हृदयाख्यमन्तस्समुद्रमवगाह्य तुरीयाख्यं धाम देवानां साक्षात्कृत्य दृष्टान् सत्यार्थान् आद्यां वाचमुपादाय श्रुतैः शब्दैः आविष्करोति । तस्मादुत्तमपदादक्षरात् प्रस्थाय आगच्छन्त्यास्तस्या वाचः चत्वारि स्थानानि भवन्ति । तत्र त्रीणि धामानि रहस्यानि गुहानिहितानि मानुषश्रवणस्यागोचराणि तस्याश्चतुर्थी अवतरणभूरेव मानुषी वाक् । चत्वार्यपि वाग्धामानि ऋषेरन्तरङ्गदीक्षितस्य मनीषिणः विदितानि, नान्यस्य । एवं मन्त्रस्य द्रष्टारः कवयः सत्यश्रुतः मन्त्रान् न कल्पयामासुः, किं तु अद्राक्षुः इति प्रसिद्धिः । ऋचां वाचां मूलस्थानभूतस्य देवतानामायतनस्य परमस्य व्योम्नः अकृतकत्वात् ततः प्रादुर्भूतवेदमन्त्रवर्णेषु नित्यत्वं उपचर्यते । मन्त्रदर्शिन ऋषेर्जन्मनः प्राक् मृतेः परं च सिद्धमेव परमं व्योम । तस्मात्र तन्मन्त्रद्रष्टर्यधीनं भवति, मन्त्रदर्शनं तु तस्मिन्नधीनं बोध्यम् । यद्यपि मन्त्रशब्दार्थाववियोज्यौ परमाकाशे सिद्धौ भवतः, तत्प्रादुर्भावस्तु ऋष्यधिकारसम्पत्तिसापेक्षो बोध्यः । अत एव ऋक्संहितायां शश्वदृषेर्मन्त्रकृत्त्वमुल्लिखितं दृश्यते– "ऋषेर्मन्त्रकृतां स्तोमैः" (९. ११४. २.) "हृदा यत्तष्टान् मन्त्रानशंसन्" (१. ६७. २.) इत्येवंजातीयकैः मन्त्रवर्णैः स्पष्टं कृतकत्वे मन्त्राणां अवगम्यमाने, कथं नित्यो वेद इति मा भूच्छङ्का । प्रागुक्तविधया ऋचां मूलभूतामाद्यां वाचं परमव्योमसंस्थामधिकृत्य सा नित्येत्याह मन्त्रवर्णः । सर्वस्यापि वेदस्य नित्यत्वं परमव्योमप्रभवत्वात् कीर्तितम् । "तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम्" (८. ६४. ६.) । इति ऋचो व्याख्याने सायणभाष्यमपि एवमुपपद्यते । "नित्यया उत्पत्तिरहितया वाचा मन्त्ररूपया" इति सायणः । अस्मदुक्तरीत्या नानुपपत्तिर्वेदनित्यत्व-ऋषिकर्तृकत्वयोः । अत एव महाभाष्य-

कारः, 'तेन प्रोक्तम्' (४. ३. १०१.) इति पाणिनीयसूत्र-व्याख्याप्रसङ्गे "प्रोक्तग्रहणमनर्थकम्" इत्यारभ्य अन्ते ब्रूते— "छन्दोर्थं तर्हीदं वक्तव्यम् । न हि छन्दांसि क्रियन्ते नित्यानि छन्दांसि । छन्दोर्थमिति चेत् तुल्यम् । .... ननु चोक्तम् नहि छन्दांसि क्रियन्ते नित्यानि छन्दांसीति । यद्यप्यर्थो नित्यः यात्वसौ वर्णानुपूर्वी सा अनित्या । तद्भेदाच्चैतद्भवति" । अत्र कैयटस्य टीका 'तद्भेदादानुपूर्वीभेदात्' 'प्रपूर्वो वचिः प्रकाशने अध्यापनरूपे वा' अत्र वर्णानामानुपूर्वी न नित्या इति वेदशब्दार्थ-नित्यत्वमभ्युपगच्छन् भगवान् पतञ्जलिः पदवर्ण-वाक्यबन्ध-व्यवस्थानित्यतां नाङ्गीचकार । सा च व्यवस्था प्रकाशनरूपा ऋषिकर्तृका । एवं वेदानां कृतकत्वाकृतकत्वयोरुपपत्तिर्द्रष्टव्या । सर्वथा ऋचामसाधारण-कवित्वरूपं मन्त्रत्वं उदाहृतैर्विरूप-दीर्घतमसोर्मन्त्रवर्णैः सुगमं भवति । परं शतश उदाहरणानि वाचो महिमानुवर्णनपराणि ऋक्संहितायां द्रष्टव्यानि, विस्तरभयाद् इह नोल्लिख्यन्ते ॥

सम्प्रति ऋचां बाह्यार्थः सायणभाष्यादवगम्यते । रहस्यार्थस्तु सङ्केतपदार्थायत्त इति प्रागुक्तः । दुरवगमो मन्त्रार्थ इति निरुक्तकारोऽप्याह । तपःस्थितानां ऋषीणां ब्रह्म-पदवाच्यो मन्त्रः प्रत्यक्षोऽभवत् नान्यथेति यास्कस्याभिप्रायः । तथा चाह— 'तदेनान् तपस्यमानान् ब्रह्म स्वयम्भु अभ्यनार्षत् तदृषयोऽभवन् तदृषीणां ऋषित्वम्' (२. ११.) । मन्त्रार्थो दुरूह इत्यन्यत्राह— "तस्मात्तपसा पारमीप्सितव्यम्" (१३. १३.) इति । वेदार्थाधिगमाय तपस ऋते नास्ति शरणम्, तपोनिष्ठस्यर्षेर्मन्त्रः प्रत्यक्षो भवतीति च यास्कमतं इति विशदं भवति । अस्मदुक्तमन्त्रप्रादुर्भाव-तन्नित्यत्व-कृतकत्वानि न केवलं मन्त्र-वर्णैर्निर्णीतानि, किं तु निरुक्तकारेणापि समर्थितानि भवन्ति । यास्कोक्तीरेव समर्थयति बृहद्देवता । 'न प्रत्यक्षमनृषेरस्ति मन्त्रम्' (नपुंसकमार्षम्) इत्याह (८. १२९.) ऋषेर्दर्शनसामर्थ्यं, त्रय्याः प्रयोजनम्, सम्यगनुष्ठितानां कर्मणां फलमित्येवमादयो बृहद्देवतायां प्रतिपादिताः वेदरहस्यार्थपक्षं पोषयन्तीति न संशयः । अत्रेमे श्लोका उदाहार्याः ॥

७. १३० "योगेन दाक्ष्येण दमेन बुद्ध्या बाहुश्रुत्येन तपसा नियोगैः ।
उपास्यास्ताः कृत्स्नशो देवताया ऋचो ह यो वेद स वेद देवान् ॥
१३१ मन्त्राणां देवताविद् यः प्रयुङ्क्ते कर्म कर्हिचित् ।
जुषन्ते देवतास्तस्य हविर्नादेवताविदः ॥

इति । "कविर्न निण्यं विदथानि साधन् वृषा यत् सेकं विपिपानो अर्चात्" (४. १६. ३.) ॥

निण्यपदं रहस्यार्थं सोदाहरणं व्याख्यातं, येन वेदभाषायां रहस्यं ऋषिभिः निक्षिप्तमित्यसन्दिग्धमवगतं भवति । तच्च रहस्यं क्वचिद्देवता क्वचिदसुरः अन्यत्र ज्ञानं सत्यं कमप्यर्थमुद्दिश्य भवतीति न विस्मार्यम् । ऋक्संहितायां अन्यानि च पदानि रहस्यार्थद्योतकानि प्रयुज्यन्ते । अत्र द्वित्राण्युदाहरणानि दीयन्ते, यतोऽपि वेदमन्त्रेषु रहस्यं निक्षिप्तमिति ज्ञायेत । गुहा-गुह्य-अपीच्यानि क्वचित् प्रतीच्यं अपि रहस्यार्थे प्रयुज्यन्ते । स्वगुण-क्रियाद्योतकैः उपयोग-विशेषायत्तैः उक्थ-शस्त्र-स्तोम-गीर्-वाग्-वाणी-ब्रह्म-मन्त्रादिपदैः ऋग् व्यवह्रियत इति विदितचरमेवैतत् । अपि तु सन्ति मन्त्राः यत्र गूढभाषाकलितां स्तोत्रवाचमावेदयितुं नामपदं प्रयुज्यते । "नाम" इत्यभिधान-वाचकं नामधेयमित्यत्र न विवादः । वेदे देवतायाः नाम न केवलं अन्याभ्यो देवताभ्यो व्यावर्त्य कामपि देवताव्यक्तिं निर्देष्टुं प्रयुज्यते । किं तु प्रकृतं देवताव्यक्ति-विशेषं विज्ञापयितुं सन्निधापयितुं वा या शक्तिरपेक्षिता भवति तां बिभर्ति तन्नाम । यतः तद्देवेभ्यो नमनाय साधनं भवति ततस्तन्नामेत्युच्यते । नमनसाधनं नामेति सायणीयव्याख्यानेऽपि दृश्यते । तस्मान्नामपदं देवताराधन-साधनभूतं सर्वाङ्गप्रणामं आविष्कुर्वन्तं मन्त्रदृष्टिरूपं स्तवं लक्षयतीति ग्राह्यम् । "नम उक्तिं विधेम" इत्यादावपि देवतां प्रति सर्वथा प्रह्वत्वं अनहङ्कृतेर्देवात्मभावं सम्पिपादयिषोर्भक्तस्यपेक्षेयम् । तस्मात् नमनसाधनं 'नाम' स्तोत्रपर्यायतया वेदे प्रयुज्यमानं ऋग्भ्य एवावगम्यते । तत्रापि तच्च नाम क्वचित् गुहायां निहितं गूढं रहस्यमिति वर्ण्यते । क्वचिदपीच्य-शब्दविशिष्टं नामपदं प्रयुक्तम् । अपीच्यं निण्यमिव अन्तर्हितनामैव भवति । नैकेषु मन्त्रेषु रहस्यं नाम रहस्यं स्तोत्रं वा अपीच्यनामप्रयोगेणावेदितं लक्ष्यते । गृत्समदस्य मन्त्रदृष्टिर्भवति— "तदस्यानीकं उत चारु नाम अपीच्यं वर्धते नप्तुरपाम्" (२. ३५. ११.) । अपां वत्सस्य शोभनं मुखं रहस्यं नाम अन्तर्हितं स्तवात्मकं नाम च वर्धते इति भावः । स्थूलपक्षे यः कोऽप्यस्तु नामशब्दार्थः, सोऽपीच्यपदार्थ-विशिष्ट इति तु असन्दिग्धं भवति । नाभाक ऋषिः वरुणं स्तौति— "यो धर्ता भुवनानां य उस्राणां अपीच्या वेद नामानि गुह्या । स कविः काव्या पुरु रूपं द्यौरिव पुष्यति नभन्तामन्यके समे" (८. ४१. ५.) । अत्र इमानि पदान्यवधेयानि— 'अपीच्या नामानि गुह्या कविः काव्या' इति । इदं च तात्पर्यं

क्षणीयम् । यो वरुणः सर्वेषां भुवनानां धारकः देवाधिष्ठानभूत-रश्मिसमूहोपलक्षित-ज्ञानप्रकाशानां रहस्यानि गुहाहितानि नामानि (स्तोत्राणि वा) जानाति, स कविः क्रान्तदर्शी काव्यानि कविकर्माणि पुष्यति, यथा द्यौः पुरुरूपं पोषयतीति सङ्क्षेपार्थः ॥

अस्मिन्नेव सूक्ते– "स समुद्रो अपीच्यस्तुरो द्यामिव रोहति" (८. ४१. ८.) । इति अन्तर्हितो रहस्यसमुद्रो वरुण इत्युक्तम् । कविर्भार्गव ऋषिः मातापित्रोः रहस्यं नाम पुत्रो धारयतीत्याह– "ऋतस्य जिह्वा……… दधाति पुत्रः पित्रोरपीच्यं नाम" (९. ७५. २.) "सदा ते नाम स्वयशो विवक्मि" (७. २२. ५.) इति वासिष्ठमन्त्र-व्याख्याने "तव नाम स्तोत्रं सदा सदैव ब्रवीमि" इति सायणः । पुनश्च "मर्त्या अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः ॥" (८. ११. ५.) 'भूरि नाम मनामहे' विस्तृतं स्तोत्रं जानीम इति सायणः ॥

बहवः सन्ति मन्त्रवर्णाः संहितायाम्, यत्र नामपदं देवताव्यक्ति-विशेषं प्रति विज्ञापनाय प्रयुज्यते, ऋचं स्तोत्रवाचं द्योतयितुंचोपयुज्यते । द्विधाऽपि तद्रहस्यं अन्तर्हितं गहनं वेत्यर्थे वर्तते । कदाचित् प्रतीच्य-पदमपि तिरोहित-रहस्य-गोपिताद्यर्थे व्यवहृतं पश्यामः । परं तु आभिमुख्ये अन्तर्मुखत्वे वा लोक इव वेदेऽपि भूयः प्रयुक्तं भवति । अन्तर्मुखत्वार्थे प्रत्यगात्मादिः प्रयोगोऽद्याऽपि वर्तते । प्रत्यङ्मुख-पराङ्मुखशब्दौ अन्तर्मुख-बहिर्मुखवाचकौ विदितचरौ । उपन्यस्तमिदं सर्वं वेदभाषायां रहस्यमस्तीति बह्वृचसंहिता-प्रमाणपूर्वकं निरूपयितुं पर्याप्तं भवेद्विचाररसिकानां जिज्ञासूनाम् ॥

अथ तद्रहस्यं परीक्ष्यते । तत् कीदृशं, केनाच्छादनेन अन्तरर्थभूतं तत् संव्रियते? प्रागुक्तं सङ्केतपदार्थरूपं तदावरणमित्याचक्ष्महे । यद्यपि अन्तरर्थः परमार्थो गोप्यविद्या-प्रवृत्तानां अध्यात्मनिष्ठानां विदित उपयुक्तश्च भवति, बाह्योऽर्थः सङ्केतरूपः स्थूलः कर्मपराणामुपयुक्तश्चेत्युक्तं, तथाऽपि बाह्योऽर्थः सर्वत्र सङ्केतरूपेणैव साध्यत इति नियमो न भवति । सङ्केत-निरपेक्षमेव बाह्याभ्यन्तरार्थद्वयं मन्त्राणामनेकत्र निष्पन्नं भवति । तत्र मुख्यं साधनं कतिपयपदानां द्व्यर्थता बह्वर्थता वा प्रसिद्धा वेदे । अत्रेमान्युदा-हरणानि भवन्ति– 'धीः' इदं च पदं लोके वेदे च बुद्धिवाचकं प्रसिद्धम् । धी-शब्दः कर्मार्थेऽपि गृह्यते वेदे । तस्मादन्तरर्थे सर्वत्र ज्ञानवृत्ति-विशेषतयैव व्याख्यायते । बाह्ये तु धियः कर्माणीति व्याचक्षते, न तु सर्वत्रेति नियमः । केतुरिति प्रज्ञापकोऽन्त-र्ज्ञान-विलासविशेषः गूढार्थपक्षे, बाह्यपक्षे तु केतूनां धात्वर्थानुगमेन प्रज्ञापकत्वे प्रोक्तेऽपि

अत्यन्तस्थूलतया रश्मिभिः प्रकाशदानात् तेषां प्रत्यक्षं जगत् प्रति प्रज्ञापकत्वाच्च केतवो रश्मय उच्यन्ते। अत्रापि न नियमः, नैकः केतुपदार्थः कर्मपरव्याख्यातॄणाम्। 'श्रवः' इदं च शृणोति-धात्वर्थसम्बन्धिनां श्रुति-श्रोत्र-श्रवणादीनामेकं पदम्। अन्तःश्रवणं दिव्यं वा, देवतानुग्रहाभिष्ठाविशेषलब्धाज्ज्ञानबलावेशाद्वा सिद्धं श्रवणं इति रहस्यसम्प्रदायार्थः। स्थूलपक्षे कीर्तिरिति स्यात् न्यायतः, कीर्तेः सर्वत्र श्रूयमाणत्वात्। क्वचिदन्नमपि व्याचष्टे सायणः, पुनरिहापि नास्ति नियमः। 'क्रतुः' प्रज्ञा, अध्यवसायात्मकं प्राज्ञमिच्छाबलं वा सर्वत्र अन्तरर्थप्रतिपत्तौ। स्थूलपक्षे तु न नियमः। क्वचित् प्रज्ञा क्वचित् याज्ञिकं कर्म, अन्यत् किमपि वेच्छानुसारेण व्याहरति सायणः। 'ऋतम्' रहस्यार्थाधिगमे प्रधानतममिदं पदं, अन्तर्हितानां वेदार्थानां अधिगमाय प्रथमं द्वारमिति वक्तव्यम्। सत्यं आविर्भूतं सत्यं वा तद्धर्मो वा ऋतपदेनोच्यते, नान्यथा गूढार्थप्रकाशनपद्धतौ। स्थूलपक्षे क्वचित् ऋतमुदकं भवति, यज्ञो भवति, अन्यत्र अन्यत् किमपि भवति, किं वा न भवेन्निरङ्कुश-कर्मपरता-प्रतिपादनोत्साहसमीरिते सायणीये भाष्ये? एवमन्यानि पदान्यपि सङ्केतरूपं विनैव बाह्याभ्यन्तरार्थ-साधकानि वर्तमानानि यथावसरं ऋचां व्याख्यानेषु प्रसज्यन्त इति नेह विस्तर इष्यते। इदमत्रावधेयम्। इदमेव महद्बलं अन्तरर्थविवरणसरणेः, यद् ऋतादिपदानां एकैकस्यापि एकरूपतया नियमेनार्थग्रहणात् सर्वत्र गूढार्थानुसारेण तात्पर्यसङ्गतिः सुलभा लक्ष्यते। स्थूलपक्षरीत्या तु बहुषु स्थलेषु न केवलं भावदारिद्र्यं किं तु तात्पर्यमसङ्गतं च भवतीति पुरस्ताद्व्याख्याने दिङ्मात्रं वा प्रदर्शयिष्यामः॥

अथ सङ्केताः। ऋतादिपदान्यसङ्केतपदान्यपि अन्तरर्थसाधनान्युपपादितानि। अन्यानि पदानि सङ्केतरूपाणि गवाश्वघृतादीनि वर्तन्ते। एषामेकैकमपि आन्तरस्य प्रपञ्चस्य सत्यस्य भावस्य पदार्थस्य वा बाह्यं सङ्केतरूपं ज्ञेयं भवति। अत्र उदाहरणानि भवन्ति। 'गौः' इति विशिष्टं आद्यं पदम्। यद्यपि लोक इव वेदेऽपि गोपदं रश्मिः वाक् चतुष्पाद्विशेषः इत्याद्यर्थेषु वर्तते, तथाऽपि गूढार्थपक्षे किरणोपलक्षित-अन्तःप्रकाशार्थे प्रयुज्यते। तस्य सङ्केतः गौरिति चतुष्पाद्बाह्ये ग्राह्यः। यद्यपि गोपदस्य श्लिष्टतया द्व्यर्थः सिध्येत्, तथाऽपि सङ्केतरूपैव गौर्ग्राह्या, गोपर्यायधेन्वादीनां गोविकार-दुग्ध-घृतादीनां च सङ्केतरूपतया मन्त्रवर्णेषु प्रयोगबाहुल्यात्। तादृशस्थलेषु सङ्केतं उज्झित्वा तात्पर्यान्वेषणे लाभस्तु असत्यः शोचनीयश्च भवेत्। मन्त्रद्रष्टार ऋषयः

असम्बद्धप्रलापिन उन्मत्ता इति वा सिध्येत् । 'अश्वः' बलस्य सङ्केतः अद्यतने युगेऽपि नव्यानां व्यवहारे इयदश्वबलमिति बलप्रमाणगणनायां आहुः । इदं च बलसङ्केतभूतत्वं अश्वस्य चिरन्तनमिति स्मार्यम् । 'आपः' जीवनरसः तच्छक्तिविशेषाणां सृष्टिकार्ये-स्थितानां विश्वमूलतत्त्वशक्तीनां च सङ्केतः । 'नद्यः' 'सिन्धवः' सर्जनपोषणशक्तीनाम् । 'समुद्रः' अखण्डसत्त्वस्वरूपं, यस्मादुदेति सूर्यात्मा सत्यः । 'पर्वतः' पर्ववान् सानुमान् सृष्टस्य भूम्यादेर्जगतः बहुप्रस्थस्य उपर्युपरि सानव इवावस्थितस्य सङ्केतः । 'गुहा' रहस्यस्थानस्य, सर्वभूतमूलस्थानभूतस्य हृदयस्य सङ्केतः । इमानि बहिरुपस्थितानि वस्तु-रूपाणि वेदकविभिः स्वोद्दिष्टानर्थान् आविष्कर्तुं निरायासेनोपयुक्तानीति सावधानाव-लोकने स्पष्टं भवेत् । अकृत्रिमधियां आदि-कवीनां अन्तरङ्गेषु समुद्रादीनामखण्डसत्त्व-स्वरूपादिभिः पदं कृतमिति नात्र चित्रम् । तथा च, अपरिमेयत्व-गाम्भीर्यादिरखण्ड-द्रव्यसमृद्धिर्वा समुद्रस्य, निरन्तर-वहनाप्यायनादिशीलता सिन्धूनां, जीवनाधारता वा अपां, एवमन्येषामभितः सतां चराणां स्थिराणां वा गुणक्रियाविशेषाः सर्गस्य मूल-तत्त्वानि सूक्ष्मगहनप्रदेशेषु विगाह्य अन्तरे प्रकृतौ देवताकार्य-विलसितानि पश्यतामृषीणां स्वानुभवसदृशाः सङ्केता अभूवन् । परदैवतं प्रति यात्रायां वेदकवेर्दर्शनप्राप्तानां सत्या-र्थानां सूक्ष्माणामसाधारणभावानां आविष्करणाय स्थूलानि सरित्समुद्र-गवाश्वप्रभृतीनि निसर्गसिद्धानि बिम्बान्यप्रयास-प्रवृत्तान्यासन् । तथा मन्त्रवाग्भिर्गूढार्थानामाविष्करणं ऋषेः स्वोपयोगाय अन्येषां तादृशाध्वचराणामनुचराणां वा प्रयोजनायाकल्पिष्ट । इदं च सङ्केतबिम्बानां परमं प्रयोजनम् । तानि हि स्वभावैरिष्टार्थान् प्रतिपाद्य विवरणमन्तरेण गाढं संस्कारमात्मनि द्रष्टरि विदधते । उत्तरयुगेषु बुद्धिप्रधानेषु साहित्याभ्युदये भ्राज-मानेऽपि बिम्बैर्विना प्रायो भावाविष्कारो न घटतेऽद्यापि । तत्रापि गुणक्रियाविशेष-धर्मारोपणेन रूप्य-रूपकभवं प्रतिपाद्य इष्टमर्थं बोधयन्ति कवयः । वेदे तु सङ्केतरूप-ग्रहणेन रूप्ये रूपकधर्मारोपस्य नास्त्यवसरः । पर्वतबिम्बप्रदर्शनमात्रेण अचलत्व-जीवन-प्रवाहप्रभवत्व-बहुप्रस्थाधिरोहसानुमत्त्व-उत्तुङ्गत्वादयः अनभिहिता एव साक्षादुपस्थिताः प्रभवन्ति हृदयं प्रवेष्टुम् । अपरं चेदं बोध्यम् । वेदनात्मकाद्भावादनुभव-विशेषाद्वा धीवृत्त्यात्मकं ज्ञानं (बौद्धेऽस्मदीये युग इव) न पृथक्कृतं वैदिके युगे, यत्र वेदनं बुद्धिः उभे अपि सुसङ्गते निरन्तरे चाभूताम् । यानि सत्यानि अवगन्तुं बुद्धिः प्रवर्तते, तानि स्वरू-पावस्थितानि घनान्यनुभववेद्यानि भवन्ति, न पुनस्तानि केवलं वृत्त्यात्मकतया गृह्यन्ते ।

सङ्केतरूपपदार्थानां स्थानं सप्रमाणमुपपादितम् । वसिष्ठवामदेवादीनां मन्त्रद्रष्टय एवार्थे प्रधानं प्रमाणं वेदगूढार्थसिद्धान्तस्येति निरूपितम् । इतः परं वेदमन्त्रवर्णेभ्योऽन्यत्र वेदगुप्तार्थसिद्धान्तं गूढमगूढं वा सूचयन्ति प्रोद्बलयन्ति वा प्रमाणान्यस्मिन् खण्डे परीक्षेमहि । अत्र प्रथमं तावत् नैरुक्तानां मतमावेदयतो यास्कस्य कान्यपि वचनानि निरीक्षितव्यानि भवन्ति, प्रसङ्गतस्तस्याशयाः क्वचिदुल्लिखिताः पूर्वम् । अत्र तस्याभिप्रायान् सामान्यतो देवान् मन्त्रान् ऋषीन् मन्त्रार्थविवरणं चाधिकृत्य सारतो व्याचक्ष्महे । वेदार्थावगमाय मुख्यमङ्गं निरुक्तमिति प्रसिद्धम् । निरुक्तं च निर्वचनं वैदिकपदानां इति बोध्यम् । कानि तानि वैदिकपदानि भवन्ति येषां निर्वचनाय प्रवृत्तो यास्क इति चेदुच्यते । छन्दोभ्यः समाहृतानि स्वाध्यायात्परमार्थविचारायोपयुक्तानि निघण्टुपदवेदनीयानि चिरन्तनसम्प्रदायाध्ययन-क्रमागतान्येव निर्वचनविषयभूतानीति ज्ञेयम् । अत एव 'समाम्नायः समाम्नातः स व्याख्यातव्यः' इति पदानां आम्नानात् समाहारं द्योतयितुं समाम्नायपदेनोपक्रान्तं निरुक्तम् । पदसमुदायो निघण्टुः पदनिर्वचनं निरुक्तमित्युभयोर्विशेषो बोध्यः । तस्मान्नामलिङ्गानुशासनस्यामरसिंह इव न यास्को निघण्टुकारः, किं तु निरुक्तकार इत्यवधेयम् । तत्रापि बहूनां पूर्वेषां निरुक्तकाराणां मतं आश्रित्य तदुक्तीरुल्लिखन् यथामति व्यरचयन्निरुक्तग्रन्थम् । यद्यपि नैरुक्तपक्षः प्रायः स्थूलो बहिर्मुख इत्यसंशयं, तथाऽपि यास्कोक्तिषु केचनांशाः संलक्ष्यन्ते, ये च भवेयुः अवधानभाजनं वेदरहस्यजिज्ञासूनाम् । यद्यपि यास्कोक्तानि पदानां निर्वचनानि सर्वत्र उपपन्नानीति न शक्यं वदितुं, यद्यपि बहुषु स्थलेषु तन्निर्वचनानि निरङ्कुशकल्पनासाधितान्येवेति वाच्यं, तथाऽपि तत्प्रतिपादितं वेदपदानां यौगिकत्वं नैरुक्तमतं गूढार्थचिन्तकानाममूल्यं रहस्योद्घाटनद्वारं भवति । वेदपद-यौगिकत्वप्रतिपादकं नैरुक्तपक्षमवलम्ब्य वैदिकधर्मस्य पुनरुद्धाराय दयानन्दस्वामिभिः प्रवृत्तमिति स्मार्यम् । वेदगुप्तार्थविचारे वैदिकपदानां यौगिकत्वं मुख्य आधारस्तम्भ इत्ययं प्रथमोंऽशो अवधेयः । अन्यश्च भवति । वेदे वृत्तान्तान्वाख्याने, देवतानां बन्धुत्वादिवादे वा, न मुख्योऽर्थो ग्राह्यः । गौणी वृत्तिरेवाश्रयणीयेति नैरुक्तः पक्षः । इदं च गौणार्थाश्रयणमवश्यमभिमतं च अस्माकं वेदरहस्यार्थप्रकाशने । परं तु तात्पर्योपपादने सूक्ष्मोऽन्तरर्थो गृह्यतेऽस्माभिः, न तु बाह्यः स्थूलश्च नैरुक्तैरिव । मीमांसकानामपि स्वमतानुसारेण गौणाः शब्दा इति प्रसङ्गवशादुदाहृतं पूर्वं, इह तत् स्मार्यम् । 'स्वसुर्जारः शृणोतु नः' (ऋग्वेद- ६. ५५. ५.) ।

इत्यत्र व्याख्याने यास्क आह– "उपसमस्य स्वसारमाह साहचर्याद्रसहरणाद्वा" (नि. ३. १६.) । अन्यत्र इन्द्रशत्रुर्वृत्र इति वदन् आह– "तत् को वृत्रः? मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः । अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते । तत्र उपमार्थेन युद्धवर्णा भवन्ति" (२. १६.) । यद्यपि बाह्यः स्थूल एव भावः परिगृह्यते निरुक्तकारेण, तथाऽपि वेदार्थविचारे गौणार्थाश्रयणस्याभिज्ञाः पूर्वे श्रुतर्षय इत्ययमंशोऽस्माकं मार्गदर्शीत्यनर्घमिदं तत्त्वम् ॥

एवं स्थूलमर्थं मन्त्राणां ब्रुवाणोऽपि दुरूहो दैवतनिर्णयः, दुरूहो वेदार्थबोध इति मन्त्रवर्णानुदाहरन् दृष्टान्तेन प्रतिपादयति– "शाकपूणिः सङ्कल्पयाञ्चक्रे सर्वा देवता जानामीति । तस्मै देवतोभयलिङ्गा प्रादुर्बभूव । तां न जज्ञे । तां पप्रच्छ विविदिषाणि त्वेति । सास्मा एतामृचमादिदेशैषा मद्देवतेति" इति (नि. २. ८.) । अत्र यास्केनोदाहृता ऋक्– 'य ईं चकार' इति दीर्घतमसः अस्यवामीयसूक्तस्था (१. १६४. ३२.) "बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजकाः, वर्षकर्मेति नैरुक्ताः" इति ऋचो विवरणमारभ्य पक्षान्तरगतं परिव्राजकीयं तात्पर्यमुल्लिखन् नैरुक्तं स्थूलमेव पक्षमुदाहरति । कर्मपर-व्याख्यानाचार्यः सायणोऽपि अस्यवामीयसूक्तं सर्वं अध्यात्मपरतया व्याख्येयमिति अभ्युपगच्छन् इमां ऋचमात्मवादिमतानुसारेण व्याख्यातवान् । यत्किमपि वा भवतु अस्या ऋचस्तात्पर्यं, यास्कोक्तित इदमवगम्यते । देवतास्वरूपावगमो दुर्लभः, देवता-प्रसादादेव सम्पाद्यः । शाकपूणेः प्रत्यक्षतां गतायामपि देवतायां, सा स्वस्वरूपं न व्यवारीत् । एवं किल सा प्रोवाच– "देवताः सर्वाश्च जिज्ञासितवानसि, अहमेव सर्वदेवता, मम यथार्थं स्वरूपं 'य ईं चकार' इत्यस्यामृचि प्रतिपादितम् । त्वं मन्त्रवर्ण-पद-निर्वचनप्रवीणोऽसि, तस्मादेतस्या ऋचः सकाशान्मामवेत्यावधारय" इति । दुरूहो वेदार्थबोध इत्युक्तं, इतश्च रहस्यमस्ति वेद इति स्पष्टम् ॥

तथैव यास्को वेदार्थनिर्णयोपयोगाय बहूनां तदानींतन-पक्षान्तराणां प्रामाणिकानां वादानखण्डयन्नुदाहरति । याज्ञिकाः, पूर्वे याज्ञिकाः, एके नैरुक्ताः, नैदानाः, परिव्राजकाः, ऐतिहासिका इत्येवमादीन् पक्षान् तत्र तत्र शंसति । अतो बहुप्रकारो मन्त्रार्थव्याहारस्तत्र अध्यात्मादिगूढार्थपक्षश्च विस्मृतप्राय एव यास्कनिरुक्त-प्रणयनसमय इति गम्यते । यद्यप्येवं, तथाऽपि ऋषीणां ऋषित्वमधिकृत्य मन्त्रप्रादुर्भावप्रकारं च "तदेनान् तपस्यमानान् ब्रह्म स्वयम्भु अभ्यनार्षत्" इत्यवोचन्निरुक्तकारः । अन्यत्र

मन्त्रार्थदुरूहत्वं प्रतिपादयन् द्वे ऋचौ उदाहरति– "उत त्वः पश्यन्न ददर्श वाचं उत त्वः शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः" (१०. ७१. ४.) । "उत त्वं सख्ये स्थिरपीतमाहुः नैनं हिन्वन्त्यपि वाजिनेषु । अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥" (१०. ७१. ५.) । अत्र आद्ययर्चा मन्त्रार्थावगत्यै यत्नः कार्यः, अर्थावबोधशून्यः स्वाध्यायवान् स्थूलमेव मन्त्रार्थं पश्यन्नपि अन्ध इव भवति, तथा मन्त्रशब्दं शृण्वन्नपि मन्त्रशक्तिप्रबोधनाक्षमः बधिर इव भवति । यस्तु विज्ञः दृष्टिश्रुतिसम्पन्नः मन्त्ररहस्यं साक्षात्कर्तुमधिकारी भवति, तस्मै ऋगात्मिका वाक् स्वयंप्रकाशा भवति, यथा जाया पत्ये स्वं वपुरर्पयति तथेति उपमया प्रतिपादयति । एवमर्थावगतिरवश्या, न चेत् 'स्थाणुरयं भारहर' इति अनर्थज्ञो निन्दास्पदं भवतीति उपपादयति । अन्ययर्चा इदमवगम्यते । अस्याः दुर्गाचार्यव्याख्यानमनुसृत्य पदार्थान् अभिधाय तात्पर्यं प्रदर्शयामः । 'उत त्वं सख्ये स्थिरपीतमाहुः' इति । उत त्वं एकमपि सख्ये देवसख्ये देवानां समान-ख्यानतायां देवसायुज्य इत्यर्थः । "यां यां देवतां निराह तस्यास्तस्यास्ताद्भाव्यमनुभवति" इति उत्तरत्राह यास्कः । तदत्र अनुसन्धेयम् । कमिति आहुः? स्थिरपीतं इति । अप्रच्यवनधर्माणं विज्ञातार्थं इत्यर्थः । क एवमाह? इयमेव वाक् ऋक्संज्ञिका । 'नैनं हिन्वन्त्यपि वाजिनेषु' एनं वागर्थज्ञं बलवत्स्वपि वाग्-ज्ञेयेष्वर्थेषु दुर्ज्ञेयेषु दुरवघटनीयेषु समुद्रपिहित-रत्नसन्निभेषु देवतापरिज्ञानादिषु व्याकर्त-व्येषु अन्ये अनुगन्तुं न शक्नुवन्ति । उत्तरेणार्धर्चेन अविद्वान् निन्द्यते । एषः अविद्वान् अधेन्वा मायया चरति, अस्मै एषा वाग्धेनुः कामान् न दुग्धे । यः अफलां अपुष्पां वाचं अन्येभ्यः सकाशात् श्रुतवान्, अध्ययनादृते नास्ति किमपि मृग्यमिति शब्दमात्रं श्रुत्वा दृढग्रहेणावस्थितो भवति, तस्य अपुष्पा अफला च वाग्भवति ॥

अत्र यास्कः "याज्ञदैवते पुष्पफले देवताध्यात्मे वा" इत्याह । अत्र निरुक्त-व्याख्यातार आहुः– 'यज्ञे भवं ज्ञानं याज्ञं, देवतासु भवं दैवतम् । आत्मन्यधि यद्वर्तते तदध्यात्मम् । यज्ञपरिज्ञानं देवता-परिज्ञानं आत्मपरिज्ञानं च । एतदेव समस्तवेदप्रति-पाद्यम् । तत्र यद्यभ्युदयलक्षणो धर्मोऽभिप्रेयते, तदा दैवतार्थत्वाद्याज्ञं दैवतं फलम् । फलार्थं हि पुष्पं भवति पूर्वम् । यदि पुनर्निःश्रेयसलक्षणो धर्मोऽभिप्रेयते, तदोभे याज्ञदैवते पुष्पत्वमेव बिभृतः । दैवते हि तदर्थत्वाद्याज्ञमन्तर्भूतमेवेति दैवतं पुष्पं अध्यात्मं फलम्' ॥

सर्वथा त्रिविधं परिज्ञानं अधियज्ञ-अधिदैवत-अध्यात्माख्यं मन्त्रवर्णेभ्यो लब्धव्यं इति यास्को मन्यते । अविस्पष्टार्थाश्च मन्त्रा इति चेन्नैष स्थाणोरपराधो यदेनमन्धो न पश्यतीत्याह । अन्यश्च स्वकालिकमैतिह्यं स्मरति निरुक्तकारः । ऋषयः साक्षात्कृत-धर्माणः अवरेभ्योऽसाक्षात्कृत-धर्मभ्यः उपदेशेन मन्त्रान् सम्प्रादुरिति । उपदेशेनेत्याह । अत्र वेदरहस्यनिर्देशकं कमपि चिरन्तनं गूढसम्प्रदायमेवाभिप्रैतीति ज्ञायते । अत एव तस्यास्तपसा पारमीप्सितव्यमिति व्याहरति ग्रन्थस्यान्ते । इतश्चास्ति रहस्यं वेद इति असन्दिग्धम् ॥

अथ मन्त्ररहस्य इव देवतारहस्येऽपि श्रद्धा यास्कस्येति प्रागुदाहृताभिस्तदुक्तिभिः अवगतं भवति । अन्ते च देवता अधिकृत्य तदुक्तयो देवगुह्यार्थसिद्धान्तस्यानुकूल्य-सम्पादिका इत्यवधेयम् । तथा चाह– "माहाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते, एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति । इतरेतरजन्मानो भवन्तीतरेतरप्रकृतयः कर्मजन्मान आत्मजन्मान आत्मैवैषां रथो भवति, आत्मा अश्वाः, आत्मा आयुधं, आत्मेषवः, आत्मा सर्वं देवस्य देवस्य" इति (७. ४.) । एवं यास्कः पक्षान्तराणि प्रामाणिकत्वेन यथावसरमुदाहरन्नपि मन्त्रेभ्यस्त्रिविधपरिज्ञानं प्रतिपाद्य अध्यात्मपक्षपारम्यं अभ्युपगच्छतीत्यवधेयम् । इदं च प्रोद्बलयति वेदरहस्यार्थसिद्धान्तम् ॥

अथ च साध्वेवेदं यत्प्रामाणिकतया शंसति पूर्वेषां नैरुक्तेतरपक्षिणां वा वचनानि यास्कः, तथाऽपि नासौ सतृणाभ्यवहारी । यत्र माननीयेष्वपि पूर्वेषां वचनेषु असाधु पश्यति, तत्र निःशङ्कं दोषं दर्शयति । अत्रैकमिदं निदर्शनं भवति– "वनेन वायो न्यधायि" (ऋ. १०. २९. १.) । अस्यामृचि 'वायः' इति एकं पदं द्विधा कृतं पदपाठकारेण तदसाध्विति आह– "वेति च य इति च चकार शाकल्यः । उदात्तं त्वेवमाख्यातं अभविष्यत्, असुसमाप्तश्चार्थः" (नि. ६. २८.) इति । ऋक्संहितापदपाठकारः शाकल्यः । यद्यप्येवं वेदपदपाठकारेऽपि दोषदर्शनं प्रयुज्यते, तथाऽपि विशृङ्खलत्वं नेष्यते, यन्मन्त्राणां परमं प्रामाण्यमभिमन्यते । परं तु यथा मन्त्रान् प्रमाणदृष्ट्या पश्यति, तथा ब्राह्मणानि तत्र तत्रोदाहरन्नपि नाद्रियते । तथा च दैवतकाण्डे वैश्वानर-प्रस्तावे "बहु-भक्तिवादीनि हि ब्राह्मणानि भवन्ति" इत्याह (नि. ७. २४.) । भक्तिर्नाम गुणकल्पना येन केनचित् गुणेन ब्राह्मणं सर्वं सर्वथा ब्रवीति तत्र तत्त्वमन्वेष्यमेव भवतीति यास्क-व्याख्यातारः । तस्मात् सविचारमेव पूर्वेषां वचनानि परीक्ष्य परिग्राह्याणीत्येवमर्थकानि

निरुक्तकारवाक्यानि स्मर्तव्यान्यस्माकं वेदरहस्यार्थविवरणप्रसङ्गे । इयानुपकारकोऽस्माकं यास्क इति प्रदर्शितम् । इतश्चास्ति रहस्यं वेदे मार्गितव्यं, प्रकाशयितव्यम् ॥

बहूनां ब्राह्मणवचनानां चाटुकारवचनत्वेनाप्रामाण्यं यथा यास्कः पश्यति तथा शौनकीय-बृहद्देवता यास्कोक्तिषु दोषं दर्शयति– "पदमेकं समादाय द्विधा कृत्वा निरुक्तवान् । पुरुषादपदं यास्को वृक्षे वृक्ष इति त्वृचि ॥" इत्यादिभिः । (बृहद्देवता– २. १११-११६.) । यास्क इव बृहद्देवताऽपि मन्त्रार्थविवरणे मतभेदानाह । तत्राप्यात्मवादिपक्षमुदाहरति । निदर्शनाय पञ्चजनचर्चां अत्रोदाहरामः– (७. ६७-७२.)

"शालामुख्यः प्रणीतश्च पुत्रो गृहपतेश्च सः ।
उत्तरो दक्षिणश्चाग्निरेते पञ्चजनाः स्मृताः ॥
मनुष्याः पितरो देवा गन्धर्वोरगराक्षसाः ।
गन्धर्वाः पितरो देवा असुरा यक्ष-राक्षसाः ॥
यास्कौपमन्यवावेतान् आहतुः पञ्च वै जनान् ।
निषाद-पञ्चमान् वर्णान् मन्यते शाकटायनः ॥
ऋत्विजो यजमानश्च शाकपूणिस्तु मन्यते ।
होताध्वर्युस्तथोद्गाता ब्रह्मा चेति वदन्ति तान् ॥
चक्षुः श्रोत्रं मनो वाक् च प्राणश्चेत्यात्मवादिनः ।
गन्धर्वाप्सरसो देवा मनुष्याः पितरस्तथा ॥
सर्पाश्च ब्राह्मणे चैव श्रूयन्ते ह्यैतरेयके ।
ये चान्ये पृथिवीजाता देवाश्चान्येऽथ यज्ञियाः ॥"

एवं षड्भिः श्लोकैः पञ्चजनशब्दतात्पर्य-विकल्पानुपन्यस्यति । अनेन निरुक्त-बृहद्देवतादिभ्यः पूर्वं अध्यात्मादिरहस्यवादिनां मन्त्रार्थविवरणं पक्षान्तरविवरणेभ्यो विभिन्नं विदितचरमिति गम्यते । इतश्चास्ति वेदे रहस्यं, यस्याधिगमः सङ्केतगुप्तार्थ-पक्षावलम्बनेन सिद्धो भवतीति वयम् ॥

प्रागुक्तं ब्राह्मणान्येव यज्ञस्य सङ्केतरूपतां प्रतिपादयन्तीति । इतश्च वेदे रहस्यं अस्तीति प्रत्ययो ब्राह्मणेषु स्पष्टं दृश्यते । न चेत् "यजमानो वै यूपः" इत्याद्याः सङ्केताः नाभविष्यन् । अत्र दीक्षिष्यमाणस्य यजमानस्य अञ्जनेन समर्धनं ततः प्राचीन-

वंशप्रवेशनं चाधिकृत्य शरीरस्यस्यैव दीक्षितस्य यजमानस्य नव्यजन्म-सम्पत्तिर्भवति इत्येवमर्थकानि वाक्यानि ब्राह्मणान्याहुः । तथा च ऐतरेयिणः "पुनर्वा एतं ऋत्विजो गर्भं कुर्वन्ति यं दीक्षयन्त्यद्भिरभिषिञ्चन्ति" इति प्रकृत्य "शुद्धमेवैनं तत्पूतं दीक्षयन्ति दीक्षितविमितं प्रपादयन्ति । योनिर्वा एषा दीक्षितस्य यद्दीक्षितविमितं योनिमेवैनं तत्स्वां प्रपादयन्ति" (१. ३.) इत्यामनन्ति । दीक्षितविमितमित्यत्र प्राचीनवंशप्रवेशेन स्वकीययोनिप्रवेश इति सायणभाष्यम् । अन्यत्र "आहुतिभ्यः सम्भूय हिरण्यशरीरः स्वर्गं गच्छति" इत्युक्तम् । अग्निरेव देवयोनिरिति च । अन्यच्चेदं प्रसक्तिवशादुदाहर्तव्यम् । याज्ञिकपक्ष-परमाधारभूतानि ब्राह्मणान्येव अध्यात्मादिरहस्यविज्ञानं विना नैव सिध्यति देवतासायुज्यं स्वर्गारोहो वेत्युपदिशन्ति । तथा च शतपथब्राह्मणम्— "तदेष श्लोको भवति । विद्यया तदारोहन्ति यत्र कामाः परागताः । न तत्र दक्षिणा यान्ति नाविद्वांसस्तपस्विन इति न हैव तं लोकं दक्षिणाभिर्न तपसाऽनेवंविद् अश्नुत एवं विदाँ हैव स लोकः" (१०. ५. ४-१६.) । प्रथितेषु कर्मकाण्डग्रन्थेष्वेवमध्यात्मविद्यारहस्यानि तत्र तत्र घोषयत्सु, किमु वक्तव्यं ज्ञानकाण्डमुद्रया प्रथिता आरण्यकोपनिषदः वैदिकाध्वरस्य परमार्थं अन्तर्यजनपरमेव व्याचक्षत इति ? "तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्मं" इत्यादीन्यारण्यकवचनान्यत्र द्रष्टव्यानि भवन्ति ॥

अथ चेदं वक्तव्यमुपनिषद्ग्रन्थानधिकृत्य । यद्यपि औपनिषदर्षयस्तपोनिष्ठाः सत्यजिज्ञासया ब्रह्मावगतये स्वतन्त्रतया प्रवृत्ता इति निरूढः प्रत्ययः प्रायो न्याय्य इति अभ्युपगच्छामः, तथाऽपि मन्त्रवर्णा अध्यात्मविद्यादि-रहस्यगर्भिता इति विदितं तेषाम् । अत एव स्वीयानि दर्शनानि तदाधारेण प्रतिपादितानि तत्त्वानि तत्र तत्र ऋग्भिः पुरातनर्षिदृष्टिभिः दृढीकुर्वन्ति । 'तदृचाऽभ्युक्तम्' 'तदुक्तमृषिणा' इत्यादीनामौपनिषदवाक्यानामिदमेव तात्पर्यम् । क्वचिदुपनिषदुपदिष्टानामर्थानां साक्षादृङ्मूलकत्वं स्पष्टं लक्ष्यते । वेदरहस्यदर्शिभिररविन्द-श्रीचरणैरत्रैकं निदर्शनं दर्शितम् । तदिदमाचक्ष्महे— 'हिरण्मयेन पात्रेण' इत्यादीनां ईशावास्योपनिषत्पङ्क्तीनां 'ऋतेन ऋतं अपिहितं' (ऋग्वेद- ५. ६२. १.) इति आत्रेयस्य श्रुतविदो मन्त्रदृष्टेश्च समानोऽर्थ इत्यत्रोपपाद्यते । प्रथमं ऋचं पदपाठक्रमेणोदाहृत्य व्याख्यास्यामः । ततः परं उपनिषद्वाक्येन ऋगर्थसङ्गतिं प्रदर्शयिष्यामः—

"ऋतेन ऋतं अपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्ति अश्वान् । दश शता सह

तस्थुः तदेकं देवानां श्रेष्ठं वपुषां अपश्यम् ॥" पदार्थविवरणम्— 'सूर्यस्य' सर्वप्रेरकस्य परमस्य देवस्य सवितुरिति यावत् । 'ऋतं' स्वरूपभूतं परमं सत्यम् । 'ऋतेन' विश्वात्मकतयाऽवस्थितेन अपरार्धपदवाच्य-त्रैलोक्यरूपेण अवरेण सत्येन 'अपिहितं' आच्छादितं अपश्यं इति सम्बन्धः । 'यत्र' यस्मिन् परमे सत्ये 'वां' युवयोः मित्रावरुणयोः स्थानं 'ध्रुवं' स्थिरं नित्यं वा भवति तदित्यर्थः, यत्र 'अश्वान् विमुचन्ति' किरणान् व्यूहीकृत्य व्यवस्थापयन्ति । यत्र च 'दशशता' सहस्र-सङ्ख्याकाः रश्मयः 'सह तस्थुः' सम्भूय एकत्र स्थिताः । 'देवानां वपुषां श्रेष्ठं तद् एकम्' देवतातनुबन्धानां वपुष्मतां देवानां वा वरेण्यं कल्याणतमं रूपं विश्वाध्यक्षं विश्वातीतं च 'तत्' ऋषिषु प्रसिद्धं तत्पदवाच्यं 'एकम्' अद्वितीयं जाज्वल्यमानं दुर्दर्शं सत्यस्वरूपं अपश्यं इति सम्बन्धः ॥

अत्रेदमवधेयम्— 'वां' युवाभ्यां स्थितं इति सायणः । 'वां' युवयोः स्थानमिति वयम् । उभयथाऽपि अध्याहार इष्यते । मित्रावरुणयोः स्थानं सूर्यमण्डलमित्यपि निर्विवादम् । 'ऋतेन' उदकेन आच्छादितं 'ऋतं' सूर्यबिम्बं ऋषिरहमपश्यमिति ब्रूत इति सायणः । परमे व्योमनि अक्षरपदवाच्ये चिद्घने भ्राजमानं सूर्यपदसङ्केतितं तत्पदवाच्यं अद्वितीयं परं सत्यं 'वरेण्यं भर्गः' 'तद्विष्णोः परमं पदम्' 'सर्वधातमं श्रेष्ठम्' इति मन्त्रदृष्टिषु महितं ज्योतिरपश्यमित्याह ऋषिरिति वयम् । 'अश्वाः' दश शतानि रश्मय इति सायणः । अभिमतमेवेदमस्माकम् । परं तु सूर्याश्वान् मन्देहादिभिरसुरैः निरुद्धान् स्तोतारः स्तुतिभिर्विमोचयन्तीति गाथावादैस्तात्पर्यमाह सायणः । रश्मिपदोपलक्षित-सत्यज्योतिष्प्रभाणां व्यूहनं समूहनं च विमोचन-सहस्थान-आख्यानाद् अवगन्तव्ये, इति वयम् । 'देवानां वपुषां' इत्यत्र वपुष्मतां इति मत्वर्थलक्षणा सायणस्य अपि अभिमता । 'ऋतेन ऋतम्' इत्यत्र कथमिदं ऋतद्वयमुच्यते ? ब्रूमः । ऋतसत्यपदयोरविशेषेण लोके प्रयोगः वेदेऽपि क्वचिद्दृश्यते । वस्तुतस्तु विशेषो ग्राह्यः । यद् ध्रुवं परं सत्स्वरूपं तत् सत्यपदवाच्यं भवति । यत् प्रत्यक्षं सत्यादाविष्कृतं सत्यानुरुद्धं सत्यानुरोधेन प्राप्तसत्ताकं सत्यप्रतिनिधीभूतं वा तद् ऋतपदवाच्यं भवति । अस्यामृचि ऋतपदं सत्यपरमेव व्याख्यातम् । उभयमपि ऋतं सत्यमेव भवति । एकं परं सत्यं परार्धगतं परमव्योमशब्द-व्यवहार्यं ध्रुवम् । तच्च सत्यं अवरेण सत्येन अपरार्धगतेन अपिहितमित्युक्तम् । अत्र मेघ एव पिधानं भवति सूर्यस्य, तदपाये सूर्यमपश्यदृषिरिति सायणः । मेघापाये सूर्यदर्शनस्य ऋषित्वं नापेक्षितं, सामान्य-चक्षुष्मत्त्वमेवेष्यते ।

एवंविधव्याख्यानबलादेव साधवो वेदर्षयः सर्वसाधारणसूर्यदर्शनेऽपि किमपि विचित्रं पश्यन्तो मुह्यन्ति देवानांप्रिया इति आधुनिकप्रवादश्चेत्, किमत्र चित्रम्?

सृष्टिगतेन अवरेण सत्येन इतः परस्तात् स्थितं उत्तमं ध्रुवं सत्यं आवृतं, अस्य अपावरणे तस्य परस्य साक्षात्कार इति स्पष्ट एव भवति भावः। मित्रावरुणयोः स्थानं सूर्यमण्डलं इति स्थूलं व्याख्यानं सायणस्य। उभयोः सत्यरक्षकत्वं सत्यधर्मत्वं परम-व्योमवर्तित्वं च उद्घोषयन्ति मन्त्रवर्णाः। 'ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि' (ऋग्वेद-५. ६३. १.) इत्येवंजातीयकैर्मन्त्रैर्मित्रावरुणयोर्नित्य-सत्यसूर्यात्मत्वं अवगन्तव्यम्। ऋतेनेति ऋगियं व्याख्याता। सायणीया व्याख्याधोरणी किंचित्प्रदर्शिता अस्मदीया च। ऋचोऽस्यास्तात्पर्यमवबुध्य औपनिषदार्षिः अगूढया भाषया स्पष्टमाह— 'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥ पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजो यत्ते रूपं कल्याणतमं तत् ते पश्यामि। योऽसावसौ पुरुषः सोऽहमस्मि॥' इतीशोपनिषद्वाक्यपङ्क्तयः। बह्वृचमन्त्रेण उपनिषन्मन्त्रस्य सङ्गतिरिह दर्शिष्यते॥

'ऋतेन' (अवरेण) वेदे, 'हिरण्मयेन पात्रेण' उपनिषदि। अवरत्वेन पिधाय-कत्वेऽपि सत्यत्वात् भास्वरहिरण्मयत्वं पिधानपात्रस्येत्यवधेयम्॥

'ऋतं अपिहितम्' वेदे, 'सत्यस्य मुखं अपिहितम्' उपनिषदि। 'वपुषां श्रेष्ठं' वेदे, 'कल्याणतमं रूपं' उपनिषदि। तच्च तेजः परं ज्योतिरस्मात् परस्ताद् ध्रुवं ज्ञेयम्॥

'तद् एकम्' वेदे, 'सोऽहमस्मि' उपनिषदि॥

'दश शता' रश्मय इति वेदे, (सायणोऽपि तथा व्याचष्टे) 'रश्मीन्' इयुत्पनिषदि विस्पष्टमुक्तम्। 'विमुचन्ति' वेदे, 'व्यूह' इत्युपनिषदि। 'सह तस्थुः' वेदे, 'समूह' इत्युपनिषदि। चिद्घन-सत्य-ज्योतिर्मयः परमः पुरुषः सूर्यशब्दसङ्केतितः सर्वदा वेदे, प्रायशस्तथैवोपनिषत्स्वपीति बोद्धव्यम्। तदलमिदमेकं निदर्शनं इदानीम्। एतादृशानि अन्यानि च निदर्शनानि सन्ति, यैरुपनिषत्सु प्रतिपादितानां तत्त्वानां ऋग्वेदमन्त्रैः साक्षात्सम्बन्धः शक्यो निरूपयितुम्। वेदमन्त्रानधिकृत्य कर्मपरव्याख्यातुर्याज्ञिक-धौरेयस्य सायणस्य यादृशं ज्ञानं तद्व्याख्याने लक्ष्यते, तादृशादपि सूक्ष्मतरः महीयो यथार्थं च ज्ञानं उपनिषत्तत्त्वदर्शिन ऋषेर्लक्ष्यत इति स्पष्टम्। किमु वक्तव्यं अधुनातन-

पाश्चात्यपण्डितानां तदनुसारिणां वा ज्ञानात् विशेषतः प्रशस्यतरं च ज्ञानमौपनिषदर्षीणां इति ?

इतश्चास्ति रहस्यं वेद इत्यसन्दिग्धम् ॥

अथ पुराणान्यपि वेदप्रशंसापराणि सर्वाणि वेदार्थस्योपबृंहणानि इति । 'इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत्' 'पुराणं नष्टशाखस्य वेदार्थस्योपबृंहणम्' 'आख्यानं कथितं भूप पुराणं वेदसम्मितम्' इत्येवंजातीयकैर्महाभारत-पुराणेतिहासवाक्यैरवगम्यते । वेदेषु श्रूयमाणानां वृत्तान्तान्वाख्यानानां गूढार्थमेव स्पष्टमाह महाभारतम् । क्वचिदा-ख्यानस्य वैदिकस्य गूढार्थो विस्पष्टो लक्ष्यते महाभारते । पूर्वेभ्य ऋषिभ्यः यथाश्रुतं वृत्रवधरहस्यं युधिष्ठिराय व्यासः प्राह । इमाश्च पङ्क्तयोऽश्वमेधपर्वणि लक्ष्यन्ते— (अ०. ११. श्लो०. ७-२०) 'ततो वृत्रं शरीरस्थं जघान भरतर्षभ । शतक्रतुरदृश्येन वज्रेणेतीह नः श्रुतम् ॥' तत्रैव 'इदं धर्म्यं रहस्यं च शक्रेणोक्तं महर्षिषु । ऋषिभिश्च मम प्रोक्तं तन्निबोध जनाधिप ॥' इति । वज्रं विवेक इति व्याख्याता नीलकण्ठः, तम एव वृत्र इति चाह— 'रथन्तरेण साम्ना तं वसिष्ठः प्रत्यबोधयत् ।' (श्लो०. १९.) । रथं मायाख्यं विग्रहं तरतीति रथन्तरपदार्थं व्याचष्टे नीलकण्ठः । रथन्तरेण साम्ना वसिष्ठः प्रत्यबोधयदित्युक्तम् । यः को वा भवतु रथस्य सङ्केतार्थः । स नेह विचार्यते । सङ्केत एवेति तु यन्मन्यते व्याख्याता तदेवावधेयम् । महाभारतमपि इदं सर्वं वृत्र-चरित्रं रहस्यमित्याह । तदपि लक्षणीयम् । अन्यत्रानुशासनपर्वणि (अ०. ८४. श्लो०.४७-४८.) मेषादीनां सङ्केतार्थत्वं प्रतिपाद्यते— 'अजोऽग्निर्वरुणो मेषः सूर्योऽश्व इति दर्शनम् । कुञ्जराश्च मृगा नागा महिषाश्चासुरा इति ॥ कुक्कुटाश्च वराहाश्च राक्षसा भृगुनन्दन ।' इत्येवंव्यक्तीनि वाक्यानि वेदगुप्तार्थ-सङ्केतरहस्यावगतये महाभारतकारकृत-परिश्रमस्य फलभूतानीत्यलं परमुक्तेन ॥

अध्यात्मविद्यादिरहस्यमस्ति वेद इति सप्रमाणमैतिह्यं निरूपितम् । सारतः स्थालीपुलाकन्यायेन पुराणेतिहासेभ्यः निरुक्तादिग्रन्थेभ्यस्तथा आरण्यकसहितब्राह्मणेभ्यः मन्त्रवर्णेभ्यश्च प्रमाणप्रपञ्चः प्रदर्शितः । अत्रान्यो मुख्यः प्रश्नः परीक्षामपेक्षमाणोऽव-शिष्यते । वेदर्षिभ्यः परं अस्माकं प्राक् च अन्तरे द्राघीयसि काले अपि न कोऽपि वेदरहस्यविज्ञः रहस्याविष्काराय वेदव्याख्यानं न्यबध्नात् ? सरलमस्योत्तरं वचो भवति । तथाविधं गुप्तार्थप्रकाशकं व्याख्यानं न दृश्यत इत्यसंशयम् । तावता नैवास्ति रहस्यं,

अस्ति चेत् तद्विवरणं वर्तेतैवेति नैवं चोद्यम् । सायणात्पूर्वं सम्पूर्णं वेदव्याख्यानं नैव अलक्षीति हेतोः वेदानां कर्मपरत्वमैतिह्यं नैवासीदिति को वा ब्रूयात्? एवं वेदरहस्य-विवरणमध्यात्मपरं व्याख्यानं नाभूदिति हेतोः रहस्यार्थपरमैतिह्यं नासीदिति न वक्तुं युक्तम् । अपि तु, रहस्यार्थपर-व्याख्यानस्य प्रातिकूल्यं कर्मपारम्यप्रसिद्धौ द्रष्टव्यम् । अत्र सायणव्याख्यानैकप्रत्ययनेय-बुद्धित्वैव वेदगुह्यार्थ-विचारप्रतिकूलेत्यवगन्तव्यम् । रहस्यार्थपक्षश्चिरन्तनं विस्मृतेऽपि तन्निर्देशकं ऐतिह्यं तु जाग्रदसन्दिग्धमिति प्रमाण-पूर्वकं प्राक् प्रदर्शितम् । तन्न पुनर्वक्तव्यम् । एवमपि न कोऽप्यासीद्वेदानामध्यात्म-परत्वपक्षस्योज्जीवनाय प्रवृत्त इति न शक्यं वदितुं आचार्यमध्वग्रन्थेषु जाग्रत्सु । यत् सायणात् किञ्चित्पूर्वं आनन्दतीर्थ आचार्यः ऋङ्मन्त्रतात्पर्य-परिग्रहस्य प्रकारोपप्रदर्शनाय ऋक्संहितायाः प्रथममण्डलीयानि चत्वारिंशत्सूक्तानि व्याचख्यौ । वैदिकधर्माचरणे कर्मानुष्ठानस्यावश्यकतया कर्मपरव्याख्यानं मन्त्राणां साध्विति, कर्मकरणमेव मन्त्राणां मुख्यं तात्पर्यमिति मतमसाध्विति च मध्व आचार्यो मन्यते । मन्त्राणामध्यात्मपरोऽर्थो मुख्यः, सर्वेषां वेदानां विष्णुपदप्राप्तिरूप-परमपुरुषार्थे तात्पर्यमिति च प्रतिपादयति आचार्यः । लघु-विस्तरं माध्वमृग्भाष्यम् । विरलान् मध्वसम्प्रदाय-पण्डितानन्तरा प्रायशो वेदविचारिणामविदितमेव तादृशं असमग्रमपि अस्त्येव वेदभाष्यमिति । तदनु-सारिणा महानुभावेन श्रीराघवेन्द्रस्वामिना योगीन्द्रेण आचार्यस्य भाष्यमनुसृत्याशयान् विशदयन्ती मन्त्रार्थमञ्जरी नाम व्याख्या निबद्धा । अग्न्यादि-देवतापरतया तदन्तर्गतपर-देवताभूत-विष्णुपरतया अध्यात्मपरतया च ऋचो व्याख्येयाः किल । यद्यपि तदुक्त-त्रिविधार्थप्रकारपरीक्षायै न वयं प्रवृत्ताः स्मः, तथाऽपि कथमर्थत्रयं ऋचां सिध्यति अस्मिन्नर्थाविष्कारनय इति समासतो ब्रूमः । आवश्यकस्थलेषु मन्त्रार्थमञ्जरीवाक्यान्येव उद्धृत्योदाहरिष्यामः—

"द्विविधा ह्यग्न्यादिशब्दाः । नीरसंवलितक्षीरवत् अयःपिण्डसमारूढवह्निवच्च । अग्न्यादिजीवचिता संवलितं यद्भगवच्चिद्रूपं विशिष्टं सपिण्डं तद्वाचिनः केचित् । केवल-शुद्धचिद्वाचिनः केचित् । शुद्धचिद्वाचिनोऽपि क्वचिद्भगवच्चिद्वाचिनो जीवचिद्वाचिनश्च इति द्वेधा । तत्राद्याः 'अग्निमीळे' इत्यादौ प्रसिद्धाग्न्यादिदेवं विष्णुं च परम-मुख्य-मुख्य-वृत्तिभ्यां, 'गङ्गायां मीन-घोषौ' इत्यत्र मुख्यामुख्य-वृत्तिभ्यां प्रवाहतीर-रूपार्थद्वयं गङ्गापदमिव, 'राजा कुवलयोल्लासी' इत्यादौ रूढि-योगाभ्यां कुमुद-भूवलयरूपार्थद्वयं

कुवलयपदमिव युगपदेव व्युत्पत्तिमतः प्रत्याययन्ति ।" एवं ऋक्सूक्तमन्त्राणां कर्मसु विनियोगार्थे मन्त्रप्रतिपादिताग्न्यादिदेवतापरं अग्न्याद्यधिष्ठानभूत-विष्ण्वाख्य-परदेवतपरं च तात्पर्यं परिग्राह्यमिति श्रुति-स्मृति-पुराणेतिहासवचनैरुपपादितम् । एवं सति, विष्ण्वर्थत्वेनैवालं, किं अग्न्यादिदेवतापरत्वेनापीति चेन्नेत्याह– 'तेषु तेषु पदार्थेषु रूढिरङ्गीकृता यतः । प्रयोजनबहुत्वेन तस्य तस्याविरोधतः ॥ उपदेशादिसामर्थ्याद्विष्णौ शक्तिश्च गृह्यते । इत्यत्र अग्न्यादिदेवतास्वरूपसिद्ध्यादिबहुप्रयोजनाय तत्तद्देवतार्थकत्वस्य आवश्यकत्वोक्तेः, निगम-निघण्टुव्याकरणादि-सिद्धव्युत्पत्ति-लभ्याग्न्यादि-देवतार्थकत्वस्य त्यागायोगाच्च ।' एवं अग्न्यादिदेवतायां मुख्यत्वं परमदेवे विष्णौ परममुख्यत्वं च प्रतिपादयत्याचार्यः, आह च– "न चैवमुभयत्र तात्पर्ये तात्पर्यभेदात् तन्निबन्धनवाक्यभेदः शङ्क्यः । महातात्पर्यार्थस्यैकत्वात् । 'सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यम् । अवान्तरं तत्परत्वं तदन्यत् सर्वागमानां पुरुषार्थस्ततोऽतः' इति पैङ्गिश्रुतिमुदाहृत्य पुराणवाक्यैश्च प्रोद्बलयत्येवम्– 'सर्वज्ञं सर्वकर्तारं नारायणमनामयम् । सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि । सर्वेषामपि वेदानामितिहास-पुराणयोः । प्रमाणानां च सर्वेषां तदर्थं चान्यदुच्यते ॥" इति । तस्मान्महातात्पर्य-अवान्तरतात्पर्यभेदेन अनेकार्थकत्वमुपपाद्य अग्निवाय्वादिसूक्तानां अग्न्यादिदेवतापरं तदधिष्ठान-विष्णुपरमात्मपरं अन्तरर्थं अध्यात्मपरं च त्रेधा मन्त्रा व्याख्येया इति मन्त्रार्थविवरणप्रकारश्च चत्वारिंशत्सूक्तैर्व्याख्यातैर्निरूपितः । अग्न्यादिसूक्तैर्भगवदुपासकानां अग्न्याद्यधिष्ठानेषु एव भगवतोऽनुसर्तव्यत्वं अभिव्यज्यमानत्वं प्राप्यत्वं इति निमित्तत्रयेण इदं अग्निसूक्तं इदं वायुसूक्तमिति देवताभेद-सूक्तव्यवस्थोपपत्तिरवगन्तव्या । अथ ऋग्व्याख्याप्रकारप्रदर्शनाय मन्त्रार्थमञ्जरीवाक्यान्युपयुज्य 'अग्निमीळे' इति ऋचोऽर्थं सङ्क्षेपेणोदाहरामः–

'अग्निमीळे' इति आग्नेयं सूक्तम् । अस्य ऋषिः मधुच्छन्दाः । विनियोगो विष्णुप्रीतिद्वारा मोक्षे, अवान्तरविनियोगः कर्मणि । अत्र विस्तरभयाद् व्याकरणप्रक्रियाविस्तरान् प्रायशोऽनुक्त्वा सारत एव राघवेन्द्रस्वामिभिः प्रतिपादितानर्थान् आचक्ष्महे– 'अग्निं' अग्रे भवं प्रथमपूज्यं प्रथमप्रवर्तकं वा अग्निनामकं विष्णुं तदधिष्ठानं प्रसिद्धाग्निं वा 'ईळे' स्तौमि । अग्निविशेषणान्येवं व्याख्यायन्ते । 'पुरोहितम्' अनादितः सर्वप्राणिनामनुकूलं 'यज्ञस्य ऋत्विजम्' जातावेकवचनं, यज्ञानां ज्योतिष्टोमादीनां कर्तृतया ऋत्विङ्नामकेषु अध्वर्यु-होतृ-उद्गातृप्रभृतिषु नियामकतया स्थिततया 'तदधीनत्वात्

तदर्थवत्' इत्युक्तन्यायेन ऋत्विङ्नामकं, 'होतारम्' होतृनियामकतया विशिष्य तत्र सान्निध्यात् तदधीनत्वन्यायेनैव होतृनामकं ऋत्विजं होतारम् । कुरुपाण्डवन्यायेन सामान्यविशेषभावादपुनरुक्तिः । 'रत्नधातमम्' रमेः औणादिक-क्त-प्रत्यये 'लशक्वतद्धिते' इति ककारलोपे 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इति धातोर्मकारलोपे 'रत्न' इति रूपत्वात् रत्नं सुखं धत्ते इति रत्नधाः अतिशयेन रत्नधाः तं रत्नधातमम् । 'देवम्' स्तुत्यर्थाद्दीव्यतेर्निष्पन्नत्वात् स्तुत्यम् । अत्र उक्तगुणानां निरवधिकत्वं विष्णौ, तदधिष्ठाने अग्नौ तु यथायोग्यम् । एवमग्रेऽपि ॥

अध्यात्मपरत्वे त्वयमर्थः । 'पुरोहितम्' सर्वानुकूलम् । यज्ञस्य ज्ञानयज्ञस्य 'ऋत्विजम्' ऋत्विग्भूतेन्द्रियाभिमानि-नियामकतया तत्र स्थितत्वेन ऋत्विङ्नामकम् । 'होतारम्' इन्द्रियाख्याग्निषु विषयलक्षणहविषां दातारं, विषयभोगप्रदम् । 'अग्निं' अङ्गं शरीरं नयति प्रेरयति— सर्वशरीरप्रवर्तकम् । 'ईळे' इति सम्बन्धः । अत्र अध्यात्मं सर्वत्र मोक्षसाधको यः कश्चिद्यजमानो ज्ञेयः । शिष्टं प्राग्वद्व्याख्येयम् ॥

श्रीमन्मध्वाचार्य-ऋगर्थविवरणानुसारेणेदं पर्यवसन्नम् । अध्यात्मं अधिदैवतं च मन्त्राणां तात्पर्यं योजनीयम् । अध्यात्ममन्तरर्थः । आधिदैवतपरत्वे यज्ञपरत्वमन्तर्गतम् । अतश्च कर्मस्ववान्तर-विनियोगो मन्त्राणामुपपद्यते मुख्यवृत्त्या । आधिदैवतपरत्वे पुनः परममुख्यवृत्त्या परमदैवतभूतविष्णौ महातात्पर्यमवगन्तव्यम् । एवमपि यास्कोक्तानि त्रीणि यज्ञ-देवता-आत्मपरिज्ञानानि वेदाल्लभ्यानीति द्वैताचार्यप्रतिपादितेन मन्त्राणां अर्थत्रयेण सामान्यतः सङ्गच्छते । सर्वथा मन्त्राणां कर्मसु विनियोगः अवान्तरप्रयोजनमात्रम् । तदनुरोधेनैव वेदर्चो व्याख्येयाः । अध्यात्मपरव्याख्याने याज्ञदैवतकर्मपरव्याख्यानेऽपि महातात्पर्यं विष्णावेव पर्यवस्यतीति श्रुति-स्मृति-पुराण-इतिहासेभ्यः सप्रमाणं सयुक्तिकं उपपादयामास पदवाक्यप्रमाणज्ञ आर्षचक्षुस्सम्पन्न आनन्दतीर्थ आचार्यः । इदमस्माभिरवधेयम् । ऋचां अध्यात्मपरदेवता-परत्वस्य प्राधान्यं केवलकर्मपरत्वस्य जघन्यत्वं च चिरन्तनार्षसम्प्रदायसिद्धं वेदरहस्यनिर्देशकं ऐतिह्यं मध्वऋग्भाष्ये मन्त्रार्थमञ्जर्यां च सोपपत्तिकं दृढीकृतम् । इतश्चास्ति रहस्यं वेदे, यद्वेदगुप्तार्थ-पक्षाश्रयणेन भेत्तुं शक्यमित्यलं विस्तरेण ॥

अथास्य रहस्यार्थपक्षस्य स्वीकारे नव्यपाण्डित्य-सम्पन्नानां इदानींतनानां पाश्चात्यपद्यां प्रविश्य वेदविचाराय प्रवृत्तानां परिश्रमः सर्वोऽपि विफल एवेति वक्तव्यमिति

चेमेति ब्रूमः । स्थूलं बाह्यार्थमाश्रित्य प्रवर्तमानस्य तेषां विचारस्य फलितं यदि समीचीनं न्याय्यं च भवेत्, तदा वेदमन्त्रदर्शिनां देश-काल-स्थिति-स्वरूपादिनिर्णयाय प्रभवेदिति न तत्परिश्रमोऽन्तरर्थमाश्रित्य प्रवृत्तस्यास्मदीय-गुप्तार्थसिद्धान्तस्य प्रतिकूल इति मन्यामहे । यतो मन्त्राणां बाह्यार्थ-स्थूलतात्पर्यसत्तामभिज्ञायैव प्रवर्तते सङ्केत-गुप्तार्थपक्षः । बाह्यार्थ एक एव मन्त्राणामिति वादे तु प्रत्यवतिष्ठामहे । इदं च सविस्तरं प्रागेव प्रपञ्चितमिति न पुनरिहोच्यते । तस्मात् प्रायः तटस्था वयं बाह्यार्थे आश्रित्य प्रवृत्तस्य परिश्रमस्य । प्राचीनवेदर्षि-देशकालदशा-विशेषनिर्णयाय वा ऐतिहासिकवृत्तान्तद्योतनाय वा बाह्यपक्षं ऋजुव्याख्यानमुपयुक्तं भवेदित्यसंशयम् । तथा च, तिलकमहाशयनिर्दिष्टः ऋषीणां उत्तरध्रुवमण्डलवासः तत्कालो वा निर्णेतुं शक्यः स्यात्, परमशिवमहोदयोत्प्रेक्षितः अहि-वृत्र-स्वरूपनिर्णयो वा ॥

अथ वैदिकदेवतास्वरूप-निर्णयायत्तं वैदिकसमयधर्ममधिकृत्य पाश्चात्यविद्वत्सु विप्रतिपत्तयो लक्ष्यन्ते । वेदर्षयो बहून् देवानाराधयामासुस्तस्मान्नानादेवतोपास्तिपरा वेदर्षय इत्येके । एकैकस्यामपि देवतायामुपासनसमये पारम्यबुद्धिरासीदुपासकानां ऋषीणामिति तात्कालिकोपास्यदेवताविशेषपारम्यवादिन ऋषय इत्यपरे । केवलं नाम-भेद एव देवताभेदः, एक एव परो देव इति वेदर्षय एकेश्वरवादिन इत्यन्ये । विश्वस्मिन् पाञ्चभौतिके जगति तत्र तत्र पदार्थेषु अभिमानि-देवताबुद्धिरासीदृषीणाम्, अत एव द्यावा-पृथिव्यौ अग्निर्वायुरादित्यः पर्जन्यो मरुत इत्येवमादयः सृष्टय एव देवताधिया स्तूयन्ते, तस्मात् प्रकृतिपूजकाः प्रकृतिसात्मत्म्य-देवतावादिनो वेदर्षय इति केचन । एवमद्यतनमेधाविनो वेदविमर्शका बहुधा विप्रतिपन्नाः संलक्ष्यन्ते । अत्रेदं ब्रूमः । एषां विविधानां वादानां प्रत्येकमाधारो न विद्यत इति नोपपद्यते वदितुम् । मूलपुरुषा वेदर्षयो नैवंविधानां मतानां अभिज्ञा इति स्मर्तव्यम् । यथा च औपनिषदर्षयोऽवर-कालिक-द्वैताद्वैतविशिष्टाद्वैतादिसिद्धान्तवादेभ्यो दविष्ठाः स्वीयानि दर्शनानि साक्षात्-कृतानि तत्त्वानि यथादृष्टं यथाश्रुतं वा प्रत्यपादयन्, तथा मन्त्रद्रष्टार ऋषयो विशेषतोऽस्मत्कालिकैकेश्वरवादादिभ्यो दविष्ठतमा यथादृष्टं यथाश्रुतं मन्त्रानाविष्कृत्य यथावसरं देवताराधनतत्पराः परदैवतमाराधयामासुरित्यसंशयम् । तस्माज्जगज्जीवेश्वरानधिकृत्य वेदर्षीणां मतं मतानि वा यदि परीक्षितुं प्रवर्तेमहि, तदा नैवोपसंहारः स्याद्वादानाम् । यथा वा औपनिषदसिद्धान्तमधिकृत्यावरकालिकानामाचार्याणां तदनुसारिणां च द्वैता-

द्वैतादिवादविशेषाः अद्यापि अधितिष्ठन्ति पण्डितलोक-विवादपाण्डित्य-भद्रपीठं, तथैव स्याद्वेदानधिकृत्य ईदृशो वादः । अत्रेदं कारणं भवति । न्यायवैशेषिकादि-दार्शनिक-चिन्तकानां तत्त्वनिर्णयो लक्षणप्रमाणपरीक्षायत्त इति निर्विवादम् । पूर्वेषामृषीणां तत्रापि वेदर्षीणामाद्यानां विलक्षणस्तत्त्वावगतिपन्थाः । तस्मात् तपोनिष्ठानां तेषां ईदृक्षया परीक्षया नाभवत् कार्यम् । यतस्तेषां साक्षात्साधनं दर्शनं श्रवणं च गुरु-परम्पराप्राप्तदीक्षाबलात्सिद्धमभवत् । मन्त्रवर्णानां ऋजुतात्पर्यग्रहणे वक्ष्यमाणाः सर्वेऽपि अर्था अवभासेरन्नित्यसंशयम् ॥

एक एव परो देवः बहुदेवात्मकतया बहूनि नामानि बिभ्रदवतिष्ठत इति मन्त्र-वर्णेभ्यः सिद्धं भवति । बह्वीनां देवतानां पृथगात्मतयाऽवस्थानादेव तत्तद्देवतालिङ्गद्वारा अमुकदैवत्यं अमुकसूक्तं इति निर्णीयत इति हेतोः देवता-नानात्वं मन्त्रवर्णैरेवावगम्यत इत्यसंशयम् । ऋषिदृष्टौ एकैकोऽपि देवः परम एव नान्यः परस्माद्देवादित्यपि बहुभिः सूक्तैरुपपादयितुं शक्यम् । अध्यण्डमधिपिण्डं वा विश्वव्यापारेऽधिकृतानां नानादेवानां इतरेतरप्रकृतित्वं इतरेतरजन्मत्वं वा मन्त्रदर्शिभिर्दृष्टं, दर्शितं चेति सूक्तपाठेभ्योऽवबुध्यते । एक एव महानात्मा सूर्यपदवाच्यः, यस्यैव मूर्तिभेदाः व्यक्तिविशेषा अङ्गप्रत्यङ्गभूताः तत्तद्गुणक्रियोचितानि नामानि बिभ्रतो देवाः प्रतिपादिता वेदेष्विति आदिवेदसंहि-तायां तत्र तत्र स्पष्टमवगम्यते । तस्मादस्माकं परमं प्रयोजनं वेदाल्लब्धव्यं चेत्, तत्तन्मन्त्रदृष्टयो यथासन्दर्भमार्षसम्प्रदायमवलम्ब्य शब्दतोऽर्थतश्च परमप्रमाणबुद्ध्या परिग्राह्याः । यद्यपि पूर्वोक्तानां बहूनां मन्त्रप्रतिपादितानां मतानां नास्तीतरेतरविरोधः, तथाऽपि तेषां सामरस्यप्रतिपादनाय नैवावश्यकी परीक्षेति ब्रूमः । का वा क्षतिर्यदि विरोधपरिहारः सामरस्यप्रतिपादनं वा न प्रवर्तेत? अयं ब्रह्मकोशः, भक्त्या ज्ञानेन तपसा उपगम्याराधनीयः । नायं सूत्रग्रन्थ-तद्भाष्यजातीयको ग्रन्थ इव पूर्वपक्षसिद्धान्त-युक्ति-प्रतियुक्तिवाद-युद्धक्षेत्रं भवति । अत्यन्तपुरातनार्षदर्शनशेवधिरयं बह्वृचानां मन्त्र-पाठः । अध्यात्मविद्यादेवतातत्त्वादि-बहुरहस्य-रत्नानामनर्घो निक्षेपः । असाधारण-साधनसम्पादितानां अतीन्द्रियाणां अर्थानां चर्मचक्षुरगोचराणां विपुलानां लोकानां तद्गतानां आधिकारिकपुरुषाणां तच्छक्तीनां स्वतः शक्तिभूतानां व्यक्तीनां च रहस्यानि अधिगम्य रहस्याध्वनि योगनिष्ठामास्थाय अधिगतवतां नः पूर्वेषां वसिष्ठवामदेवादीनां दिव्यदर्शनश्रवणात्मकस्य अनितरसामान्यस्य साक्षात्कारस्य वाङ्मयावतारोऽयं वेदग्रन्थः,

कानि वा अन्यान्यन्तर्निहितानि अस्यामत्यन्तचिरन्तन्यां दाशतय्यां संहितायां, को वेद? 'तस्मात्तपसा पारमीप्सितव्यम्, तस्मात्तपसा पारमीप्सितव्यम्' ॥

अथ चतुर्थः खण्डः

अथ देवतामीमांसायां वक्तव्यमिदमवशिष्यते—

तथाविधाः सन्ति मन्त्रा बहुत्र दाशतय्यां संहितायां, येषां गूढार्थविवरणमन्तरेण तात्पर्यं न सङ्गच्छते बाह्यपक्षावलम्बनेऽसामञ्जस्यमेवापद्यते । अन्यच्चेदं अवधेयम् । यद्यपि नव्याः पाश्चात्यविचारमार्गानुसारिणः सायणीय-बाह्यार्थपद्धतिमेवाश्रयन्ते, तथाऽपि देवता अधिकृत्य ते भारतीय-प्राचीनसम्प्रदायानुसारिणं सायणं न सर्वथाऽनुयान्ति । देवताविषये स एष विशेषः । अस्मदीयाः पूर्वे देवानां तत्तल्लोकाध्यक्षत्वं तत्तत्तत्त्वाभिमानित्वं वाऽभिप्रयन्ति स्म । सूर्ये स्तूयमाने तन्मण्डलाध्यक्षस्तन्मडलान्तर्वर्ती वा पुरुषः स्तुतो भवति । एवं अग्न्यादीनां स्तुतावपि अग्न्याद्यभिमानि-देवतास्तुतिः कृता भवति । नव्यास्तत्र प्रत्यवतिष्ठन्ते । अग्निवाय्विन्द्रसूर्यादीनां दृश्यब्रह्माण्डगत-पदार्थ-रूपत्वमात्रं अङ्गीकृत्य तत्र अधिष्ठानाभिमानाध्यक्षतादीन् उद्धृत्य निराकार्षुः । अत्रेदं कारणं भवति । प्राकृतावस्थानां वेदकवीनां केवलकल्पना सा, यया जडवस्तुषु देवतात्वारोपणं साधितमिति तेषां मतम् । गूढार्थसिद्धान्तिनो वयं तु बाह्यपदार्थानां सङ्केतरूपत्वं पश्यन्तोऽपि पृथिव्यादीनां अग्न्याद्यधिष्ठानत्वं अभ्युपगच्छामः । अन्त-र्बहिश्च देवानामधिकारं पश्यतो गूढार्थसिद्धान्तस्य अर्थाविष्कारनये सर्वत्र अन्तरर्थस्य प्राधान्यं बोध्यम् ॥

अथ मन्त्रवर्णानामुदाहरणेनेदं प्रतिपादयामः— यच्चेतना एव देवा अन्तर्दृष्टिगोचरा इति । बाह्यार्थपक्षावलम्बनेन तथोपपत्तिर्दुर्घटा । प्रधानदेवतानां इन्द्रादीनां अप्रधान-त्वेन परिगणितानामपि मरुदादीनां च प्रस्तावेषु स्थूलार्थपक्षे पर्यवसन्नोऽर्थो न सङ्गत इति प्रदर्शयिष्यामः— 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुरा-ततम् ॥' (१. २२. २०.) । अस्मिन्मन्त्रे प्रतिपादितो देवो विष्णुः सूर्य इति व्याचक्षते । बाढम् । सूर्य एवायं विष्णुः, किं तु नासौ लौकिको भवितुमर्हति । कुतः? यत् प्रत्यहं सञ्चारे नभोमध्यं तेनाधिगतं भवति तदेव परमं पदं भवतीति वक्तव्यम् । तच्च सूरयः सर्वदा पश्यन्तीति आह । कथं खमध्यं सर्वदा सूर्यमण्डलाधिष्ठितं भवेत्, यच्च

सूरीणामेव गोचरं स्यात्? लौकिकं चेत् सूर्याक्रान्तं पदं तद् असूरिजनस्यापि गोचरं स्यात्, कुतः सूरिजनगोचरमिति वक्तव्यम्? अलौकिकोऽतीन्द्रियार्थः सूरिजनसाक्षाद्दर्शनविषय इति असंशयम्। न चेत् काल्पनिकमिदं असम्बद्धप्रलपितं भवेत् यत् सूरयः सदा खमध्यं सूर्याक्रान्तं पश्यन्तीति। अलौकिकत्वादेव तद् धाम श्रेष्ठं दिवि समन्तात् ततं चक्षुरिव सदा पश्यन्ति सूरय इत्युक्तम् ॥

एवंजातीयकमन्यं मन्त्रं निरीक्षामहे– 'उद् वयं तमसस् परि ज्योतिष्पश्यन्त उत्तरम्। देवं देवत्रा सूर्यं अगन्म ज्योतिरुत्तमम् ॥' (१. ५०. १०.)। अस्यायमर्थः– 'वयं तमसः अन्धकारात् पाप्मनः परि उपरि उत् उद्गम्य उत्तरं उद्गततरं उत्कृष्टतरं वा ज्योतिः पश्यन्तः सन्तः देवत्र देवेषु देवानां मध्ये देवं द्योतमानं सूर्यं उत्तमं ज्योतिः अगन्म प्राप्नुयाम।' अयं सामान्यार्थो मन्त्रस्य। तमश्शब्देन पाप्मा कथित इति ब्राह्मणवाक्योदाहरणेन सायणो व्याचष्टे। तर्हि नायं लौकिकः सूर्यः। सायुज्यमेव उक्तमृषिणा प्रस्कण्वेनेति तुरीयपादव्याख्याने सायण एवाह। अस्यामृचि स्पष्टमुक्तं अतीन्द्रियार्थ-सूर्यपदवाच्यं उत्तमं ज्योतिः। यथा कथञ्चिद् व्याख्यातेनाप्यनेन मन्त्रेण बाह्यो लौकिकः सूर्यो न निर्दिष्ट इति स्पष्टम् ॥

बाह्याः सूर्यादयो भावा एव देवता इति वादो नोपपद्यत इति प्रदर्शयितुं सूर्यात्मकविष्णुदेवताकमेकं ज्योतिःस्वरूप-सूर्यदेवताकमन्यं च मन्त्रं उदाहार्ष्म। अथेन्द्रदेवताका ऋचः कतिचन परीक्षामहे। इन्द्रः किल त्रिलोकाधिकारिकाणां देवानां राजा मेघमण्डलादूर्ध्वं तिष्ठन् वृत्रपदवाच्यं मेघं वज्रेण हत्वा विसृजत्यप इति वदन्ति। यद्यपि एवंविधान् अभिप्रायान् समर्थयितुं तत्र तत्र प्रकरणात्पृथक्कृता मन्त्रा अवकाशं दद्युः, तथाऽपि बहुत्र नोपपद्यन्ते। अन्तरर्थानुसारेण तु सर्वत्र सामञ्जस्यं परिस्फुटं भवति– 'दूरे तन्नाम गुह्यं पराचैर्यत् त्वा भीते अह्वयेतां वयोधै' (१०. ५५. १.)। अत्र ऋषिरिन्द्रं सम्बोध्य प्राह– 'तद्रहस्यं ते नाम दूरे वर्तते, येनैव साधनेन द्यौश्च पृथिवी च त्वां आह्वयत' इति। 'महत् तन्नाम गुह्यं पुरुस्पृग् येन भूतं जनयो येन भव्यम्।' (१०. ५५. २.) 'तद् रहस्यं नाम महद्भवति, यस्मै स्पृहयन्ति लोकाः, येनैव साधनेन सर्वं जातं त्वं अजनयः, जनितव्यं च जनयसि त्वं इन्द्रः' इति स्पष्टार्थो मन्त्रः। आत्रेयमण्डलस्थं एकं मन्त्रं पश्यामः– 'अवाचचक्षं पदमस्य सस्वः उग्रं निधातुरन्वायमिच्छन्। अपृच्छमन्यान् उत ते म आहुः इन्द्रं नरो बुबुधाना अशेम ॥' (५. ३०. २.)।

ऋषेर्बभ्रोरियं मन्त्रदृष्टिः । अयं भावः– 'तस्येन्द्रस्य दृढं रहस्यं धाम अहं अद्राक्षम् । नितरां धातारं प्रतिष्ठापकं तं कामयमानोऽहं तत्पदं अधिगतवानस्मि । कथम्? प्रथमं अहं अन्यान् बुधान् अपृच्छम् । तैरेवं उक्तोऽस्मि, नेतारो वयं प्रबोधवन्तः सन्तः तं इन्द्रं प्राप्नुयाम' इति । पुनश्च तदेव रहस्यं, पूर्वोदाहृतमन्त्रयोः रहस्यं नाम, अत्र तु धाम । किं तत् पदं नाम वा अभ्रमण्डलात् किञ्चिदधिकं वोर्ध्वं वा वर्तते? मन्त्रवर्णः स्पष्टमाह प्रबोधे सति इन्द्रकामस्य इन्द्राधिगमो भवतीति । इन्द्रमत्र 'निधातारं' नितरां धारकमाह । किमयं काल्पनिको देवः क्वाप्याकाशे वर्तते? किमत्र 'बुबुधानाः' इति प्रयोगेण ऋषीणां साधरणस्वापोत्थानमेव निर्दिष्टम्?

अथ मरुतोऽधिकृत्य, ते चण्डवाता एव भवन्तु । यद्यपि मरुतत इन्द्रस्य भ्रातर इमे नेन्द्र इव प्रधानदेवता भवन्ति, यद्यपि विशेषतो बाह्यव्यापारा एव लक्ष्यन्ते, अत एव बाह्यार्थपक्षप्रोद्बलकास्तन्मन्त्रा इत्यसंशयं स्थूलदृष्ट्या, तथाऽपि तेषां अन्तर्व्यापारवत्त्वं, पाप्मनो रक्षणं, अन्यथा गूढस्वरूपत्वं इत्यादीनि मन्त्रेभ्योऽवगम्यन्ते । अघेभ्यो रक्षार्थं अगस्त्यो मरुतः प्रार्थयते 'अघाद्रक्षत' इति । यदि मरुतो बहिर्व्यापारा ऋषेः स्तवेन प्रसाद्यन्ते, ऋषेरावासस्थानानि अन्यानि द्रव्याणि च प्रचण्डमारुताघातेभ्यो रक्षितानि भवन्तु । कथं तेषां चेतनव्यापारा पापनाशिनी शक्तिरन्तर्वृत्तिः सम्भवेद्, यदि ते जडाः केवलं बाह्यभावाः स्युः? वसिष्ठस्येह मन्त्रदृष्टिमवधत्त– 'इहेह वः स्वतवसः कवयः सूर्यत्वचः । यज्ञं मरुत आवृणे ॥' (७. ५९. ११.) । ऋषिराह– भोः मरुतो देवा यूयं 'स्वतवसः' स्वबलेन वृद्धाः 'कवयः' क्रान्तदर्शिनः 'सूर्यत्वचः' सूर्यप्रभैव युष्माकं आवरकं रक्षकं चर्म, तादृशेभ्यो युष्मभ्यं अहमिहैवाधुना यजनं कल्पयामि' इति । कथं इमे क्रान्तदर्शिनः अत एव चेतनावन्तः केवलं बाह्यभावाश्चण्डमारुता जडा भवितुं अर्हन्ति? 'एतानि धीरो निण्या चिकेत' (७. ५६. ४.) इति द्वितीयखण्डे प्रागुदाहृतेन मन्त्रेणापि सूक्ष्मदर्शिनो धीरस्य ऋषेरेव मरुतां रहस्यानि विदितानि भवन्तीति सिद्धम् ॥

अथ सोमः । अयं च लताविशेषः बाह्यो भाव इत्यसंशयम् । अत्रापि याज्ञिकः सङ्केतरूप एवायं अन्तरर्थगम्यस्य चिदानन्द-क्षरणस्वभावस्य देवस्येति क्वचिद्विशदं भवति मन्त्रेषु । बाह्यपक्षे तु बहुत्र मन्त्रा असङ्गतार्था एव भवन्ति । आयुर्वेदे कल्पौषधित्वेन ख्यातः सोमः । सोमपानमदोन्मत्ताः कवयो यथेच्छं सोमवैभवं गायन्तीति निरङ्कुशं कल्पयन्ति नव्याः कल्पनाचतुराः । सोमस्य चतुर्विंशतिभेदाः कथिताः सुश्रुतसंहितायां

चिकित्सास्थाने (२९. अ.)। तत्र न क्वापि तस्य मदप्रभावो वर्णितः। विचित्रमिदं यदृषयः पानमदलिप्सया बहुशतसङ्ख्याकैर्मन्त्रैः सोमं तुष्टुवुरिति, वस्तुतस्तु लतायाः केवलसङ्केतरूपतामात्रम्। अन्तरर्थेनैव सर्वत्र सोममन्त्राणां सामञ्जस्यं लक्ष्यते– 'विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यन्ति केतवः। व्यानशिः पवसे सोमधर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥' (९. ८६. ५.) कथमयं मन्त्रो सोमलतापरत्वेन व्याख्यातुं शक्यः? स्वयं विचार्यतां मतिमद्भिः, अयमस्यार्थः– विश्वचक्षः सर्वार्थदर्शिन्! सोम, प्रभोः परिबृढस्य सतः ते तव ऋभ्वसः महान्तो द्रष्टारः केतवः प्रज्ञापकाः रश्मयः विश्वा सर्वाणि धामानि तेजःस्थानानि देवशरीराणि परियन्ति परितो गच्छन्ति प्रकाशयन्तीत्यर्थः। हे सोम, व्यानशिः व्यापनशीलस्त्वं धर्मभिर्धारकैः रसपदवाच्य-आनन्दनिष्यन्दैः पवसे क्षरसि। विश्वस्य भुवनस्य पतिः स्वामी त्वं राजसि ईश्वरो भवसि। इत्ययमर्थः सायणभाष्यानुसारेणैव प्राप्तो भवति। एतावतोक्तेनापि यदि सोमविषये सन्देहो न व्यपेतो भवेत्, अन्यो मन्त्रः संशयच्छेदको दशममण्डलस्थो जागर्ति– 'सोमं मन्यते पपिवान् यत् सम्पिषन्त्योषधिम्। सोमं यं ब्रह्माणो विदुः न तस्याश्नाति कश्चन ॥' (१०. ८५. ३.)। अस्मिन् मन्त्रे वस्तुतः सोमस्वरूपस्य निर्णयः कृतः। सामान्यतः सर्वोऽपि सोमलतापेषणेन रसमादाय पानं कुरुते, यं वस्तुतत्त्वज्ञाः तात्त्विकं सोमं विदुः तस्य भोक्ता दुर्लभ इति ह्यस्या ऋचोऽभिप्रायः ॥

अथोषसमधिकृत्य। उषः प्रभातकालो बाह्यपक्षे साध्वेव कथ्यते। किं तु तस्याः तत्त्वं अन्तरर्थगम्यं, नात्र सन्देहः। उत्तमं ज्योतिरिति वेदप्रतिपादितस्य सत्यस्य सूर्यस्य साक्षात्कारात्मकाद् उदयात्प्राक् तस्य पुरस्सरा देवी सौरी प्रभा आविर्भवति। अत एव तां 'ऋतावरी' 'सूनृता' इति वर्णयन्ति मन्त्राः। 'ऋतस्य रश्मिम अनुयच्छमाना भद्रं भद्रं क्रतुमस्मासु धेहि' (१. १२३. १३.)। इत्यत्र सत्यस्याध्वानमनुगच्छन्तीं उषसं ऋषिः कल्याणतमं दृढप्रज्ञाबलं याचते। कथं प्रभातकालस्येदृशं सामर्थ्यं सम्भवति? एवं अन्येऽपि देवाः मित्रो वरुणोऽश्विनावित्यादयः स्थूलपक्षानुसारेण अनिर्णीत-बाह्यभावा अपि अन्तरर्थानुसारेण विस्पष्ट-देवभावा इति तत्तन्मन्त्रतात्पर्यावगाहने सुगमं भवति ॥

अथेदं निरीक्षणीयम्। एकस्यैव परस्य देवस्य सर्वे देवा बहूनि नामानि अङ्गानि व्यक्तयश्चेति प्रागुक्तम्। किमयमाशयः मन्त्रवर्णेभ्य एव सिध्यति, उत, औपनिषद-तत्त्वविदां अर्वाक्कालिकानां व्याख्यानबलादिति संशयः। अत्र नव्या 'ऋग्वेदे प्रायशो

नाना-देवतावाद एव सर्वत्र, उपनिषत्स्वेव सत्यं एकमेवाद्वितीयं ब्रह्म प्रतिपादितम् । यद्यपि क्वचिद् एकदेवस्वरूपज्ञानं ऋषीणां लक्ष्यते, तथाऽपि तदर्वाचीनमन्त्रेषु विशेषतः दशमे मण्डले' इत्याहुः । अत्र ब्रूमः । नेदं तथ्यम् । बहुभ्यो मण्डलेभ्यो मन्त्रान् उदाहरामः, यत्र अग्निरिन्द्रोऽन्यो वा देवः साक्षात्तदेक-स्वरूपभावेन स्तूयते ऋग्वेदे । तदेकं, एकं सत्, उत्तमं ज्योतिरिति च सूर्यपदवाच्यं परमं सत्यं श्रूयते, यस्यैव व्यापार-भेदात् व्यक्तिनामभिर्भिन्ना देवा इति च ज्ञायते । अत्र प्रथमं तावद् बहुधोदाहृतः प्रसिद्धो दैर्घतमसो मन्त्रवर्णो भवति । 'इन्द्रं मित्रं' इत्यारभ्य 'एकं सद्विप्रा बहुधा वदन्ति' (१. १६४. ४६.) इति तृतीये पादे सारं प्रदर्शयति मन्त्रदृष्टिः ॥

वैश्वामित्रे मण्डले द्वाविंशत्यृच एकस्मिन् सूक्ते– 'महद् देवानां असुरत्वं एकम्' (३. ५५.) इति सर्वास्वपि ऋक्षु आवृत्त्या पठितम् । असुरत्वं प्रबलं महदैश्वर्यं एकं इत्युक्तम् । अन्यत्र (३. ५४. ८.) 'विश्वेदेते' इति मन्त्रे 'विश्वं एकं चरत् पतत्रि विषुणं वि जातम्' इति तुरीयः पादः । अस्या ऋचोऽयमर्थः– द्यावा-पृथिव्यौ सर्वाणि जातानि विविक्तानि कृत्वा धारयेते, सर्वान् देवान् बिभ्राणे अपि भारश्रमाद्व्यथां न प्राप्नुतः । यत् चराचरात्मकं विश्वमीष्टे तदेव चरं भवति पतत्रि भवति नानारूपतया जातं च भवति इति । अथ वामदेव्ये मण्डले 'वपुषामिदेकम्' (४. ७. ९.) इति प्रयुक्तम् । पुनश्च 'वपुषामपश्यम्' इति पञ्चमे मण्डलेऽपि मन्त्रो दृश्यते (५. ६२. १.) । स च प्रागुदाहृतो व्याख्यातश्च तृतीयखण्डे । 'ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः । विश्वे देवाः समनसः सकेताः एकं क्रतुं अभि वि यन्ति साधु" (६. ९. ५.) । अयं आग्नेयो मन्त्रः, अत्रापि ध्रुवं अमृतं ज्योतिः अन्तर्निहितं दर्शनाय, तमेकं क्रतुं प्रति सर्वे देवाः स्वैः पथिभिः साधु यान्तीति कथितम् । वासिष्ठे मण्डले (७. ३३. १०.) 'विद्युतो ज्योतिः' इति मन्त्रे 'तत्ते जन्मोतैकं अगस्त्यो यत्त्वा आजभार' इति गीतम् । दशमे मण्डले (१०. ८२. २.) 'यत्र सप्त ऋषीन् पर एकमाहुः' इति स्पष्टमुक्तम् । तत्रैव सूक्ते (ऋक् ६.) 'अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः' इति मन्त्रवर्गः । जन्मरहितस्य तस्यैकस्य नाभौ सर्वे लोकाः प्रतिष्ठिता इत्युक्तं, 'सुपर्णं विप्राः कवयो वचोभिः एकं सन्तं बहुधा कल्पयन्ति' (१०. ११४. ५.) एवं तदेकं परं सत्यमेव देवो देवानां ऋक्संहितायां गूढमगूढं वा स्तूयत इति प्रदर्शयितुं बहुभ्यो मण्डलेभ्यो मन्त्रा उदाहृताः, न केवलं दशममण्डलात् । इदं च तत्त्वं मनसि निधाय

यदि न केवलं आग्नेयसूक्तानि इन्द्र-सोमादिसूक्तानि च पश्येमार्थविचाराय, तदा असन्दिग्धं भवेदिदं यत्तदेकं सदेव सर्वेऽपि देवाः येषामेकैकोऽपि स्वसदृशं साहाय्यं विनियुज्य यजमानं नरं तदेकं परं ज्योतिरमृतं सत्यं प्रापयतीति ॥

अत्र काश्चन ऋच उदाहरिष्यामः, याभिस्तदेकमेव परं ज्योतिः बहुदेवताकारभृद् वर्ण्यते— 'येषामर्णो न सप्रथो नाम त्वेषं शश्वतामेकमिद्भुजे । वयो न पित्र्यं सहः ॥' (८. २०. १३.) । ऋषिः सोभरिः काण्वः मरुतो देवान् अधिकृत्याह । अयं भावः । तेषां मरुतां एकं नाम भ्राजमानं समुद्रवत् पृथुलं बहूनां भोगाय पित्र्यं बलमिव भवतीति । अनेन मरुतामेकाधारत्वं बहूनां देवानां यजमानानां वस्तुजातस्य वा उपकारकत्वं च द्योतिते । वालखिल्यसूक्ते (८. ५८. २.) 'एकं वा इदं वि बभूव सर्वम्' इति स्पष्टम् । 'अयमस्मि जरितः पश्य···ऋतस्य एकमासीनं हर्यतस्य पृष्ठे' (८. १००. ३. ४. ५.) अत्र ऋषिं नेमं इन्द्रास्तित्वे जातशङ्कं इन्द्र आह— 'अहमस्मि स्तोतः, पश्य, मम महिम्ना विश्वानि जातानि अतिक्रम्य स्थितोऽस्मि, ऋतस्योपगन्तारो मां वर्धयन्ति, ऋतं कामयमानाः समारुह्य मामुपयन्ति, अहं तु एक आसीनोऽस्मि नाकपृष्ठे' इति । 'ते हिन्विरे अरुणं जेन्यं वस्वेकं पुत्रं तिसृणाम् । ते धामान्यमृता मर्त्यानां अदब्धा अभिचक्षते ॥' (८. १०१. ६) । अत्र देवानां व्यापारमहिम्ना यजमाने जातं महद्धनं एकमेव ज्योतिः तिसृणां मातॄणां पुत्रत्वेन कीर्तितम् । 'स सप्तधीतिभिर्हितः नद्यो अजिन्वदद्रुहः । या एकमक्षि वावृधुः ॥' (९. ९. ४.) । भूरादिसप्तलोकधामगताभिः धीशक्तिभिर्धारितः स (सोमः) तेजोवाहिनीरप्रीणयत् । ताश्च नद्यः 'एकं अक्षि' विश्वैक चक्षुःशब्दवाच्यं सर्वार्थदर्शि ज्योतिः अवर्धयन् इति भावः । 'महन्महत्या असुरत्वमेकम्' (१० ५५. ४.) इदं च 'महद्देवानां असुरत्वमेकम्' इति प्रागुदाहृतवाक्यप्रायम् ॥

एवं देवानां एकमूलत्वं एकात्मत्वं एकलक्ष्यत्वं च मन्त्रवर्णैरेव ग्राह्याणि भवन्ति । तेषां पृथक्त्वं तु नामतो व्यापारतो व्यक्तितश्चेत्यवधेयम् । अत एव तेषां लिङ्गानि मन्त्रेभ्य एवावगम्य पूर्वैरुक्तानि । आयुध-वाहन-वर्णादयोऽपि लक्षयन्ति देवताविशेषान् । 'बभ्रुरेक' इति प्रागाथमण्डलीयसूक्तात् (८. २९.) तत्त्वमिदमवगम्यते । वाहनान्यधिकृत्य निरुक्त-निघण्टौ (१. १५.) 'हरी इन्द्रस्य' इत्यारभ्य 'नियुतो वायोः' इत्यन्तं पठ्यते । एवमपि देवतालिङ्गानि मन्त्रवर्णेष्वेव लक्ष्यन्ते ॥

अथेदं वक्तव्यम् । यद्यपि सर्वेषां देवानां कर्माणि ऊर्ध्वमूलानि परस्माद्धाम्नः

प्रारभन्त इत्यसंशयं, तथाऽपि तेषां प्राधान्यं साक्षात्साहाय्यं आरादुपकारकत्वं वा यजमानस्य अध्वरपदवाच्येन अन्तर्यागमार्गेण दिवमारोहतः यात्रादशायत्तमिति वक्तव्यम् । विश्वमेव ह्यन्तर्बहिर्वा देवतानां अधिकारक्षेत्रम् । तस्मात्तासां कर्तव्यानि ऊर्ध्वमूलाद् आपृथिव्याः प्रवृत्तानि प्रसरन्ति, तत्र तत्र सोपानपदविशेषेषु यावदपेक्षं विभिद्यन्ते । यद्यपि एकैकस्मिन् धामनि मध्येमार्गं तदधिष्ठानदेवतायाः प्राधान्येनाधिकारः, तथाऽपि सा एकमेव मुखं परमस्य देवदेवस्य । अन्याश्च देवतास्तस्याः पश्चात् परस्ताद्वा व्यापृतास्तत्साहाय्येऽवतिष्ठन्ते । इदमेव तत्त्वमाधारो भवति मन्त्रदशामृषीणां देवतास्तवेषु, यत्र बह्वीषु देवतासु स्तूयमानास्वपि एकैकामपि सर्वदेवात्मभावेन प्रकरणबलात् पृथक्त्वेन च उपतिष्ठते स्तोता यजमानः । ऋषेर्मन्त्रद्रष्टुरिमे देवाः सत्याः, न तु काल्पनिका इति किमु वक्तव्यम् ?

अथेदमवधातव्यम् । अन्तर्यजने चलति, यजमानस्य तत्तत्पदमधिष्ठातुरग्न्यादेर्देवस्य च सम्बन्धोऽभिनिष्पद्यते । स च पिता-पुत्र-सखित्वादिरूपो बहुविधो लक्ष्यते वेदे । अन्यच्च इदं चित्रं, यद् यो देवः पालकः पिता पूज्यो भवति, स एव यजमाने जायमानः पुत्रो भवतीति । अत एव सर्वेऽपि देवाः ब्रह्माण्डेऽधिकाराय प्राप्तप्रथमजन्मानः यजमाने द्वितीयं जन्म लभन्ते । तस्माद् द्विजन्मानो देवा इति सङ्गच्छते । कथं कुतो वा यजमाने देवानां द्वितीयं जन्म ? उच्यते । दिवः परस्तात् परस्माद् धाम्नः प्रस्थितस्य विश्वस्य मूर्धा द्यौः शिखरभूता भवति, तदारभ्य पृथिव्यां पादभूतायां विरमतीव विश्वसृष्टिः । एवं द्यावापृथिव्योरन्तराले पर्वतशिखर-पादयोरन्तर इव बहूनि पदानि गिरिप्रस्थवदवतिष्ठन्ते । तदधिष्ठानदेवैः परिपक्के यजमाने स्वीयवैभवाधानपूर्वकं तदुद्धाराय स्वीयं जन्म लभ्यते । एषां मुख्यः प्रथमजोऽग्निर्भवति । तस्मात्तस्यैव स्वरूपाधिकारविचारः क्रियते । तथा कृते अन्येषां देवानां तत्त्वमपि सुगमं स्यात् । तत्र यथापूर्वं मन्त्रवर्णाधारेणैव निर्वाहः भवति ॥

कोऽयमग्निदेवः यः प्रबोध्य ऋषिभिरीड्यते ? नायं नूनं भौतिको भवितुमर्हति, पञ्चसु भूतेषु तृतीयस्य तस्य जडत्वात्, तेजस्तत्त्वाभिमानित्वेऽपि बाह्यसङ्केतमात्रत्वाच्च । नापि स बहिर्यज्ञकर्मणि अरणिनिर्मथितो वा भवितुमर्हति, यं देवं विना अमृतानां देवानां सम्मदो न विद्यते । 'न ऋते त्वां अमृता मादयन्ते' इति हि मन्त्रदृष्टिः । देवोऽयमग्निः 'कविक्रतुः', क्रान्तदर्शिनः प्रज्ञा अस्येति बहुशो गीयते वेदेषु । अस्मिन् सर्वं यज्ञरहस्यज्ञानं निहितं, अस्मिन् सर्वेऽपि रमन्ते अमर्त्या इत्येवमर्थको मन्त्रराशिर्जेजीयते ॥

दाशतय्यां संहितायाम् । स मुखं भवति देवानां, आस्यं च भवति । स हि सर्वं यजमानेनार्पितं हविः देवान् प्रापयति । स एव देवानामग्रे तिष्ठन् प्रमुखो यजमानमुपगच्छति हविरादानाय । हविरर्पणानि प्रणतीश्च स्वीकृत्य देवानास्वादयति, प्रीणयति । तस्मात्स दूतो देवानाम् । तद्द्वारेणैव मर्त्योऽमर्त्यैः सह व्यवहर्तुं प्रभवति । स नेता 'नर' उच्यते । होता च यज्ञस्य ऋत्विक् । स निर्वहन् यज्ञविधिं देवानाह्वयति यजमानकृतद्रव्यत्यागपरिग्रहाय । स एव तस्मात्सर्वेषामाद्यो देवानां मर्त्ये जनितुम् । इदं च प्रागुक्तं द्वितीयं तस्य जन्म । स 'क्रतुः' दैवी दृढप्रज्ञाशक्तिः मानुषे 'एवमेतत्, नान्यथा' इति अध्यवसायात्मिका बुद्धिर्भवति । तादृशः 'क्रतुः' यदा अरण्योर्निर्मथनाद्याज्ञिकाग्निरिव द्यावापृथिव्योर्विश्वस्य पित्रोरनुग्रहयोगात् मर्त्यस्य हृदयवेद्यां प्रादुर्भूतो भवति, तदा सुप्तोत्थित इव यजमानस्वात्मार्पणान्यादाय पदे पदे दिवमारोहति । सोऽयमग्निः हृदयस्थदैवज्वालो भवति, यस्य स्वं वासस्थानं बृहती द्यौः, यश्च मर्त्येष्वमर्त्यो जायते । जातश्च स सप्तभिः स्वसृभिः पोषितो भवति । सप्तमातृस्तनन्धयं तं आपः सप्तसिन्धवः समाहृत्य पुष्णन्तीति वर्ण्यते । इदं च सप्तकं भूरादिसत्यलोकान्ताः सप्तभूमिकागताः सप्ततत्त्वात्मिकाः शक्तय इति ग्राह्यम् । सप्ततत्त्वात्मक-सप्तभूमिका-ज्ञानशक्तिवैभवानि अस्मिन्नग्नाववस्थितानीति बोध्यम् । अत एवानेन हविराद्यर्पणेषु उपात्तेषु सप्तापि धामानि तद्भागहराणि भवन्तीति द्योतयितुं सप्तार्चिस्सप्तजिह्वादिः अग्निपर्यायशब्दः प्रयुज्यते । तथा यजमानदानेषु सप्तभूमिकाः प्रापितेषु, तत्र यजमानस्य धामानि सिद्धानि भवन्ति, तदीयदेवानाममर्त्यानां जन्मापि मर्त्ये यजमाने सम्भवति ॥

बहुव्यपदेशभागग्निर्वेदे गीतो गुहापदवाच्ये रहसि हृदये निहितः किल । अग्निधर्मबोधकानि कानिचिन्नामानि ख्यापयतो मन्त्रवर्णान् साभिप्रायानुदाहृत्य कथं अग्निरेव स्कन्दः कुमार इति पुराणेषु प्रथितोऽभवदिति निरूपयिष्यामः । अनादेः कालादृषीणां अयं दृढः प्रत्ययः, यदग्निर्नाम सत्यो देवः, न काल्पनिकः नापि केवलं भौतिको याज्ञिको वा, किं तु देवोऽयममर्त्यो मर्त्येष्विति । भृगुपदवाच्याः सत्यसौरप्रभाशक्तय ऋषित्वं प्राप्ताः दिवोऽग्निमाहृत्य मानुषे निधिभूतं मित्रमिव न्यधुरित्याहुः । किमर्थम् ? मानुषस्य दिव्यजन्मलाभायेति गायन्ति । तथा च राहूगणः– 'दधुष्ट्वा भृगवो मानुषेषु…… मित्रं न शेवं दिव्याय जन्मने' (१. ५८. ४.) । ईदृश्य ऋचो बह्वयो दृश्यन्ते, यासां तात्पर्यं न सङ्गच्छेत यदि वयं ऋषीणां किमपि रहस्यं अन्तर्विश्वं विदितमिति

नाभ्युपगच्छेम । 'इमं नो यज्ञममृतेषु धेहि इमा हव्या जातवेदो जुषस्व' (३. २१. १) । 'भोः अग्ने सर्वेषां जातानां वेत्तः! त्वमिमं अस्मदीयं यज्ञं अमृतेषु देवेषु धेहि, इमानि हव्यानि तत्रार्पयितुमर्हसि,' इति प्रार्थयते यजमान ऋषिः । 'अयं कविरकविषु प्रचेता मर्त्येष्वग्निरमृतो निधायि' (७. ४. ४.) । अयमग्निः क्रान्तदर्शी 'अकविषु' अतथाभूतेषु दृष्टिहीनेषु मर्त्येषु अयममृतो न्यधायि इति स्फुटार्थो वसिष्ठस्य मन्त्रः । 'महानसि अध्वरस्य प्रकेतः·········· न ऋते त्वदमृता मादयन्ते' (७. ११. १.) । स्वर्गाध्व-प्रयाणात्मकं यज्ञं अधिकृत्य प्रकृष्टज्ञानोपेतः अग्निः । तस्मादृते देवानां सम्मदो न विद्यत इति वसिष्ठः पुनरत्र ब्रूते । 'अग्निं सूनुं सहसो जातवेदः··········द्विता योऽभूदमृतो मर्त्येषु' (८. ७१. ११.) । स्वयं दिव्योऽपि अत्र मर्त्येषु अमर्त्य इति द्विधाभूत इत्युक्तम् । 'अपश्यमस्य महतो महित्वं अमर्त्यस्य मर्त्यासु विक्षु' (१०. ७९. १.) । अग्नेः अमर्त्यस्य महतो महिमानं मर्त्येषु अहमद्राक्षमिति सौचीकस्य मन्त्रद्रष्टुस्तात्पर्यम् । अत्रि-मण्डले स्पष्टार्थ एष मन्त्रो भवति— 'अग्निर्देवेषु राजति अग्निर्मर्तेष्वाविशन् । अग्निर्नो हव्यवाहनः अग्निं धीभिः सपर्यत ॥' (५. २५. ४.) इति । तत्रैव मण्डले (सू. ११ ऋ. २.) 'यज्ञस्य केतुं' इति मन्त्रे, यज्ञविषयक-प्रज्ञाविशेषवान् अग्निः, होता इन्द्रेणान्यैश्च देवैः सह एकं रथं अध्यासीनो बर्हिरेतीति कथितम् । 'यो मर्त्येष्वमृत ऋतावा' (१. ७७. १.) इति राहूगणस्य, 'विश्वायुर्यो अमृतो मर्त्येषु' (६. ४. २.) 'स मर्त्येष्वमृत प्रचेताः' (६. ५. ५.) 'उप वो गीर्भिरमृतं विवासत' (६. १५. ६.) इति भारद्वाजस्य च मन्त्रवर्णाः मर्त्येष्वमृतमग्निमुद्घोषयन्ति ॥

एवममर्त्योऽग्निरस्ति चेदस्मासु, स वर्तेतैव कुत्राप्यस्मासु गूढे स्थाने । तच्च हृत्पद-वाच्यं रहस्यमन्तरमाहुर्मन्त्रद्रष्टारः । तदेव गुहापदेन व्यवह्रियते । अग्नेरावासः सा गुहा बहुषु मन्त्रेष्वाम्नायते । तदत्र पराशर-विश्वामित्र-वामदेवानां सूक्तेभ्यः सङ्क्षेपतो मन्त्रभागान् उल्लिखामः—

'पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम्' (१. ६५. १.), 'हस्ते दधानो नृम्णा विश्वान्यमे देवान् धाद् गुहा निषीदन् । विदन्तीमत्रनरो धियं धा हृदा यत्तष्टान् मन्त्रानशंसन्' (१. ६७. २.), 'विश्वायुरग्ने गुहा गुहं गाः' (१. ६७. ३.), 'य ईं चिकेत गुहा भवन्तम्' (१. ६७. ४.), 'चित्रं सन्तं गुहा हितम्' (४. ७. ६.), 'गुहा चरन्तं सखिभिः शिवेभिः' (३. १. ९.) । एवमादयो मन्त्रवर्णा अग्नेर्गुहावासं रहस्यं

अन्तर्निहितं हृदयमुदीरयन्ति ॥

अथ सप्ततत्त्वात्मकं विश्वं अस्मिन्नमर्त्येऽग्नौ निहितं इति सर्वथा सप्तकसम्बन्धित्वेन अयं वर्ण्यते । सत्त्वं बलं ज्योतिः आनन्द इति सर्वाणि सप्तधा भवन्तीति गीयते, अत एवाग्नेः सप्तकसम्बन्धित्वं बहुधोक्तम्– 'आ यस्मिन् सप्तरश्मयस्तता यज्ञस्य नेतरि' (२. ५. २.), 'दमे दमे सप्त रत्ना दधानोऽग्निर्होता निषसाद यजीयान्' (५. १. ५.), 'इदं मे अग्ने कियते पावकामिनते गुरुं भारं न मन्म । बृहद् दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु॥' (४. ५. ६.) । सप्तभूमिकाभारं दुर्भरं वोढुं न शक्तोऽसि, अतः पावक, भोः! इमं च चिन्ताभारं मह्यं मा दाः इति सारांशः । 'सप्त स्वसॄररुषीर्वावशानो विद्वान् मध्व उज्जभारा दृशे कम् ।' (१०. ५. ५.) इति त्रितः । अन्यत्र– 'सप्त धामानि परियन्नमर्त्य' इति (१०. १२२. ३.) । 'सप्त ऋषयः प्रतिहिताः शरीरे' इति शुक्लयजुर्वेदीयं मन्त्रं यास्केनोदाहृतं च स्मारयामः । तस्मात् सप्त गिरयः, सप्त सिन्धवः, सप्त ऋषयः, सप्त स्वसारः, सप्त धामानि इति सर्वत्र सप्तकं श्रूयते । इदं च प्रागुक्तप्रकारेण सप्ततत्त्वात्मिकां विश्वसत्तामधिकृत्य तद्गतज्ञानशक्तितेजोविशेषवद् भूमिकापरम्परायां तदाधिकारिकदेवतानां वा यथासम्भवं द्योतकमिति बोध्यम् ॥

अथ अग्निस्वरूपविचारे मुख्यप्रसक्त्या अपां स्वरूपं विचारयितव्यम् । का इमा आपः सिन्धवो वा, याः सप्तविधा उद्घोष्यन्ते वेदमन्त्रेषु? ता ऋतस्य धाराः परस्माश्रितः प्रवाहाः, परचित्तेजोवाहिन्यः । इमाश्च तदावरकस्य वृत्रासुरस्य वज्रेण हत्या देवराजेन इन्द्रेण विसृज्य निर्मुच्यन्त इति बाह्याः । पार्थिवचैतन्ये ऋतधाराप्रवेशं यः प्रतिरुणद्धि तस्यासुरस्य बाह्यः सङ्केतो वृत्रशब्दवाच्यो मेघ इत्यवधेयम् । वसिष्ठवामदेवसूक्तेभ्यः तत्रापि विशेषतः 'समुद्रज्येष्ठाः' (७. ४९.) 'समुद्रादूर्मिः' (४-५८) इत्याभ्यां स्फुटमिदमवगम्यते, यदखण्डसत्यस्वरूपस्य रूपकं बिम्बमेव समुद्रः, आप एव ऋतचिद्धाराः, सिन्धवः सप्त विश्वभूमिका-सप्तकगत-सर्जनधारणतेजोवाहिन्यः शक्तयश्चेति । इदं च सङ्केतरहस्यं वैश्वामित्रस्य आद्यस्य आग्नेयसूक्तस्य तात्पर्यविचारादसन्दिग्धमवधार्यते । तदत्र समासतः प्रधानविषयान् आवेदयामः ॥

अग्निमदर्शन्नप्सु देवाः । तस्मिन् सप्त बलिष्ठाः (यह्वीः) पुष्टिं प्राप्ताः । स च मोदवान् अभवत् । जन्मना श्वेतः संवर्धनेन रक्तः (अरुषः) अरुणो वा । ताः अश्वाः तं नवप्रसूतं शिशुं अभिजग्मुः (अभ्यारुः) । ज्योतिर्वसानः अप्सु परितो वसन्

अन्यूनानि विपुलानि वैभवानि स स्वयं अकल्पयत्.........नित्ययौवना देव्यस्तमेकं गर्भं दधिरे । ताश्च सप्तवाण्यः । प्रकाशमानधीसारमूले मधुनः प्रवाहेषु विश्वरूपेषु तस्य वपुर्विततमभवत् । अत्र धान्यो नद्यः (धेनवः) स्वयं पोषिका अवर्तन्त। साधोस्तस्य देवस्य द्वे च मातरौ विशाले भूत्वा सुसङ्गते संवृत्ते । जन्मना स पितुः सत्त्वसमृद्धिं अवेदीत् । स स्वीया धारा व्यसृजत्, स्वीया विपुलाः सरितश्च । स्वयमेकः बह्वीनां वर्धमानानां मातॄणां स्तनन्धयो भूत्वा समवर्धत । ऋते बृहति अवियोज्याभिः स्वसृभिः (जामिभिः) तस्मै परिकल्पितं वासं स स्वीचकार । ....अपारे स्वीये रहसि स्थाने वसन्तं तं अमृतं दुदुहुस्ताः । अयं वैश्वामित्रसूक्तैकदेशस्य सारांशः ॥

अथ मन्त्रस्थपदानि तत्र तत्रोपयुज्य सङ्केतार्थविवरणं करिष्यामः । इमाश्च सप्त (नद्यः) आपः सत्या दिव्याश्च भवन्ति । उच्चैर्धाम्नस्ता अग्निमानैषुरत्र प्रतिष्ठापयितुम् । स चाग्निर्दिव्यं रहस्यं वस्तु, पृथिव्यां ओषधीषु निहितः, अरणिभूतयोः द्यावापृथिव्योः घर्षणादाविर्भावयितव्यः । अतो द्यावापृथिव्योः शिशुरुच्यते, शुद्धसत्त्वमनःप्रधाना द्युस्थाना चिदेव द्यौरुच्यते । पार्थिव-मनःप्रज्ञाप्रधाना जागरितस्थाना चित् तु पृथिवीति सङ्केतिता । उभयोर्व्यापारबलात् प्रयासतो मर्त्यः तद्रहस्यं वस्तु अग्न्याख्यं निष्पादयेत् । दिव्यास्वप्सु तु स सुदर्शः, बलेन ज्ञानेन भोगेन च युक्तः सुगमः सुखेन जातो भवति । जन्मना शुभ्रः क्रियया वर्धमानोऽरुणो जायते । जातमात्राय तस्मै देवाः प्रादुस्तेजो बलं वपुश्च । सप्त महत्यो (धेनाः) नद्यस्तं वर्धयन्ति । धेनुशब्दवाच्याः सिन्धवोऽत्र अश्वा इति अभिवर्णिताः । अत्रेदं कारणं भवति । धेनुपर्यायो गौः ज्ञानात्मिकायाः शक्तेः सङ्केतो वेदे । अश्वस्तु क्रियात्मिकायाः शक्तेः । अश्वोऽत्र प्राणगता कार्यकारकशक्तिः । अग्नेराधाने जनने च अप्स्वरूपा धेनवः प्राणात्मकतां भजन्ते । स च प्राणः प्राणिति, करोति, कामयते, भुनक्ति च । अग्निरेव प्रथमं पार्थिवो घर्मात्मको भूत्वा, ततः परं प्राणो भवति, अन्ते च स्वर्ग्योऽग्निश्च । एवं सप्तविधा आप ऊर्ध्वमेत्य शुद्धसत्त्वमनः-प्रधाना (यह्वीः) दिव्या भवन्ति । उत्तमं प्रज्ञानं सत्यमेव तासां उद्भवस्थानम् । तस्मादेव ताः प्रवहन्ति । सप्तवाचस्तु (सप्त वाणीः) सर्वेश्वरस्य देवस्य विसृष्टिरूपा आविष्कारशक्तय इति ग्राह्यम् । सर्वेषां वस्तूनां पिता प्रभुः पुमान्, स तेषां रहस्यो-द्भवधामनि गूढः स्थितः । तच्च उत्तमं चित्पदम् । अग्निः सखिभिर्देवैः सप्तभिरद्भिश्च सह तत्पदमारोहति । स चाग्नेः स्वर्गारोहः अस्मासु मर्त्येषु यजमानेषु पृथिवीशब्द-

क्षितां जागरितस्थानां प्रज्ञां अजहदेव निर्वर्त्यते । अग्निस्तेन स्वर्गारोहेण सर्ववस्तूनां पितुः समृद्धस्य मधुनो मूलमधिगम्य तानि मधून्यावर्जयन् वर्षत्यस्मत्प्राणेषु । स स्वयं गर्भं दधानः पुत्रो जायते । अत एव स नित्यः कुमारः, शुक्रं ज्योतिः, शुभ्रः पुमान्, एक आत्मा वैश्वानरात्मना मानवे मर्त्येऽमर्त्यः सिद्धो भवति । कविक्रतुः, दिव्यः शिशुः, (देवकुमारः) तस्येह जन्म, तस्य पोषः, अद्भिः संवर्धनं, नद्य एव आपः, धेनवः ता एव पुनरश्वाः इत्यादयः सङ्केतरहस्यार्थान् अन्तरेण तात्पर्यसङ्गत्या नोपपत्तिं क्षमन्ते । यदि सङ्केतगोप्यमन्तरा कमप्यर्थमेषां निर्णेतुं प्रयतेमहि, असम्भावितकल्पनैव सिध्येत्, न चेदुन्मत्तप्रलापित्वं मन्त्रद्रष्टृष्वारोपितवन्तः स्याम । ईदृशाः सङ्केताः स्वयमेव विवृतगूढार्थाः स्पष्टं लक्ष्यन्तेऽन्यत्रापि सूक्तेषु । 'समुद्रादूर्मि'रित्यारभ्य 'तमश्याम मधुमन्तं तमूर्मिम्' इत्यन्तं वामदेवसूक्तं प्रस्फुटं वेदरहस्यं लक्षयतीति कः सन्देहः? अथ च "घृतस्य नाम गुह्यं यदस्ति', 'जिह्वा देवानां अमृतस्य नाभिः', 'एता अर्षन्ति हृद्यात् समुद्रात्', 'घृतस्य धारा .... सरितो न धेना अन्तर्हृदा मनसा पूयमानाः', 'अग्निं योषाः कल्याण्यः स्मयमानासो अग्निम्', 'धामन् ते विश्वं भुवनमधिश्रितम्', 'अन्तः समुद्रे हृद्यन्तरायुषि" इत्यादि-वाक्यवाक्यैकदेशेभ्यः इदं स्फुटमवगम्यते, यद् घृतं मधु धेनुः आपः योषाः हृत् अन्तः समुद्रः–इत्यादयः शब्दाः स्वीयान् महतो रहस्यार्थान् स्वयमेव विवृण्वत इति । ईदृशानां साङ्केतिकानां रूपाणां कानिचित्पुराणेषु स्पष्टमवशिष्टानि लक्ष्यन्ते । क्षीरसागरवासी अनन्तशयनो विष्णुरित्युक्ते," नायमनन्तः कोऽपि प्राकृतः सर्पः, न वा क्षीरं च मधुरं पार्थिवं गव्यं, नापि समुद्रो दुग्धवारां राशिः । सर्वव्यापी विष्णुः परिच्छेदशून्ये अनन्ते सद्भावे आनन्दमये नित्ये वस्तुनि अवतिष्ठत इति सङ्केतार्थः । ननु पुराणानां कर्तारः पुरोहिता जडबुद्धयः सूर्यचन्द्रोपरागतत्त्वस्यापि अनभिज्ञाः कथं गहनानि तत्त्वानि जानीयुः? साधारणपार्थिव-सर्प-क्षीरसागरानेव ते ब्रुवते, वयमेव सङ्केतार्थं कल्पयाम इति चेत्, नाऽवश्यकी कल्पनाऽस्माभिः कार्या । त एव लाक्षणिकैः शब्दैः सङ्केतकल्पनां मुद्रयित्वा गहनानि तत्त्वानि सार्वलौकिकदर्शनाय ख्यापयामासुः । ते च शब्दाः, व्यापको 'विष्णुः' शेषसर्पः 'अनन्तः' आनन्दमयं 'मधुरं क्षीरं' नित्याखण्डसत्स्वरूपः 'समुद्रः' इति बोध्याः ॥

अथ यो वेदेऽग्निः कुमारः कीर्त्यते, स पुराणेषु अग्निजः स्कन्द इति कथ्यते । पुराणेषु कुमारकथाप्रस्तावे ये विषयाः स्मर्यन्ते, ते सङ्केतभाषावेषान्तरैर्वेदे श्रूयन्ते ।

यद्यपि कथाविस्तरेषु तत्र तत्र पुराणानि विप्रतिपद्यन्ते, तथाऽपि सर्वाणि पुराणानि कुमारतत्त्वमधिकृत्य प्राधान्येन एककण्ठानि भवन्ति । महाभारतावलोकने निस्संशयं इदं भवति, यद्वनपर्वणि आङ्गिरसोपाख्याने स्कन्दोत्पत्तिविवरणे लक्ष्यमाणा विषया वेदेभ्य एवोद्धृत्य प्रोक्ता इति । भाषाभेदेऽपि क्वचिद्वैदिकान् शब्दान् प्रायशो वेदप्रतिपादितानेवार्थानाविष्करोति महाभारतसंहिता । परस्मात्स्वधाम्नः पितुरागतः पुत्रोऽग्निः कुमारो वर्ण्यते वेदे, महादेवात्स्कन्नं तेजः स्कन्दः सुब्रह्मण्यः कुमारो भारते पुराणे च । ओषधीषु जातो वेदे, शरवणे पुराणे, अप्सु संवर्धितो वेदे, गङ्गायां पुराणे । धेनुभिः संवर्धनं वेदे, कृत्तिकाभिः क्षीरदानं पुराणे । आपो गावोऽश्वा वा मातरः स्वसारो वा सप्त वेदे, पुराणे तु षडेव मातरः एकां परमपदभूमिकां मातरं वर्जयित्वा ॥

अथ च महाभारते इन्द्रो मानसशैले तिष्ठन्नग्नेरागमनं प्रतिपालयति स्मेति पठ्यते । 'स शैलं मानसं गत्वा ध्यायन्नर्थमिदं भृशम्' (वनपर्व-अ०. २२२.), धेनवो नद्यो मातरः अग्नेर्धात्र्य इति च पठ्यते— "एता नद्यस्तु धिष्ण्यानां मातरो याः प्रकीर्तिताः" (अ०- २२१. श्लो०- २६.) । एवं स्कन्दोत्पत्तिकथायां विचार्यमाणायां वैदिकी सङ्केतभाषा पुराणकथाया मूलं भवतीत्यसंशयम् । स्कन्द एवाग्निरिति संशयच्छेदकं वाक्यं वेदाधारकं ब्रूते महाभारतसंहिता । अद्भुतनामकोऽग्निर्यो वेदे वर्णितः स एव स्कन्द इति स्पष्टमाह— 'अद्भुतस्य तु माहात्म्यं यथा वेदेषु कीर्तितम्' इति (वनपर्व- २२१-३०.) । तथा अग्नयो बहवः प्रोक्ता आङ्गिरसोपाख्याने । तत्र अद्भुतोऽग्निर्वेदे वर्णितः किल । यदि वेदे अग्निरद्भुतपदेन व्यवहृतो दृश्येत, तदा महाभारतकारो वेदसूक्तार्थज्ञानबलात् पुराणप्रकारककथायां अद्भुताख्यस्याग्नेः स्कन्दस्य इतिवृत्तं निवेशितवानिति शक्यं वदितुम् । परं तु, यथा अग्निः पुरोहितो यज्ञस्य, होता, मुखं दूतो वा देवानां, सेनानीः, सप्तजिह्व इति कीर्त्यते, न तथा अद्भुतपदं अग्निलिङ्गत्वेन प्रख्यातं भवति । तस्मादत्र विचारो भवति । ऋग्वेदे पञ्चविंशत्यधिकेषु स्थलेषु अद्भुतपदं प्रयुक्तं दृश्यते, अन्यत्र चतुर्षु समासान्तर्गतं भवति, यथा 'अद्भुतैनसः' इति । अत्र प्रथमं अद्भुतपदार्थनिर्णयः कार्यः । अद्भुतं लौकिकसंस्कृतभाषायामिव वेदेऽपि आश्चर्यपर्यायो भवतीति निर्विवादम् । 'महत्' इत्यर्थेऽपि बहुत्र प्रयुज्यते, तथा सायणीया व्याख्या च भवति । विश्वातीतं परं सत्यं महत्पदवाच्यं वेदे, यथा 'महद्देवानामसुरत्वमेकम्' इत्यादौ । तदेव 'महत्' 'अद्भुतं' आश्चर्यं भवति । इदमेव प्रतिबिम्बितं 'आश्चर्यवत्पश्यति' इत्युपनिषद्वाक्ये ।

उपनिषत्सु ब्रह्मपदमपि बृहतेर्धातोरर्थानुगमात् महत्पर्यायो भवति । 'महतो महीयान्' इत्यौपनिषदः पुरुषश्च श्रूयते । परं ज्योतिः पितैव कुमारो जात इति वेदे अद्भुतसंज्ञोऽग्निर्गीयते– 'न भूतं अद्भुतं' इति नैरुक्तं निरङ्कुशं निर्वचनं क्वचिदवलम्ब्य व्याचक्षाणोऽपि सायणः प्रायशः 'आश्चर्यं' 'महत्' इत्येव व्याचष्टे । अत्र प्रथमं समासान्तर्गतं अद्भुतपदं विमृश्य, ततः परं तत्पदं अग्नि-परत्वेन प्रयुज्यमानं परीक्षिष्यामहे ॥

'अद्भुतैनसः' इति मरुतां विशेषणत्वेन सकृत्, आदित्यानां च सकृत्, एवं द्विः प्रयोगो दृश्यत ऋक्संहितायाम् । अद्भुतं न भूतं एनः पापं येषु ते मरुत इति सायणो मन्यते । नैतदृजु भवति । अद्भुतानि एनांसि येषु त इति उपपन्नतरम् । कुतः? मरुतश्चण्डकर्माणः प्रथिता वेदे । चण्डकर्माणः पापा इति लोके साधारणोऽभिप्रायः । मरुतां कर्माणि चण्डान्यपि न साधारणानि तस्मादद्भुतानीत्याशयेन अद्भुतपापा इत्युक्तम् । अस्मासु मानुषेष्विव तेषु पापं न विद्यत इति फलितोऽर्थः । अत्र अद्भुतं आश्चर्यमिति ग्रहणेन सायणीयतात्पर्यं सिध्यति, स्वच्छन्दनिर्वचनस्य अनपेक्षता भावपुष्टेरक्षतिश्चेति अवधेयम् । प्रायः सर्वत्र अद्भुत इत्यग्नेर्व्यपदेश इति निरूपणाय सर्वाणि ऋग्वेदीय-प्रयोगस्थलानि परीक्षितव्यानि । यत्र कुत्रापि अन्यदैवत्ये सौम्ये ऐन्द्रे वा मन्त्रे तत् पदं प्रयुक्तं दृश्येत, तत्रापि अग्निगुणबोधकानि विशेषणानि प्रयुज्यन्ते । तच्च पुरस्तात् प्रदर्शयिष्यामः । केवलं आश्चर्यार्थप्रयुक्तानि स्थलानि वर्जयित्वा देवतापरत्वेन निर्दिष्टानि एव निरीक्षामहे ॥

'न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम्' (१. १७०. १.) । अत्र परं वस्तु निर्दिष्टम्– 'स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः' (१. ७७. ३.) । अत्र अद्भुतस्य महतो भूतस्य सारथिरग्निरित्युक्तम् । 'सदसस्पतिमद्भुतं प्रियमिन्द्रस्य' (१. १८. ६) इन्द्रस्य प्रियः किल अग्निरद्भुतः । 'शुचिः पावको अद्भुतः मध्वा यज्ञं मिमिक्षति' (१. १४२. ३.) । अग्निमद्भुतं गायति दीर्घतमाः । 'देवो देवानामसि मित्रो अद्भुतः' (१. ९४. १३.) अत्राप्यग्निरद्भुतः । 'विशां राजानमद्भुतं अध्यक्षं धर्मणामिमम् । अग्निमीळे स उश्रवत्' (८. ४३. २४.) । अग्निरद्भुतः स्पष्टः । 'त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना' (५. १०. २.) । 'त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः' (५. २३. २.) । अग्निरेवाद्भुतः सम्बोध्यते– 'द्रुग्वः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः' (२ ७. ६.) अग्निरेवात्र देवता । 'व्यस्तभ्नाद्रोदसी मित्रो अद्भुतः' (६. ८. ३.)

अग्निरेव निर्दिष्टः । 'स त्वं सुप्रीतो वीतहव्ये अद्भुत' (६. १५. २.) अग्नेरेव सम्बोधनम् । 'स्तोता यत्ते अनुव्रत उक्थानि ऋतुथा दधे । शुचिः पावक उच्यते सो अद्भुतः ॥' (८. १३. १९.) अयं ऐन्द्रो मन्त्रः । अत्रापि अग्निधर्मवत्त्वेन स्तुता देवता । शुचिः पावकः, अद्भुत इत्यग्निविशेषणानि प्रयुक्तानि भवन्ति । 'त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ । पुनानो वह्ने अद्भुत ॥' (९. २०. ५.) अत्र सोमो देवता, सम्बोधने 'वह्ने' 'अद्भुत' इति प्रयुक्तम् । 'शास इत्था महानसि अमित्रखादो अद्भुतः' (१०. १५२. १.) अत्र सकृदेव अग्निलिङ्गवर्जे इन्द्रः अद्भुत इति स्तुतः । 'यो असै हव्यैर्घृतवद्भिरविधत्…… उरुचक्रिरद्भुतः' (२. २६. ४.) । ब्रह्मणस्पतिरत्र देवः, सकृदेव अद्भुतविशेषणमस्य लक्ष्यते । सकृत् मित्रावरुणौ अद्भुतौ (५. ६६. ४.) इत्युक्तम् । सकृत् समासान्तर्गतं अद्भुतपदं मित्रावरुणपरं भवति– 'अद्भुतक्रतू' (५. ७०. ४.) इति । तथा सकृत् 'अद्भुतक्रतुम्' (८. २३. ८.) इति अग्निपरम् । 'अद्भुतैनसां' (५. ८७. ७.) इति मरुतां विशेषणं प्राग् विचारितं स्मार्यम् । 'अस्ति देवा…… आदित्यास अद्भुतैनसः' (८. ६७. ७.) इति अन्यत्र भवति ॥

ऋग्वेदे अद्भुतपदप्रयोगस्थलानि सर्वाणि परीक्षितानि । साधारण्येन केवलं आश्चर्यार्थे प्रयुक्तानि नेह दर्शितानि, प्रयोजनाभावात् । सर्वत्र अग्नेर्वैशिष्ट्यं अद्भुतपद-द्योतितं भवति । कदाचिदत्र दर्शितप्रकारेण अन्यदेवताविशेषणत्वेन दृष्टमिति तथ्यम् । न तावता ह्रासापत्तिरद्भुतपदविशेषितस्य अग्नेर्वैशिष्ट्यस्य । परस्य ज्योतिषः अग्निरूपेण अवस्थितस्यैव अद्भुतशब्देन व्यवहारो वेद इति निरूपितम् । एकस्यैव परस्य देवस्य बहु-देवताकारत्वात् क्वचिदन्योऽपि देव इन्द्रः सोमो वा अद्भुतविशेषणेन प्रतिपाद्यते । अग्निरेव सर्वा देवता इत्यपि गीयते । यथा वैश्वानरीयसूक्तेषु क्वचित् सूर्य एव प्रति-पाद्यमानेऽपि वैश्वानरपदं अग्निमेव लक्षयति, तथा अद्भुतपदं अन्यदेवताविशेषणतया कदाचित्प्रयुक्तमपि अग्निमेव विशिष्टतया ख्यापयतीत्यवधार्यम् ॥

'अद्भुतस्याग्नेर्माहात्म्यं वेदेषु परिकीर्तितम्' आख्यातुं प्रतिज्ञाय महाभारतकारः स्कन्दोत्पत्तिवृत्तान्तं कथारूपेणोपपादयामास । इदं च वेदमूलत्वं कुमारतत्त्वस्य वैश्वा-मित्राग्निसूक्तार्थविचारादुदाहृताभ्य ऋग्भ्यश्च विस्पष्टं भवति । यद्यपि स्कन्दकथासारांशः पुराणेषु महाभारतसंहितायां च उभयत्रैक एव भवति, तथाऽपि वैयासिकी संहिता भाषया भावेन च वेदभाषायाः सङ्केतरूपत्वनिरूपणे बहुतरामुपयुक्तेति तामेवोदाहार्ष्म ।

एवं वृत्रवधादि-पुराणकथानां च वेदमूलत्वं बोध्यम् । अत्र तु अग्निस्वरूपविचार एव प्रसक्तः, तदनुप्रसक्त्या पौराणिकस्कन्दकथामूलपरीक्षणेन वेदभाषायाः सङ्केतरूपत्वं दृढीकृतम् ॥

स एष ऋचां राशिः, ब्रह्मकोशो व्याख्यास्यते । गूढार्थप्राधान्येऽपि कर्मोपयोगितया व्यवस्थितानां ऋचां पदार्थविचारे गवाश्वादीनि साङ्केतिकपदानि अपरिहार्यैव अन्तरर्थानुसारि-तात्पर्यपरिग्रहे व्यवसायः कार्यः । अग्न्यादीनि देवतानामानि तत्तद्गुणबोधकैर्वाचकैर्व्याख्यातुं शक्यान्यपि संज्ञापदानीव पदपरिवृत्तिं न सहन्त इति बोध्यम् । अग्न्यादिदेवानां क्वचिद्बाह्यप्रपञ्चे भौतिकाग्न्यादिरूपेणावस्थानं केवलं साङ्केतिकमिति मन्तव्यम् । देवतानां स्वरूपाणि तु दिव्येनाभ्यन्तरेण वोन्मीलितेन चक्षुषा ग्राह्याणि । एकैकोऽपि देवः अद्वितीयस्य परस्य देवस्य अङ्गं गुणः शक्तिविशेषो वा इत्युक्तौ अग्न्यादिः देवः न केवलं शक्तिर्गुण एव वा अङ्गं वा भवति, किं तु स्वयं गुणी शक्तः, व्यक्तिर्वेति बोध्यम् । समस्तेऽपि ऋग्वेदे एकरूपा सङ्केतव्यवस्था । यद्यपि ऋषीणां मन्त्रदृष्टिषु क्वचिद्भावपुष्टिरधिका क्वचिद्गाढा सरला वा वाक्यगतिः, शब्दार्थमाधुर्यगाम्भीर्यादौ साम्यं वा न लक्ष्येत, क्वचित्सङ्केतगूढार्थबाहुल्यं वा दृश्येत, तथाऽपि सर्वेषां मन्त्रद्रष्टॄणां एकमेव परमं लक्ष्यं, एकमेव रहस्यं, एक एव सङ्केतसम्प्रदायः । अत एव रहस्यार्थपरिज्ञानमक्लिष्टं भवति । एकरीत्यैव ह्यत्र साङ्केतिकशब्दार्थपरिग्रहो भवति । सङ्केतव्यवस्थापरिज्ञानं वेदरहस्यावगाहनस्य द्वारं भवतीति माधुच्छन्दसेभ्यः सूक्तेभ्य ऋक्संहितायामादिमेभ्य एवावगम्यते । 'अग्निमीळे' सूक्तमेव वेदरहस्याधिगमाय प्रथमसोपानतया संहितायां प्रारम्भे संहिताकारैर्निवेशितमिव लक्ष्यते । इदं च मन्त्रार्थविचारावसरे सुगमं स्यादिति असंशयम् । 'अग्निमीळे' सूक्तजपस्य सर्ववेदपारायणफलं प्राहुः प्राज्ञाः । सर्ववेदरहस्यज्ञानबीजं अत्र द्रष्टव्यमित्याशयेन तथा फलश्रुतिरिति बोध्यम् ॥

अथ ऋग्वेदसंहितायाः द्विप्रकारको विभागो भवति । अष्टकानि, अध्यायाः, वर्गाः, मन्त्राश्चेति एको विभागः । अयं चाध्ययनोपयोगी । मण्डलानि, अनुवाकाः, सूक्तानि ऋचश्चेत्यपरो विभागः अनुष्ठानोपयोगी । अनुष्ठानमपि द्विविधम् । कर्मानुष्ठानं, जपाद्यनुष्ठानं चेति । मन्त्राणां कर्मभिः सम्बन्धं विनियोगमाहुर्याज्ञिकाः । तथा विशेषविनियोगो मन्त्राणां तत्तत्क्रतौ सूत्रकारेण प्रदर्शितः कर्मपराणामुपयुक्तो

भवति । कृत्स्नस्यापि वेदस्य स्वाध्याये जपे ध्याने च सामान्यविनियोगो बोध्यः । अयमेव वेदरहस्यार्थपराणामस्माकमपेक्षणीयः । तां तां देवतां साक्षात्कर्तुं मन्त्रार्थानुसन्धानबलभूयसि जपध्यानपारायणात्मके अनुष्ठाने सूक्तमन्त्राणां सामान्यविनियोगो द्रष्टव्यः । मन्त्राक्षराणामनितरसामान्यप्रभावत्वेऽपि अर्थानुसन्धानमन्तरा भस्मन्यनग्नावाज्यहोमवत् पर्यवस्येत् स्वाध्यायः । अत एव अर्थविचारवर्जं स्वाध्यायी 'स्थाणुरयं भारहर' इति निन्दास्पदमभूत् पूर्वेषाम् । कर्मपारम्यपक्षप्रमुखा आश्वलायनप्रभृतयः सूत्रकारा अपि वेदाध्यायिना अन्तर्मुखेन एकाग्रमनसा भाव्यमित्यभिप्रायेणैवमाहुः— 'यत् स्वाध्यायमधीते स ब्रह्मयज्ञः' 'द्यावापृथिव्योः सन्धिमीक्षमाणः सम्मील्य वा यथा वा युक्तमात्मानं मन्येत तथा युक्तोऽधीयीत स्वाध्यायम्' इति । तस्मात् 'स्वाध्यायोऽध्येतव्य इति ब्रह्मयज्ञादौ शब्दप्राधान्येऽपि अनुष्ठानं अर्थानुसन्धानपूर्वकमेव फलवदिति सिद्धम् । सोऽयं मन्त्रार्थविचारो देवतास्वरूपादिरहस्यविज्ञानसम्पत्तये जिज्ञासूनां कर्मबद्धश्रद्धानामप्युपकारकः स्यादित्याशंसामहे ॥

इति श्रीमहर्षि-रमणभगवत्पादानुध्यात-श्रीभगवद्वासिष्ठगणपतिमुनिप्रवरान्तेवासिनः
पूर्णयोगाचार्य-श्रीमदरविन्दभगवत्पादानुध्यातस्य
भारद्वाजस्य विश्वेश्वरसूनोः
कपालिनः कृतिषु

वेदगुप्तार्थसिद्धाञ्जनस्य ऋक्संहिताभाष्यस्य

भूमिका समाप्ता

भूमिका-विषयानुक्रमणिका.

प्रथमः खण्डः (पुट १–३०)

वर्त्मनि एतावताऽपि कालेन व्यामोहो न न्याय्यः । प्राचीनार्षरहस्य-जिज्ञासया गूढार्थविवरणपक्षपरीक्षायां प्रवृत्तिरावश्यकी धीमतां तेषाम्, न चेद् दुर्विपाक एव भवेत् तद्विमर्शवैदुष्यस्येति मन्त्रतात्पर्योदाहरणपूर्वकं कथनम् ॥

१५–१७ द्वितीयाक्षेपोपन्यासः– सायणीयसम्प्रदायभाष्यस्य विरुद्धो वेदरहस्यवादः इत्युक्तेर्विमर्शनम् । त्रिविधं परिज्ञानं इति यास्कोक्तिमुदाहृत्य सायणीये व्याख्याने दृश्यमानं असामञ्जस्यादिकं निरीक्षितम् ॥

१७ पूर्वमीमांसकसिद्धान्तविरोधी वेदरहस्यार्थवाद इति तृतीयो जघन्य आक्षेपः– तस्योपन्यासपरिहारौ ॥

१८ सायणभाष्यस्य अपरिहार्यत्वं वेदार्थविचारे इति प्रतिपादनम् । गुणदोष-स्मरणपूर्वकं भाष्यस्य प्रशंसा ॥

१९ कर्मैकपरत्वपक्षे तु दोषः, गीतावाक्यस्य न्याय्यता च ॥

२० स्वपक्षोपन्यासः– ऋग्वेदोऽत्र विचारविषयः- बहिरर्था अन्तरर्थाश्चेति द्व्यर्था मन्त्राः ॥

२१–२२ अर्थद्वयवच्छब्दप्रयोगव्यवस्था, भाषास्वरूपम्, शब्दानां प्रवृत्तिः,शब्दः प्राधान्येन यौगिकः, शब्दार्थसङ्केतस्वरूपम्

२३ अस्माभिरत्र विशिष्टेऽर्थे सङ्केतपदप्रयोगः, आयुर्घृतमित्यादाविव अश्वादीनां बलादिलक्षकत्वं प्रतिपाद्य, बाह्योर्थः अन्तरर्थस्य सङ्केतभूत इति प्रतिपादनम् ॥

२४–२५ बहिर्यागोऽपि सङ्केतभूतोऽन्तर्यजनस्य । ऋत्विग्-यजमान-यजन-तत्फलानां स्वरूपविचारः । होत्रादीनां ऋत्विजां घृतादिद्रव्याणां गवाश्वादिफलानां च अन्तरर्थोपपादनम् ॥

२६ भूरादिसमव्याहृत्युपन्यासः । तत्र भूमिरन्तरिक्षं द्यौरिति त्रैलोक्यविभाग आर्ष इति प्रतिपाद्य, आन्तरस्य त्रिकस्य सङ्केतभूतं बाह्यं त्रिकमिति प्रतिपादनम् ॥

२७–२८ ब्रह्माण्डाधिकारिकाणां देवानां तत्त्वं (स्थूलपक्षे बाह्ये, आन्तरे सूक्ष्मपक्षे च) उपन्यस्तम् । अग्निस्वरूपवर्णनम्–तथा इन्द्रादीनां स्वरूपस्य विवरणम् ॥

द्वितीयः खण्डः (पुट ३१–५२)

४३ तपस ऋते दुरवगाहो मन्त्र इति प्रमाणपूर्वकं उपपादनम् । निरुक्तबृहद्देवताकाराणां वचनोदाहरणम् । श्रद्धया ज्ञानपूर्वकमनुष्ठितस्यैव कर्मणः फलम्, नान्यथेत्युपपादनम् ॥

४४ बाह्यपक्षे, उच्चावचैरभिप्रायैःऋषीणां मन्त्रदृष्टयो भवन्तीत्युक्तिर्युक्ताऽपि, नैव अन्तरर्थबाधिका भवतीति प्रतिपादनम् ॥

" ऋचः प्रमाणं वेदरहस्यविषये–

४५ तपोनिष्ठानां ऋषीणां देवताभिः सह व्यवहारे तदर्थप्रकाशने च रहस्यभाषाव्यवस्थापितेति निर्णयाय मन्त्रदृष्टिष्वेव प्रमाणं द्रष्टव्यं इति प्रारभ्य ऋग्वेदसंहितायां रहस्यपदार्थप्रसक्तिपरीक्षापुरस्सरं 'निण्य' पदार्थप्रतिपादनम् ॥

४६–४८ सर्वाणि निण्यपदप्रयोगस्थलानि परीक्ष्य ऋचामुदाहरणेन वेदभाषायां 'निण्यं'

४९ रहस्यं प्रतिपादितम् । गुहा, अपीच्यं, प्रतीच्यं इत्यादीनि रहस्यपदार्थत्वेन स्तोत्रपर्यायनामपदविशेषणतया प्रयुक्तानीति मन्त्रोदाहरणपूर्वकं प्रदर्शितम् ॥

" केनोपायेन रहस्यमाच्छादितमिति प्रश्नमुत्थाप्य, बाह्याभ्यन्तरार्थद्वयवता शब्देन घृतादिना, सङ्केतरूपेण गवाश्वादिना चेति निरूपणम् ॥

५० ऋत-केतु-क्रतु-घृतादिपदानां अर्थनिर्णयः एकरीत्या सर्वत्र तेषां अर्थावगतिः गूढार्थपक्षानुसारस्य सौलभ्यमावहतीति प्रतिपादनम् ॥

५१ वेदे सङ्केतरूपाणां प्रयोगस्य निदानविचारपूर्वकं सङ्केतार्थ-समालम्बः वेदगुप्तार्थसिद्धान्त इति प्रतिपादनम् ॥

५२ नैकविधानां सङ्केतानां स्वरूपोल्लेखनम् ॥

तृतीयः खण्डः (पुट ५२–६७)

५३ वसिष्ठ-वामदेवादीनां मन्त्रदृष्टय एव वेदगूढार्थसिद्धान्तस्य प्रधानं प्रमाणमिति द्वितीये खण्डे निरूपितम् । मन्त्रवर्णेभ्योऽन्यत्र वेदगूढार्थसिद्धान्तं सूचयन्ति प्रोद्बलयन्ति वा प्रमाणानि प्रदर्शितानि । तत्र प्रथमं वैदिकपदानां यौगिकत्वं प्रतिपादयतो यास्कस्य ऋषि-मन्त्र-देवतादीन्यधिकृत्याभिप्राया उपन्यस्ताः ॥

५४ गौणवृत्त्याश्रयणमवश्यमिति यास्कीयाशयस्य विचारः, तत्फलं च। दुरूहो वेदार्थबोधः तथा दैवतनिर्णयश्चेति तदीयमतम्, तस्य विमर्शः। वेदार्थ-निर्णयोपयोगाय तदानींतनपक्षान्तरीयवादोदाहरणेन बहुप्रकारो मन्त्रार्थ-व्याहार आसीदेकदेति कथनम् ॥

५५ मन्त्रार्थदुरूहत्वप्रतिपादनाय यास्कोदाहृतऋग्द्वयम्। तस्य व्याख्यानम्। तेन त्रिविधं वेदार्थपरिज्ञानं यास्काभिमतमित्युपपादनम् ॥

५५ उपदेशेन साक्षात्कृतधर्माण ऋषयोऽवरेभ्यः पुरा मन्त्रान् सम्प्रादुरिति यास्कोक्तिनिरीक्षणम्। स्थूलमर्थं व्याचक्षाणोऽपि यास्को मन्त्रार्थविचारे अध्यात्मपक्षपारम्यमभ्युपगच्छतीत्युपपादनम् ॥

५६ नासौ सतृणाभ्यवहारी न वा विशृङ्खल इति यास्कमधिकृत्य निरूप्य, वेदे रहस्यमस्तीति तस्यासीन्मतिरिति प्रतिपादनम् ॥

५७ पञ्चजनचर्चायां बृहद्देवताश्लोकोदाहरणेन निरुक्तकारवद् बृहद्देवताऽपि अध्यात्मादिरहस्यमस्ति वेद इत्याहेति कथनम् ॥

५८ ब्राह्मणान्यपि 'यजमानो वै यूपः' इत्यादिवाक्यैः यज्ञस्य सङ्केतरूपतां प्रति-पादयन्तीति स्मारयित्वा, ऐतरेय-शतपथब्राह्मणवाक्योदाहरणेन कर्मकाण्ड-ग्रन्थेष्वपि वेदरहस्यप्रतिपत्तिरसन्दिग्धेति स्वमतदृढीकरणम्। उपनिषत्सु 'तदृचाऽभ्युक्तम्', इत्यादिवाक्यस्य तात्पर्यविचारः। क्वचिन्मन्त्रवर्णमूल-कानि उपनिषद्वाक्यानीति प्रतिपादनाय निदर्शनं दत्तम् ॥

५९–६० 'हिरण्मयेन पात्रेण' इत्यादीशावास्योपनिषत्पङ्क्तीनां 'ऋतेन ऋतमपिहितम्' इति पञ्चममण्डलीय-मन्त्रदृष्टेश्च समानोऽर्थ इति व्याख्यानपूर्वकं उप-पादनम्। इतश्च वेदे रहस्यमस्तीति निरूपितम् ॥

६१ महाभारतमपि वेदगुप्तार्थ-सङ्केतरहस्यमतं प्रोद्बलयतीति प्रमाणं दत्तम् ॥

६२–६५ सायणभाष्यात् प्रागपि आचार्यश्रीमदानन्दतीर्थीयं चत्वारिंशत्सूक्तभाष्यं परमपुरुषार्थभूतविष्णुपदप्राप्तिरूपवेदप्रयोजनप्रतिपादकं आसीदित्युपन्यस्तम्। 'द्विविधा ह्यग्न्यादिशब्दाः' इत्यारभ्य मन्त्रार्थमञ्जरीवाक्यान्युदाहृत्य श्रीमद्-

चतुर्थः खण्डः (पुट ६७–८३)

७६–७७ वैश्वामित्रस्य आग्नेयसूक्तस्य विमर्शद्वारा अश्वादीनां सङ्केतरूपस्य दृढीकरणम् ॥

७८-७९- यो वेदेऽग्निः कुमारः कीर्तितः स एवाग्निजः स्कन्दः पुराणे, अद्भुताख्योऽ-

८१ ग्निः महाभारते, इत्युपपादनाय ऋक्संहितायां अद्भुतपदप्रयोगस्थलानि परीक्ष्य, अग्निरेवाद्भुतो वेदे इति निरूपितम् ॥

८२ प्रसक्तस्याग्निस्वरूपविचारस्य अनुप्रसक्त्या पौराणिकस्कन्दकथामूलपरीक्षणेन वेदभाषायाः सङ्केतरूपगूढार्थत्वं दृढीकृतम् ॥

,, गूढार्थप्राधान्येऽपि कर्मोपयोगितया व्यवस्थितानां ऋचां पदार्थविचारे गवाश्वादीनि साङ्केतिकपदानि अपरिहार्यैव अन्तरर्थानुसारि-तात्पर्यपरिग्रहे

८३ व्यवसायः कार्य इत्युपपाद्य, अयं रहस्यार्थविचारो जिज्ञासूनां कर्मबद्ध-श्रद्धानामप्युपकारकः स्यादित्याशंसयोपसंहारः ॥

ऋग्वेदसंहिता

पदपाठसहिता सभाष्या

आदिमे शतर्चिनां मण्डले चतुर्विंशत्यनुवाकाः । तत्र आद्यानुवाकत्रयस्य अन्तिमं द्वादशं सूक्तमन्तरा वैश्वामित्रो मधुच्छन्दा ऋषिः । द्वादशस्य सूक्तस्य तु माधुच्छन्दसो जेता । 'अग्निमीळे' इत्यारभ्य 'गायन्ति त्वा' इत्यतः प्राक् सूक्तनवकं गायत्रीच्छन्दस्कं, सूक्तत्रयात्मकस्य प्रथमानुवाकस्य आदिमं अग्निदेवताकं 'अग्निमीळे' इति नवर्चं सूक्तम् । तत्र नवानामृचामियं प्रथमा भवति—

ॐ अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् ॥१॥

अ॒ग्निम् ई॒ळे॒ पु॒रःऽहि॑तम् य॒ज्ञस्य॑ दे॒वम् ऋ॒त्विज॑म् । होता॑रम् र॒त्न॒ऽधात॑मम् ॥

अग्निं अग्निनामकं (देवं) **ईळे** अध्येषणीयत्वेन स्तौमि । कीदृशम्? **पुरोहितं** पुरस्तात् निहितं कार्यनिर्वाहाय, पुनः कीदृशम्? **यज्ञस्य देवं ऋत्विजं** देवतासम्भावनार्थं अनुष्ठीयमानस्य यागस्य निर्वर्तने यो देव एव ऋत्विग्भूतः तम् । पुनश्च कीदृशम्? **होतारम्** ह्वातारं सामर्थ्याद्देवानाम् । पुनरपि कथंभूतम्? **रत्नधातमम्** रमणीयानां रत्नानां अतिशयेन धारकम् ॥

अग्निपदं बहुधा निर्ब्रुवते नैरुक्ताः । तेषां निर्वचनानां परीक्षणे स्पष्टमिदमवगम्यते, यत् ब्राह्मणवाक्यबलात्कयाचिद्विधया अग्निस्वरूपमाकलय्य निर्वचनानि विकल्पतो दत्तानीति । 'स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नाम' इत्यादि ब्राह्मणवाक्यानि 'अग्रणीः' इत्यादि निर्वचनस्य मूलमिति ज्ञायते । वैयाकरणपक्षे अङ्गतेर्धातोर्निष्पन्नं अग्निपदम् । 'अङ्गेर्नलोपश्च' इत्युणादिसूत्रमुदाहरन्ति । अङ्गति गच्छति उर्ध्वं, हविः स्वर्गं नेतुमिति वा व्युत्पत्तिमाचक्षते । प्राचीन-आर्य-भाषाशाखीयानां अग्न्यर्थकधातूनां परीक्षणे बलवद्दीप्तिमद्गतिरवयवार्थो भवति । एवं च सङ्गच्छन्ते अग्निधर्मप्रतिपादकाः शब्दा इति बोध्यम् ॥

ईळे - स्तौमीति सायणः, याचामीति यास्कः । धातूनां बह्वर्थत्वे न विवादः । ईळतिर्याच्ञाकर्मा अध्येषणाकर्मा पूजाकर्मा वेति यास्कः । अग्निस्वरूप-तदधिकार-तन्निर्वाहापेक्षया अध्येषणाकर्मेत्युपपन्नतमम् । अध्येषणा अधिका एषणा प्रेरणा भवति । पूज्यस्य पुरोहितस्य अग्नेर्देवस्य वा सत्कारपूर्वकं कर्तव्यविशेषेषु नियोजनं अध्येषणेति उच्यते । ईळे अध्येषे ॥

पुरोहितम्— यजनकर्म-निर्वाहाय यजमानस्य पुरस्तादग्रे निहितः अग्निः । अत एव तं ऋषिरन्तर्यागे, यजमानो बहिर्यागे अध्येषते । एवं चोपपद्यते ईळतिरध्येषणार्थः । पुरोहितम्- 'पुर एनं दधते' इत्याम्नायश्च सङ्गच्छते । 'यज्ञस्य पुरोहितम्' 'होतारं देवम् ऋत्विजम्' 'रत्नधातमम्' इति व्याख्यातॄणामन्वयः नावश्यकः न च समीचीन इति द्रष्टव्यम् । पादशः अन्वयस्य सम्भवे सति, पादान्तरस्थपदैः पादान्तरस्थपदानां योजना न ऋज्वी । तस्माद् 'यज्ञस्य देवं ऋत्विजं' इति पादो व्याख्यातः ॥

होतारम्— स्वयं देवः सन् अन्यान् यज्ञे समुपस्थितान् कर्तुं आह्वयति । एवं आह्वानप्रभुरग्निः ॥

रत्नधातमम्— रमेर्धातोः औणादिक-क्न-प्रत्ययान्तं रत्नपदमिति सर्वेषामभिमतम् । 'रत्नं सुखं धत्त इति रत्नधा अतिशयेन रत्नधातमः' इति मन्त्रार्थमञ्जरीनिर्वचनं अन्तर्यागपराणां नः सम्मतम् । अन्तर्यजने प्रवृत्तस्य ऋषेर्यजमानस्य अर्पणानां फलभूताः रत्नपदवाच्या या रतयः तासां धारकः प्रतिष्ठापकः अग्निरेव भवतीत्यन्तरर्थः । बहिर्यागात् नान्यदस्तीति वादिनां पक्षे, रत्नं धनं यागफलभूतं गवाश्वादिकं तस्यातिशयेन दाता अग्निः तं, इति ॥

इदं च ऋचस्तात्पर्यं भवति— 'यो यज्ञस्य निर्वोढा अग्रणीः पुरोहितः, यश्च काले कर्तव्यस्य यज्ञस्य कर्ता कारयिता च ऋत्विग्भूतो देवः, यो देवान् यज्ञे सन्निधापयितुं प्रभवन् तेषामाह्वाता, यः पुनर्यजमाने प्रहर्षातिशयानां आधायकः तमग्निं अध्येषणीयं अभिकाङ्क्षामि' इति ॥

अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त । स दे॒वाँ एह व॑क्षति ॥२॥

अ॒ग्निः पूर्वे॑भिः ऋषि॑भिः ईड्यः॑ नूत॑नैः उत । सः॒ दे॒वान् आ इ॒ह व॒क्ष॒ति॒ ॥

अग्निः पूर्वोक्तः पुरोहितत्वादियोग्यताविशिष्टः देवः, **पूर्वेभिः** पुरातनैः **ऋषिभिः** मन्त्रद्रष्टृभिः भृग्वङ्गिरःप्रभृतिभिः **ईड्यः** स्तुत्यः पूज्यः अभिकाङ्क्षणीय इति यावत्, **नूतनैः उत** नवैः ऋषिभिरपि ईड्यः । **सः** य एवमीड्य उक्तः स **देवः देवान्** इतरान् इन्द्रादीन्, **इह** अस्मिन् यज्ञ **आवक्षति** आवहति । इह अस्मिन् जगतीति वा इति स्कन्दस्वामी । द्युस्थानान् देवान् पृथिवीस्थानमानयति पृथिवी-स्थानोऽग्निरिति भावः । अन्तर्यजने सुगमो भावः । अशक्यः कालनिर्णयः पूर्वेषां अङ्गिरःप्रभृतीनाम् । मधुच्छन्दा इव तत्समकालिकाः सूक्तकृत ऋषयोऽन्ये च आसन् इति गम्यते 'नूतनैरुत' इत्युक्तेः । अतिचिरन्तना दृष्टफलका रूढमूला च अग्नेरुपास्तिः इत्याचारबलं च द्योत्यते ॥

अ॒ग्निना॑ र॒यिम॑श्नव॒त् पोष॑मे॒व दि॒वे दि॑वे । य॒शसं॑ वी॒रव॑त्तमम् ॥३॥

अ॒ग्निना॑ र॒यिम् अ॒श्नव॒त् पोष॑म् ए॒व दि॒वे दि॑वे । य॒शसं॑ वी॒रव॑त्ऽतमम् ॥

अग्निना देवेन निमित्तभूतेन **रयिम्** धनं किमप्यान्तरं न केवलं बाह्यं **अश्नवत्** प्राप्नोति यजमानः । कीदृशम् रयिम्? **दिवे दिवे** अनुदिनं **पोषमेव** पोषोपेतमेव पुष्यमाणं न कदाऽपि क्षीयमाणम् । पुनः कीदृशम्? **यशसम्** यशोयुक्तं वैभवसम्पन्नम् । **वीरवत्तमम्** अतिशयेन वीरबलोपेतं च रयिं अश्नवदिति सम्बन्धः ॥

अत्र पोषशब्दस्य घञन्तत्वाद्रयिविशेषणत्वेन न ग्राह्यमित्येकेषामाक्षेपः । पोषं पुष्टिं रयिं (धनं) च 'अश्नवत्' इत्याहुः । एवं चेत् समुच्चयार्थकश्चकारोऽध्याहार्यः । 'पोषमेव' इत्यत्र एवकारस्य प्रयोजनं अलक्षितं स्यात् । 'पोषं' 'यशसं' इत्युभयमपि मत्वर्थलक्षणया रयिविशेषणमिति बोध्यम् । एतादृशः प्रयोगः साधारणो वेदे । 'वपुषामिदेकम्' (४. ७. ९.), 'वपुषामपश्यम्' (५. ६२. १.) इत्यादिस्थलेषु वपुषां वपुष्मतां देवानां इति मत्वर्थलक्षणया व्याचक्षते पदार्थ व्याख्यातारः । साध्वेतत् । एवमिहापि लक्षणाश्रयणं साधु । वैभवद्योतनाय 'यशसं' इति रयिविशेषणम् । 'अश्नवत्' इति लेटि रूपं, तस्माल्लोडर्थो वक्तव्य इत्येके नव्याः । लडर्थ एवोपपन्नतरः, पूर्वेषां व्याख्यातॄणामभिमतश्च ॥

पूर्वोक्तलक्षणेन देवानामाह्वात्रा अग्निना तत्प्रसादमहिम्ना वैभवशालिनीं वीर्याति-

श्रयसम्पन्नां रयिपदवाच्यां अन्तस्समृद्धिं प्राप्नोति यजमान इति भावः ॥

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्देवेषु गच्छति ॥४॥

अग्ने यं यज्ञं अध्वरम् विश्वतः परिऽभूः असि । सः इत् देवेषु गच्छति ॥

अग्ने त्वं यं अध्वरं अध्वगमनशीलं यज्ञं यागं विश्वतः सर्वतः परिभूः परिवृत्य भवन् असि स इत् स एव यज्ञः देवेषु देवानां मध्ये गच्छति गन्तव्यं स्थानम् ॥

अध्वरो हिंसारहित इति कर्मपराणां व्याख्यासरणिः । 'न हिंस्यात्सर्वभूतानि' इति धर्मशास्त्रस्य अपवादः पश्वालम्भो यज्ञे । ततोऽत्र हिंसा न दोषायेत्युपपादयितुं न ध्वरो हिंसा अस्मिन्निति अध्वरपदं निष्पादयन्ति बाह्यार्थपक्षीयाः । यज्ञः पुरुषाकारतया वर्ण्यते वेदे । स च द्रव्यत्यागापरपर्यायः सर्वस्वार्पणरूपो यजमानस्यान्तराविर्भूय प्रतिष्ठत ऊर्ध्वं स्वर्लोकं प्रति देवानधिगन्तुम् । तस्मात् स प्रयाणं करोति, अध्वानं राति ददाति यजमानस्योर्ध्वगत्यै । तथाविधस्य यज्ञस्य यात्रायां सर्वतः पापेभ्यो राक्षसादिभ्यो रक्षणं अग्नेरेव सम्भवति । तस्माद् यो यज्ञोऽग्निना परिरक्षितः स एव देवान् प्राप्नोतीत्युक्तम् ॥

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः । देवो देवेभिरागमत् ॥५॥

अग्निः होता कविऽक्रतुः सत्यः चित्रश्रवःऽतमः । देवः देवेभिः आ गमत् ॥

अग्निः स्वयं देवः देवेभिः अन्यैर्देवैः सह आगमत् आगच्छतु । अग्नेः चत्वारि विशेषणानि । होता आह्वाता देवानाम्, कविक्रतुः कविर्मेधाविनाम, क्रान्तदर्शी अतीन्द्रियार्थदर्शी कविरिति वेदे । एवमेव सायणव्याख्या बहुत्र । क्रतुः प्रज्ञा कर्म वा यथासन्दर्भं व्याख्यायते कर्मठैः । कर्मकरणसामर्थ्यवत् अध्यवसायात्मकं प्राज्ञं बलं निष्प्रकम्पसङ्कल्पो वा क्रतुरिति ज्ञेयम् । एवं कविक्रतुः अतीन्द्रियार्थदर्शी प्राज्ञसङ्कल्प इच्छाबलं वेति वेद्यम् । सत्यः दर्शने प्राज्ञकर्मणि स्वरूपतोऽपि सत्यः अनृतैरभिघातः सम्पर्को वा नास्त्यस्य, अतो न व्यभिचरति दर्शनादिकर्तव्येषु । चित्रश्रवस्तमः श्रव इति कीर्तिनाम, तथा बाह्यार्थपक्षे ग्रहणं नासाधु । श्रवः-

श्रवणश्रुतिशब्दाः शृणोतेर्निष्पन्नाः समानमेवार्थं स्मारयन्ति । सर्वतः श्रूयमाणत्वादेव श्रवः कीर्तिरुच्यते । तस्मादत्र चित्रं अद्भुतं विविधं चायनीयं वा, श्रवः श्रवणं अस्य अग्नेरतिशयेनास्तीति पदार्थः । अतीन्द्रियार्थविचित्रश्रवणशाली भगवानग्निः स्वयं श्रुतिमान् उपासकं अद्भुताः श्रुतीः श्रावयितुं प्रभुरिति बोध्यम् ॥

इति प्रथमस्य प्रथमे प्रथमो वर्गः

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवेत्तत्सत्यमङ्गिरः ॥६॥

यत् अङ्ग दाशुषे त्वं अग्ने भद्रं करिष्यसि । तव इत् तत् सत्यं अङ्गिरः ॥

अङ्ग! अग्ने! हे अग्ने दाशुषे दत्तवते यजमानाय त्वं यद् भद्रं कल्याणं करिष्यसि तवेत् तवैव तत् सत्यं हे अङ्गिरः एतन्नामक अग्ने ॥

अत्रायं सायणीयोऽभिप्रायो भवति, हविर्दत्तवते यजमानाय पशुप्रजादिरूपं धनं अग्निर्ददाति । तदेव कल्याणं भद्रशब्देनोक्तम् । तथा लब्धेन धनेन साधनेन पुनरग्निं यजते यजमानः । तस्मादग्नेरेव तत् 'तवेत्तत्' । सत्यं न विसंवादोऽत्र । रमणीयार्थेऽस्मिन् मन्त्रे अग्नेः सत्यं किमपि स्वच्छमुक्तं लक्ष्यते, व्याख्यातृभिर्महाननर्थः कृतः । 'दाशुषे' दत्तवते 'यद्भद्रं करिष्यसि' 'तत्सत्यं' तवैव 'तवेत्' इति साधीयान् ऋजुः अन्वयः । तर्हि अयमाशयः । अग्निना यजमानाय करिष्यमाणं भद्रं अग्नेरेव सत्यम् । किं तद्भद्रं यदग्नेरेव सत्यं उच्यते? प्रजाः पशवो वित्तं गृहा इतीदं सर्वं भद्रमिति ब्राह्मणवाक्यबलेन प्रतिपादयन्ति । भवतु प्रजापश्वादि कल्याणम् । मास्तु विवादः । ऋग्वेदे भद्रपदं सत्यसम्बन्धि किमपि विशिष्टं कल्याणं द्योतयतीति न संशयः । 'विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आसुव ॥' 'परा दुष्वप्न्यं सुव' (५. ८२. ४, ५) इत्यादौ दुःष्वप्न्यदुरितप्रतिद्वन्द्वित्वेन भद्रपदं प्रयुज्यते । अनृतज्ञानजन्यदुर्गतानामन्तकं भद्रपदवाच्यं कल्याणमेव अग्नेः सत्यमिति तात्पर्यपरिग्रहे, पूर्वस्यां ऋचि अग्नेः सत्यविशेषणं, अत्र तथाविधं भद्रं अग्नेरेव सत्यं इति प्रतिपादनं च उपपद्येते । तस्मान्नेह कल्याणसामान्यं विवक्षितम् । अनृतप्रज्ञापरिपन्थिकल्याणं सत्यं अग्नेरेव तत्त्वं स्वभावो वेति बोध्यम् । सर्वथा भद्रपदं अशुभ-अनृतज्ञानजन्य-दुरितप्रतिद्वन्द्वित्वेन प्रयुज्यते वेदे । दुःस्वप्नघ्नसूक्ताच्च इदमवगम्यते, यत्र पापदेवताया

निर्ऋतेर्विरोधितया 'भद्रं वरं वृणते' (१०. १६४.) इत्यादि गीयते । ये भद्रं दूषयन्ति ते निर्ऋतेरन्तिके क्षिप्यन्त इत्यर्थको मन्त्रश्च अन्यत्र श्रूयते– 'ये वा भद्रं दूषयन्ति स्वधाभिः । अहये तान् प्रददातु सोमः आ वा दधातु निर्ऋतेरुपस्थे ॥' (७. १०४. ९.) अपि च, अग्नेः स्वावासभूत-ऋतपदवाच्यस्य बृहतः सत्यस्य विशेषणतया, मनसः क्रतोश्च प्राप्यत्वेन च 'भद्रं' कीर्त्यते । 'भद्रं मनः कृणुष्व' (४. १९. २०.) 'भद्रं नो अपि वातय मनो दक्षमुतक्रतुम्' (१०. २५. १.) 'आ भन्दिष्ठस्य सुमतिं चिकिद्धि बृहत्ते अग्ने महि शर्म भद्रम्' (५. १. १०.)– इत्येवंजातीयको मन्त्रवर्णः कल्याणपर्यायत्वेऽपि भद्रस्य वैशिष्ट्यं द्योतयतीत्यवधार्यम् । आङ्गिरसस्य कुत्सस्य मन्त्रदृष्टिरपि 'यदङ्ग दाशुषे' इत्यस्या ऋचोऽस्माभिरुक्तमर्थं दृढीकरोति । सेयं भवति– 'तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुता जरसे मृळयत्तमः । दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मारिषामा वयं तव' (१. ९४. १४.) । पुरस्तात् 'राजन्तं' इति मन्त्रस्य अर्थावगाहने स्मरणीयेयं कुत्सस्य ऋक् ॥

उप॑ त्वाग्ने दि॒वे दि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम् । नमो॒ भर॑न्त॒ एम॑सि ॥७॥

उप॑ त्वा॒ अ॒ग्ने॒ दि॒वेऽदि॑वे॒ दोषा॑ऽवस्तः धि॒या व॒यम् । नम॑ः भर॑न्तः आ इ॒म॒सि॒ ॥

हे **अग्ने** **त्वा** त्वां **दिवे दिवे** प्रत्यहं **दोषावस्तः** नक्तं-दिवं **वयं** **धिया** धारणसमर्थया बुद्ध्या **नमः** प्रणतिं **भरन्तः** बिभ्रतः सन्तः **उपेमसि** उपगच्छामः उपास्मह इत्यर्थः । अत्रैके 'दोषावस्ता' रात्रेराच्छादकः स्वप्रकाशेन अग्निः, तस्य सम्बोधनं 'दोषावस्तः' इत्याहुः । वस्तुतस्तु दोषा रात्रिवाची तेन तमो लक्ष्यते, वस्तः दिनवाची तेन प्रकाशो लक्ष्यते । तमसि प्रकाशे वा सर्वास्ववस्थासु प्रत्यहमविरतं त्वामुपास्मह इति भावः । 'एवं नमो भरन्तो वयम्' इत्युपपद्यते । प्रणतिभारधारण-सामर्थ्यं धियो वर्तते । तस्माद्ध्यानदृढा धीरेवात्र साधनं अनुदिनमविच्छेदं अन्तःप्रकाशे अप्रकाशे वा सर्वासु दशास्वग्न्युपास्तेरिति बोध्यम् ॥

राज॑न्तमध्व॒राणां॑ गो॒पामृ॒तस्य॒ दीदि॑विम् । वर्ध॑मानं॒ स्वे दमे॑ ॥८॥

राज॑न्तम् अ॒ध्व॒राणां॑ गो॒पाम् ऋ॒तस्य॑ दीदि॑विम् । वर्ध॑मानम् स्वे दमे॑ ॥

पूर्वमन्त्रे अग्ने त्वां उपेम इत्युक्तम् । अत्र कीदृशं त्वामिति पादत्रयस्थविशेषण-त्रयेणाह– **अध्वराणाम् राजन्तम्** अध्वरपदवाच्यानां यज्ञानां ईशानम् । **ऋतस्य दीदिविम् गोपाम्** सत्यस्य दीप्यमानं रक्षकम् । **स्वे दमे वर्धमानम्** स्वीये गृहे वृद्धिमाप्नुवन्तम् ॥

पादशोऽन्वयसम्भवे 'अध्वराणां गोपाम्' इति योजना न युक्ता । 'ऋतस्य गोपाः' स च 'दीदिविः', 'स्वे दमे' वर्धते, इत्यस्य तात्पर्यं पर्यालोचनीयम् । अत्रैव सूक्ते 'सत्यः' 'तवेत् तत् सत्यम्' इति द्विरग्नेः सत्यधर्मत्वं प्रतिपादितम् । अस्यामृचि सत्यस्य रक्षिता इति तस्य स्वगृहे वर्धनमिति चोच्यते । किं अग्नेः स्वीयं गृहं भवितुमर्हति सत्यादन्यत्र? 'सत्यं ऋतं बृहत्' एव अग्नेरावासगृहं भवति । तच्च सत्यं परं धाम यजमानेन प्राप्यं, यज्ञस्तत्र साधनम् । निर्वोढा तु 'कविक्रतुः' 'सत्यः' सत्यधर्मा सत्यरक्षकः सत्यावासभूः अग्निरेव भवति । 'यजा नो मित्रावरुणा यजा देवान् ऋतं बृहत् । अग्ने यक्षि स्वं दमम् ॥ (१. ७५. ५.) ऋषिर्गोतमो राहूगणः अग्निं प्रार्थयते– 'अस्मदर्थं मित्रावरुणौ यज, अन्यान् देवान् यज, ऋतं बृहत् स्वं दमं यज' इति । अनयर्चा स्पष्टं भवति न केवलमग्नेर्यजमानार्थं यज्ञनिर्वाहित्वं, किं तु 'ऋतं बृहत्' अग्नेः स्वीयं गृहं, तदेव परमं यष्टव्यमिति च । 'गोपा ऋतस्य दीदिहि स्वे दमे' (३. १०. २.) इत्यत्रापि श्रूयते ॥

कर्मपरव्याख्यानेन कदर्थीकृतो गम्भीरार्थोऽयं मन्त्रः । यज्ञशालां अग्नेः 'स्वं दमं आहुः । तत्र हविर्भोजनेन 'वर्धमानं' अग्निं सायं प्रातरुपासतेऽग्निहोत्रिणः!

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥९॥

सः नः पिताऽइव सूनवे अग्ने सुऽउपायनः भव । सचस्व नः स्वस्तये ॥

अग्ने स त्वं **सूनवे** पुत्राय **पितेव** जनक इव **नः** अस्माकं **सूपायनः** सुखेन उपायनं समीपगमनं यस्य सः सुप्रापो भव । **नः** अस्मान् **स्वस्तये** कल्याणाय **सचस्व** सेवस्व, अस्मासु सक्तो भव, अस्मासु समवेतो भवेति यावत् ॥

व्याख्यातं माधुच्छन्दसमाग्नेयं सूक्तम् । दाशतय्यां अत्र प्रथमसूक्त एव वेदरहस्यं किञ्चिद्विस्पष्टं द्योतितम् । तथा व्याख्याने यावदपेक्षं सङ्क्षेपतो मन्त्रपरमार्थपद्धतिः प्रद-

र्शिता, यद्यपि याज्ञिकपक्षानुसारेण सूक्तेऽस्मिन् कासाञ्चिदृचां यथाकथञ्चिदर्थाविष्कारः शक्यो भवति, तथाऽपि न सर्वत्र ऋजुर्भवति पन्थाः कर्मपरतया व्याख्यानाय । 'कविक्रतुः' 'सत्यः' 'चित्रश्रवस्तमः' 'धिया नमो भरन्तः' 'स्वे दमे (ऋते बृहति) वर्धमानम्' इत्यादिस्थलेषु महता क्लेशेन जघन्योऽर्थः सम्पादितः कर्मठव्याख्याने । 'यदङ्ग दाशुषे' इति मन्त्रस्य व्याख्याने साधितस्य तात्पर्यस्योपहसनीयता परां काष्ठां गता । ऋज्वर्थस्तु, 'स्वात्मीयं स्वात्मानमेव वा योऽग्नयेऽर्पयति, तस्मै अनृतज्ञानतज्जन्य-दुःखान्तकरं भद्रपदवाच्यं कल्याणं करोत्यग्निः । यदिदं भद्रं तत् सत्यं अग्निनिष्ठमेव' इति ॥

एवं ऋजुना वेदरहस्यमुद्घाटयता द्वारेण सूक्तमन्त्रार्थोपपत्तिर्द्रष्टव्या । देवोऽग्निरेव पुरोहित ऋत्विग्भूतश्च यजमानस्य यज्ञनिर्वाहार्थमन्वेष्यते प्रथमे मन्त्रे । सा चाग्नेरन्वेषणा-रूपोपास्तिर्न नूतना मधुच्छन्दसाऽवलम्बिता, किं तु बहोः कालादृषिपरम्परागता, यथा देवानां प्रमुखोऽग्निरितरान् देवानावहति इति द्वितीये प्रतिपादितम् । अग्नेः प्रसादाल्लब्धा सम्पद् न लौकिकीव क्षयभयाभिमृष्टा, किं तु उत्तरोत्तराभिवृद्धिशालिनी इति तृतीये । न केवलं असहायेन पुरुषकारेण साधितो यज्ञो देवान् गच्छति, किं तु अग्निना सर्वथा पापेभ्यो रक्षोभ्योऽभिरक्षितं यजनमेव देवान् प्राप्नोतीति चतुर्थे । दृष्टिश्रुतिसम्पन्नः प्राज्ञदृढसङ्कल्पोऽग्निर्देवानां सहाय इति पञ्चमे । अनृतपरिपन्थि-सत्यज्ञानात्मक-भद्रप्रदत्वं अग्नेस्तत्त्वं इति षष्ठे । प्रत्यहं सर्वास्ववस्थासु ध्यानदृढाः प्रणतिभरोपेता ऋषयोऽग्निमुपासत इति सप्तमे । तस्याग्नेः ऋतं (सत्यं बृहत्) स्वीयं धाम, स यजमानाय तत्र वर्धते । तद् रक्षतीति अष्टमे । एवंविधमग्निं साक्षात्कृतं साक्षात्कर्तुं वा महता विस्रम्भेण ऋषिः "पिता तनुजन्मनीव सक्तः सन् नः सुगमो भव" इति प्रार्थनां करोति नवमे ॥

नैतादृशोऽग्निर्बहिः सङ्केतमात्रतयाऽवस्थितो याज्ञिको भवितुमर्हति । न वा केवलं भौतिकतेजस्तन्मात्राधिदैवतम् । किं तु अस्माभिः प्रदर्शितप्रभावः सूक्तप्रतिपादितलक्षणः सत्य एवायं भगवान् भद्रात्मा नः 'कविक्रतुः' ईडितोऽस्मिन् प्रथमे सूक्ते । तदिदं वेदरहस्यरसास्वादरसनाभूतं आग्नेयं, यतश्चेदं सूक्तसहस्राधिकवेदपाठप्रत्याम्नायत्वेन लघु-ब्रह्मयज्ञ इति प्रतिपिपादयिषया "'अग्निमीळे' जपेत् सूक्तं पापघ्नं श्रीकरं च यत् । पारा-यणफलं तस्य वेदानां चैव सर्वशः" इत्याहुः पूर्वे । अग्निष्टोम इति विख्याते सोमयागे प्रातरनुवाके सोमाभिषवात् प्रागिदं होत्रा शस्यते ॥

इति प्रथमस्य प्रथमे द्वितीयो वर्गः

इति प्रथमं सूक्तम्

अथ द्वितीयं सूक्तम्

अथ प्रथमानुवाकस्य द्वितीयं सूक्तं नवर्चं तृचत्रयात्मकं भवति । द्वादशर्चं तृतीयं सूक्तम्, तत्र चत्वारस्तृचाः । इदं तृचसप्तकं प्रउगाख्यं शस्त्रं प्रातःसवने होत्रा वैश्वदेवग्रहणादूर्ध्वं शंसनीयम् । अत्र प्रथमस्य तृचस्य वायुर्देवता, द्वितीयस्य इन्द्रो वायुश्च, तृतीयस्य मित्रो वरुणश्च भवन्ति ॥

वायव्ये तृचे प्रथमामृचमाह–

वायवा याहि दर्शतेमे सोमा अरंकृताः । तेषां पाहि श्रुधी हवम् ॥१॥

वायो इति आ याहि दर्शत इमे सोमाः अरम्ऽकृताः । तेषां पाहि श्रुधि हवम् ॥

वायो जगत्प्राण, **दर्शत** दर्शनीय, **आयाहि** आगच्छ । **इमे** (अस्माभिर्निवेदिताः) **सोमाः** निष्पीडिताः सोमसवाः **अरङ्कृताः** अलङ्कृताः सम्यक् साधिताः सिद्धा इति यावत् । **तेषां** तान् (द्वितीयार्थे षष्ठी) **पाहि** पिब । हवं ह्वानं अस्मदाह्वानं **श्रुधि** शृणु ॥

सुबोधा अत्र पदार्थाः । अरङ्कृताः, पर्याप्त्यर्थो भूषणार्थो वा अलं-शब्दः, संस्कृता इति तात्पर्यम् । अग्निस्तवनात्परं वायुं प्रार्थयते सोमपानाय । वायुश्च जगत्-प्राणः, अत एव शारीरः प्राणोऽपि भवन् बिभर्ति नाडीचक्रव्यवस्थाम् । तस्मादाधारोऽयं मानवे मनोमयव्यापारस्य । तर्हि कोऽसौ सोमः यस्याभिषवानां पानाय वायुराहूयते? ब्रूमः । ऋतचित्पदवाच्य-सत्यज्ञानभुवः क्षरन् यो दिव्यः सदानन्दरसो मनोमयभुवि प्रवहति, स हि सोमपदवाच्यो वेदे व्यवह्रियते । लताविशेषः सोमस्तु बाह्यः सङ्केतो याज्ञे कर्मणि । पुरस्ताद् अस्य तृचस्य व्याख्यानान्ते तत्त्वमिदं प्रपञ्चयिष्यते ॥

द्वितीयामृचमाह–

वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः । सुतसोमा अहर्विदः ॥२॥

वायो इति उक्थेभिः जरन्ते त्वाम् अच्छ जरितारः सुतऽसोमाः अहःऽविदः ॥

वायो प्राणदेव, **त्वां अच्छ** त्वां अभिलक्ष्य **जरितारः** स्तोतारः [त्वत्कामाः] **उक्थेभिः** स्तोत्रवचनैः [त्वदाविष्कारकैः] **जरन्ते** स्तुवन्ति । कीदृशास्ते? **सुतसोमाः** सोमाभिषवं कृतवन्तः, पुनः कीदृशाः? **अहर्विदः** अहश्शब्दलक्षितं प्रकाशं विदितवन्तो दृष्टवन्त इत्यर्थः ॥

अत्रेदमवधेयम् । यद्यपि 'रेभः कारुर्जरिता' इत्यादीनि स्तोतृनामानि पठितानि निघण्टौ, तथाऽपि एकैकमपि स्तोतुः किमपि वैशिष्ट्यं द्योतयति । वेदे जारशब्द इव जरितृपदमपि गूढं प्रेमाणं गमयति, अत एव स्तोतारः त्वत्कामा इति व्याख्यातम् । एवं वेदे वाचः सर्जनसामर्थ्यं आविष्कारकत्वं वा प्रसिद्धम् । अत एव वचेर्निष्पन्नस्य 'उक्थ' शब्दस्य, त्वदाविष्कारकैः स्तोत्रवचनैः इति व्याख्यानं उपपन्नम् ॥

तृतीयामृचमाह—

वायो॒ तव॑ प्रपृ॒ञ्च॒ती धेना॑ जिगाति दा॒शुषे॑ । उ॒रू॒ची सोम॑पीतये ॥३॥

वायो॒ इति॑ तव॑ प्र॒ऽपृ॒ञ्च॒ती धेना॑ जि॒गा॒ति॒ दा॒शुषे॑ उ॒रू॒ची सोम॑ऽपीतये ॥

वायो! प्रपृञ्चती प्रकर्षेण सम्पर्कं कुर्वती (पूरयित्रीत्यर्थः) **तव धेना** वागुपलक्षिता रसनाधारा **सोमपीतये** सोमपानाय **उरूची** (सती) विस्तारं प्राप्नुवन्ती **दाशुषे** यजमानाय **जिगाति** गच्छति वहतीत्यर्थः ॥

धेना वाङ्नामसु पठितम् । तथा सर्वत्र ऋक्षु सायणीयं व्याख्यानम् । धेना 'धारा' इति सर्वत्रास्माभिर्व्याख्यायते । अत्रेदं कारणं भवति । प्रायश ऋग्वेदे नद्यः धेनव इति क्वचिदुपमया क्वचिदभेदाध्यवसायेन वर्ण्यते । तत्र प्रीणनं पोषणं वा साधर्म्यं भवति । अत एव सायणः धेना प्रीणयित्री वाक् इति क्वचित्, प्रीणयित्री नदी इति क्वचित्, प्रीणयित्री योषिद् इत्यन्यत्र व्याचष्टे । यथा पयस्विन्यो धेनवः प्रीणयित्र्यो नद्यः भवन्ति, तथा धेनाऽपि प्रीणयित्री धारा भवति । वाचो धारारूपत्वं सायणव्याख्यायामप्यङ्गीकृतं भवति । 'एकं गर्भं दधिरे सप्त वाणीः' (३-१-६) 'सप्तवाणीः नद्यः' इत्याह । वाग्वाहिनी सरस्वती प्रथिता वेदे । 'सरस्वती देवतारूपेण नदीरूपेण च वर्तते, देवतारूपा स्तुता । अधुनाऽनया नदीरूपां स्तौति' इति 'इयं शुष्मेभिः' (६-६१-२) इति मन्त्रव्याख्यानारम्भे सरस्वत्या द्विरूपत्वकल्पनया सायणीयः क्लेशः

स्पष्टो भवति । एवमेव तृतीयसूक्ते 'महो अर्णः' इति अन्तिमर्चो व्याख्यानेऽपि । तदिह वाक्पर्यायत्वेन निघण्टुपठितमपि धेनापदं धारात्वं न जहातीति बोध्यम् ॥

'सम्यक्स्रवन्ति सरितो न धेनाः' (४. ५८. ६), 'व्यस्य धारा असृजद् वि धेनाः' (३. १. ९.) इत्यादिषु स्थलेषु विस्पष्टा भवेदस्मदुक्ता युक्तिः । तर्हि धेना धारेत्येवालं स्यात्, कुतो 'वागुपलक्षितरसनाधारा' इत्युक्तमिति चेत्, ब्रूमः । अस्यामृचि वायोः धारा सोमपानाय यजमानकृते वहतीत्युक्तम् । वाचा (वचनेन) पानस्यासम्भवात् लक्षणाश्रयणेन रसनामयत्वविशिष्टधारा प्रोक्ता । तस्माद्विवरणार्थोऽयं न केवलपदार्थः धेनापदस्य । प्रीणयित्री पोषयित्रीति वा केवलावयवार्थः । सा धारा चेत् सङ्कुच्छते, धारकत्वात् । एवं हि उरूचीति विशेषणं उपपद्यते । सोमरसादानाय सङ्कोचं उज्झित्वा विपुला भवति धारा । प्रपृञ्चतीति धेनाविशेषणमप्युपपन्नम् । अभिषुते सोमे दातरि यजमाने च धारायाः सम्पर्कप्रकर्ष उक्तः । वायोः प्राणदेवस्य धारा यजमाने सर्वोत्कृष्टं स्पर्शं विदधती, अत एव स्वयं पूरयित्री यथेष्टं सोमाभिषवं ग्रहीतुं प्रभवति ॥

अत्र बाह्यार्थपरा एवमाहुः– हे यजमान! त्वया दत्तं सोमं पास्यामि' इति वायुः ब्रूत इति । एवं 'धेना वाक्' इति मुख्यार्थपरिग्रहः सायणीयः । तदनुसारेण वाग्विशेषणद्वयं व्याख्यातम् । 'प्रपृञ्चती' वाक् सोमगुणवर्णनपरा किल । 'उरूची' वाक् तु बहून् यजमानान् वर्णयितुं गच्छतीति चाहुः । स्कन्दस्वामी तु धेनापदस्य मुख्यार्थबाधात् वाचा लक्षिता जिह्वेति अब्रुवन्नपि 'धेना' 'जिह्वा' इत्याह ॥

अन्तरर्थपरेऽस्मिन् व्याख्याने त्विदं विचारयितव्यम्– कोऽसौ सोमः? यस्याभिषुतस्य स्वीकाराय वायुः सम्प्रार्थितः स्वीयां धारां विवृतां कुर्वन् यजमानार्थं गच्छति । ऋतचिद्भुवः पवमानो रसापरपर्याय आनन्दो मनोमयं क्षेत्रं आविश्य प्रवहतीत्यवोचाम पूर्वम् । कथं तर्हि तादृशं सोमं यजमानः सुनुते, वायवेऽर्पयितुं वा प्रभवति? तथ्यमेव इदं यत् सोम ऊर्ध्वे विश्वातीत-सत्यचिदानन्दरसः स्वयंप्रकाशो मनोमयभुवमवतीर्य प्राधान्येन मनोमयधामाधिराजायेन्द्राय क्षरतीति । 'अपाम सोमं अमृता अभूम' 'रसो वै सः' 'को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' इत्यादिवाक्यैः प्रतिपादितः सोम एव अध्यण्डमधिपिण्डं च बहुसोपानपदे विश्वसर्गे उपाध्यनुरोधेन प्राप्नोत्याविर्भावम् । तद्यथा दिव्यं सत्यं ज्योतिरिहापि तमसि पार्थिवे लोके सर्वत्र निलीनं सत् परिणामवशात् क्वचिद् व्यक्तं भवति, तथा सोमोऽपि सर्वत्र निगूढः

पृथिव्यां पृथिवीरुहेषु इन्द्रियार्थेषु इन्द्रियार्थानुभूतिषु च सारांशभूत-रसात्मकतयाऽवस्थितो भवति । स एष रसात्मा बहिः सोमलतया सङ्केतितो निष्पीड्य संस्कृतो देवेभ्यो दीयते । इन्द्रियार्थानुभवेषु यः सुखमयो रसो लसति तं निष्कृष्य तत्र स्वीयतां स्वार्थतां च सन्त्यज्य देवेभ्यः समर्पयति सोमयाजी देवभक्तोऽन्तर्यजने । अयं च रसोऽमृतं अन्नं भवति देवानाम्, येनामृतान्धसो यजमाने देवा अमृताः पुष्टिं लभन्ते । देवेभ्यः, अग्नये, वायवे, इन्द्राय वा 'स्वाहा इदं न मम' इति आहुतिवाच इदमेव तात्पर्यं बोध्यम् । सोमस्वरूपं समासेन प्रतिपादितम् ॥

अथ सोमाभिषवसंस्काराहुतिनिर्वाहाय दिवमारुरुक्षोः भूस्थस्य यजमानस्य शारीरकनाडीचक्रं शुद्धं प्राणबलसमृद्धं स्यात् । तस्मात् प्रथमं वायोरनुग्रहोऽभ्यर्थनीयः । तत्रापि न केवलं प्राणदेवताया वायोरनुग्रहेण इन्द्रियानुभूतीनां परिष्कारः प्रसन्नता वा निष्पाद्यते मनोमयाधिदेवतायाः प्रसादमन्तरेण । अत एवेन्द्रं वायुं च प्रार्थयते द्वितीयेन तृचेन । शरीरे प्राणमनसोः साधुव्यापारो वाय्विन्द्राभ्यां निरुह्यत इति बोध्यम् । यद्यपि, ऋतचित्प्रकाशात्मनः सूर्यस्य उदयभूमिरिव स्वर्भूमिः शुद्धसत्त्वमनःप्रधाना इन्द्रस्य विशिष्टं धाम भवति, तथाऽपि बहुभूमिकस्य मनसः स एव देवता । इन्द्रियात्मकस्यापि मनसः स एवेश्वरः । इन्द्रशब्दान्निष्पन्नं हि इन्द्रियपदम् । सर्वेन्द्रियाणां आद्यं गुप्तमिन्द्रियं मन इत्यपि शक्यं वदितुम् । 'मनः षष्ठानीन्द्रियाणि' इत्यपि स्मर्यते । 'इन्द्रियमिन्द्रलिङ्गं इन्द्रदृष्टं इन्द्रसृष्टं इन्द्रजुष्टं इन्द्रदत्तं इति वा' इति पाणिनिः (५. २. ९३.) । अत्र लिङ्गं दृष्टं इत्यादीनां विकल्प उक्तः, 'अत्र वा-शब्दः प्रत्येकमभिसम्बध्यमानः विकल्पानां स्वातन्त्र्यं दर्शयति' इति वृत्तिकारोक्तं स्मरणीयम् । एवं सर्वेन्द्रियसार्वभौमस्येन्द्रस्य साहाय्यमन्तरेण वायुर्यथाभागं सोममादातुं न प्रभवेदित्यार्षोऽयं आशयः । मनोबलवर्जं प्राणवृत्तिर्न साध्वीति सर्वेषां अनुभवसिद्धम् । एवं हि, अत्र द्वितीयतृचस्य विनियोगे ऐन्द्रवायवग्रहे त्रयो भागा वायोरिन्द्रस्यैको भागः 'तुरीयभागिन्द्रोऽभवत् त्रिभाग्वायुः' (ऐ. ब्रा. अ. ९, खं. १) इति ऐतरेयिणः समामनन्ति । वायोरिन्द्रः सारथिरित्यप्युक्तं ब्राह्मणे 'नियुत्वाँ इन्द्रसारथिः' । एतेन इन्द्रानुग्राह्यमनोबलस्य नेतृत्वरूपं उपकारकत्वं शारीरकनाडीगतप्राणबलस्य सोमभागभूयस्त्वं च द्योतिते ॥

द्वितीयतृचे ऐन्द्रवायवे प्रथमां ऋचमाह–

इन्द्रवायू इमे सुता उप प्रयोभिरागतम् । इन्दवो वामुशन्ति हि ॥४॥
इन्द्रवायू इति इमे सुताः उप प्रयःऽभिः आ गतम् । इन्दवः वाम् उशन्ति हि ॥

हे इन्द्रवायू! इमे सोमाः सुताः अभिषुताः । प्रयोभिः प्रीणयितृभिः (वस्तुभिः सह) उपागतम् उपागच्छतम् । हि यस्माद् इन्दवः क्लेदनकराः (सुखप्रदाः सोमाः) वां युवां [इन्द्रं वायुं च] उशन्ति कामयन्ते ॥

'प्रयोभिः अन्नैः अस्मभ्यं दातव्यैः सह' इति सायणः । प्रयः प्रीणयितृ प्रीञ्-धातोर्निष्पन्नत्वात् । यत् प्रीणयति यजमानं तत् प्रयः । अत एव इन्द्र-वायुगतानि यानि कानि वा भवन्तु 'प्रयांसि' प्रीणयितॄणि वस्तूनि वैभवानि वा, तैः सह उपागच्छतम् इति अस्माभिर्व्याख्यातम् ॥

ऐन्द्रवायवे तृचे द्वितीयामृचमाह–

वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू । तावा यातमुप द्रवत् ॥५॥
वायो इति इन्द्रः च चेतथः सुतानाम् वाजिनीवसू इति वाजिनीऽवसू तौ आ यातम् उप द्रवत् ॥

हे वायो त्वं इन्द्रश्च उभावपि सुतानाम् अभिषुतान् सोमान् [द्वितीयार्थे षष्ठी] चेतथः जानीथः । वाजिनीवसू सत्त्वसमृद्धिसम्पन्नौ तौ युवां द्रवत् क्षिप्रं उपायातम् उपागच्छतम् ॥

वाजिनीवसू– वाजिनी यागक्रियासन्ततिः तत्र वसतः इन्द्र-वायू इति कर्मठ-व्याख्यानम् । अन्नं, बलं, युद्धं, वेगः इति बहुधा वाजपदार्थः कथ्यते सायणेन । अत्र वाजोऽन्नं, तद् अस्यां हविस्सन्ततावस्ति इति वाजिनी, तत्र वसत इत्युक्तम् । अस्मदीयो वाजपदार्थस्तु सर्वत्र एकरूपः, समृद्धिः पूर्णता वा यत्र बलस्य अन्नादेर्वा अन्तर्भावेऽङ्गीकारक्षमेऽपि सङ्केतरूपत्वं ग्राह्यम् । वसुपदं धनवाचकं सर्वत्र सत्त्वं द्रव्यं इति गृह्यतेऽस्माभिः । वाजस्येव वसोरपि नैकोऽर्थः सायणीयः ॥

इति प्रथमस्य प्रथमे तृतीयो वर्गः

ऐन्द्रवायवे तृचे तृतीयामृचमाह–

वायविन्द्रश्च सुन्वत आयातमुप निष्कृतम् । मक्ष्वित्था धिया नरा ॥६॥

वायो इति इन्द्रः च सुन्वतः आ यातम् उप निःऽकृतम् मक्षु इत्था धिया नरा ॥

वायो इन्द्रश्च उभौ युवां **सुन्वतः** सोमाभिषवं कुर्वतः [यजमानस्य] **निष्कृतम्** निश्शेषेण साधितं (युष्मदर्थं देयं वस्तु उद्दिश्य) **मक्षु** शीघ्रं **इत्था** इत्थं [अस्मद्दान-परिग्रहक्षमया सिद्धया] सत्यया वा **धिया** बुद्ध्या (धारणात्मिकया प्रज्ञया) युक्तौ **आयातम्** आगच्छतम् । **नरा** नरौ नेतारौ हे देवौ इति सम्बोधनम् ॥

इत्था– इत्थं सत्यमिति वा यथासम्भवं अर्थो ग्राह्यः । उभयथाऽपि वेदे प्रयोगदर्शनात् । निष्कृतं– संस्कृतं सोमं इत्याह सायणः । वेद्याख्यप्रदेशमिति स्कन्दस्वामी । निश्शेषेण सम्पादितं किमपि सोमाभिषवफलितमिति वयम् । इदं चास्य तृचस्य तात्पर्यपर्यालोचनया स्पष्टं भवेदिति ब्रूमः समासत इन्द्र-वायुप्रसादवैभवम् ॥

प्रथमं सोमाः सुताः इन्द्रं वायुं च कामयन्ते, तस्मात्, ततः प्रवहन्तं सोमरसं चेततोः तयोरागतयोः वाय्विन्द्रयोः क्षिप्रं तल्लाभः प्रार्थितः । प्राणमनसोरधीश्वरौ हि वाय्विन्द्रौ । अनेन सोमपदवाच्य-अमृतानन्दरसः ऊर्ध्वदेशात्प्रवहन् प्राणबलपूरिते नाडीचक्रे सत्त्वसमृद्धे मनसि च लब्धान्तरो भवतीत्युक्तम् । अत एव समृद्धिसम्पदं द्योतयितुं वाजिनीवसू इत्युक्तम् । अथ तस्मिन् रसे प्राण-मनसोः पवमाने सति कोऽपि अपूर्वो व्यापारः फलितो भवति, यस्मात् मर्त्ये अमृतचिद्विलासः प्रारभते । इदं च फलितं कर्म निश्शेषेण सम्पादितं 'निष्कृतम्' इत्युक्तम् । अस्य कर्मणः सम्पूरणे वाय्विन्द्राभ्यां भागहराभ्यां भाव्यम् । तस्मात् तन्निर्वर्तनार्थया सिद्धया धिया युक्तौ उभावपि आगमनार्थं प्रार्थितौ । धीः बुद्धिरिति सामान्येनावोचाम । वस्तुतस्तु तस्याः स्थानं इन्द्रियात्मनो युक्तायुक्तविचारशीलस्य वा मनस ऊर्ध्वं 'ऋतचितः' अधस्ताच्च, एवमुभयोर्मध्यमिति बोध्यम् । अत्रैव प्रथमं धीपदं प्रयुक्तम् । अस्य प्रयोजनं तृतीयतृचार्थविचारे विशदं स्यात् ॥

तृतीयतृचे मैत्रावरुणे प्रथमामृचमाह–

मि॒त्रं हु॑वे पू॒तद॑क्षं॒ वरु॑णं च रि॒शाद॑सम् । धियं॑ घृ॒ताचीं॒ साध॑न्ता ॥७॥

मि॒त्रम् हु॒वे॒ पू॒तऽद॑क्षम् वरु॑णं च॒ रि॒शाद॑सम् धिय॑म् घृ॒ताची॑म् साध॑न्ता ॥

पूतदक्षम् पवित्रं धीकौशलं यस्य तं **मित्रं हुवे** आह्वयामि **रिशादसम्** हिंसकानां अत्तारं भक्षकं (विनाशनमित्यर्थः) **वरुणं** च [हुवे आह्वयामि] कथंभूतौ तौ मित्रावरुणौ? **घृताचीम्** घृतं दीप्तिं अञ्चति प्राप्नोतीति घृताची तां दीप्तां **धियं** धारणावतीं बुद्धिं **साधन्ता** साधयन्तौ निष्पादयन्तौ ॥

दक्षपदं सर्वत्र बलार्थे वर्तते, तथैव सायणो व्याचष्टे । अपि तु बहुप्रयोगस्थल-परिशोधनेन धीकौशलरूपं बलमिति वक्तव्यम् । बलस्य वैविध्यमङ्गीकृत्य साध्वसाधु-सत्यासत्यादि-विवेचनपरां तत्त्वनिर्णायिकां प्रज्ञां दक्षपदवाच्यां ब्रूमः । अत एव धी-कौशलं इति सामान्येन दक्षपदार्थो दत्तः । महीधरो ज्ञानेन्द्रियकौशलं दक्षपदार्थमाह । अन्ये पुनर्नव्याश्च अत्र विप्रतिपन्नाः । पुरस्तात् पुनर्विचारयिष्यामः अस्य सूक्तस्य अन्तिमर्चो व्याख्यानावसरे ॥

घृताचीम्- धीविशेषणम् । जिघर्तिर्जुहोत्यादिः क्षरणे दीप्तौ च । 'जिघर्म्यग्निं हविषा घृतेन' इत्यादिः दीप्त्यर्थे मन्त्रवर्णेषु प्रयोगो लक्षणीयः । दीप्तां अत एव प्रकाश-मानां धियं इति विशेषणं उपपद्यते । क्षरणे प्रस्रवणे च वर्तते । अत एव घृतं सर्पि-र्वाचकं लोके । वेदे तु 'दीप्तिमत्' घृतम् । ऋक्संहितायां अत्रैव प्रथमं 'घृताची' इति घृतपदं धीविशेषणतया प्रयुक्तम् । इदं च वेदरहस्यार्थोद्घाटन-प्रधानानां सङ्केतपदानां एकम्, कवि-क्रतु-भद्र- दक्ष-ऋतादिपदानीव यौगिकत्वमजहत् सर्वत्र नियतेऽर्थे प्रयुक्तं मन्त्रेषु । अस्य तृचस्य तात्पर्यं पुरस्तात् पर्यालोचयामः ॥

मैत्रावरुणे तृचे द्वितीयामृचमाह–

ऋ॒तेन॑ मि॒त्रावरु॑णावृतावृधावृतस्पृशा । क्रतुं॑ बृ॒हन्त॑माशाथे ॥८॥

ऋ॒तेन॑ मि॒त्रा॒व॒रु॒णौ॒ ऋ॒त॒ऽवृ॒धौ॒ ऋ॒त॒ऽस्पृ॒शा॒ क्रतु॑म् बृ॒हन्त॑म् आ॒शा॒थे॒ ॥

ऋतेन सत्येन [सत्येनैव साधनेन] हे **मित्रावरुणौ** मित्रो वरुणश्च [उभौ युवां] **बृहन्तम्** महान्तं **क्रतुम्** प्राज्ञं दृढसङ्कल्पं [कर्मसाधकं इच्छाबलमित्यर्थः] **आशाथे**

आनशाथे [व्याप्तवन्तौ, प्राप्तौ उपभोगायेत्यर्थः] कीदृशौ मित्रावरुणौ? **ऋतावृधौ** ऋतस्य सत्यस्य वर्धयितारौ, पुनः कौ? **ऋतस्पृशा** ऋतं सत्यं स्पृशन्तौ ॥

ऋतं सत्यं सत्यधर्मो वा भवति सर्वत्र वेदे । वेदगूढार्थाविष्कारायोपयुक्तानां पदानां इदमाद्यं वक्तव्यम् । ऋतं यजमाने वर्धयन्तौ मित्रावरुणौ 'ऋतावृधौ' । स्वभावतः सिद्धस्तयोः सत्यस्पर्शः 'ऋतस्पृशौ' । तथा सत्यवर्धनकर्मणः सत्यमेव साधनं भवति तयोः । अत एव करणे तृतीया प्रयुक्ता 'ऋतेन' । तादृशव्यापारस्य तयोः प्राज्ञकर्मणि स्यादध्यवसायः । अत एव 'क्रतुं आशाथे' इत्युक्तम् । बहिः, क्रतुर्यज्ञ इति प्रसिद्धम् । तर्हि बाह्येऽर्थे, अन्नबहुलं महान्तं 'बृहन्तम्' अङ्गैश्चोपाङ्गैश्च अतिप्रौढं यज्ञं भोक्तुं यज्ञदेशं प्राप्तौ यज्ञभुजौ मित्रावरुणौ इति तात्पर्यं प्राहुः । अस्मत्पक्षे तु, अन्तर्यजने समारब्धे, कविक्रतौ समिद्धे भगवत्यन्तर्ज्वलने, प्रसादितयोरिन्द्रवाय्वोरनुग्रहबलात् सोमाभिषवसामर्थ्यं प्राप्ते च मनस्सारथौ मुख्यप्राणे, मित्रावरुणौ उक्तगुणविशिष्टौ ऋतवर्धनौ विपुलं विशालं वा ऋतवद् बृहद्भूतं क्रतुपदवाच्यं कर्मसाधकं अध्यवसायबलं प्राप्तौ भुञ्जात इति ग्राह्यम् ॥

मैत्रावरुणे तृचे तृतीयामृचमाह–

क॒वी नो॑ मि॒त्रावरु॑णा तुवि॒जा॒ता उ॑रु॒क्षया॑ । दक्षं॑ दधाते अ॒पस॑म् ॥९॥

क॒वी इति॑ नः॒ मि॒त्रावरु॑णा तु॒वि॒ऽजा॒तौ उ॒रु॒ऽक्षया॑ । दक्ष॑म् द॒धा॒ते॒ इति॑ अ॒पस॑म् ॥

कवी मेधाविनौ (अतीन्द्रियार्थदर्शिनौ) **तुविजातौ** बहुषु बहुधा वा प्राप्तजन्मानौ **उरुक्षया** उरुक्षयौ विशालनिवासौ (एवंभूतौ) **मित्रावरुणा** मित्रावरुणौ देवौ **नः** अस्माकं **अपसम्** कर्मवत् (कर्मसाधकं, क्रियानिष्पादकमिति यावत्) **दक्षम्** विवेचनात्मकं धीकौशलं **दधाते** धारयेते ॥

कवी– नेदं मेधाविसामान्यवाचकं वेदे, दृष्टिसम्पत्तिं द्योतयति । क्रान्तदर्शी, अतीन्द्रियार्थदर्शीति वा व्याख्यातम् । तुविजातौ– तुविपदं वेदे बलवाचकम् । बलं सेनार्थे यथा बहुलं द्योतयति तथा तुविपदमपि बह्वर्थकम् । बहुनामसु पठितं च ।

बहूनामुपकारकत्वाद् बहुधा जात इति सायणव्याख्या । यजमाने देवाः स्वरूपतो व्यापारतश्च बहुशः स्वात्मानमाविष्कुर्वन्ति, तेषामाविष्कार एव तेषां जन्म, तस्माद् बहुधा जात इति वयम् । उरु बहुनामसु पठितमिति हेतोः 'उरुक्षया' बहुनिवासौ इति सायणः । उरु विस्तृतं अत एव विशालं विपुलं वा वेदे । तस्माद् वितते बृहति निवासोऽनयोरिति ग्राह्यम् । 'दक्षं' बलं 'अपसं' कर्म च दधाते मित्रावरुणाविति चकाराध्याहारेणोभयं च समुच्चितं सायणव्याख्याने । नावसरोऽध्याहारस्य । 'अपसम्' इति दक्षविशेषणम् । न चेदिदं विशेषणमभविष्यत् अपि त्विह सत्त्ववाचि, तदा आद्युदात्तं अपठिष्यत । नेदमाद्युदात्तम् । ननु विशेषणं चेत् विशेष्यनिघ्नं वाच्यलिङ्गं स्यात्, अपश्शब्दस्तु न तथेति चेत्, मत्वर्थलक्षणया व्याख्यातपूर्वं 'रयिं यशसं' इत्यादिकमिव 'अपस्वि दक्षम्' इति बोध्यम् । अन्यथा च अपश्शब्दो वेदे वाच्यलिङ्गतया प्रयुज्यत इत्यवधेयम् । अपि च वेदे सत्त्वनामान्यपि यौगिकार्थप्राबल्यं व्यञ्जयितुं गुणवाचकत्वं दधते । 'गोतमः' 'अङ्गिरस्तमः' 'इन्द्रतमः' 'अपस्तमा' इत्यादिः प्रयोगः साधारणो वेदे ।

'अयं देवानामपसामपस्तमः' (१-१६०-४) अप इति कर्मनाम । तेन तद्वान् लक्ष्यते । कर्मवतां मध्ये प्रकृष्टकर्मा इति सा. व्या. । 'अपसामपस्तमा' (६-६१-१३) वेगवतीनां वेगवत्तमा– सा. व्या. । (१०-७५-७) कर्मवतीनां मध्ये वेगाख्यकर्मवती– सा. व्या. । (१०-५३-९) शोभनकर्मवतां मध्ये अतिशयेन शोभनकर्मा । (१०-११५-२) अपस्वितमः कर्मवत्तमः मत्वर्थो लुप्तः– सा. व्या. ॥

दक्षम्– प्राग्व्याख्यातम् । फलवत्कर्मसाधकं दक्षपदवाच्य-विवेचनात्मकधीकौशलं दधाते मित्रावरुणौ । प्राक् पूतदक्षपदार्थ-प्रतिपादनावसरे दक्षपदं सामान्येन बलनामसु पठितमपि तस्य धीवैशिष्ट्यमुपपादितम् । अस्यामृचि मित्रावरुणौ सुसङ्गतौ क्रियाकौशलविशिष्टं विवेचनात्मकज्ञानकौशलं धारयमाणावित्युक्तम् । अनेन युक्तयोर्मित्रावरुणयोः आयत्तं किमपि कर्मविशिष्टं ज्ञानमित्युक्तं भवति । 'पूतदक्षं' मित्रं 'रिशादसं' वरुणं इति उक्तेश्च प्रकारान्तरेणेदमुक्तं ग्राह्यम् । किमिदं कर्म ज्ञानं वा? कौ नाम मित्रावरुणौ? का वा तयोः प्रसक्तिः? ब्रूमः—

सूक्तेऽस्मिन् प्रथमस्य तृचस्य सोमाभिषवे प्राणसन्नाहो विषयः, यदर्थं वायुरेक एव पृथक् स्तुतः । ततः परं यजमाने मानव ऋतचिद्विलासाय मनोमयभू-परिष्कारः प्रस्तुतः, यदर्थं धिया युक्तौ इन्द्र-वायू आगमनाय प्रार्थितौ । अस्य सूक्तान्ततृचस्य विषयस्तु,

ऋतस्य व्यापारो मनोमयसत्त्वे साधनीय इति; येन धीः सम्यक् साधिता स्यात् कर्म च विपुलं भवेत् । एतत्कृते मित्रावरुणावाहूतौ । इमौ च, मित्रो वरुणोऽर्यमा भग इति चतुर्णां एकसदनानां (१-१३६-२) व्यूहभूतानां मध्ये प्रसिद्धौ द्वन्द्वभूतौ । तादृशीं प्रदीप्तां धियं साधयितुं प्रभू इमौ 'घृताचीं धियं साधन्ता' इति प्रथमसूक्तम् ॥

अत्रेदमवधेयम् । सूक्तमन्त्रेष्वियं ऋषीणां शैली लक्ष्यते, यत् कमपि विषयं प्रतिपाद्य अन्यस्य क्रमणे पूर्वोक्तं किमपि मुख्यं पदं पुनः प्रयुज्य उत्तरत्र तदनुरणनेन साधनेन पूर्वोत्तरयोः सम्बन्धं व्यञ्जयन्ति मन्त्रकृतः । एवं कथितपदस्य पुनः कथनं सप्रयोजनं भवति । प्रायः सर्वेषामृषीणां समाना रीतिरियम् । इह धीपदं बन्धकं उभयोः । 'धिया नरा' 'धियं साधन्ता' इति पुनः प्रयुक्तमवधार्यम् ॥

अथ धीपदं विचार्यम् । यद्यपि मतिर्बुद्धिवाचको धीपर्यायो वा भवति साधारणव्यवहारे, तथाऽपि वेदे मतेर्धियश्च भेदो बोध्यः । मतिर्मननं सामान्यबुद्धिर्मनसो वृत्तिरवस्था वा भवति, रोषावेगादिभावमपि क्वचित् प्रतिपादयति मन्युशब्दवत् । धीस्तु धारणावती प्रज्ञा, धिया धीवृत्तिश्च आक्षिप्यते । अनया सह आगमनाय इन्द्र-वायू पूर्वं प्रार्थितौ । अधुना तु, ऋतचित्सम्पर्क-तद्व्यवहाराय सा धीः साधिता समृद्धा प्रदीप्ता च विधातव्या । तत्कृते मित्रावरुणौ स्तुत्या आहूतौ । उक्तलक्षणे धीक्षेत्रे ऋतचितेर्व्यापारस्य विशुद्धप्रतिफलनस्य वा प्रतिबन्धकद्वयं वर्तते । तत्रैकं ऋतानृत-साध्वसाधुविवेचनमालिन्यम्, येन सत्यसम्बन्धिव्याकुलतापत्तिः । अन्यत्तु, बहूनि कारणानि सम्भूय धियः सत्यसम्बद्धमभ्युदयं प्रतिरुध्य धीवृत्तीनां परस्परसाधुयोग-विघातकं वैषम्यमापाद्य धियो दारिद्र्यं तद्गतवृत्तीनां वैतथ्यं च विदधते । अतः सकल-विषकलुषध्वंसिनः सर्वमावृत्य तिष्ठतो वरुणस्य प्रसादात्पारिशुद्ध्यसिद्धिर्भवति । स ऋत-चितिशक्त्यात्मना मानुषे वर्तमानोऽस्मदभिवृद्धिं विघातयतः सर्वान् विरोधिनः पापान् अन्तयति । अतो 'रिशादसं' वरुणं इत्युक्तम् । वरुण इव मित्रश्च ऋतज्योतिःशक्त्यात्मना वरुणसाधितनैर्मल्यविभवेन साधुयोग-सौख्य-सौहार्द-साम्यादिव्यवस्थां धियः सम्पादयन् मानुषे ऋतानन्दविधानाय प्रभवति ॥

एवं युक्तौ देवावुभौ ऋतेन साधनेन ऋतं वर्धयन्तौ मानुषे ऋतसम्पर्कं धत्तः । बृहन्तं क्रतुमस्मासु भुञ्जाते । 'बृहन्' महान् विततो विपुलो वा भूमा, 'क्रतुः' अमोघोऽध्यवसायः कर्मभाक् । स ह्यावश्यको भवति प्राप्तव्यसिद्धये । ज्योतिः शक्तिश्चेति

द्वयमिदं अपेक्षणीयं भवति वेदर्षीणामन्तर्यजने । ऋतस्य ज्योतिर्व्यापाराद् धीर्दीप्ता भवति (घृताचीम्) । ऋतस्य शक्तिव्यापाराद् अध्यवसायोऽविफलो बृहन् भवति [ऋतुं बृहन्तम्] । ऋतस्य विभवेषु स्वयमाविष्कुर्वत्सु कर्मवती कर्मणि प्रवृत्ता विवेचनात्मिका धीः स्थिरीकृता धारिता भवति [दक्षं दधाते अपसम्] । पूता विवेचिका निर्णायिका वा धीः ऋतानुरोधेन कर्मणि प्रवर्तते, ऋतस्य शक्तिविशेषः सञ्जायते, इन्द्रवायुविहितं कर्म सम्यक् साधयति । तस्मात् 'ऋतोः' 'धिय'श्च मालिन्यव्याकुलतादेर्विमोक्षः । इममर्थं अन्यत्र बहूनि मैत्रावरुणसूक्तानि समर्थयन्ति । विस्तरभिया नोदाह्रियन्ते । 'मित्रं वयं हवामहे वरुणं सोमपीतये । जज्ञाना पूतदक्षसा ॥ ऋतेन यावृतावृधा ऋतस्य ज्योतिषस्पती । ता मित्रावरुणा हुवे' इति निदर्शनमेकं मेधातिथेः (१. २३. ४-५) ॥

इदं च बोध्यम् । ऋतप्राप्तिर्निःश्रेयसलाभश्च यज्ञस्य फलम्, तच्च, अग्नेर्विशिष्टं साध्यं कर्मेति प्रथमे अग्निसूक्ते सूक्ष्मशः सूचितम् । द्वितीये सूक्ते, सोमाभिषवे वाय्विन्द्राभ्यां साधनीयं पूर्वाङ्गं कर्म, ततः परं मित्रावरुणयोः कार्यम्, येन ऋतवर्धनेन पवमानानन्दबलेन द्वारा च मानुषस्य साधारण-मनोमयसत्त्वसन्नाहनं च प्रतिपादितानि ।

ऋग्वेदे सर्वत्र ऋषीणामन्तर्यागे द्विधा प्रयत्नः क्रियमाणो लक्ष्यते । तत्रैकः, मानुषस्य शरीरे मनसि च परिपाकः, येन प्राप्तव्यमुद्दिश्य तयोः सन्नाहनं भवति । अन्यस्तु, ऋतस्य सोमपदवाच्य-तदानन्दस्य चाधिगमः, येन मानुषे अमृतस्वरूपस्य परदैवतस्य कार्यपरिपूरणं भवति ॥

इति प्रथमस्य प्रथमे चतुर्थो वर्गः

प्रथमानुवाकस्य तृतीयं द्वादशर्चं सूक्तम्, तत्र चत्वारस्तृचाः । प्रउगशस्त्रस्य देवताः प्रागुक्ताः । अश्विनेत्यादिः प्रथमस्तृच आश्विनः ॥

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती । पुरुभुजा चनस्यतम् ॥१॥

अश्विना यज्वरीः इषः द्रवत्पाणी इति द्रवत्ऽपाणी शुभः पती इति पुरुऽभुजा चनस्यतम् ॥

अश्विना हे अश्विनौ यज्वरीः यागनिष्पादिकाः इषः प्रेरणात्मिकाः शक्तीः चनस्यतम् भुञ्जाथाम् । अश्विनोस्त्रीणि विशेषणानि । द्रवत्पाणी क्षिप्रगपादौ

शुभस्पती शुभस्य पालकौ पुरुभुजा बहूपभोक्तारौ ॥

इषः– अन्नानि [प्रायशः कर्मठव्याख्यानम्] तथा चनः अन्नं इति च । तदनुसारि द्रवत्पाण्यादीनां तात्पर्यम् । प्रेरणार्थाद् धातोरपि निष्पन्नत्वात् प्रेरणवेगार्थे परिग्राह्यः ॥

चनस्यतम्– अन्नमपि भोग्यं भवति, तस्मादन्तरर्थे चनः भोग्यं, इच्छतम् उपभुञ्जाथां इति ग्राह्यम् ॥

द्रवत्पाणी– औचित्यात् पाण्युपलक्षितः पादो बोध्यः । अन्यत्र (२. ३१. २) 'पाण्युपलक्षितैः पादैः' इति सायणोऽप्याह ।

शुभस्पती– दीप्तौ भोगक्षमे शोभार्थे शुभे च वर्तते शुभधातुः । अत्र द्वितीयोऽर्थ उपपन्नः 'पुरुभुजा' 'चनस्यतम्' इति पदद्वयेऽपि भोगार्थकशब्दश्रवणात् ॥

सामान्येनायं मन्त्रार्थो भवति– द्रुतगतिकौ भोगाधीश्वरौ बहुभोगसमर्थौ अश्वाधिरूढौ देवावश्विनौ सम्बोधितौ, ताभ्यां यजननिष्पत्ति-निमित्तभूताः प्रेरयित्रीः यागसम्बन्धिनीः शक्तीराक्रम्य अधिष्ठाय वा सामोदं भाव्यम्– इति । विशेषः पुरस्ताद् विचार्यते तृचस्यान्ते ॥

अश्विना पुरुदंससा नरा शवीरया धिया । धिष्ण्या वनतं गिरः ॥२॥

अश्विना पुरुऽदंससा नरा शवीरया धिया धिष्ण्या वनतम् गिरः ॥

अश्विना हे अश्विनौ अश्वारूढौ कीदृशौ? **पुरुदंससा** बहुकर्माणौ [बहुविधक्रियानिष्पादकौ] **नरा** नरौ नेतारौ पुरुषौ [बलिनौ देवौ] युवां **गिरः** वाचः [अस्मदीयाः स्तोत्रवाचः] **वनतम्** सम्भजतम् [तासु रमध्वम्] । **धिष्ण्या** हे धारयितारौ [धियां सन्तौ] । तयोः कया निमित्तभूतया गिरां सम्भजनं स्यात्? **शवीरया धिया** स्फुरद्बलभूयस्या धारणात्मिकया बुद्ध्या ॥

पुरुदंससा– आश्चर्यभूतविविधकर्माणौ इत्येके व्याख्यातारः । पुरु बहु, दंसः कर्म, एतावन्निर्विवादम् । आश्चर्यभूतेति विशेषणोपादानं व्याख्यानमात्रम्, न पदार्थः । नात्र दोषः ॥

नरा– नृपदं बलवाचकं वेदे । यथा नृम्णम् । नृणां नृतमः । बलवत्त्वादेव

नरो नेतार इति व्याख्यानं साधु स्यात् । नराः पुरुषाः मानुषा देवाश्च वेदे । स्त्री-देवतास्तु गणाः ॥

शवीरया— बहुधा निर्वचनमाहुः । शव इति स्फुरद्बलम्, तस्माद् ईरन्प्रत्ययः । धियो विशेषणं अस्मदभिमतम् ॥

धिष्ण्या— अत्रापि बहूनि निर्वचनानि । धिषणा धिष्णा तत्र भवौ धिष्ण्यौ इति चेत् 'शवीरया धिया' इत्यनेन स्यादर्थसङ्गतिः ॥

अयं साधारणोऽर्थः— हे अश्वारूढौ विविधकार्यसाधकौ बलवन्तौ देवौ धियां ध्रियमाणौ धारयितारौ, युवां स्फुरद्बलसाधनीय-अप्रतिहतप्रसरया बुद्ध्या अस्मदीय-स्तोत्रवाक्षु मोदध्वम् इति ॥

दस्रा॑ युवाक॑वः सु॒ता नास॑त्या वृ॒क्तब॑र्हिषः । आ या॑तं रुद्रवर्तनी ॥३॥

दस्रा॑ यु॒वाक॑वः सु॒ताः नास॑त्या वृ॒क्तऽब॑र्हिषः आ या॒त॒म् रु॒द्र॒व॒र्त॒नी॒ इति॑ रुद्रऽवर्तनी ॥

दस्रा कर्मनिष्पादकौ **नासत्या** द्रुतगमनशीलौ हे अश्विनौ **वृक्तबर्हिषः** वृक्तं वर्जितं (अनुपयुक्तैः वर्जनीयैरपावनैर्वा वस्तुभिरिति शेषः) बर्हिः आस्तीर्णं येन तस्य यजमानस्य मम **युवाकवः** बलिनः सोमाः **सुताः** । हे **रुद्रवर्तनी** रुद्रः गतिवेगेन भीषणः वर्तनिः मार्गः ययोस्तौ युवां **आयातम्** आगच्छतम् ॥

दस्रा— उपक्षयार्थाद् दस्यतेर्धातोः क्वचिद्, दर्शनार्थाद् दंशनार्थाद्वा दंसतेर्दंसयतेर्वा क्वचिद् दस्र-दस्रपदयोर्निष्पत्तिं आह सायणः । तस्माद् दर्शनीयोपक्षपयित्राद्यर्थः नैकः प्रोक्तः । अपरोक्तार्थे गृहीतं दस्रपदं दंसवत् कर्मसम्बन्धित्वं द्योतयेत् । यथा 'पुरुदंससा' इत्यत्र कर्मैव प्रतिपादितम्, न तु उपक्षय-दर्शनीयादिकम् । तथेहापि । तस्माद् दस्रौ कर्मणां निष्पादकौ इति वयम् ॥

युवाकवः— युवां कामयन्ते, मिश्रणार्थाद् यौतेर्निष्पन्नत्वात् मिश्रणं कामयन्ते, इति चान्यत्र सायणः । 'युवावते यौवनवता बलिना' इति (३. ६२. १.) सायणव्याख्या । अत्रापि युवशब्दलक्षितं वीर्यं, तच्छालिनः सोमा ग्राह्याः । नासत्या— न असत्यौ सत्यौ एवेति पूर्वे । इदं न साधु लक्ष्यते । वेदे देवतानाम्नामेकैकमपि तत्तद्देवताधर्म-गुण-

स्वरूपान्यतमबोधकं भवति । अश्विनोः नासत्याविति नञ्द्वयेन सत्यस्पष्टीकरणे किं प्रयोजनम्? यथा मित्रावरुणादीनां ऋतसम्बन्धो वैशिष्ट्यं द्योतयति तथा अश्विनोर्न । नासत्यशब्दोऽश्विनोरेव नाम । तस्मात् किमपि वैशिष्ट्यप्रतिपादकं स्यात् । तच्च नसते-र्गत्यर्थात्निरुक्तं भवति । 'द्रवत्पाणी' 'रुद्रवर्तनी' अश्विनौ अश्वारूढौ द्रुतगतिप्रसिद्धौ । तस्मात्पुक्तमस्मदुक्तं निर्वचनम् ॥

वृक्तबर्हिषः– अग्निं परितः (वेद्यां सोमार्थं वा) छिन्नमूलानां दर्भाणां आस्तरणं कृतम् । तस्माद् येषां सोमानां बर्हिः आस्तीर्णं वृक्तं मूलवर्जितं ते सुताः (सोमाः) इति प्रथमाबहुवचनम् इति सायणप्रभृतयः । षष्ठ्येकवचनान्तं अध्याहृतस्य यजमानस्य विशे-षणमुक्तमस्माभिः । एवं स्थूलार्थस्य कर्मोपयोगिनो न क्षतिः । अन्तरर्थे बर्हिः यजने देवानामागमनस्थानसम्बहनम् ॥

रुद्रवर्तनी– 'रुद्रस्येव मार्गो ययोस्तौ' इति प्राञ्चः । रक्तवर्णे द्वे अश्विनीनक्षत्रे इति नव्यानामेकेषां कल्पना । गतिवेगस्य भीषणत्वात् मार्गो रुद्रोऽनयोरिति वयम् ॥

कर्मनिर्वर्तनपटू द्रुतगमनौ वेगभीषणमार्गौ हे अश्विनौ! वेद्यां आसनं सिद्धं कृतं मया, इमे वीर्यशालिनः सोमा अभिषुताः, तान् उपभोक्तुं आगच्छतम् इति ऋषिर्ब्रूते ॥

अथास्य तृचस्य तात्पर्यावगाहने अश्विनावधिकृत्येदं वक्तव्यम् । काऽपि भवतु तयोः कथा पुराणेषु प्रथिता, तावुद्दिश्य नव्यैः कृता नक्षत्रात्मकत्वकल्पना मिथ्या सत्या वा भवतु, प्राच्यया पाश्चात्यया वा आश्विनस्वरूपनिर्णायिकया स्थूलदृष्ट्या नास्ति कार्यमस्माकम् । अन्तरर्थविधामवलम्ब्य अश्विनोस्तत्त्वं प्रतिपित्सूनां नो बाह्यार्थपक्षीया-भिप्रायपरीक्षाया नावसरः । अथेदमश्विनोर्विवरणं भवति–

अश्विनौ यमौ अश्वारूढौ । अश्वो बलोपलक्षकः, विशेषतः प्राणबलं प्राणानु-गृहीतनाडीबलं प्राणमेव वा लक्षयत्यश्वः । तस्मादश्वः क्रियाशक्तिनिष्पादकस्य प्राणस्य प्राणबलस्य वा सङ्केतो भवति । यद्यपि सर्वेषां देवानां ऋतसम्बन्धित्वादिः सामान्यधर्मो लक्ष्यते, तथाऽप्यनयोर्वैशिष्ट्यं सर्वेषां आश्विनसूक्तानां परीक्षणेनावगम्यते । भोगशक्ति-भूयिष्ठौ, सौम्यं मधु पिबन्तौ, तदिच्छन्तौ, आरोग्यं रोगिणे यच्छन्तौ भिषजौ इति बहुषु मन्त्रेषु वर्णितौ । विशेषतः पक्षिवत्, तथा मनोवच्च वेगवन्तौ । रौद्रोऽनयो र्रथवेगः । उषा सूर्यदुहिता रथं तयोरारुह्य याति प्रिया तयोर्योषा । यद्यपि मयः-पद-

वाच्य-परमसुखस्य भावयित्रोस्तयोः क्रियाभोगनिष्पादनमेव प्रधानं कर्म, तथाऽपि ऋत-शक्तिविशेषाविमौ मतिमत्तमकर्माणौ । अखण्डसत्त्वलक्षक-समुद्रसमुत्थौ ऋतसत्त्वं ऋत-बलं चाधिजग्मुषा धीबलविशेषेण परमजीवन-सम्मद-सम्पत्तीनां मनोमयतां सम्पाद्य दधाते, महते कर्मणे यद् अपेक्षितं प्रेरणबलं तद् बिभृतः, येन ज्योतिष्मता तमसस्पारं तारयतो नरं यजमानम् । इमौ नरं मतिभुवः सर्वा अतिक्रम्य स्वयं नावा तारयत इत्येवमर्थकानि सूक्तानि द्रष्टव्यानि ॥

निदर्शनाय मन्त्रभागाः केचन स्वल्पश इह भवन्ति–

'मनोजवसा वृषणा मदच्युता....अवसे पूर्वीभिः पुरुभोजसा' (८-२२-१६) 'आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा' (८-२२-१७) 'युवमत्यस्यावनक्षथो....स्वसा यद् वां विश्वगूर्ती भराति । वाजायेट्टे मधुपाविषे च ॥' (१-१८०-२) 'मध्वः पिबन्ता उषसः सचेथे' (१-१८०-१) 'अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम्' (६-६३-५) 'युवोरुषा अनु श्रियं परिज्मनोरुपाचरत् । ऋता वनथो अक्तुभिः ॥' (१-४६-१४) 'यदन्तरिक्षे पतथः पुरुभुजा '(८-१०-६) 'उत त्या दैव्या भिषजा शं नः करतो अश्विना' (८-१८-८) 'उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः' (८-८६-१) 'एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः । स्तुषे वामश्विना बृहत् ॥' (१-४६-१) 'या दस्रा सिन्धुमातरा मनोतरा रयीणाम् । धिया देवा वसुविदा ॥' (१-४६-२) 'या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः । तामस्मे रासाथामिषम् ॥' (१-४६-६) 'आ नो नावा मतीनां यातं पाराय गन्तवे । युञ्जाथामश्विना रथम् ॥' (१-४६-७) एतादृशैः शतशो दृश्यमानैरन्यैश्च मन्त्रैर्विचारितैराश्विनं तत्त्वं अस्माभिरुक्तविधं सुगमं युक्तं च भवेदित्यसंशयम् ॥

अत्र आश्विने तृचे, बहुभोगभृतौ आशुगतिकौ अश्विनौ यजननिष्पादिनीः प्रेरण-शक्तीरुपभोक्तुं प्रार्थितौ (यज्वरीरिषः) । इमाश्च सोममदवैभवजा इति बोध्यम् । तथा च हेतुरुक्तः । चितेः अभिनवरूपाविष्कारसमर्था वाचः [गिरः] उद्गताः, यजनक्षेत्रं च सिद्धं कृतम् (वृक्तबर्हिषः), वीर्यवत्तमाः सोमाश्चाभिषुताः (युवाकवः सुताः), तस्माद् अश्विनोर्गिरां सम्भजनायागमनमवश्यम् । कार्यसाधकधौरेयाभ्यां ताभ्यां धियां गिरः स्थापयित्वा तासां तद्रूपतामापाद्य तत्स्वीकारः साधनीयः [धिष्ण्या धिया वनतं गिरः] ।

कार्यसाधकौ तौ सोमाभिषवबलप्रेरितेन रौद्रवेगेन निष्कण्टकमार्गौ आगच्छेताम् (रुद्र-वर्तनी)। अश्वाधिरूढाभ्यामाभ्यां प्रदेयं तु सर्वथा बलं, वीर्यम् । याज्ञिकशक्तिभोगे हि रतिस्तयोः । तदिदं तयोः साधनीयम्– वाक् सत्त्वसमृद्ध-धीस्वरूपसात्कर्तव्या, कर्मणः कार्यनिष्पादकत्वं सम्पाद्यम्, प्रयाणे क्षिप्रगमनं निर्वर्तनीयम्, क्रियादक्षता आशुता-इतीदं द्वयं अश्विनोः शक्त्युल्लासाल्लभ्यम् ॥

एवं आध्यात्मिकार्थानुसारेण ऋषीणां भाषासु सर्वत्र अर्थसाङ्गत्यम्, प्रसाद-निर्भरः, अभिप्रायाणामेकरूपता च स्पष्टं लक्ष्यन्ते । बाह्यार्थव्याख्यास्तु, वेदो गहनतम-ज्ञानगर्भित इति नाभिमन्यन्ते, चिरन्तनं गूढार्थविवरणपरं सम्प्रदायं ऐतिह्यं वा न लक्षयन्ति, अत एव असङ्गतार्थान् ब्रुवते, विविधाशयव्याकुल-व्यामोहपरिभूत-मन्त्रार्थ-विवरणधोरणीमवलम्ब्य परमार्षपथात् पतिताः पण्डितानपि पातयन्ति व्यामोह्य ॥

द्वितीयमिव सोमयागे विनियुक्तमिदं तृतीयं सूक्तं आध्यात्मिकभावभूयिष्ठम् । द्वितीयसूक्तीयान्तिमतृच इव अत्राप्यन्तिमे सारस्वते तृचे, ऋतस्य प्राप्तिः, ऋतचितेः अधिगम एव यज्ञस्य फलमिति स्पष्टतरं लक्ष्यते । द्वितीयसूक्त इवेहापि प्राणबलात्मिकाः प्राणशक्तयो देवताः प्रार्थ्यन्ते । तत्राहूतो वायुः, येन प्राणभृतोऽश्वाः प्राणबलविशेषाः सम्भृत्योपकल्प्यन्ते । इह तु, अश्विनावाहूतौ, याभ्यामश्वाः प्राणशक्तयोऽधिरुह्योप-युज्यन्ते । द्वितीये वाय्वनुग्रहात् प्राणव्यापाराद् ऋषिः मनोमयक्रतुं साधयितुं प्रवृत्तः । इहापि आश्विनबलादिन्द्रबलावाप्तये प्रवर्तते । एवं सर्वत्र वेदे देवताव्यवस्था, भाषा-व्यवस्था, अर्थसाम्यं, इति सर्वं एकरीतिकं समञ्जसं सूपपादं च भवति ऋजु पश्यतां चिन्तकानाम् ॥

ऐन्द्रे तृचे प्रथमामाह–

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥४॥

इन्द्र आ याहि चित्रभानो इति चित्रऽभानो सुताः इमे त्वाऽयवः अण्वीभिः तना पूतासः ॥

हे **इन्द्र चित्रभानो** बहुविधरश्मे (बहुप्रकारक-प्रभासमृद्धेत्यर्थः) **सुताः** अभि-षुताः, **इमे** सोमाः **त्वायवः** त्वां कामयमानाः (त्वत्कामा वर्तन्ते) । एते सोमाः

अण्वीभिः अङ्गुलीभिः इति व्याख्यातारः (सूक्ष्माभिः शक्तिभिः)। **तना** विस्तृत्य **पूताः** शुद्धाः कृता इत्यर्थः ॥

'अण्वीभिः, तना' इति पदद्वयमेवात्र विचारयितव्यम्। इन्द्रपदार्थो यास्कोदाहृत-निर्वचनबाहुल्यात् अव्यवस्थितविकल्पत्वाच्च न विचार्यते। इन्द्रमधिकृत्य सारतः प्रागुक्तम्। चित्रपदार्थविवरणे व्याख्यानभेदोऽप्यकिञ्चित्करः। 'अण्वी सूक्ष्मा' 'तना विस्तृतेन' इति सायणव्याख्यानं, अन्यत्र 'एष धिया याति अण्व्या' (९-१-७) 'यच्चिद्धि शश्वता तना' (१-२६-६) इत्यादिस्थलेषु द्रष्टव्यम्। 'तना दशापवित्रम्' इति च सायणोऽन्यत्र ब्रूते। इह स्कन्दस्वामी तमेवार्थमाह। अण्व्यः अङ्गुलय इति निघण्टुबलात् सर्वे व्याख्यातार आहुः। अयं तेषामाशयः– ऋत्विजः सोमरसशोधनं कुर्वन्ति। तत्र एकं साधनं हस्तः अङ्गुलीभिः (अण्वीभिः) लक्षितः, अन्यत्तु विशोधनी भवति। तद् दशापवित्रं तनापदेनोक्तम्। हस्तेन दशापवित्रमादाय शोधिताः सोमाः पूता इति भावः ॥

अत्र याथार्थ्यं सविमर्शं ग्राह्यम्। आश्विनानुग्रहसम्पत्तेः परं ऐन्द्रं प्रसादमभिकाङ्क्षति सूक्तद्रष्टा। प्राणबलसमृद्धेः शुद्धसत्त्वमनोमयं ऐन्द्रमनुग्रहं याचत इत्युक्तं भवति। अभिपुताः सोमाः इन्द्रं कामयन्ते। प्राणाश्वबलवेग-प्रचोदितानां सम्मदभरप्रसराणां यथायथं साधुकर्मणे शुद्धसत्त्व-धीराज्यप्रवेशलाभः आवश्यकः, तदर्थं इन्द्रः शस्यते। अशोधितानां सोमाभिषवानां आमोदरसक्षरणरूपाणां कथं इन्द्रभोग्यता युक्ता स्यात्? अतः सूक्ष्माभिः धीशक्तिभिः (अण्वीभिः) बहिः प्रज्ञाधारे शरीरे वितत्या च (तना) शोधिताः (पूतासः) इत्युक्तम्। ननु, अणु-तन्निष्पन्न-अण्व्यादिपदानि सूक्ष्मवाचकानि भवन्तु, कथं सूक्ष्मता धिय एवोच्यत इति चेत्, मन्त्रवर्ण एव प्रत्युत्तरमाह, सायणोऽप्यवश इव गत्यन्तराभावात् 'अण्वी धीः' इत्यभ्युपगम्य व्याचष्टे। तथा हि 'तममृक्षन्त वाजिनमुपस्थे अदितेरधि। विप्रासो अण्व्या धिया' (९-२६-१)। अत्र सायणीयव्याख्यायां इदं दृश्यते– तं वाजिनं अश्वं अश्ववदाशुव्याप्तं (समृद्धं सोमं इति वक्तव्यम्) अदितेरुपस्थे अमृक्षन्त शोधितवन्तः। के? विप्रासः मेधाविनः। केन साधनेन? अण्व्या अङ्गुल्या धिया प्रज्ञया स्तुत्या वा, अथवा सूक्ष्मया धिया अङ्गुल्येति विशेष्य-विशेषणभावः–इति। एष विक्रान्तः सोमः सूक्ष्मया धिया द्वारा सम्यक् निष्पादितं ऐन्द्रं द्युस्थानं गच्छतीत्येवमर्थकस्य मन्त्रस्य (९-१५-१) अघटनघटनापटीयसी सायणव्याख्या ब्रूते 'एष सोमः

अङ्गुल्याऽभिषुतो धिया कर्मणा इन्द्रस्य निष्कृतं स्थानं दिवं प्रतिगच्छति ।....अङ्गुल्याऽभिषूयमाणः सन् होमद्वारा अग्निनिष्पीडनद्वारा पात्रं वा गच्छति' इति! मन्त्रवर्णस्तु विस्पष्टमाह– 'धियमिच्छन् देवानां अमृतानां निवासस्थानं बृहत् (ऋतं सत्यं) प्रतिगच्छति, न तु पानपात्रं चमसं प्रति सोमः'–इति 'एष पुरु धियायते बृहते देवतातये । यत्रामृतास आसते' (९-१५-२) ॥

अन्ये च मन्त्राः सन्ति नवममण्डले, यत्र अङ्गुल्यर्थकः अण्वीशब्दः, कर्मार्थे धीशब्दो वा नोपपद्यते, विस्तरभिया नोदाहरामः । अथ चेद् अण्वीभिः अङ्गुलीभिरेव भाव्यं, तर्हि ता न मानुष्यः, किं तु दिवो दुहितुः सूर्याया अश्विनोः प्रियाया इति वक्तव्यम् । नेयमस्माकं कल्पना । अत्रोपपत्तिं प्रदर्शयामः । यमर्थं मनसि निधाय ऋषिर्मधुच्छन्दाः 'अण्वीभिस्तना पूतासः' इत्याह सूक्ष्मशः गूढं वा गूढार्थमन्त्रदर्शी, तमेव स्वयं नवममण्डले, प्रथमसूक्ते विस्पष्टमाह (९-१-६-७) । अत्र 'सूर्यस्य दुहिता' 'अण्वीः' 'दश स्वसारः' 'योषणः' द्युलोके तार्ये सोमं गृह्णन्तीति प्रत्यक्षवचनानि लक्षणीयानि भवन्ति । सोममधिकृत्यालमेतावताऽत्र । तृचस्य प्रथमर्चोऽर्थोऽस्माभिरुक्त उपपादितः । अथावशिष्टं ऋग्द्वयं सुगमार्थं भवति ॥

ऐन्द्रे तृचे द्वितीयामृचमाह–

इन्द्रा या॑हि धि॒येषि॒तो विप्र॑जूतः सु॒ताव॑तः । उप॒ ब्रह्मा॑णि वा॒घतः॑ ॥५॥

इन्द्र॑ आ या॒हि॒ धि॒या इ॒षि॒तः विप्र॑ऽजूतः सु॒तऽव॑तः उप॑ ब्रह्मा॑णि वा॒घतः॑ ॥

हे इन्द्र धिया प्रज्ञया [धारणात्मिकया] इषितः प्रेरितः, विप्रजूतः विप्रेण मेधाविना प्रदीप्तध्यानेन जूतः प्रेरितः (पुरो गन्तुमुद्योजित इत्यर्थः) । एवंभूतः त्वं आयाहि आगच्छ । किमर्थम्? सुतवतः सोमं अभिषुतवतः (मम) वाघतः स्तोतुः [आत्मार्थध्यानानि वाचा आविष्कर्तुमिच्छतो मम] ब्रह्माणि मन्त्रात्मकानि स्तोत्राणि उप उपैतुम् ॥

प्रथमं अभिषुताः सोमाः इन्द्रं कामयन्त इत्युक्तम् । तत इन्द्रः सोमं सुतवत आत्मार्थध्यानानि वाग्भिराविष्कृत्य स्तोतुः मन्त्रानङ्गीकर्तुं स्तूयतेऽस्यामृचि । अथ प्रदीप्तया धिया तद्बलेनोपेतः भ्राजमानैरश्वैर्युक्त इन्द्रस्तान् ऋषेर्मन्त्रानुपगच्छति । तमृषिः

प्रार्थयते सुते सोमरसे सम्मदमरं धर्तुं धारयितुं चेति तृतीयस्यामृचि प्रोच्यते ॥

ऐन्द्रे तृचे तृतीयामृचमाह–

इन्द्रा याहि तूतुंजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥६॥

इन्द्र आ याहि तूतुंजानः उप ब्रह्माणि हरिऽवः सुते दधिष्व नः चनः ॥

हे इन्द्र, हरिवः अश्वयुक्त, तूतुजानः अत्यन्तं त्वरमाणः सन् [अश्वयुक्तत्वात्] ब्रह्माणि मन्त्रात्मकानि स्तोत्राणि उप उपैतुं आयाहि आगच्छ । सुते सोमे नः अस्मदर्थं चनः सुखं सम्मदं वा दधिष्व धारय ॥

पूर्वं सोमाभिषवेण साधिते आनन्दक्षरणे, अश्विभ्यां प्राणमयसत्त्वे प्राणावधृते नाडीचक्रे च यो मदो वीर्यवान् कृतः स्थापितश्च, सोऽधुना इन्द्राधीनः कर्तव्यः, येन स शुभ्रधी-दीप्ते द्युस्थाने पदं लब्ध्वा चितेर्न च्युतः स्यात् । तस्मादिन्द्रं प्रज्ञायां आनन्द-धृत्यै प्रार्थितवानृषिः 'सुते दधिष्व नश्चनः' इति ॥

इति प्रथमस्य प्रथमे पञ्चमो वर्गः

तृतीये वैश्वदेवतृचे प्रथमामृचमाह–

ओमासश्चर्षणीधृतो विश्वेदेवास आ गत । दाश्वांसो दाशुषः सुतम् ॥७॥

ओमासः चर्षणिऽधृतः विश्वे देवासः आ गत दाश्वांसः दाशुषः सुतम् ॥

हे विश्वेदेवासः एतत्संज्ञकाः सर्वे देवाः, आगत आगच्छत । कीदृशास्ते? ओमासः अवितारः [वर्धयितारः] पुनः कीदृशाः? चर्षणिधृतः चर्षणीनां नराणां धारयितारः [चर्षणयः कृष्टय इव कर्मोद्युक्ताः, न केवलं मनुष्या इति बोध्यम्] पुनः कीदृशाः? दाशुषः दत्तवतो यजमानस्य सुतम् अभिषुतं सोमं दाश्वांसः यथाभागं विभज्य दातारः ॥

ओमासः– अवतेर्धातोर्निष्पन्नः शब्द इति निर्विवादम् । धातूनां बह्वर्थत्वाद् वर्धने च अव-धातुर्वर्तते । यद्यपीदं पदं सकृदेव प्रयुक्तं ऋक्संहितायां, तथाऽपि 'ओमानं' 'ऊमासः' 'ऊमाः' इत्यादयः शब्दाः प्रयुक्ता दृश्यन्ते । सायणस्तु प्रायशः रक्षणार्थोऽवधातुरिति क्वचित् अर्थान्तरमप्याह । तथा च 'ओमानं सुखविशेषं (१-३४-६)

इत्याह । धात्वर्थमनुवन्नेव 'ऊमासः अवितारः' (१-१६९-२) इत्याह । अन्यत्र 'ऊमाः' ऊमसंज्ञकाः पितरः' (३-४-८) इति च । प्राचीन-आर्यभाषाशाखीय-अवादिधात्वर्थ-परीक्षणाद् अवतिः वर्धने पोषणे वा वर्तत इति शक्यं निर्णेतुम् । एवमेव अव-धातो-रूठिपरे 'ऊतिः' वर्धनं वृद्धिः इति क्तिन्प्रत्ययान्तं पदम् ॥

'चर्षणयः' मनुष्यनामसु पठितमिति हेतोर्मनुष्यसामान्यार्थे न ग्राह्यम् । पञ्चविंशति-नामसु एकमिदम् । कारुः कीरिः कृष्टयः चर्षणयः— इत्यादीनि तत्र तत्र पठितान्यपि अविशेषेण न कदाऽपि ग्राह्याणि ॥

दाश्वांसः— दाशृ दान इत्यस्मान्निष्पन्नम् । अत्रापि विशेषो बोध्यः । तत्तद्युक्त-भागानुसारेण विभजनपूर्वकं दानमिति धात्वर्थो बोध्यः ॥

वैश्वदेवतृचे द्वितीयामृचमाह—

विश्वेदेवासो अप्तुरः सुतमागन्त तूर्णयः । उस्रा इव स्वसराणि ॥८॥

विश्वे देवासः अप्ऽतुरः सुतम् आ गन्त तूर्णयः उस्राःऽइव स्वसराणि ॥

हे विश्वेदेवासः विश्वेदेवाः सुतम् अस्मदीयं सोमं प्रति आगन्त आगच्छत । कीदृशाः अप्तुरः? अपः तुतुरति, श्लुगन्तिकरणी त्वरयन्तीति अप्तुरः वृष्टि-प्रदाः (वृष्टिर्दिव्यानामभीष्टानामिति बोध्यम्) । पुनः कीदृशाः? तूर्णयः त्वरमाणाः अत्रोपमामाह- स्वसराणि गोष्ठानि उस्राः इव गाव इव । उस्राः रश्मयः स्वसराणि स्वावासस्थानानि अहानि यथेति केचन व्याख्यातारः ॥

अप्तुरः— वृष्टिप्रदाः । सर्वेऽपि देवाः वर्षितारः एव तेजो-बल-भोगादीनां, उदकस्यैव वर्षितारो देवा इति कथा शैशवी कल्पनोपहास्यतां याति । अपां तारयितारः, 'अन्तर्णीतण्यर्थस्य तरतेरप्तुरः' इति स्कन्दस्वामी । अर्थद्वयेऽपि अपां साङ्केतिकमर्थं गृह्णीयात् । तेन ऋचस्तात्पर्यं सुगमं भवति । तृचस्यान्ते प्रदर्शयिष्यामः । 'उस्राः'— गोनाम रश्मिनाम च । एवं द्व्यर्थशब्दप्रयोगः साधारणो वेदे । तत्रापि उपमायां ईदृशा प्रयोगेण उपमानोपमेययोरभेदाध्यवसायद्वारा उपमेयार्थस्य उपमानपदार्थः सङ्केतरूप-बाह्यभाव इति व्यक्तो भवति । तथा स्वसराणि— अहानि स्वयं सरति आदित्यः एषु, स्वः सूर्यः इमानि सारयतीत्यादि निर्वचनमाहुः । विश्रान्तिसुखप्रदानि स्वसराणि गृहाणि (गोष्ठानि) अहानि वा भवन्तु ॥

आगन्तेति मध्यमपुरुषश्रुतिसामर्थ्याद् 'विश्वेदेवासः,' इत्यत्र आमन्त्रितप्रथमान्ततया व्याख्यातम् । तथा तद्विशेषणे च । एवं तृतीयतृचेऽपि आमन्त्रिता विश्वेदेवा इति बोध्यम् । एवं ऋग्द्वये श्रुतेन आमन्त्रणेन सङ्गच्छेत ॥

वैश्वदेवतृचे तृतीयामृचमाह–

विश्वेदेवासो अस्रिध एहिमायासो अद्रुहः । मेधं जुषन्त वह्नयः ॥९॥

विश्वे देवासः अस्रिधः एहिऽमायासः अद्रुहः मेधम् जुषन्त वह्नयः ॥

विश्वेदेवासः हे विश्वेदेवाः **मेधं** यज्ञं (मदीयं सोमसत्रं) **जुषन्त** सेवध्वम् (व्यत्ययेन प्रथमपुरुषबहुवचनान्तम्)। कीदृशाः? **अस्रिधः** क्षतिरहिताः [न केनापि क्षपयितुं शक्या इत्यर्थः]। पुनः कीदृशाः? **अद्रुहः** द्रोहरहिताः [यजमानाय न द्रुह्यन्ति, स्वयं अक्षय्याः आश्रितानां भक्तानां न क्षयमापादयन्ति, प्रतिकूलं नाचरन्ति, तान् न वञ्चयन्तीत्यर्थः]। पुनः कीदृशाः? **एहिमायासः** आङ् समन्तात् ईहिः ईहमाना माया प्रज्ञा येषां ते [सर्वतोगतिक-प्रज्ञाविशेषसम्पन्ना इत्यर्थः]। पुनः कीदृशाः? **वह्नयः** वोढारः [भर्तारः, अस्मदीय-यज्ञस्य धारकाः सन्तः तं भजन्तु भवन्त इत्यर्थः] ॥

अस्रिधः– स्रिधिः क्षये शोषणे वा इति व्याख्यातारः । न कुतोऽप्यभिघात एषामिति विवक्षा। एहिमायासः– सकृदेव प्रयुक्तं इदं वेदे । अप्सु प्रविष्टं सौचीकमग्निं 'एहि मा यासीः' इति विश्वेदेवा अवोचन्, तदनुकरणहेतुकोऽयं विश्वेषां देवानां व्यपदेश 'एहिमायासः' इति सायणस्य वापक्षव्याख्या । सर्वतो व्याप्तप्रज्ञाः इति साधुरर्थः सायणीयः । अद्रुहः– व्याख्यातम् । मेधम्– मेध्यते सङ्गम्यते देवैरिति मेधं हविराह सायणः । यज्ञ इति वक्तव्यम् । 'अस्मदीयं यज्ञं' इति स्कन्दस्वामी, तथा अन्ये च । क इमे विश्वेदेवाः? एतत्संज्ञकाः देवताविशेषा इत्येके, यथा शाकपूणिः । सर्वपर्यायो विश्वशब्दः, तस्मात् सर्वदैवतसमष्टिरिति यास्कमतम् । अपरोक्तमेव साधीयो दृश्यते, यतो वैश्वदेवसूक्तमन्त्रेषु प्रयुक्तानि विशेषणानि प्रतिपादिता अर्थाश्च सर्वदेवसमुदायार्थ-संवादं बिभ्रतीत्यसंशयम् । तदस्मिन् तृचे सर्वदैवतसाधारणगुणाः कीर्तिताः । तर्हि एषां शंसनस्य कोऽवसरः? उच्यते । यदश्विभ्यां इन्द्रेण च साधितं तदेव दिव्यं कर्म विश्वैर्देवैः उक्तानुक्तैर्ज्ञाताज्ञातैर्वा परदैवत-विभूतिभूतैः सम्भूय धारयितव्यम्, ततः पूरयितव्यम् । अत एव सर्वदेवसमष्टेः प्रसादः प्रार्थ्यते ॥

अस्य तृचस्य तत्र तत्र कृतैः पदार्थविवरणैरेषां विश्वेषां देवानां विशेषणानि आवश्यकस्थलेषु व्याख्यातानि । 'अप्तुरः' इत्यस्य अपां तरयितारः तारयितारो वेति व्याख्याय द्विधाऽपि सम्भवः साधीयान् अभ्युपगतश्च । समुद्रः-नदी-इत्यादिशब्दाः सङ्केतरूपाः, तस्मादापश्च सङ्केतार्थः प्रागुक्तः । भूमिकायां सविचारं इदं सर्वमावेदितं स्मार्यम् । (पृष्ठ-७६-७७) तदेवं मानुषे जने यजमाने अन्तर्यागपरायणे, आश्विनव्यापारात् प्राणसत्त्वे साधिते, ऐन्द्रकर्मणो धीसत्त्वे च निष्पादिते, सोमाभिषवपदलक्षित-आनन्द-वर्षे च मनः-प्राण-शरीरेषु प्रवृत्ते, विश्वेदेवा आमन्त्रितास्तं सत्रमाविश्य धारयमाणाः यजनपरिपूर्तये प्रभवन्तीति बोध्यम् ॥

अथान्तिमे तृचे, अश्विनोरिन्द्रस्य विश्वेषां देवानां च प्राणबुद्धिनिष्पादनस्य पर्यवसानं ऋतचितिप्राप्तौ इति, ऋतचितिसम्पत्तिरेव यज्ञस्योद्देशः प्राप्तव्यं फलितमिति च असन्दिग्धं विस्पष्टं लक्ष्यते ॥

अन्तिमे सारस्वते तृचे प्रथमामाह-

पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥१०॥

पावका नः सरस्वती वाजेभिः वाजिनीऽवती । यज्ञं वष्टु धियाऽवसुः ॥

सरस्वती वाग्देवी नः यज्ञम् अस्मदीयं यजनं वष्टु कामयताम् । कीदृशी? पावका शोधयित्री अपि च वाजेभिः वाजिनीवती समृद्धिभिः बहुलविधया समृद्ध्या युक्ता । पुनः कीदृशी? धियावसुः धिया द्रव्यवती ॥

पावका- पुनातेः, पापापनोदिनीत्यर्थः । पापं दुरितम्, भद्रपदव्याख्याने तत्स्वरूपं अशुभं अनृतमेवेति वेदर्षीणां मतं प्रतिपादितम् । अनृतप्रध्वंसात्पापापनये शोधनं साधितं भवति । वक्ष्यति च अनृतनाशाय 'सूनृतानां चोदयित्री' इति । वाजेभिः वाजिनीवती- ऐन्द्रवायवतृचव्याख्याने 'वाजिनीवसू' पदार्थप्रसक्तौ वाजशब्दो विचारितः । धियावसुः- अलुक्समासः छान्दसः । 'वसु' सर्वत्र द्रव्यं, सत्त्वं, इति व्याख्यायत इति प्रागुक्तम् । प्रज्ञावृत्तिभिः सत्त्वसमृद्धेत्यर्थः ॥

सारस्वते तृचे द्वितीयामृचमाह-

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥११॥

चोदयित्री सूनृतानाम् चेतन्ती सुऽमतीनाम् यज्ञम् दधे सरस्वती ॥

सरस्वती सेयं वाग्देवी **यज्ञं** (इमं) **दधे** धारयते। कीदृशी? **सूनृतानाम्** शुभानां सत्यानां **चोदयित्री** प्रेरयित्री । **सुमतीनाम्** शोभनानां मतीनां मनोवृत्तीनां हार्दभावानां वा **चेतन्ती** चेतयन्ती प्रज्ञापयन्ती ॥

सूनृतानाम्– प्रियसत्या वाक् सूनृतेति लोके प्रसिद्धिः । तथाऽपि अत्र वेदे सुपदस्य शोभनार्थ एवोपपन्नः । सुमतीनाम्– अत्रापि कल्याणमतीनामिति बोध्यम् । दधे– लडर्थ एव साधीयान्, छान्दसः । नेह भूतार्थविवक्षा ॥

तृतीयामृचमाह–

महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥१२॥

महः अर्णः सरस्वती प्र चेतयति केतुना धियः विश्वाः वि राजति ॥

सरस्वती वाग्देवी (पूर्वऋग्द्वयप्रतिपादिता) **केतुना** प्रज्ञापकेन (दर्शनकर्मणा) **महो अर्णः** महान्तं प्रवाहं समुद्रं वा [ऋतस्य बृहतीं प्रवृत्तिं इति बोध्यम्] **प्रचेतयति** प्रकर्षेण ज्ञापयति [प्रज्ञायां सुप्तमिव स्थितं ऋतप्रवृत्तिरूपं अर्णः-पदवाच्यं प्रवाहं उत्थाप्य प्रबोधयति]। अपि च **विश्वाः धियः विराजति** समस्ता धीवृत्तीश्च प्रदीपयति ॥

अस्यामृचि 'केतुना' कर्मणेति सायणः, कर्मणा प्रज्ञया वेति यास्कः । वेदरहस्योद्घाटन-साधनभूतानां ऋत-क्रतु-श्रवः-प्रभृतीनां एकमिदं केतुपदम् । दर्शनात्मकः सहजावबोधः केतुरिति सर्वत्र ग्राह्यम् । स्थूलार्थपक्षीयानां नये क्रतु-वाज-ऋतादीनामिव केतोरपि बहवोऽर्थाः । नास्ति नियमः । अस्मदुक्तेऽर्थे नियतः केतुशब्दः सर्वत्र मन्त्रवर्णेषु घटत इत्यवधेयम् । स्थूलार्थानुसारेण अस्यामृचि नदी सरस्वती स्तुता । पूर्वं ऋचोर्द्वयोः वाग्देवी विग्रहवतीति च प्राहुः कर्मठसम्प्रदायिनः । नावश्यकी परीक्षा तेषां विवक्षायाः । यत् किं वा भवतु तात्पर्यं तन्मते, तन्मन्त्रद्रष्टरि महर्षौ मधुच्छन्दसि भावदारिद्र्यं आरोपयतीत्यसंशयम् । प्रथमं विग्रहवती भूत्वा, ततः नदीरूपा संवृत्ता किल! कुतोऽयं ऋषिदृष्टौ हठाद् वेषान्तरपरिग्रहस्तस्याः सरस्वत्याः? कारणं नोक्तम् । फलं तु देवो जानाति ।

अथ चेदवगच्छामः स्वरूपं सरस्वत्याः, आद्यं ऋग्द्वयमस्मिन् तृचे विस्पष्टार्थं प्रसन्नं भवेदित्यसंशयम् । महीति स्तूयमानया भारत्या इळया च सह सरस्वती गीयते वेदे ।

'इळा सरस्वती मही' इति तिस्रो देवीरधिकृत्य व्याख्यानावसरे तासां विवेकः पुरस्तात् प्रपञ्चयिष्यते । ऋतचितेः शक्तिविशेषा सत्यश्रुतिप्रचोदिनी दिव्यावेशवाणी सरस्वतीति कीर्त्यते । सत्यावेशादनृतप्रध्वंसो भवति । अनृतं हि सर्वतोमुखपापरूपतां धत्ते, अनृतात्पापं नातिरिच्यत इति पुरातनमार्षं मतम् । अनृतप्रेरणयैव असाधुः दुष्टः सुखाद्यनुभवः, असाधुः सङ्कल्पः, असाधु च कर्म, मानुषं जन्म आविश्य वशयन्ति । तस्माद् अनृतमायुः सर्वथा जन्मनः प्रभृति नः प्रबाधते, येन सर्वाणि नः कर्माणि कायिकानि मानसिकानि वा अनृतसात्कृतान्यन्धितानि भवन्ति । तदत्र चिकित्साया नास्ति शरणं ऋतादृते । तच्च ऋतं, ज्योतिषा वाचा वा रूपेण उभयथा च अवतरत्याविशत्याविर्भवतीति दर्शनं महर्षीणामाद्यानाम् । येन धियः परिवर्तनं साध्यते, जगता सह अस्मान् प्रति नूतनो विवेकश्च सञ्जायते । ऋतमयी धीः दृष्टिं ऋतमयीं विधत्ते, ऋतदृष्ट्या नः सत्यरूपता निष्पादिता स्यात् । यतः प्रयासवर्जं स्वभावतः सत्याः हार्दभावाः सत्याः सङ्कल्पाः सत्यानि च कर्माणि निरर्गलं प्रवहेयुः ॥

अधुना तृचतात्पर्यं सुगमं स्यात् । प्रथमं 'धियावसुः' 'पावका' सरस्वती पापापनोदाय पारिशुद्ध्यं विदधाना यज्ञकामा धीसमृद्धा प्रसीदति । ततः मानुषस्य सर्वकर्मसमर्पणरूपं यज्ञं परिपाल्य धारयते, येन ऋतानुरोधेन मर्त्यस्य कर्माणि ज्ञानानि वाचो भावाश्च प्रवर्तेरन् (सूनृतानां चोदयन्ती, सुमतीनां चेतन्ती) । अन्ते च सा भगवती वर्षति प्रवाहयति स्वीयेन दर्शनकर्मणा ऋतचिद्दीप्तीः 'अपः' प्रेरयन्ती मानुषे यजमाने, सर्वाश्च धीप्रवृत्तीः सत्यज्योतिषा प्रज्वलयति (धियो विश्वा विराजति) चेति सारांशः ॥

तदिदं व्याख्यातं तृतीयं सूक्तम् । तत्र विशेषतश्चतुर्थतृचप्रतिपादितो विषयः प्रागुक्तमर्थं समस्तं दृढीकृत्योज्वलयन् बाह्यस्य कर्मणः, यजमानस्य अन्तःकरणपरिपाकदशाविशेषस्य च सम्बन्धं प्रद्योतयतीति स्पष्टम् । 'महो अर्ण' इति प्रायशोऽगूढया सङ्केतभाषया महान्तं ऋतचितिप्रवाहं प्रबोधयन्त्याः सरस्वत्या दर्शनकर्मवैभवप्रस्तावेन वेदरहस्यं नात्यन्तं अविभेद्यतया गोपितम्, अपि तु मधुच्छन्दसैव महर्षिणा किञ्चिद्वा रहस्यप्रकाशकैः पदैः प्रयुक्तैरुपदर्शितमिति गम्यते ॥

इति प्रथमस्य प्रथमे षष्ठो वर्गः

इति प्रथमे मण्डले प्रथमोऽनुवाकः

अथ द्वितीयेऽनुवाके चतुस्सूक्तात्मके 'सुरूपकृत्नुम्' इति प्रथमं सूक्तम् । प्राग्वद् ऋषिश्छन्दश्च, इन्द्रो देवता । तत्र प्रथमामृचमाह—

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यविद्यवि ॥१॥

सुरूपऽकृत्नुम् ऊतये सुदुघाम्ऽइव गोऽदुहे । जुहूमसि द्यविऽद्यवि ॥

सुरूपकृत्नुम् सुरूपाणां साधूनां सिद्धानां वा रूपाणां कृत्नुम् कर्तारम् **ऊतये** वृद्धये **द्यविद्यवि** अहरहः **जुहूमसि** जुहुमः, आह्वयामः । आह्वान-कर्मणि दृष्टान्तमाह- **गोदुहे** गां दोग्धि गोधुक् तस्मै **सुदुघामिव** सुष्ठु दोग्ध्रीं पयस्विनीमिव ॥

सुरूपकृत्नुम्- कृत्नुः कर्ता, शिल्पीति भट्टोजीदीक्षितानां उणादिसूत्रवृत्ति-सूचितां पश्यामः । अत्रेन्द्रः कर्ता, शिल्पी साधूनां सिद्धानां वा धीवृत्तिरूपाणां कर्मरूपाणां वा । हत्नुः, दत्नुः, जिगत्नुरित्येते औणादिकक्नु-प्रत्ययान्ताः । ऋक्-संहितायां सकृदेवात्र प्रयुक्तमिदं पदम् । ऊतये- अवतेर्धातोरूतिरिति निर्विवादम् । यद्यपि क्वचिद्रक्षणार्थोऽप्युपपद्येत, तथाऽपि वर्धनार्थः प्रायः सर्वत्र सङ्गतः स्यादिति 'ओमासः' इति शब्दस्यार्थविचारे प्रतिपादितम् ॥

सुदुघामिव- सुष्ठु दोग्धि सुदुघा तामिव । गोदुहे- 'गोः दोग्धा तस्मै' इति वयमपि पूर्वे व्याख्यातार इव ब्रूमः । अत्र नव्याः केचन विप्रतिपद्यन्ते । अत्र दृष्टान्त-दार्ष्टान्तिकपर्यालोचना कार्या । जुहूमसि- ह्वयतेः लडुत्तमपुरुषबहुवचने छन्दसि शपः श्लुः । द्यविद्यवि- निघण्टुपठितमेव पदम्, प्रतिदिनमित्यर्थः ॥

अत्रेन्द्रः सुरूपकृत्नुः सुदुघया पयस्विन्योपमीयते । 'ऊतये' इन्द्र आहूयते, गोदोहनाय सुदुघा आहूयत इत्यर्थो वक्तव्य इत्याहुः । एवं भावक्विबन्ताद् गोधुक्पदात् चतुर्थी 'गोदुहे' इति ग्रहणे उपमायां लोपो न भवेदित्याशयः । इयं च युक्तिरापाततः साध्वी लक्ष्यते, किं तु न लक्षयति विवक्षां मन्त्रद्रष्टुः, दृष्टान्तप्रतिपादितं भावं वा । भवतु लुप्तोपमा, सर्वसाधारणी सा वेदे । 'गोदुहे' गोदोहनक्रियार्थमिति चेत्, गोदोग्धा कः? दोहनमात्रेण कथं 'ऊतिः' भवति? भवतु 'ऊतिः' रक्षैव, मास्तु 'वृद्धिः' इति असदुक्तार्था । कस्य भोग्यं भवति दुग्धम्, येन 'ऊतिः' सम्पाद्या? इदं सर्वमनालोच्य

उपमां पूर्णां निरूपयितुं कृतः प्रयासो निस्सारो भवति । आह्वाता यजमानः स्तोतैव दोग्धा, दुग्धं फलं तस्यैव भोग्यं 'ऊतये' भवति । अन्यत्रापि मन्त्रवर्णेषु स्तोता गोधुक् सुदुघा त्विन्द्र इति च गीयते । यथा वा 'आ त्वद्य सबर्दुघां हुवे⋯⋯इन्द्रं धेनुं सुदुघां' (८. १. १०.) । 'आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे । इन्द्र सोमस्य पीतये' (८. ५४. १.) । अत्र प्रथमर्चि इन्द्रधेन्वोरभेदाध्यवसायः कृतः । द्वितीयर्चि इन्द्र उपमीयते गवा । अन्यामृचमुदाहरामः, यत्र स्तोता आह्वातैव दोग्धा स्पष्टमुक्तः— 'दोहेन गामुपशिक्ष सखायं प्रबोधय जरितर्जारमिन्द्रम्' (१०. ४२. २.) । अत्र 'जरितः' स्तोतः इति सम्बोधनम् । तस्यैव दोहनकर्मणा साधनेन गूढकामं (जारं) इन्द्रं वशं नेतुं (उपशिक्ष) प्रयासः कार्य इत्युक्तः । आह्वातृभिः स्तोतृभिरेव दोग्धृभिर्भाव्यमिति संशय-च्छेदकोऽन्यो मन्त्रो वालखिल्यसूक्ते भवति । इदं उत्तरार्धम्— 'तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः' इति (वाल- सू. ४. ऋ. ४.) । अत्र 'वयं' इत्यस्य विशेषणं 'गोदुहः' इति प्रथमाबहुवचनान्तम् । एवं 'गोदुहे' भावक्विप्प्रत्ययान्ताद्वा इति संशयः छिन्नः ॥

द्वितीयामृचमाह—

उप॑ नः॒ सव॒ना ग॑हि॒ सोम॑स्य सोमपाः पिब । गो॒दा इद्रे॒वतो॒ मदः॑ ॥२॥

उप॑ नः॒ सव॑ना आ ग॒हि॒ सोम॑स्य सो॒म॒ऽपाः॒ पि॒ब॒ । गो॒ऽदाः इत् रे॒वतः॑ मदः॑ ॥

हे **सोमपाः** सोमपायिन् (इन्द्र) **नः** अस्माकं **सवना** सवनानि, यज्ञान् **उपागहि** उपागच्छ (अस्मदीयसोमाभिषवं प्रति समीपमेहि) । **सोमस्य पिब** सोमं पिब । [तथा सोमपानेन] **रेवतः** ऋद्धिमतः [तव] **मदः** हर्षः **गोदाः इत्** गोप्रद एव, ज्ञानरश्मिप्रद एवेत्यर्थः ॥

यजमानेन सुते सोमे धीसाम्राज्यधुरन्धरेण इन्द्रेण परिगृह्य पीते सति, सोमरस-जन्यहर्षातिशयेन पोषितो धीराज्यस्वामी प्रज्ञारश्मीन् वर्षति सोमसुते यजमानायेति अन्तर्यागपरा अर्थपुष्टिर्भवति । मदमत्तः श्रीमान् यथा गोदानं गोकामेभ्यः करोति, तथा इन्द्रः अग्निष्टोमाख्ये बाह्ये कर्मणि सोमवल्लीं यथाविधि निष्पीड्य रसमादाय

संस्कृत्य स्वस्मै [इन्द्राय] ददते यजमानाय पुष्कलाश्चतुष्पदो गा अनुगृह्णातीति परिहाम-वर्जं गम्भीरं व्याचक्षते कर्मठाः ॥

तृतीयामृचमाह—

अथा॑ ते॒ अन्त॑मानां वि॒द्याम॑ सुम॒तीना॑म् । मा नो॒ अति॑ ख्य॒ आ ग॑हि ॥३॥

अथ॑ ते॒ अन्त॑मानाम् वि॒द्याम॑ सु॒ऽम॒तीना॑म् मा नः॒ अति॑ ख्यः॒ आ ग॒हि॒ ॥

अथ अनन्तरं [सोमपानाल्लब्धेन हर्षातिशयेन गोपदलक्षितज्ञानरश्मीनामस्मभ्यं वितरणात् परमित्यर्थः] इन्द्र! **ते** तव **अन्तमानाम्** अन्तिकतमानां आत्यन्तिकीनां **सुमतीनाम्** शोभनबुद्धीनां, साधुचिन्तनानां किञ्चिद्वा **विद्याम** जानीयाम [देवस्येन्द्रस्य सर्वाणि चिन्तनानि ज्ञातुं कथं प्रभवेज्जीवो यजमानः? तस्मादेकदेशं वेत्ति व्याख्यातम् । अन्यथाऽपि द्वितीयार्थे षष्ठी, 'सोमस्य पिब' इतिवदुपपद्यते] । **नः** अस्मान् **अति मा ख्यः** अतिक्रम्य मा दर्शय (स्वात्मानमिति शेषः) **आ गहि** आगच्छ ॥

'अति मा ख्यः' इत्यत्र अन्तर्भावित-ण्यर्थो बोध्यः । अस्मान् अतीत्य मा ख्यापयात्मानमिति पदार्थः । अस्मान् मातिक्रमीरिति भावः । 'यावदस्माकं दर्शन-सामर्थ्यं तावदेव प्रकाशयात्मानम् । परिच्छिन्नामस्मच्छक्तिमतीत्य स्वात्मानं प्रकाशयसि चेत्, द्रष्टुं न शक्नुमः । अथ च मा भूरगोचरः, आगच्छ' इति तात्पर्यम् ॥

अत्र सायणीयव्याख्यानसारांश एवं भवति— इन्द्र! तव सोमपानानन्तरं अन्तिकतमानां शोभनप्रज्ञानां पुरुषाणां मध्ये वयं स्थित्वा त्वां जानीयाम । त्वमपि अस्मानतिक्रम्य अन्येषां त्वत्स्वरूपं मा प्रकथय, अस्मानेवागच्छ' इति । 'पुरुषाणां मध्ये वयं स्थित्वा' इति व्याहारो निर्मूलाधारः । 'अन्येषां त्वत्स्वरूपं मा प्रकथय, अस्मानेव आगच्छ' इत्यस्य न केवलं अयुक्तता, मन्त्रद्रष्टृषु मात्सर्यमप्यारोपितम् । एवंविधं व्याख्यानमेव मूलं सायणे नव्यानामविश्वासस्य ॥

चतुर्थीमृचमाह—

परे॑हि॒ विग्र॑मस्तृ॑त॒मिन्द्रं॑ पृच्छा विप॒श्चित॑म् । यस्ते॒ सखि॑भ्य॒ आ वर॑म् ॥४॥

परा इहि विप्रम् अस्तृतम् इन्द्रम् पृच्छ विपःऽचितम् यः ते सखिऽभ्यः आ वरम् ॥

ऋषिरन्तर्यागे प्रवर्तमानमन्यं सखायं ब्रूते । अथवा स्कन्दस्वामिनोक्तप्रकारेण आत्मन एवान्तरात्मनः प्रैषः। **परेहि** परागच्छ । **इन्द्रं** पृच्छ । कीदृशम्? **विप्रम् अस्तृतम् विपश्चितम्** इति त्रीणि विशेषणानि इन्द्रस्य, क्रमेण 'वेगिनं अहिंसितं सम्यग्दर्शनप्राज्ञं' इत्यर्थकानि । **य** इन्द्रः **ते** तव **सखिभ्यः** समानोद्योगेभ्यः सुहृद्भ्यः **वरम्** श्रेष्ठं [कल्याणं] **आ** आहार्षीदित्यर्थः ॥

परेहि- परा अतीत्य, अतिदूरं, इहि गच्छ । अतिदूरं गतोऽपि स इन्द्र एव प्रष्टव्यः प्राप्तव्यलब्धि तदुपायं वा । कुतो दूरगमनमवश्यम्? स 'विप्रः' वेगवान् पुष्टि-बाहुल्यात् स वेगगमनशीलः । अयमर्थः सङ्गच्छते 'मा नो अति ख्यः' इति पूर्वोक्तेन वाक्येन । विप्रपदं मेधाविनामसु पठितमिति 'विपश्चितम्' इति विशेषणान्तरे वर्तमानेऽपि अनर्थकां पुनरुक्तिमलक्षयन् विप्रं 'मेधाविनं' इति व्याचष्टे सायणः । केचन विप्रमिन्द्र-विशेषणं विपश्चितं स्तोतृविशेषणं चाहुः । विप्रशब्दः वेगशब्द इव विजतेश्चलनार्थाद् धातोर्निष्पन्नो वेगार्थद्योतक इति ग्राह्यम् ॥

अस्तृतम्- अहिंसितं, अपराजितं प्रतिकूलैरसुरैः वृत्रादिभिरित्यर्थः । विपश्चितम्- अन्तर्यागे काः प्रतिकूलाः शक्तयः काश्चानुकूला इति विशिष्य पश्यन्ती प्रज्ञा इन्द्रस्य वर्तते, तस्मात् स जानाति बलीयान् शात्रवशक्तीर्विजेतुम् । तथाकर्तुं प्रभुः अन्येभ्यः समानेभ्यो युक्तेभ्यः (सखिभ्यः) श्रेष्ठं (वरं) व्यधत्त, विदधाति च, तस्मात् स एव उपगन्तव्यः, उपगम्य प्रष्टव्यश्च ॥

पञ्चमीमृचमाह—

उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत । दधाना इन्द्र इद्दुवः ॥५॥
उत ब्रुवन्तु नः निदः निः अन्यतः चित् आरत दधानाः इन्द्रे इत् दुवः ॥

उत अपि च **नः** अस्माकं **निदः** निरोधकाः **ब्रुवन्तु** भणन्तु (एवं

वक्ष्यमाणप्रकारेण) । अन्यतः चित् अन्येषु क्षेत्रेष्वपि निरारत (इतो निर्गत्य) अरणं कुरुत प्रयासं कुरुत । कीदृशाः सन्तः? इन्द्र इत् इन्द्र एव दुवः (युष्मदीयां) परिचर्यां दधानाः धारयमाणाः ॥

निदः– निन्दका इति पूर्वे व्याख्यातारः । बन्धनं निरोधनं वा धात्वर्थः । निन्दायामपि क्वचिद्वर्तते, उपपन्नश्च । यथा वृत्रादयः प्रकाशावरकास्तद्विभूतयश्च देवद्विषो यज्ञविघातका भवन्ति, तथा अन्येऽपि अन्तर्यागप्रवृत्तस्य पुरुषस्य देवराजमिन्द्रं प्रेप्सोः निरोद्धारो भवन्ति । त एव 'निदः' इत्युच्यन्ते । णिदिधातुः बन्धनार्थे अन्यत्र अपि प्रयुक्तो भवति । 'निदितम्' 'निदानम्' 'निदातारम्' इत्येतानि बन्धनार्थानि मन्त्रेषु दृश्यन्ते । 'उदुस्रियाणामसृजन्निदानम्' (६. ३२. २.) । निदानं बन्धनं बोध्यम् । 'वलस्य भृत्यैः पणिभिरपहृतानां गवां निदानं बन्धनं उदसृजत् अमोचयत्' इति सायणः । 'चरन् वत्सो रुशन्निह निदातारं न विन्दते' (८. ३१. ५.) । निदातारं निरोधकम् इति सायण एव । 'शुनश्चिच्छेपं निदितं सहस्राद्यूपादमुञ्चः' । निदितं नितरां बद्धमित्येव व्याख्याता ॥

अस्य सूक्तस्य तात्पर्यपर्यालोचनायां 'निदो' निरोद्धारः, न लिह निन्दका इति विस्पष्टं भवेत् । अस्यामृचि अस्माकं प्रतिकूला निरोद्धार एव उत्तरोत्तरप्रयाणाय नः सम्मतिं ब्रुवन्त्वित्युक्तम् । अस्मदनुकूला अपि अस्मान् भाग्यशालिनः कर्मवीराः कार्यसाधका इति ब्रुवन्तु, 'उत नः सुभगान्' इति उत्तरत्र ऋचि प्राह, तस्मादुभयो ऋचोः तात्पर्ये सम्बन्धोऽवधेयः ॥

आरत– अरतिः अरणं अरिः अर्यः आर्यः इत्यादयः शब्दाः, प्रयास-परिश्रम-निरन्तरोद्योग-कर्षणाद्यर्थे वेदे प्रयुक्ता ज्ञेयाः । अत एव 'आर्यः' अनलसः, नित्योद्यमी, देवाराधनकर्मणि देवशत्रुभिः सह योद्धा, मानुषभुवं दिव्यसम्पत्फलिनीं विधातुं कृषिं न जहाति नित्यं कर्षकः– इत्याद्यर्थे प्रयुक्तो ग्राह्यः ॥

दुवः– सामान्यं कर्म, परिचर्या वा ॥

इति प्रथमस्य प्रथमे सप्तमो वर्गः

षष्ठीमृचमाह–

उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः । स्यामेदिन्द्रस्य शर्मणि ॥६॥
उत नः सुऽभगान् अरिः वोचेयुः दस्म कृष्टयः स्याम इत् इन्द्रस्य शर्मणि ॥

उत अपि च [न केवलमस्मत्प्रतिकूला 'निदः', अनुकूला अपि वक्ष्यमाणरीत्या ब्रुवन्त्वित्याह 'उत' इति निपातः] अरिः कृष्टयः (अस्मदर्थं) योद्धारः, कर्म कुर्वन्तः [अरिरिति वचनव्यत्ययः सं-अरणशीला आर्या देवार्थं योद्धारः, कृष्टयः कर्षणशीलाः फलावाप्तये] नः अस्मान् सुभगान् धन्यान् कृतार्थान् वोचेयुः उच्यासुः । (किञ्च) हे दस्म कर्मनिष्पादक, इन्द्रस्य शर्मणि सुखे स्याम भवेम इत् पादपूरणे, [अथवा इन्द्रस्यैव प्रसादाल्लभ्ये तदानन्दे ध्रियेमहि इति अवधारणार्थे वा 'इत्' इति वोचेयुरिति सम्बन्धः] ॥

पदार्थकथन एव तात्पर्यमाविष्कृतम् । ऋचोऽस्याः पूर्वस्याश्च सम्बन्धः प्रागुक्तः । दंस-दस्रादिवत् दस्मपदमपि कर्मनिष्पादनं प्रतिपादयतीति बोद्धव्यम् । 'अरिः कृष्टयः' स्युर्नाम आर्यमानुषवर्गीयाः अन्तर्यागप्रवर्तनसाधनानुकूलाः । वस्तुतस्तु, अतीन्द्रिय-भूम्या देवताशक्तिभेदाः दिव्यविभूतिविशेषाः मानुषं यज्ञेन साधनेन दिवमारुरुक्षुं आ-रोहन्तं च उपकुर्वन्तः, तस्य भ्रातर इव सखाय इव तद्युक्ताः [जामयः सखायः युजः] तं तारयन्ति तेन स्वयं च तृप्यन्ति सम्प्राप्ता ऐन्द्रं शर्म । यज्ञाध्वनि पुरुषं निरुद्धवतां परिच्छिन्नवतां वा वैरिणां [निदः] अतिक्रमणे सहायभूता 'अरिः कृष्टयः' अधुना तेन साधितकर्मणा (दस्म) पुरुषेण कृतार्थेन सह इन्द्रानन्दपरायणा भवेयुरिति युक्तमेवेदम् ॥

अनयोर्द्वयो ऋचोः परस्परसम्बन्धज्ञापकं वाक्यद्वयं च निरीक्षणीयम् । ऐन्द्रं कर्म कुरुत, सर्वकर्मभारमिन्द्रे निवेश्य बिभृत (दधाना इन्द्र इद्दुवः) इति पूर्वर्चि प्रोक्तम् । अत्र इन्द्रस्यैव शर्मणि ध्रियेम (स्यामेदिन्द्रस्य शर्मणि) इति तथाविधस्य कर्मणः फलं च द्योतितम् ॥

'आरत' इत्युक्त्वा तदेवानुरणितं अरणार्थकधातुनिष्पन्न-अरिपदप्रयोगेन । पूर्वो-त्तरसम्बन्धध्वननायेदृशी रीतिरवलम्बिता मन्त्रदर्शिभिरिति पुनः स्मारयामः ॥

सप्तमीमृचमाह—

एमाशुमाशवे भर यज्ञश्रियं नृमादनम् । पतयन्मन्दयत्सखम् ॥७॥

आ ईम् आशुम् आशवे भर यज्ञऽश्रियम् नृऽमादनम् पतयत् मन्दयत्ऽसखम् ॥

आशवे [वेगोपलक्षिताय तीव्रायेति वक्तव्यम्] इन्द्राय ईम् [एनम् इदमर्थोऽयं निपातः] आशुम् सोमम् आ भर आहर । कीदृशं सोमम्? यज्ञश्रियम् यज्ञवैभवभूतम् (यज्ञं श्रयति, यज्ञश्रीः तं इत्येके) । पुनः कीदृशम्? नृमादनम् नृणां मादनं मदकरम्, (मनुष्यो देवश्च नर उच्यते वेदे) पुनश्च मन्दयत्सखं पतयत् मन्दयत्सखं इन्द्रं पतयत् पतयन्तं गमयन्तं पुरतो वहन्तम् ॥

पतयत्— द्वितीयाविभक्तिलोपः छान्दसः, सर्वेऽपि व्याख्यातारः सोमविशेषणत्वेन गृह्णन्ति, कथञ्चित् रूपं निष्पादयन्ति । मन्दयत्सखम्– 'पतयत्' इति सकर्मकधातोः शतृप्रत्ययान्तस्य क्रियार्थकस्य कर्मपदं भवति । यजमानान् मन्दयति हर्षयति इन्द्रः, तस्मिन् सखिभूतः सोम इति सायणो मन्यते, अन्ये व्याख्यातारः अन्यथा व्याकुर्वते, नव्यास्तु किमपि विभावयन्ति, यः को वा भवत्वर्थः 'पतयन्मन्दयत्सखम्' इत्यत्र व्याकरणोपपादनं छान्दसत्वाश्रयणेनैव साध्यम् । तदिह मन्दयन् हर्षयन् सखा (इन्द्रः) तम् 'पतयत्' सोममिति वयम् । यः को वा भवतु इन्द्रस्य सखा, सोम इति सायणः । अत्रानुपपत्तिर्भवति, तन्निरीक्षा नावश्यकी । यजमान ऋषिरन्ततस्सोमयाजी इन्द्रसख एवेति वयम् । अयमर्थः सूक्तेऽस्मिन्नन्याभिर्ऋग्भिः सङ्गच्छते । व्याख्यानान्तरपरीक्षया नास्ति प्रयोजनमित्यलमेतावता ॥

अष्टमीमृचमाह–

अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः । प्रावो वाजेषु वाजिनम् ॥८॥

अस्य पीत्वा शतक्रतो इति शतऽक्रतो घनः वृत्राणाम् अभवः प्र आवः वाजेषु वाजिनम् ॥

हे शतक्रतो शतकर्मन् (शतं बहुनाम, क्रतुः कर्म, प्रज्ञा वा, औचित्यादत्र कर्मार्थो ग्राह्यः) अस्य सोमस्य सोमं (द्वितीयार्थे षष्ठी, सोमसम्बन्धिनं अंशं इति शेषषष्ठी वा युक्ता) पीत्वा, वृत्राणाम् आवरकाणां (वृत्रनामकासुर-तद्विभूतिभूतानां

शत्रूणाम्) घनः अभवः हन्ता भवसि [लङो लडर्थः छन्दसि, इह युक्तश्च]। वाजेषु समृद्धिषु वाजिनम् समृद्धिमन्तम् प्रावः प्रकर्षेण रक्षसि ॥

अत्र वृत्राद्यसुराणां तत्त्वं समासतः सूक्तान्ते निवेदयामः। वाजपदार्थः प्राग् विचारितः, सर्वत्र समृद्धिः पूर्णता वेति 'वाजिनीवसु', 'वाजेभिर्वाजिनीवती' इत्यादौ व्याख्याने प्रदर्शितम्। प्र-आवः– अत्र रक्षणार्थोऽव-धातुः, वृत्रं हत्वा वाजिनं इन्द्रो रक्षतीत्यौचित्यात्। 'प्रावः' 'अभवः' इति लङा भूतार्थो न विवक्षितः। यदा सोमं पिबति शतक्रतुः, तदा वृत्रं हन्तुं प्रभुः, वाजिनं रक्षितुं चेति विवक्षा। तस्मात् सार्व-कालिकं तत्त्वमुक्तम्। तत्र लडर्थो युक्तः ॥

नवमीमृचमाह—

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो। धनानामिन्द्र सातये ॥९॥

तम् त्वा वाजेषु वाजिनम् वाजयामः शतक्रतो इति शतऽक्रतो धनानाम् इन्द्र सातये ॥

वाजेषु समृद्धिषु वाजिनम् समृद्धम् (सन्तं) तं त्वा तथाविधं त्वां, हे इन्द्र शतक्रतो बहुकर्मन् वाजयामः पुनः समर्धयामः। किमर्थम्? धनानां सातये लब्धानां दिव्यधनानां अन्तस्सम्पदां उपभोगाय। सातिः न केवलं प्राप्तिः, प्राप्तस्य रक्षणमपि, तस्माद्भोगायेत्युक्तम् ॥

वाजशब्दार्थं बहुधा ब्रूते सायण इत्यवोचाम। एकत्रैव स्थले विविधमर्थमेकस्य पदस्योक्त्वा भ्रमयति चिन्तकान् इति तु नोक्तम्। अतीतायामृचि 'वाजेषु वाजिनम्' इत्यत्र 'सङ्ग्रामेषु सङ्ग्रामवन्तम्' इत्याह। अस्यामृचि 'वाजेषु वाजिनं वाजयामः' इत्यत्र अर्थः 'युद्धेषु बलवन्तम् (त्वां) अन्नवन्तं कुर्मः' इत्याह। 'वाजिनं सङ्ग्रामवन्तम्' 'वाजिनं बलवन्तम्' इत्येकत्रैव पदमेकं द्विधा व्याख्यातम्। अपरं च वाजं अन्नम्, वाजं बलम्, वाजं युद्धम्, इत्येकस्यैव पदस्य एकत्रैवर्चि त्रयोऽर्थाः दत्ताः। मृग्य एव व्यवस्थागन्धः ॥

दशमीमृचमाह—

यो रायो॒३॒ऽवनि॑र्म॒हान्त्सु॑पा॒रः सु॑न्व॒तः सखा॑ । तस्मा॒ इन्द्रा॑य गायत ॥१०॥

यः रा॒यः अ॒वनिः॑ म॒हान् सु॒ऽपा॒रः सु॒न्व॒तः सखा॑ तस्मै॑ इन्द्रा॑य गा॒य॒त ॥

यः [इन्द्रः] **रायः** धनस्य (दिव्यस्यान्तरस्य) **अवनिः** आश्रय आधार इत्यर्थः (पृथ्वीनाम, सर्वेषां भूतजातानां आश्रयो हि पृथिवी) । **महान्** बृहन् [अत एवाश्रयत्वं उपपद्यते] बलेनापि महान्, अत एव **सुपारः** सुष्ठु पारयति [सुरक्षितं प्रापयति देवभक्तं पुरुषं प्राप्तव्यं स्थानम्] । **सुन्वतः सखा** सोमयाजिनः सखा (च) भवति, **तस्मै इन्द्राय** तस्येन्द्रस्यार्थाय (तादर्थ्ये चतुर्थी) **गायत** स्तुतिं कुरुत (मन्त्रैरिति शेषः) । अस्यामृचि स्पष्टमुक्तं 'सुन्वतः सखा' इन्द्र इति । 'मन्दयत्सख' इन्द्र एवेत्युपपद्यतेऽस्मदुक्तिः ॥

व्याख्यातं 'सुरूपकृत्नुम्' इति सूक्तम् । अस्य कर्मसु विनियोगो याज्ञिकैराम्नातः । तेन विचारितेनास्माकमलं प्रयोजनम् । तस्मात् सूक्ततात्पर्यमन्तरर्थानुसार्येव सुतरामुपपद्यत इति सङ्क्षेपेण तन्निरीक्ष्यते । अन्तर्बहिर्वा सर्वथा सोमयागे विनियोगोऽस्येति तु बोध्यम् । इहान्तर्यागे चलति, कमपि दशाविशेषं प्राप्तस्य ऋषेर्मधुच्छन्दस ऐन्द्री स्तुतिः भवति । का सा दशा यत्र किमपीन्द्राल्लभ्यं ऋषेरवश्यं भवति? किं वा तत् प्राप्तव्यम्, यदर्थमभ्यर्थना क्रियते सोमयाजिना महर्षिणा? पश्यामस्तावत् ॥

सुतः संस्कृतः सोमो देवानामन्नं भवति । देवास्तं यथाभागं भुञ्जानास्तन्मदेन बलिनो मानुषे स्वयं वर्धन्ते, तेन तमपि वर्धयन्ति, सर्वोत्कृष्टानुभूतीनां तमधिकारिणं च विदधते । ये चास्वार्थपरा भूत्वा स्वीयमानन्दं सर्वानुभूतीनां सारं सोमपदलक्षितं रसं 'देवेभ्य इदं न मम' इति न प्रयच्छन्ति प्रत्युत विषयभोगरताः स्वार्थपरा नीचैर्जीविनश्च भवन्ति, न खलु ते देवानामाराधकाः किं तु पणिनामकानामसुराणामुपासकाः भवन्ति । पणयो हि स्वामिन इन्द्रियार्थचैतन्यस्य, यस्य सर्वशः परिच्छिन्नवृत्तेर्व्यापारेषु वणिज इव ते व्यवहरन्ति । न हि ते सुन्वते सोमं, नार्पयन्ति संस्कृतं सोमाभिषवं, नापि मन्त्रानुच्चारयन्ति । एतैरेव पणिभिरपहृत्य समुज्ज्वलचैतन्यरश्मयः (रोचमानाः सूर्यस्य गावः, गुहायां गूहिता भवन्ति । सा च गुहा, गूढमस्मासु वर्तमानं जागरितप्रज्ञायाः प्रागवस्थितं अप्रबुद्धचैतन्यं वासनानामधिकरणं बोध्यम् । न केवलमेवं लब्धितायां

गुहायां गाः प्रच्छादयन्ति पणयः, अद्रिशब्दलक्षिते घनीभूते अन्धतमसेऽश्ममये जडे वस्तुन्यपि । अपि च ते स्वीयमध्वानमनुगम्य चोरिता गाश्च गवेषयन्तीं उज्ज्वल-सहजावबोधरूपिणीं सरमाख्यां देवशुनीमपि वशयन्ति, भ्रंशयितुं प्रयतन्ते ॥

त इमे पणयोऽधुना सोमसवनिर्वर्तनादतिक्रान्ताः । ऋषेर्यज्ञाभ्युदये प्रवर्तमाने ते वृत्राश्च (वृत्रस्तद्विभूतयश्च) समतीताः, यैरस्माकं पूर्णाः शक्तयः क्रियावैभवानि च आवृत्य प्रतिबध्यन्ते । तथा वलश्च पृष्ठतः कृतः येन ज्योतिर्वलयितं असत्तोऽवरुध्यते । एवं प्रमुखेष्वसुरेषु यज्ञवैरिषु अतिक्रान्तेष्वपि, मार्गे पुनरन्येऽवतिष्ठन्ते ये परिच्छेदनियामकाः बन्धका (निदः) निन्दका वा भवन्ति । यद्यप्येते न पणिवृत्रवलादय इव ज्ञान-क्रियाशक्तिप्रसारप्रतिकूला भवन्ति, तथाऽपि अभिवृद्धाद्वृषेरुत्तरोत्तरपदक्रमणे तं निरुन्धन्ति । तस्य ज्ञानशक्तिक्रियालोपन्यूनातिरिक्ततादीन् दोषान् प्रकाश्य 'इतो न गन्तव्यम्, गन्तुमधिकारसम्पादनात् प्राङ्नानुजानीमोऽनन्तरगमनम्' इति प्रत्यव-तिष्ठन्ते ॥

तदस्मिन् सूक्ते सेयं दशा प्रस्तुता, यस्यामृषिर्दिव्यप्रकाशाभिवर्धनायेन्द्रमाह्वयति, येन निरोधक-तद्धेतुभूतन्यूनतादिदोषाणां निवारणं भवेत् । इन्द्रो हि प्रभुस्त्रैलोक्याधि-कारिकाणां देवानाम्, विश्वमनस्तत्त्वाभिमानी, दिव्यो मनोमयः सम्राट् । तत्प्रसादात् तद्वैभवस्य उज्ज्वलप्रज्ञात्मकस्य मनसो विलासनमस्मासु सम्पादयितव्यम् । येनेन्द्रियार्थे-षणादिभिर्विकृतिं प्रापितस्य अनृतप्रज्ञाविमोहितस्य मनसः सङ्कोचाद्विस्तृतिः बन्धनात् विमोचनम् प्रकाशलेशात् प्रकाशभूमा च निष्पद्येरन् ॥

ऐन्द्री शुभ्रोज्ज्वलप्रज्ञा हि सुरूपाः साध्वीर्धीवृत्तीः साधुरूपाणि कर्माणि वा साधयितुं प्रभवेत्, येनानुदिनवर्धनं स्यादिति 'सुरूपकृत्नुमूतये' महर्षिराह्वयति प्रथमस्यां ऋचि । दिव्यप्रकाशा प्रज्ञा अभिषुतेन सोमेन भुक्तेन पोषिता हर्षभरिता स्वीयान् रश्मीनभिवर्षतीत्युक्तं (गोदा इद्रेवतो मदः) द्वितीयस्याम् । तथा चित्तेजोविशेषलाभे दैव्याः प्रज्ञाया आत्यन्तिकीर्वृत्तीर्वेदितुं यद्यपि प्रभवामः, तथाऽपि प्रभातिशयोदयाद् दुर्निरीक्ष्योऽतिगोचरो वा मा भूद् भगवानिन्द्र इति तृतीयस्याम् । अथान्तरात्मानं अन्यं वा सखायमुपासकं प्राह— 'इन्द्र एव प्रष्टव्यः, स वेगेन बलवानपि प्रतिकूलाननुकूलांश्च पश्यति प्राज्ञचक्षुः, ददाति च श्रेष्ठं पदं, दत्तवांश्च नः सखिभ्यः' इति चतुर्थ्याम् । अस्माकं

अनन्तरप्रतिपत्ति निरोद्धार एव अनुजानन्तु, भणन्तु च– 'यूयमधिकारिणोऽधुना, अन्यतोऽपि गत्वा इन्द्रकर्माणः सन्तः परिश्रमं कुरुत' इति पञ्चम्याम् । अस्मदनुकूलाः कार्यसहकारिणो देवकार्यनिरताश्च 'ऋषे, साधु साधितं कर्म त्वया, अस्य फलं ऐन्द्रं महत् सुखम्, तत्रैव स्थामेति ब्रुवन्तु' इति षष्ठ्याम् । शिष्टाश्च ऋचो यावत्सूक्तसमाप्तिं इन्द्रमहिमानुवर्णनपरा इन्द्रप्रार्थनात्मिकाश्च प्रागृविवृतरीत्या मन्त्रार्थपरिज्ञानाद् विस्पष्टं बोध्याः ॥

इति प्रथमस्य प्रथमे अष्टमो वर्गः

द्वितीयानुवाके प्रथमं सूक्तं समाप्तम्

द्वितीयानुवाके आ त्विति दशर्चं द्वितीयं सूक्तम् । ऋषिच्छन्दोदेवताः पूर्ववत् ॥

आ त्वेता नि षीदतेन्द्रमभि प्र गायत । सखायः स्तोमवाहसः ॥१॥

आ तु आ इत नि सीदत इन्द्रम् अभि प्र गायत सखायः स्तोमऽवाहसः ॥

आ आ इत आगच्छत (उपसर्गाभ्यासात् तद्युक्तस्याख्यातस्याभ्यासः, अवश्यमागन्तव्यमित्यर्थकः) **तु** (पादपूरणः, क्षिप्रार्थको निपातो वा) **निषीदत** उपविशत **इन्द्रम् अभिप्रगायत** इन्द्रमभिमुखीभूय प्रकर्षेण गायत । हे **सखायः** सुहृदः (समानकर्मणि प्रवृत्ताः) कीदृशास्ते? **स्तोमवाहसः** स्तोमान् प्रापयितारः [इन्द्रं प्रति] ॥

अत्र ऋत्विज आमन्त्रिता इन्द्रस्तवनायेति कर्मपरं व्याख्यानमुपपद्यते । द्विधाऽपि तात्पर्यं प्रायशः सम्भवति मन्त्राणामित्युक्तमेवास्माभिः । परं तु अन्तरर्थस्य प्राधान्यं सर्वत्र, बाह्यार्थस्य विसंवादो नैकत्रेति च स्मरणीयम् । अत्र 'स्तोमवाहसः' इति सखीनां आमन्त्रितानां विशेषणं साकूतं बोध्यम् । अन्तर्योगे, 'सखाय इमे युजः जामयः' अतिमानुषभूचराः देवकार्यधुरंधराः अस्माकं स्तोमान् इन्द्रं प्रति प्रापयितुं प्रभवन्ति । न तु केवलं स्तोतार इमे, अपि तु स्तोत्रवाचोऽस्मन्निर्गता हार्दवाणीर्वा नयन्ति स्तुतिविषयीभूतमिन्द्रम् । 'अरिः कृष्टयः' प्रागुक्ता अप्येवंभूताः सुहृदो ज्ञेयाः ॥

द्वितीयामृचमाह—

पुरूतमं पुरूणामीशानं वार्याणाम् । इन्द्रं सोमे सचा सुते ॥२॥

पुरुऽतमम् पुरूणाम् ईशानम् वार्याणाम् इन्द्रम् सोमे सचा सुते ॥

ऋचोऽस्याः पूर्वयर्चा एकवाक्यत्वात् 'प्रगायत' इति अन्वयः ॥

सचा सह [सखिभिः यजमानेन सह ऋत्विग्भिर्वा सम्भूय] सोमे सुते अभिषुते इन्द्रम् अभिप्रगायतेति सम्बन्धः । कीदृशमिन्द्रम्? पुरुतमम् अतिशयेन बहुलः [बहुधा भवन् प्रभूत इत्यर्थः] तम् । पुनः कीदृशम्? पुरूणाम् वार्याणाम् ईशानम् बहूनां वरणीयानां (वराणाम्) स्वामिनम् ॥

पुरुतमम्– अत्र व्याख्यातारो विविधं व्याचक्षते । 'पुरून् बहून् [शत्रून्] तमयति ग्लपयति' इति सायणः । शत्रुनाशन इति विशेषणमिहेन्द्रस्यायुक्तम्, वरदानशौण्ड इति स्तुतिप्रसक्तेः । 'अतिशयेन प्रभूतम्' इति पदमिदं व्याख्यातमन्यत्र सायणेन, इहापि तद्युक्तम् । 'यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन्' (६-६-२) ॥

तृतीयामृचमाह—

स घा नो योग आ भुवत्स राये स पुरंध्याम् । गमद्वाजेभिरा स नः ॥३॥

सः घ नः योगे आ भुवत् सः राये सः पुरम्ऽध्याम् गमत् वाजेभिः आ सः नः ॥

घ पादपूरणः । अवधारणार्थो निपातोऽयमित्येके । तर्हि चतुर्धा प्रयुक्तेन तच्छब्देनास्य सम्बन्धः । सः इन्द्रः प्रागुक्तगुणविशिष्टः नः अस्माकं योगे अप्राप्तस्य लाभे विषये आ भुवत् अभिमुखं यथा तथा भवतु [सन्निहितो भूत्वा अलब्धं पुरुषार्थं लम्भयत्वित्यर्थः] सः राये धनाय दिव्यसम्पदर्थं स 'आ भुवत्' इति सम्बन्धः । सः पुरन्ध्याम् बह्व्यां प्रज्ञायां [बहुविधायां बुद्धौ, आ भुवत्] सः वाजेभिः समृद्धिभिः (सर्वविधाभिः) नः अस्मान् आ गमत् आगच्छतु । वाजेभिरित्यत्र सहयोगलक्षणा तृतीया ॥

बहुविधपूर्णताविशिष्टः इन्द्रः सान्निध्येन अलब्धलाभ-लब्धसम्पद्रक्षण-बहुलप्रज्ञाः साधयत्विति प्रार्थना ॥

चतुर्थीमृचमाह—

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः । तस्मा इन्द्राय गायत ॥४॥

यस्य सम्ऽस्थे न वृण्वते हरी इति समत्ऽसु शत्रवः तस्मै इन्द्राय गायत ॥

यस्य इन्द्रस्य संस्थे संस्थाने हरी अश्वौ द्वौ (द्वितीया) समत्सु सङ्ग्रामेषु शत्रवः शातयितारो वैरिणः न वृण्वते न वारयन्ति तस्मै इन्द्राय तस्येन्द्रस्य सन्तर्पणार्थम् गायत स्तुतीः कुरुत ॥

संस्थे– धात्वर्थानुसारेण 'संस्थाने' इत्युक्तम् । इन्द्रस्य आवासस्थाने, समागमस्थाने वा शत्रवः हरिनामकौ इन्द्राश्वौ वारयितुं न प्रभवन्ति, तयोरप्रतिहतवीर्यत्वात् । 'हरी इन्द्रस्य' इति निघण्टुपठितं इन्द्राश्वयोर्नाम प्रसिद्धम् । हरिः हरितवर्ण इत्याचक्षते प्रायशो व्याख्यातारः । हर्य गति-कान्त्योरिति धातोः हरिपदनिष्पत्तौ कान्त्यर्थसिद्धिः सुगमा भवति । हर्यश्वः, हरिकेशः, हरिवर्पसम्, हरिधायसम् इत्यादिप्रयोगे कमनीयत्वं भास्वरत्वं वा द्योतितं भवति । इन्द्रस्य प्रकाशमयस्य वाहौ 'हरी' हरितवर्णावपि कान्तिमन्तौ । इन्द्रसंस्थाने तयोः प्रभां देवशत्रवः न 'वृण्वते', नाच्छादयन्ति न आवृण्वन्ति, तयोः प्रसारं न प्रतिरुन्धन्ति । 'संस्थे रथे संयुक्तौ हरी' इति सायणव्याख्या । अन्यत्र विविधमेवं सायणीयं संस्थपदव्याख्यानं भवति– 'संस्थाने, आसादने' (५-१-८) 'स्थाने युद्धे' (८-२१-११) 'संस्थानभूते यज्ञे' (८-२७-१५) 'सङ्ग्रामे' (८-३२-११) । अत्रेदं द्रष्टव्यम् । सर्वत्र संस्थानं स्थानं वा संस्थपदार्थमुक्त्वा ततः स्वसम्भावितप्रकरणवशात् सङ्ग्रामो यज्ञो वा विवरणार्थः कथितः । गूढार्थे अन्तर्दर्शनशक्तिविशेष-सङ्केतभूतौ हरी इन्द्रस्य ॥

पञ्चमीमृचमाह—

सुतपाव्ने सुता इमे शुचयो यन्ति वीतये । सोमासो दध्याशिरः ॥५॥

सुतऽपाव्ने सुताः इमे शुचयः यन्ति वीतये सोमासः दधिऽआशिरः ॥

इमे सुताः सम्पादिताः सोमासः सोमाः सुतपाव्ने सुतस्य अभिषुतस्य सोमस्य पात्रे पात्रे इन्द्राय यन्ति गच्छन्ति । किमर्थम्? वीतये तदीयव्याप्तये (यजमाने इन्द्रस्य जन्मने, व्याप्तये, आगतये वा इत्यर्थः वेतेर्धातोर्गति-व्याप्त्याद्यर्थत्वात् । अन्तर्यागे देवानां वीतिर्नाम यजमानमुद्दिश्य आगतिः, तत्र व्याप्तिः, जन्म वा भवति)

कीदृशाः सोमाः? **शुचयः** दीप्ताः [संस्कृताः शोधिता अत एव दीप्ताः, शुच दीप्तौ इति धात्वर्थानुगमो बोध्यः] । पुनः कीदृशाः? **दध्याशिरः** दधिमिश्राः [आङ्-पूर्वकात् हिंसार्थात् शृणातेर्निष्पन्नं, आशृणाति आशीः इति रेफान्तं पदम् । दोष-विघातकं इत्यर्थः । दधि आशीः येषां ते दध्याशिरः इति सायणीय-व्याख्यानुसारतः शब्दार्थः] ॥

त्र्याशिरः सोमाः प्रसिद्धाः श्रौतकर्मसु, गवाशिरः दध्याशिरः यवाशिर इति क्रमशः पयो-दधि-यवमिश्राः सोमा उच्यन्ते । अधिश्रयणसाधनभूतानि त्रीणि द्रव्याणि । श्रयणं च मिश्रणम् । अत्र सङ्केतार्थो लक्षणीयः । पयसा तत्प्रकृतिभूता गावो रश्मयः प्रज्ञाप्रकाशा लक्ष्यन्ते । तत्परिणामेन दध्ना धारणात्मिका सूक्ष्मा बुद्धिः, यवैः घनी-भूत-बाह्यप्रज्ञा स्थूला बुद्धिश्च । एवं गवादिद्रव्यत्रय-सङ्केतितेषु प्रज्ञाप्रकाश-सूक्ष्मबुद्धि-स्थूलप्रज्ञासत्त्वेषु सोमैः सह मिश्रणाय सिद्धेषु सत्स्वेव गवादिभिरधिश्रिताः सम्मदरस-वाहिनः सोमाः पूताः तत्तद्देवताभ्योऽर्प्यन्ते, ताभिश्चादीयन्ते, भुज्यन्ते । तथा रस-ग्रहणेन देवानां मानुषे यजमाने वृद्धिरित्यादि स्पष्टं पूर्वोक्तं सर्वं सार्यम् ॥

इति प्रथमस्य प्रथमे नवमो वर्गः

अथ षष्ठीमृचमाह—

त्वं सुतस्य॑ पी॒तये॑ स॒द्यो वृ॒द्धो अ॑जायथाः । इन्द्र॒ ज्यैष्ठ्या॑य सुक्रतो ॥६॥

त्वम् सु॒तस्य॑ पी॒तये॑ स॒द्यः वृ॒द्धः अ॒जा॒य॒थाः॒ इन्द्र॑ ज्यैष्ठ्या॑य सु॒क्र॒तो॒ इति॑ सुऽक्रतो ॥

हे **इन्द्र त्वम् सुतस्य** अभिषुतस्य सोमस्य **पीतये** पानाय **सद्यः** तस्मिन्नेव समये **वृद्धः** शरीरेण वीर्येण च वृद्धिं प्राप्तः **अजायथाः** जायसे, भवसि । किमर्थम्? **ज्यैष्ठ्याय** ज्येष्ठानां प्रवृद्धानां श्रेष्ठानां वा कर्मणे, हे **सुक्रतो** शोभनकर्मन्! ॥

इन्द्रः सोमं पीत्वा तत्प्रभावेण सद्यो वृद्धो भवति । अत एव प्रवृद्धवीर्यस्य तस्य श्रेष्ठकर्म युक्तम् । उपपन्नं च सुक्रतो इति सम्बोधनम् । 'पीतये' इत्यत्र तृतीयार्थे चतुर्थी इति स्कन्दस्वामिनो व्याख्या समीचीनं तात्पर्यमुपपादयति । न चेदेवम्, 'सद्यः' इत्यस्य स्वरसता विहता शोषिता स्यात् । कर्मपरव्याख्याने तु 'तस्मिन्नेवाहनि'

इत्याहुः । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति सूत्रानुसारेण ज्यैश्र्यं कर्म अत्र उपपन्नं ग्राह्यम्, 'वृद्धो अजायथाः' इत्युक्तेः पुनर्ज्येष्ठभावो न विवक्षितः ॥

सप्तमीमृचमाह–

आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः । शं ते सन्तु प्रचेतसे ॥७॥

आ त्वा विशन्तु आशवः सोमासः इन्द्र गिर्वणः शम् ते सन्तु प्रऽचेतसे ॥

हे **इन्द्र गिर्वणः** गीर्भिः स्तुतिभिः वननीय सम्भजनीय, **त्वा** त्वां **आशवः** व्यापनशीलाः **सोमासः** सोमाः **आविशन्तु** प्रविशन्तु । **ते** तव **प्रचेतसे** प्रकृष्ट-ज्ञानाय (ते सोमाः) **शम्** शान्तिसुखरूपाः **सन्तु** भवन्तु ॥

पूर्वस्यामृचि पीताः सोमाः इन्द्रस्य श्रेष्ठकर्मणे प्रभवन्ति, अत्र तु इन्द्रं समन्तात् प्रविष्टास्ते तस्य श्रेष्ठज्ञानायेत्युक्तम् ॥

अष्टमीमृचमाह–

त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो । त्वां वर्धन्तु नो गिरः ॥८॥

त्वाम् स्तोमाः अवीवृधन् त्वाम् उक्था शतक्रतो इति शतऽक्रतो त्वाम् वर्धन्तु नः गिरः ॥

शतक्रतो शतकर्मन् इन्द्र [शतं बह्वर्थकम्] **त्वाम् स्तोमाः** सामरूपाणि स्तोत्राणि इत्यर्थः । **अवीवृधन्** वर्धितवन्तः । तथा **त्वाम् उक्था** उक्थानि शस्त्राणि ऋग्भिः शंसनानीत्यर्थः । अवीवृधन् । **त्वाम् नः** अस्माकं **गिरः** स्तोत्रवाचः **वर्धन्तु** वर्धयन्तु [णि-लोपः छान्दसः, तथा परस्मैपदं च] ॥

स्तोत्रेण मन्त्रात्मकेन देवानां यजमाने (उपासके) अभिवृद्धिरिति शतश उद्घोष-यन्ति वेदाः । कर्मपरव्याख्याने मेघमण्डलादुपर्येव मध्यमस्थानस्येन्द्रस्य वृद्धिर्वक्तव्या । फलं तु अपां वृष्टिः ! ॥

नवमीमृचमाह–

अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम् । यस्मिन्विश्वानि पौंस्या ॥९॥

अक्षितऽऊतिः सनेत् इमम् वाजम् इन्द्रः सहस्रिणम् यस्मिन् विश्वानि पौंस्या ॥

अक्षितोतिः अक्षिता अक्षीणा ऊतिः वृद्धिः यस्य स **इन्द्रः इमम्** अस्माभिः अर्प्यमाणं **सहस्रिणम्** सहस्रयुक्तं **वाजम्** (सोमात्मकं) समृद्धिविशेषं **सनेत्** सम्भजेत् । **यस्मिन्** वाजे **विश्वानि** समस्तानि **पौंस्या** पुंस्त्वानि पुंसः कर्माणि कर्मोपलक्षितानि बलानि वर्तन्त इत्यर्थः ॥

अक्षितोतिः– अहिंसितरक्षण इति सा० व्याख्या । क्षि क्षये इत्यकर्मको धातुः, तस्मान्नपुंसके भावे क्तः । एवं क्षितं इति रूपम् । न विद्यते क्षितं क्षयः अत्रेति अक्षिता ऊतिः वृद्धिः यस्येति विग्रहः । इन्द्रस्य वृद्धिः प्रस्तुता स्मार्या । तस्मादूतिः वृद्धिरेवात्र न तु रक्षा । तस्येन्द्रस्य वृद्धेर्न क्षयो भवति । सहस्रिणम्– वाजविशेषणम् । बहुविधबलगुणसम्पन्नः समृद्धिवाचको वाजः इह सोमात्मको भवति । सोऽर्प्यमाण इन्द्रस्वीकारक्षमो भवति । तेन शतक्रतोरिन्द्रस्य विश्वेषां कर्मणां निर्वाहः स्यात् । 'यस्मिन्' इन्द्रे 'विश्वानि पौंस्या' इति एके प्राहुः । उभयथाऽपि सम्भवं पश्यामः । यस्मिन् 'वाजे' समृद्धौ सोमरसात्मिकायां विश्वानि 'पौंस्या' बलानि प्रादुर्भवन्ति । यस्मिन् इन्द्रे विश्वानि कर्माणि आयत्तानि इति च समञ्जसम् ॥

दशमीमृचमाह—

मा नो मर्ता अभि द्रुहन् तनूनामिन्द्र गिर्वणः । ईशानो यवया वधम् ॥१०॥

मा नः मर्ताः अभि द्रुहन् तनूनाम् इन्द्र गिर्वणः ईशानः यवय वधम् ॥

गिर्वणः स्तुतिभिर्वननीय देव हे **इन्द्र मर्ताः** मनुष्याः **नः** अस्माकं **तनूनाम्** शरीराणां **मा अभि द्रुहन्** द्रोहं मा कार्षुः । **ईशानः** ईश्वरः त्वं **वधम्** नाशं **यवय** पृथक्कुरु ॥

मरणधर्मभ्यो विरोधिभ्यः विपत्तिर्माभूदस्मदीयानां देहानाम् । शरीरगतं 'वधं' अपि पृथक्कर्तुं समर्थ ईश्वरस्त्वम् । अयमृगर्थः । अत्रेदं रहस्यमवधेयम् । तच्च तृतीय-पादे निक्षिप्तम् । यौतिः पृथग्भावे तस्माण्णिचि 'यवय' (पृथक्कुरु) इति रूपम् । शरीरस्य नश्वरता इह वधापरपर्याय-हिंसया लक्षिता ॥

शरीराद्वधं पृथक्कर्तुमिन्द्र एव प्रभुरित्युक्तम् । सदसतोः अमरण-मरणधर्मयोः मिश्रितयोराश्रयभूताद्देहात् मृत्युलक्षणभूतं सर्वं वधं, वधस्य आपादयितारं वा, मानुषममानुषं वा पृथक्कृत्य अपसारयितुमीश्वर इन्द्रोऽत्र प्रार्थितः ॥

इति प्रथमस्य प्रथमे दशमो वर्गः

इति प्रथमाध्याये द्वितीयानुवाके द्वितीयं सूक्तम्

द्वितीयानुवाकस्य तृतीयं 'युञ्जन्ति' इति दशर्चं सूक्तम् । ऋषिच्छन्दोदैवतानि पूर्ववदवगन्तव्यानि । अस्मिन् सूक्ते 'आ दह' इत्येतां चतुर्थीमारभ्य षडृचो मारुत्यः । तासु मध्ये 'वीळुचित्' 'इन्द्रेण' इत्येते द्वे ऋचौ मारुत्यौ सत्यौ ऐन्द्र्यावपि भवतः । इदं सर्वमनुक्रमणिकोक्तमुदाहृतं सायणभाष्ये । परमार्थपरेऽस्मिन् व्याख्याने कर्मसु विनियोगः सविस्तरं नोदाह्रियते । आवश्यकस्थलेषु ईषन्मात्रं सूच्यते ॥

तत्र प्रथमामृचमाह—

युञ्जन्ति॑ ब्र॒ध्नम॑रु॒षं चर॑न्तं॒ परि॑ त॒स्थुषः॑ । रोच॑न्ते रोच॒ना दि॒वि ॥१॥

युञ्जन्ति॑ ब्र॒ध्नम् अ॒रु॒षं चर॑न्तम् परि॑ त॒स्थुषः॑ रोच॑न्ते रो॒च॒ना दि॒वि ॥

ब्रध्नम् महान्तं अरुषम् आरोचमानम् चरन्तम् गच्छन्तं (न तु तिष्ठन्तम्) परि तस्थुषः परितः तन्निवासः स्थिताः युञ्जन्ति सम्बन्धयन्ति । दिवि द्युलोके रोचना रोचनानि ज्योतींषि रोचन्ते दीप्तानि भवन्तीत्यर्थः ॥

प्रथमं केवलपदार्थो दत्तः । तात्पर्यानुसारेण पदार्थो दास्यते । ततः प्राक्, ईषन्मात्रं पूर्वेषां व्याख्या पर्यालोचनीया, येन वक्ष्यमाणस्य तात्पर्यस्योपपत्तिः सुगमा स्यात् । ब्रध्नः– इदं पदं महन्नामसु पठितम् । ब्रध्नं महान्तमिति पदार्थमनुक्त्वा आदित्यं इति सायणव्याख्या । सर्वत्र सामान्यतः पदार्थं उक्त्वैव सन्दर्भमनुसृत्य तात्पर्यमाविष्करोति, अर्थान्तरं वा ब्रवीति सायणः । यथा वा– 'ब्रध्नस्य महतोऽग्नेः' (३-७-५)

'ब्रध्नं महान्तं बभ्रुं अश्वम्' (७-४४-३) 'अधि ब्रध्नस्य विस्तृतस्य (अश्मनः) उपरि' (८-४-१३) 'उद्यद् ब्रध्नस्य विष्टपं महत् (आदित्यस्य) स्थानम्' (८-५८-७) 'ब्रध्नो यामः, महान् रथः' (१०-२०-९) । अन्तिमोदाहरणे याम इति विशेष्यं मन्त्र एव पठितम् । अत्र युञ्जन्तीति अस्यामृचि अन्यत्र क्वचिच्च आदित्यपर्यायतया ब्रध्नपदं गृहीतं सायणीय-व्याख्यायाम् । 'ब्रध्नमादित्यं अरुषमग्निं चरन्तं वायुम्' इति ब्राह्मणवाक्यबलेन तथा कृतम् । अनुक्रमणिकायामयं ऐन्द्रो मन्त्र इत्युक्तम् । तर्हि कथमनेन ब्राह्मणवाक्यं सङ्गच्छेत ? इन्द्र एव आदित्याग्निवायुरूपेणावस्थित इत्युपपादितम् ॥

ब्रध्नम्– विकल्पबहुला व्युत्पत्तिः 'बन्धेर्ब्रधिबुधी च' इत्युणादिसूत्रेण नक्प्रत्ययः बन्धेर्ब्रधिरादेशश्चेत्येके ॥

अरुषम्– हिंसार्थाद् रुषधातोर्निष्पन्नं अहिंसकम् अग्निमित्याचष्टे सायणः । बहुषु स्थलेषु आरोचमानमित्येव भवत्यस्य व्याख्या । आङ्पूर्वकाद् दीप्त्यर्थकाद् रुशतेर्निष्पा-दयति स्कन्दस्वामी, आङो ह्रस्वत्वं शकारस्य षश्च भवतः । अरुषपदस्य आरोचमानत्वं प्रायः सर्वत्र सर्वेऽपि व्याख्यातारोऽभ्युपगच्छन्ति ॥

तस्थुषः– विभक्तिव्यत्ययेन तस्थिवांस इति प्रथमाबहुवचनान्तं पदं सायण-व्याख्यानुसारतः । युक्तमेतत् ॥

अथ अर्थविचारः समासतः क्रियते । युञ्जन्ति युगयुगन्धरयोजनेन रथं युक्तं सुसम्बद्धं कुर्वन्ति । स च रथो विशालो रोचमानश्च भवति । सामर्थ्यात् 'चरन्तं' रथम् । परितोऽवस्थिताः नित्यसूरयस्तत्र स्थिराः चरन्तं रथं सन्नद्धं कुर्वन्ति । तथा रथसन्नाहे क्रियमाणे सति द्युलोके ज्योतिर्मयानि ऊर्ध्वस्थानानि भुवनानि वा रोचमानानि लक्ष्यन्ते । अन्तरर्थानुसारेण तात्पर्यं पुरस्ताद् वक्ष्यते ॥

द्वितीयामृचमाह–

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥२॥

युञ्जन्ति अस्य काम्या हरी इति विऽपक्षसा रथे शोणा धृष्णू इति नृऽवाहसा ॥

अस्य हरी अस्येन्द्रस्य अश्वौ (कर्म) रथे ब्रध्नादिगुणविशिष्टे पूर्वोक्ते रथे

युञ्जन्ति योजयन्ति रथयुक्तौ विदधते । के? पूर्वोक्ताः परितः स्थिताः (नित्यसूरयो द्युस्थानाः) । कीदृशौ हरी? **काम्या** कमनीयौ कामयितव्यौ वा । अन्यानि हर्योर्विशेषणानि चत्वारि भवन्ति । **विपक्षसा** विपक्षौ वामवामेतरभेदेन विभिन्नौ रथपक्षौ ययोस्तौ, रथस्य पार्श्वद्वये युक्ताविन्यर्थः । **शोणा** रक्तवर्णौ, **धृष्णू** धृष्टौ, **नृवाहसा** नरं नेतृत्वबलाढ्यं देवं वहन्तौ, [नृपदं देवं मानुषं वा पुरुषं अभिधत्ते इदं बलोपलक्षणम्] ॥

प्रथमस्यामृचि विशालस्य रोचिष्मत इन्द्ररथस्य सन्नाहः प्रोक्तः । अस्यां तु कमनीययोर्धृष्टयोर्बलवाहयोरिन्द्राश्वयो रथयोग उक्तः । उभयत्रापि कार्यनिर्वाहः पर्यवस्थितैः स्थिरैर्दिविषद्भिः सूरिभिर्भवति । एवं पूर्वाङ्गे साधिते, इन्द्र एवाविर्भवतीति तृतीयस्यां उच्यते । स किं कुर्वन् प्रादुर्भवति? ॥

तृतीयामृचमाह–

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥३॥

केतुम् कृण्वन् अकेतवे पेशः मर्याः अपेशसे सम् उषत्ऽभिः अजायथाः ॥

हे **मर्याः** हे मर्य बलाढ्य, त्वं **अकेतवे** अविद्यमानप्रज्ञानाय तादर्थ्ये चतुर्थी **केतुम्** प्रज्ञानं **कृण्वन्** कुर्वन् **अपेशसे** अविद्यमानरूपाय **पेशः** रूपं (कृण्वन्) **सम्** सम्भूय **उषद्भिः** प्रज्ञानप्रभातरश्मिभिः **अजायथाः** जातोऽसि प्रज्ञामयानां दैवतांशुभूतानां सङ्गतानां सहायानां उदयेन त्वं प्रादुरभूरित्यर्थः ॥

मर्यः– बलार्थकाः शब्दाः प्रायशो हिंसार्थकधातुभ्यो निष्पन्ना भवन्ति । दक्षपदं बलार्थे दंशतेः दंसतेः दंसयतेर्वेत्याहुः । शत्रूणां मारयितृत्वात् मर्यः बलवान् । 'स हि क्रतुः स मर्यः' (१-७७-३) इत्यत्र सायणव्याख्याऽपि इममर्थं समर्थयति । अन्यत्र च शतशो मर्यपदं बलद्योतकं प्रयुक्तं लक्षणीयम् । अत्र 'मर्य' इति इन्द्रसम्बोधनम् । रथे सन्नद्धे तत्र अश्वयोर्योगे च साधिते प्रज्ञामयदैवतांशुभिः सम्भूयोदिते, इन्द्रः प्रादुर्भूतः । स प्रसन्नो ऋषेर्दृष्टिगोचरोऽभवदित्यर्थः । तां च दृष्टिं स एव ऋषये ददाति । अत एव 'केतुं कृण्वन्' इत्याह । केतुः अन्तर्बोधाज्जायमानं प्रज्ञाचक्षुः । एवं इन्द्रप्रसादलब्धं प्राज्ञं अन्तश्चक्षुर्नालं स्थैर्येण दिव्यदर्शनेऽवस्थातुम् । तादृशस्य दिव्यदर्शनकर्मणः किमप्यधिकरणं अपेक्षितं भवति । तच्च नेदं पार्थिवं शरीरं भवितुमर्हति । यथा बाह्य-

चक्षुष आधारो बाह्यो देहः, तथा आन्तरस्य प्रज्ञाचक्षुषोऽपि तद्युक्तं शरीरं नियताय आश्रयणाय अवश्यं भवति । तच्च सामान्यतो मानुषे जने पार्थिवदेहे जडीभूतप्रज्ञे मिश्रितं मग्नं निलीनं अत एव अनभिव्यक्तं भवति । तदेव रूपपदलक्षितं सूक्ष्मं दिव्य-दृष्टियोग्यं शरीरं अभिव्यक्तं कुर्वन् प्रकाशोऽभवदिन्द्र इत्यर्थः ॥

अथेदमवधातव्यम् । रथो गतिविशेषः दिव्यः विस्तृतो रोचमानश्च भवति । तमधितिष्ठतीन्द्रः । तद्युक्तौ हरी अपि दीप्तौ अश्वौ विशेषतो बलवाहिनौ । ऋक्-संहितायां इन्द्राश्वगुणवर्णनपरैर्वचनैः हर्योः स्वरूपं सामान्यतोऽवगन्तुं शक्यम् । इमौ अन्तर्दर्शनशक्तिविशेषौ दिव्यौ प्रज्ञाविभवौ इति बोध्यम् । 'स्तवा हरी सूर्यस्य केतू' (२-११-६) 'केता' 'घुथा' इत्यपि इन्द्राश्वौ वर्ण्येते । इमौ प्रथमं ऋषेर्हार्द-वागात्मना मन्त्रेण युक्तौ भूत्वा ततः परं इन्द्राधिष्ठानभूते रथे युक्तौ भवतः । अत एव बहुषु मन्त्र-वर्णेषु ब्रह्मयुजौ हरी इन्द्रस्य गीतौ । 'आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी' (१-८४-३) 'ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया' (३-३५-४) 'एहि हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् । गीर्भिः श्रुतं गिर्वणसम् (८-२-२७) ॥' एवमन्येऽपि भवन्ति मन्त्रवर्णाः, यैर्न केवलं इन्द्राश्वस्वरूपं गूढमगूढं च प्रतिपाद्यते, किंतु इन्द्राश्वप्रसादद्वारा दिव्यदृष्ट्यादिसम्पत्तये महर्षीणां ब्रह्मपदवाच्यमन्त्रात्मा हार्दवागेव साधनमभूदिति अव-गम्यते ॥

अथेन्द्रप्रादुर्भावात्परं तत्कार्यस्य मरुतां साहाय्यमपेक्षितं भवति । मरुतश्च चण्ड-वेगानां दीप्तानां धीवृत्तीनां दिव्यगतिविधायिनो देवविशेषाः । दिव्यमनस्साम्राज्यं इन्द्रस्येति प्रागस्माभिः प्रतिपादितं स्मार्यम् । तत्र परिपक्वस्य ऋषेर्धीप्रवेशात् तद्वृत्तीनां तत्र पुनर्जन्म भवति । इदं च मानुषे व्यष्टौ मरुतां द्वितीयं जन्म । प्रथमं तु सर्वेषां देवानामिव सृष्टौ समष्टौ स्वाधिकाराय भवति । इदं च मरुतां पुनर्जन्म इन्द्रजन्मनः परं भवति । अत एव इन्द्रज्येष्ठा मरुद्गणा इति प्रसिद्धिर्वेदे । इममेवार्थमाह ऋक् चतुर्थी । एवं पूर्वेषां मतमनुसृत्य मरुतां जन्मेत्युक्तम् । वस्तुतस्तु देवकामानां ऋषीणामेव दिव्यत्वप्राप्तये पुनर्जन्म तत् ॥

चतुर्थीमृचमाह–

आदह॑ स्व॒धामनु॒ पुन॑र्गर्भ॒त्वमे॑रि॒रे । दधा॑ना॒ नाम॑ य॒ज्ञिय॑म् ॥४॥

आत् अह स्वधाम् अनु पुनः गर्भऽत्वम् आऽईरिरे दधानाः नाम यज्ञियम् ॥

आदह अनन्तरमेव (आत् इत्यानन्तर्ये अह इत्यवधारणे च निपातौ)। स्वधाम् अनु स्वधापदवाच्य-स्वीयधारणधर्मानुसारेण पुनः गर्भत्वम् पुनर्जनिष्यमाणशिशु-भावम् एरिरे प्रापुः । के? सामर्थ्यात् देवकामा ऋषयः । कीदृशाः? यज्ञियम् यज्ञार्हं नाम अभिधानं (देवताभ्यक्तिबोधकं संज्ञात्मकं) दधानाः धारयमाणाः ॥

स्वधाम्– स्वं दधाति धारयते, स्वभावधारणसमर्था शक्तिः, ताम् । स्वभावं सर्वस्यापि विविधस्य सतः यो धारयते पोषयति वा स धर्मः स्वधापदवाच्यो भवति वेदे । एरिरे– आङ्पूर्वकस्य ईर गतौ इति धातोः लिटि रूपम् ॥

इन्द्रप्रादुर्भावानन्तरमेव मरुतां जन्म । तच्च कथं पुनर्जन्मेति प्रागुक्तम् । इह तेषां स्वधारणसामर्थ्यरूप-धर्मानुसारि जन्मेत्युक्तम् 'स्वधामनु'। तत्र तथाविधपुनर्जन्म-लाभविषये स्वार्थतावर्जं देवार्थं क्रियमाणस्य अर्पणरूपस्य यज्ञाख्यस्य कर्मणः यद्युक्तं देवताप्रतिबोधकं रहस्यं पावनं नाम भवति, तस्य धारणं साधनं भवति 'दधाना नाम यज्ञियम्' ॥

पञ्चमीमृचमाह–

वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः । अविन्द उस्रिया अनु ॥५॥

वीळु चित् आरुजत्नुभिः गुहा चित् इन्द्र वह्निऽभिः अविन्दः उस्रियाः अनु ॥

हे इन्द्र! वीळुचित् दृढमपि (पर्वतादिस्थानम्) आरुजत्नुभिः भञ्जद्भिः गुहाचित् गुहायामपि (गुप्तिस्थानेऽपि) वह्निभिः वोढृभिः (त्वां वोढुं समर्थैः लब्ध-दिव्यजन्मभिः सहायभूतैः) उस्रियाः गाः अनु अनुगम्य अविन्दः अलब्धाः ॥

वीळु– वीळयतेः संस्तम्भनार्थाभिष्पन्नं बलनामसु पठितम् । आरुजत्नुभिः– रुज भङ्गे इत्यस्मात् आङ्पूर्वकाद् धातोः औणादिक-क्नु-प्रत्यये परे तृतीयाबहुवचनान्तं

पदम् । गुहा सप्तम्याडादेशः । उस्रियाः उस्राः कान्त्यर्थाद् वष्टेर्निष्पन्नाः (वस्य सः), वसतेरिति सायणीयम् । प्रज्ञानरश्मयो गाव उस्रियाः प्रोक्ताः ॥

ज्योतिर्दृशां पूर्वोक्तमन्त्रार्थानुसारेण अतिमानुषभुवि पुनर्जन्मलाभे पणिभिरपहृतानां पर्वतगुहायां स्थापितानां गवां अधिगमाय इन्द्रसाहाय्ये प्रवृत्तिरुक्ता । तेषां पर्वतशब्द-लक्षितस्य घनीभूतप्रज्ञस्य जडस्य भञ्जने सामर्थ्यं, तत्र अन्धकारबन्धुरं गुहापदवाच्यं रहस्यस्थानं प्रविश्य, तत्रेन्द्र-तद्विभूतीर्वोढुं शक्तिश्च प्रोक्ते । ईदृशः प्रभावः कथं समभवत् तेषामिति चेत्, इन्द्राधिकारे गर्भसम्भवाद् देवकामास्ते कर्तव्यमधिकृत्य इन्द्रप्रसाद-लभ्यं दिव्यावेशश्रवणं प्रतिपालयन्त उपतस्थिरे, अतोऽयमेषां विभव इति उत्तरत्र वक्ष्यते ॥

इति प्रथमस्य प्रथमे एकादशो वर्गः

दे॒व॒यन्तो॒ यथा॑ म॒तिमच्छा॑ वि॒दद्व॑सुं॒ गिरः॑ । म॒हाम॑नूषत श्रु॒तम् ॥६॥

दे॒व॒ऽयन्तः॑ यथा॑ म॒तिम् अच्छ॑ वि॒दत्ऽव॑सुम् गिरः॑ म॒हाम् अ॒नू॒ष॒त श्रु॒तम् ॥

देवयन्तः देवकामा ऋषयः **महाम्** महान्तं **श्रुतम्** दिव्यावेशश्रुतिगोचरं इन्द्रं **अनूषत** स्तुतवन्तः [दिव्यवाणीश्रवणलाभात्] । तत्र दृष्टान्तमाह । **गिरः** गृणन्तः स्तोतारः **विदद्वसुम्** वेदयद्वसुं वेदयद्धनं **मतिम्** मन्तारं इन्द्रं **अच्छ** अभि-मुखं **यथा** स्तुवन्ति (अनूषत) वसुलाभात्तथेति ॥

देवयन्तः— देवानात्मन इच्छन्तः, क्यच् । मतिम्— मतिशब्दो बुद्धिपरोऽपि उपचारादिन्द्रे बोद्धरि वर्तते । एवं गिरः स्तुतयः स्तोतृषूपचर्यते ॥

विदद्वसुम्— विदन्ति वेदयन्ति अन्तर्भावितण्यर्थः ज्ञापयन्ति लम्भयन्ति वा 'मतिम्' इन्द्रमात्मानं वसूनि धनानि यस्य तम् । वसु धनं ऐश्वर्यं भवति । तस्य ज्ञान-मयत्वाद् इन्द्रं ज्ञापयितुं सामर्थ्यमस्तीति तात्पर्यम् । अनूषत— णू स्तवने इति धातोः लुङि प्रथमपुरुषबहुवचनम्, गुणाभावः छान्दसः, तथा आत्मनेपदं च ॥

अयं मन्त्रार्थो भवति— यथा स्तोतारः स्ववैभवप्रापकदिव्यधनयुक्तं इन्द्रं स्तुतिभिः उपतिष्ठन्ते, तथा प्रत्यग्रजन्मानो ज्योतिर्दर्शिन इन्द्रकामा इन्द्रात् श्रुतिं लभमानास्तं दिव्यावेशवाणीश्रवणगोचरमुपासत इति । अथ प्राधान्येन प्राणपदमधितिष्ठतां क्रिया-

शक्तिपराणामपि ऐन्द्रतेजोबलदीपितानां येषां मरुतां साहाय्यमत्यन्तमुपयुक्तमभूत् पर्वतभञ्जनादौ, तेषामधुना समुदायेन गणरूपतया स्तुतिर्भवति ॥

सप्तमीमृचमाह—

इन्द्रे॑ण॒ सं हि दृक्ष॑से सञ्जग्मा॒नो अबि॑भ्युषा । म॒न्दू स॑मा॒नव॑र्चसा ॥७॥

इन्द्रे॑ण सम् हि दृक्ष॑से स॒म्ऽज॒ग्मा॒नः अबि॑भ्युषा । म॒न्दू इति॑ स॒मा॒नऽव॑र्चसा ॥

हे मरुद्गण ! त्वं इन्द्रेण सञ्जग्मानः सङ्गच्छमानः संवादसम्पन्नो युक्त इति यावत्, सन्दृक्षसे हि सम्यग् दृश्यसे । कीदृशेन्द्रेण? अबिभ्युषा भयवर्जितेन । युवां इन्द्रो मरुद्गणश्च मन्दू मुदितौ समानवर्चसा तुल्यदीप्ती [भवथः] ॥

दृक्षसे– लिङर्थे प्रार्थनायां लेट् इति सायणीयम् । 'दृश्यसे' इति कर्मणि लडेव स्कन्दस्वामीये । युक्तमेतत्, प्रत्यक्षकृतो ह्ययम् । मन्दू– मन्दतेर्मोदनार्थस्येदं रूपम् ॥ सञ्जग्मानः– सम्पूर्वाद्गमेः लिटः कानच् । अबिभ्युषा– बिभेतेः क्वसुः, अन्यत् छान्दसम् ॥

एवं इन्द्रेण सङ्गतस्य तत्तुल्यतेजसो मुदितस्य मरुद्गणस्य सन्दर्शनात् सम्प्राप्तद्युति-विशेष ऋषिर्यज्ञकारी बलवदृचमुच्चारयतीति वक्ष्यते ॥

अष्टमीमृचमाह–

अ॒न॒व॒द्यैर॒भिद्यु॑भिर्म॒खः सह॑स्वदर्चति । ग॒णैरिन्द्र॑स्य॒ काम्यैः॑ ॥८॥

अ॒न॒व॒द्यैः अ॒भिद्यु॑ऽभिः म॒खः सह॑स्वत् अ॒र्च॒ति॒ ग॒णैः इन्द्र॑स्य काम्यैः॑ ॥

मखः यज्ञकारी (तत् करोति तदाचष्टे, मखयति यज्ञं करोति) अर्चति स्तौति ऋचमुच्चारयति । कथम्? सहस्वत् बलवत् वीर्यवद्यथा भवति तथा (अर्चति) कीदृशः सन्? गणैः मरुद्गणैः उपेतः (प्रसादात्तेषामावेशाद्वा तैर्युक्त इत्यर्थः) कीदृशैर्गणैः? अनवद्यैः दोषरहितैः शुभ्रैरित्यर्थः (धीवृत्तीनां दिव्यभावमापन्नानां अत एव लब्ध-

पुनर्जन्मनां दिव्यमनोमयसम्राज इन्द्रस्य साहाय्ये वर्तमानानां मरुतां निष्कलङ्कत्वमुप-वर्णनम्) । पुनः अभिद्युभिः अभितः (मखं, यज्ञकारिणं) प्राप्ता द्युलक्षिता द्युतिः येषां तैः । पुनश्च, इन्द्रस्य काम्यैः इन्द्रस्य स्पृहणीयैः, प्रियैरित्यर्थः ॥

अर्थाविष्कार एव विशिष्टशब्दनिर्वचनं दत्तम्, तेन तात्पर्यबोधाय द्वारं च कृतम् ॥

ऋषिर्यजमानः स्वीयामर्चनविधां मरुद्गणसहितेन्द्रप्रसादलब्धां विस्रम्भेण गायन्, सर्वतोऽपि इन्द्रसान्निध्यं प्रार्थयत उत्तरे मन्त्रे ॥

नवमीमृचमाह–

अतः परिज्मन्नागहि दिवो वा रोचनादधि । समस्मिन्नृञ्जते गिरः ॥९॥

अतः परिऽज्मन् आ गहि दिवः वा रोचनात् अधि सम् अस्मिन् ऋञ्जते गिरः ॥

परिज्मन् परितो गामिन् [सर्वव्यापिन् इत्यर्थः, परि-उपसर्गस्य अज-धातोः रूपम्, मनिन्प्रत्ययः] हे इन्द्र! अतः अस्मान्मध्यमादन्तरिक्षस्थानात् आगहि आगच्छ दिवो वा द्युलोकाद्वा, रोचनादधि रोचमानात् दीप्तात् ततोऽप्यूर्ध्व-लोकाद्वा आगच्छ (सर्वत्र व्यापकत्वात्, तत्तत्स्थानविभवसम्पन्नस्य इन्द्रस्य आगमनं ऋषेर्दिव्याभ्युदयपोषकं भवति) । अस्मिन् मदीये अन्तर्यजने कर्मणि, [अयं मधु-च्छन्दाः] गिरः स्तुतीः मन्त्रवाच इत्यर्थः, समृञ्जते प्रसाधयति, उज्ज्वलाः करोति ॥

प्राधान्येनास्मिन् ऐन्द्रे सूक्ते, विस्पष्टा इन्द्रस्तुतिरन्ते भवति ॥

दशमीमृचमाह–

इतो वा सातिमीमहे दिवो वा पार्थिवादधि । इन्द्रं महो वा रजसः ॥१०॥

इतः वा सातिम् ईमहे दिवः वा पार्थिवात् अधि । इन्द्रम् महः वा रजसः ॥

इतो वा अस्माकं सन्निहितात् पृथिवीस्थानाद्वा सातिम् लब्धिं सम्भजनीयं प्राप्तव्यमित्यर्थः । ईमहे प्रार्थयामहे । स च प्राप्तव्य इन्द्र एव भवति । इन्द्रम्

प्राप्तव्यतया ईहामहे । तस्य त्रैलोक्याधिराज्यत्वात् इतो वा स प्राप्यो भवति । **पार्थिवादधि दिवो वा** पृथिवीसम्बन्धिनो द्युलोकाद्वा, **महो रजसो वा** महतोऽन्तरिक्षलोकाद्वा तं प्राप्तव्यमिन्द्रमीहामहे ॥

व्याख्यातं युञ्जन्तीति सूक्तम् । अनुक्रमणिकोक्तप्रकारेण ऐन्द्रमारुतऋचौ द्वे मारुत्यश्चतस्रश्च ऐन्द्यश्चतस्रश्च व्याख्याताः । दशर्चेऽस्मिन् ऋचां पूर्वोत्तरसम्बन्धः प्रदर्शितः । रहस्यगर्भितमिदं स्थूलपक्षव्याख्यातृणामर्थाविष्कारनये शुष्कभावं संवृत्तम् । नेष्यते तत्तात्पर्यपरीक्षा । अस्ति त्वस्माकमिह वक्तव्यम् ॥

बह्वस्ति रहस्यमस्मिन् गाढं कामतो निक्षिप्तमृषिणेति वक्तव्यम् । इदं च प्रबलं निदर्शनं भवति प्रागस्माभिर्भूमिकायां आर्षं रहस्यमधिकृत्य प्रतिपादितस्यार्थस्य । 'इदं च रहस्यं ऋषीणां विदितं, तच्छिष्याणां च । ये च गुरुभ्यो महर्षिभ्यो दीक्षां लब्ध्वा अन्तरङ्गशोधनसाधनादिभिः अन्तर्यजनाय शिक्षिताः ।' इत्यादि ह्युक्तम् । अत्र गवाश्व-केत्वादिपदानि साङ्केतिकानि द्व्यर्थानि वा पदानि परिचितान्यस्माकमधुना न कष्टप्रदानि भवन्ति । तथाऽपि रहस्यं सूक्ते स्पष्टं विचारपूर्वकं निहितमिति वक्तुं वाक्यान्येवालम् ॥

प्रथमस्यामृचि 'युञ्जन्ती'त्याह । के? कर्तृपदं नोक्तम् । 'परि' 'तस्थिवांसः' इति विभक्तिव्यत्ययेन गृहीतमपि विशेषणमेव तत्, विशेष्यस्य स्वरूपमनुक्त्वा शिष्य-शिक्षार्थं अन्तर्याजिनो बोधाय वा विसृष्टम् । 'चरन्तम्' अत्रापि कम्? इति नोक्तम् । द्वितीयस्यामपि कर्तृपदमध्याहृतं तत्तु सुलभं प्रथमर्गपेक्षया । तृतीयस्यां, 'उषद्भिः' कैः इन्द्रजन्म? नोक्तम् । चतुर्थ्यां, के 'पुनर्गर्भत्वमेरिरे'? पञ्चम्यां 'आरुजत्नुभिः' वह्निभिः कैः इन्द्रस्य गोलाभः? षष्ठ्यां, के 'देवयन्तः' देवकामाः महान्तं श्रुतं नुतवन्तः? सप्तम्यां, कः सम्बोध्यते इन्द्रेण सह सन्दृश्यमानः, तेन 'समानवर्चाः'? अष्टम्यामपि कण्ठतो नोक्तं 'इन्द्रस्य काम्या गणाः' के? इति । नवम्यां, 'परिज्मन्' इति कस्यामन्त्रणम्? दशम्यामेव स्पष्टमुक्तमिन्द्रं 'ईमहे' इति ॥

अस्य सर्वस्योत्तरं वचनं उद्देशपूर्वकमेवान्तर्निधाय गोपितं वाक्यविदैव साक्षात्कृत-धर्मणा महर्षिणा मधुच्छन्दसेति ब्रूमहे । एवमपि तत्र तत्र ऋक्षु स्पष्टान्यस्पष्टानि वा लिङ्गानि क्षिप्तानि । तेषां परीक्षणेन प्राचीनैः कृतं दैवतनिर्णयं आधारीकृत्य बृहद्देवता-नुक्रमणिकादयः प्रवृत्ताः । बहुषु स्थलेषु पूर्वेषामेव दैवतनिर्णये मतभेदः सन्देहो

विवादश्च दृश्यन्ते । इदं च पर्यालोचनीयम् । आद्यानां मन्त्रद्रष्टॄणां तदपेक्षया अर्वाचीनानां श्रौतकल्पादिसूत्रकाराणां च युगान्तरकालभेद एव कारणं भवति देवतादिविषयकविचिकित्सायाः । प्राधान्येनान्तर्यागसम्बन्धिनो हि मन्त्राः । तेषां बहिर्यागोपयोगाय भावमाविष्कर्तुमुद्यताः, तत्राप्यर्वाचीनाः मन्त्रप्रतिपादितदेवता अत्यन्तस्थूलदृष्ट्या निरणैषुरिति नात्र चित्रम् । अत एव सामान्येन मन्त्रार्थविचारे विशेषतोऽन्तर्यागानुरोधेन क्रियमाणे, मन्त्रार्थस्य कात्यायनादिभिरुक्ताया देवतायाश्च उभयोर्न लक्ष्यते संवादः । अस्मिन्नेव 'युञ्जन्ति' इति सूक्ते 'देवयन्तः' इत्यादिमन्त्रेषु विस्पष्टं विसंवादो भवति । यद्यपि यावत् शक्यं यथासम्भवं अनुक्रमणिकाकारमेव देवताप्रतिपादनविषयेऽनुसरामः, क्वचित् स्पष्टं अयुक्तस्थलेषु विप्रतिपन्नाः स्मः । तस्मादरविन्दश्रीचरणानामाशयमवलम्ब्य अन्तरर्थपरेऽस्मिन् विवरणे 'देवयन्तः' इति मन्त्रे मरुतो देवता इति नाङ्गीकृताः । तथा 'अतः परिज्मन्' इत्यत्र न मरुद्गण आमन्त्रितः । अन्यत् सर्वं व्याख्यायामुक्तम् ॥

इति प्रथमस्य प्रथमे द्वादशो वर्गः

द्वितीयेऽनुवाके चतुर्थं 'इन्द्रं' इत्यादिकं दशर्चं सूक्तम् । ऋषिच्छन्दोदेवताः पूर्ववत् ॥

तत्र प्रथमामृचमाह—

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥१॥

इन्द्रम् इत् गाथिनः बृहत् इन्द्रम् अर्केभिः अर्किणः । इन्द्रम् वाणीः अनूषत ॥

गाथिनः सामगायिनः [गाथा एषां सन्ति, गायतेर्गाथा] **इन्द्रम् इत्** इन्द्रमेव **बृहत्** बृहता साम्ना ['त्वामिद्धि हवामहे' इति प्रसिद्धेन बृहत्साम्ना] **अनूषत** स्तुतवन्तः । **अर्किणः** ऋग्भिः स्तोतारो होतारः **अर्केभिः** अर्कैः ऋग्रूपैर्मन्त्रैः इन्द्रमेव 'अनूषत' । **इन्द्रम् वाणीः** वाचः अवशिष्टाः सर्वाः यजूंषीत्यर्थः, विभक्तिव्यत्ययेन यजुर्भिः सामर्थ्यादध्वर्यवः इन्द्रमेव 'अनूषत' ॥

ऋक्संहितायामत्रैव प्रथमं ऋग्यजुस्सामात्मिका त्रयी, तस्या उपयोक्तारः क्रमशो

होत्रध्वर्यूद्गातार इति सूचितम् ॥

द्वितीयामृचमाह—

इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा । इन्द्रो वज्री हिरण्ययः ॥२॥

इन्द्रः इत् हर्योः सचा सम्ऽमिश्लः आ वचःऽयुजा इन्द्रः वज्री हिरण्ययः ॥

इन्द्रः इत् इन्द्र एव हर्योः अश्वयोः, अश्वाभ्यामिति तृतीयार्थे । सचा सह आ आगच्छति । कीदृशः? संमिश्लः संमिश्रः लकारश्छान्दसः । सर्वेषां वस्तूनां सम्यङ्मिश्रयिता योजयितेति यावत् । कीदृशोर्हर्योः? वचोयुजा वचोयुजोः वचोयुग्भ्यां । सुविनीतौ अश्वौ स्वामिन इन्द्रस्य वचनमात्रेण स्वयं युज्येते, इति स्थूलं व्याख्यानं पूर्वेषाम् । अस्माकं तु न चतुष्पात्पशुरश्वः, तत्रापि विशेषतो 'इन्द्रस्य हरी' प्रति किमु वक्तव्यम् दीप्तिविशिष्टप्राणबलसङ्केताविति? तस्मात् वचोयुजा 'ब्रह्मयुजा' इति ग्राह्यम् । 'युञ्जन्त्यस्य काम्या हरी' इत्यस्या ऋचो व्याख्यानमवधेयम् । पुनः कीदृगिन्द्रः? इन्द्रो वज्री वज्रोपेतः हिरण्ययः हिरण्मयः स्वर्णप्रभोज्ज्वल इत्यर्थः॥

मिश्रणम् मिश्रः, समीचीनो मिश्रो यस्य सः संमिश्रः । इन्द्र आगच्छति । स हरिद्वयसहितः सर्ववस्तुसम्यक्संयोजनकारी, तस्याश्वौ ब्रह्मपदवाच्य-मन्त्रवाग्युक्तौ । वृत्रभिदा वज्रेणोपेतः हिरण्योज्ज्वल आगत्य किं करोति?

तृतीयामृचमाह—

इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥३॥

इन्द्रः दीर्घाय चक्षसे आ सूर्यम् रोहयत् दिवि वि गोभिः अद्रिम् ऐरयत् ॥

इन्द्रः दीर्घाय दूरगामिने शाश्वताय प्रौढाय वा चक्षसे दर्शनाय सूर्यं (सर्वस्यापि जगतः) प्रेरकम्, सूर्यसङ्केतितं ऋतज्योतिरित्यर्थः । दिवि द्युलोके आरो

हयत् आरोपितवान् । स इन्द्रः गोभिः स्वीयैः रश्मिभिः अद्रिम् अद्रिशब्दलक्षितं तमोमयं जडं जगत् व्यैरयत् विभिन्नं यथा तथा ऐरयत्, व्यभेत्सीदित्यर्थः ॥

चक्षसे– दर्शनार्थात् चक्षेः, सर्वधातुभ्योऽसुन् । ऐरयत्– ईर गतौ ण्यन्तात् लुङ् । सूर्यम्– षू प्रेरणे, सुवति प्रेरयति, धात्वादेः षस्य सः, सर्वस्यापि प्रेरकः सूर्यः प्रसिद्धः, कथं तं प्रेरयतीन्द्रः? यद्यपि देवास्सर्वेऽपि ज्योतिर्मया ऋतजाः ऋतसदः, तथाऽपि तत्र ज्येष्ठ इन्द्रः, ऋतज्योतिस्तु साक्षात्सूर्यात्मकं सूर्यवाच्यं भवति । तस्माद् यदा इन्द्रः स्वीयैर्दिव्यैः प्रज्ञारश्मिभिस्तमस्सत्रं व्यपोहति, तदा ऋतज्योतिषः सन्तत-दर्शनं सम्भवति । अत एव 'दीर्घाय चक्षसे', 'वि–ऐरयत्' वितत्य रश्मिभिः सूर्यं यथा दिवि सर्वदा दर्शनक्षमं तथा उच्चं स्थानं प्रापयदित्युक्तम् । 'सदा पश्यन्ति सूरयः दिवीव चक्षुराततम्' इत्युत्तरत्र मन्त्रोऽप्येवं सङ्गच्छते । इन्द्रमधिकृत्य प्रथमानुवाके द्वितीयसूक्तव्याख्याने समाख्यातमिति नेह विस्तर इष्यते ॥

चतुर्थीमृचमाह—

इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥४॥

इन्द्र वाजेषु नः अव सहस्रऽप्रधनेषु च उग्रः उग्राभिः ऊतिभिः ॥

हे इन्द्र, उग्र अप्रधृष्य उग्राभिः अप्रधृष्याभिः ऊतिभिः रक्षाभिः वाजेषु [समृद्धिषु, अस्माभिरधिगतासु, इतः परं प्राप्स्यमानास्वपि] नः अस्मान् अव रक्ष, यथा देवशत्रुभ्यो भीतिर्न भवति तथेति भावः । सहस्रप्रधनेषु च अत्यधिक-प्रकृष्टधनेषु लब्धेष्वपि नोऽव । ज्ञानबलादीन्येव प्रकृष्टानि धनानि अन्तर्याजिनामृषीणाम् ॥

पञ्चमीमृचमाह—

इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणम् ॥५॥

इन्द्रम् वयम् महाऽधने इन्द्रम् अर्भे हवामहे युजम् वृत्रेषु वज्रिणम् ॥

वयं देवार्थं आत्मानं समर्पयन्तोऽनुष्ठातारः महाधने महत्यैश्वर्ये लब्धे लब्धव्ये वा, निमित्तसप्तमी । अर्भे तथा अल्पेऽपि इन्द्रम् हवामहे आह्वयामः । न केवलं

सम्पत्तौ विपत्स्वपि तमेवाश्रयामह इति तृतीयपादेनोच्यते । वृत्रेषु बहुधा आवरकेषु शत्रुष्वसुरेषु प्राप्तेषु युजम् युक्तम्, अस्मासु कृतयोगं सहकारिणम् वज्रिणम् वृत्रवध-साधनेन वज्रेणायुधेनोपेतं इन्द्रमेवाह्वयामः । 'हवामह' इत्याह्वानं च सर्वथा समाश्रयणम् ॥

इति प्रथमस्य प्रथमे त्रयोदशो वर्गः

अथ 'इन्द्रमिद्गाथिन' इति सूक्ते षष्ठीमृचमाह—

स नो॑ वृषन्न॒मुं च॒रुं सत्रा॑दाव॒न्नपा॑वृधि । अ॒स्मभ्य॒मप्र॑तिष्कुतः ॥६॥

सः न॒ः वृ॒ष॒न् अ॒मुम् च॒रुम् सत्रा॑ऽदाव॒न् अप॑ वृ॒धि॒ । अ॒स्मभ्य॑म् अप्र॑तिऽस्कुतः ॥

सः तथाभूतस्त्वम् नः अस्मदर्थं हे वृषन् वर्षितः सर्वस्याप्यभीष्टस्य, हे सत्रादावन् सत्रा सह युगपत् दावन् दातः ज्ञानैश्वर्यतेजोबलादेः, अमुम् पुरतो दृश्यमानम् चरुम् चरन्तं मेघं सततपरिचलत्प्राणमनोवृत्त्यात्मनाऽवस्थितं चित् तेजो-बलाद्यावरकम् अप वृधि अपावृणु, उद्घाट्य प्रकाशय स्वात्मानम्, अस्मभ्यं अस्मदर्थं अप्रतिष्कुतः अप्रतिशब्दितः, दानशौण्डस्त्वं न कदाऽपि 'न दास्यामि' इति नः प्रतिवचनं ददासीत्यर्थः । अथवा त्वत्क्रियाविघातोपलक्षणं प्रतिवचनं न कुतोऽपि भवतीत्यर्थः । एवंविधं सायणीयं व्याख्यानम् । वस्तुतस्तु न केनापि छादयितुं शक्य इति वक्तव्यम् । स्कुञ् आवरणे इति श्नाविकरणी धातुः । प्रतिपूर्वकात्तस्मात् क्तः । ततो नञ् समासः । आवरकं चरुं अपावृणु, निराच्छादनो नित्यप्रकाशो भव नः इत्यर्थः । 'अस्कुनात् शरवृष्टिभिः' बाणवर्षैः छादितवान् इत्यादिः प्रयोगः अद्यापि द्रष्टव्यः ॥

चरुम्– मेघनाम, पात्रेऽपि वर्तते क्वचित् । चरतेर्निष्पन्नं, तस्मादुपपन्नमन्तरर्थ-परं व्याख्यानम् । सत्रादावन्– सत्रा सहार्थे, दवा दातरि, छान्दसं रूपम् । वृधि– वृञ् वरणे, लोटि मध्यमपुरुषे धिरादेशः, छान्दसः ॥

सप्तमीमृचमाह—

तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः । न विंधे अस्य सुष्टुतिम् ॥७॥
तुञ्जेऽतुञ्जे ये उत्ऽतरे स्तोमाः इन्द्रस्य वज्रिणः । न विन्धे अस्य सुऽस्तुतिम् ॥

तुञ्जे-तुञ्जे प्रतिप्रेरणम् तुञ्जतिः [यज्ञे वा दाने वेति पूर्वे, बलादानयोरपि वर्तते, तरयति प्रेरयतीत्यर्थेऽपि कचित् सा०. व्या०. । तस्मात् प्रेरणबलं, तदादानं वेति वयम्] ये उत्तरे उत्कृष्टतराः स्तोमाः स्तोत्राणि मदीयानि प्रवर्तन्ते, तैः अस्य मम सन्निहितस्य वज्रिणः महापराक्रमद्योतकवज्रयुक्तस्य इन्द्रस्य सुष्टुतिम् सुष्ठु यथोक्तां स्तुतिं न विन्धे न विन्दामि, न लभे ॥

यदा यदा प्रेरणानि मामाविश्य स्तावयन्ति तदा तदा उत्तरोत्तराः श्रेष्ठाः स्तुतीः करोम्येव । तथाऽपि वज्रबाहोरिन्द्रस्य वर्णने नालमिमाः स्तुतय इति मे मतिः इति भावः । विन्धे– विदॢ-लाभे दस्य व्यत्ययेन धः छान्दसः ॥

अष्टमीमृचमाह—

वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा । ईशानो अप्रतिष्कुतः ॥८॥
वृषा यूथाऽइव वंसगः कृष्टीः इयर्ति ओजसा ईशानः अप्रतिऽस्कुतः ॥

वृषा इन्द्रः वर्षिता दिव्यानां कामानां कृष्टीः कर्षणपदलक्षितनित्योद्यमशीलान् आर्यान् मनुष्यान् ओजसा वीर्यवत्तमेन स्वानुग्रहबलेन इयर्ति प्राप्नोति, प्रेरयतीत्यर्थः । तत्र दृष्टान्तः । वंसगः यः वंसं वननीयं यथा तथा गच्छति, सः वननीयगतिः वृषा वृषभः यूथेव गोयूथानीव । यथा गवां यूथानि प्रविष्टः बलिष्ठो बलीवर्दः तान् प्रेरयति तथा स चेन्द्रः ईशानः ईश्वरः अप्रतिष्कुतः न केनापि छादयितुं शक्यः, अत एव नित्यप्रकाशः । अन्यत् प्रागुक्तम् ॥

नवमीमृचमाह—

य एकश्चर्षणीनां वसूनामिरज्यति । इन्द्रः पञ्च क्षितीनाम् ॥९॥
यः एकः चर्षणीनाम् वसूनाम् इरज्यति । इन्द्रः पञ्च क्षितीनाम् ॥

यः इन्द्रः एकः समानः स्वयमेक एव चर्षणीनां चर्षण-कर्षण-भरणादि-प्रागुक्तलक्षणानां मनुष्याणां इरज्यति ईष्टे, ईश्वरो भवति, तथा वसूनां विविधानां धनानामपि इरज्यति ईश्वरो भवति, स इन्द्रः पञ्च पञ्चानां, विभक्तिव्यत्ययः। क्षितीनाम् निवासस्थानानां ईश्वर इति शेषः ॥

चर्षणीनाम्– न केवलं मनुष्यसामान्यपरं ग्राह्यम् । यौगिकार्थानुसारेण 'आर्यः कृष्टिः' इत्यादिवद्ग्राह्यः । इरज्यति– ऐश्वर्यकर्मा । 'पञ्च क्षितीनाम्' इत्यत्र पञ्चजनानां इति सायणीयम् । सर्वत्र पञ्चजनाः निषादपञ्चमा इति व्याख्या । स्थूलपक्षानुसारेण अपि सन्दिग्धमिदम् । उपन्यस्तोऽयं विषयो भूमिकायां (पृ. ५७) । क्षियतेर्निवासार्थस्य रूपं क्षितिः । क्षितयो निवासस्थानानि पृथिव्यादीनि पञ्च इतः पृथिवीमारभ्य उत्तरोत्तरं ऊर्ध्वं सृष्टौ परिकल्पितानि भवन्ति । एवं त्रिलोकसंस्थानं, सप्तलोकसंस्थानं, क्वचित् चतुर्व्याहृतिप्रतिपादितचतुर्लोकसंस्थानं चामनन्ति । यथा पृथिव्यस्तिस्र इति वेदे प्रतिपादिताः त्रैलोक्यसम्बन्धिनीः पृथुला भूमीरभिदधते, यत्रेयं नः पृथिवी स्थूला भूमिः प्रथमा भवति, तथा पञ्च क्षितयोऽपि पञ्च वासभूमयः यत्रेयं क्षितिर्नः प्रथमेति बोध्यम् ॥

दशमीमृचमाह—

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥१०॥

इन्द्रम् वः विश्वतः परि हवामहे जनेभ्यः अस्माकम् अस्तु केवलः ॥

भो यजमानाः, देवतानुग्रहसम्पादनप्रवृत्तान् प्रति सम्बोधनम् । वः युष्मदर्थं विश्वतः सर्वेभ्यः जनेभ्यः जातेभ्यः मनुष्येभ्यः प्राप्तजन्मभ्यो लोकेभ्योऽपि परि उपरि अवस्थितं इन्द्रम् हवामहे आह्वयामः । स इन्द्रः अस्माकम् सर्वेषामनुष्ठातॄणां केवलः असाधारणः, अद्वितीयाराध्यः अनन्योपास्तिविषयभूतः अस्तु भवतु । इतरेभ्योऽप्यधिकमनुग्रहमस्माकं करोत्विति व्याख्यानमयुक्तम् । न तद्भक्तिलक्षणम् । अल्पमनस्कता मधुच्छन्दसि महर्षावारोपिता भवति ॥

इति प्रथमस्य प्रथमे चतुर्दशो वर्गः

इति प्रथमे मण्डले द्वितीयोऽनुवाकः

तृतीयोऽनुवाकः चतुस्सूक्तात्मकः, तत्र प्रथमं 'एन्द्र सानसिम्' इति दशर्चं सूक्तम् । ऋषिच्छन्दोदेवताः पूर्ववत् ॥

तत्र प्रथमामृचमाह—

एन्द्र सानसिं रयिं सजित्वानं सदासहम् । वर्षिष्ठमूतये भर ॥१॥

आ इन्द्र सानसिम् रयिम् सऽजित्वानम् सदाऽसहम् वर्षिष्ठम् ऊतये भर ॥

हे **इन्द्र ऊतये** अस्मदभिवृद्धये **रयिं** धनं **आभर** आहर । नेदं साधारणं धनमिति ज्ञापयन्ति रयिविशेषणानि इमानि भवन्ति । **सानसिम्** सम्भजनीयं (षण-धातोः असिप्रत्ययनिपातः) । **सजित्वानम्** समानजयशीलं (समानस्य सभावः जयतेः क्वनिप्) **सदासहम्** सदा साहयितारं अभिभवप्रापकं शत्रूणामिति शेषः । **वर्षिष्ठम्** प्रवृद्धं (वृद्धशब्दस्य वर्षादेशः, तत इष्ठन्) । अत्र तेजोबलरूपं प्रार्थ्यते । तत्तु सर्वस्यापि श्रेयस्कामस्य सम्भजनीयम् । प्रबलशत्रुभिः तेजोबलविरोधिभिः समानं युद्ध्वा तान् जेतुं शीलं अस्य तेजोबलरूपस्य धनस्य, अतः 'सजित्वानम् रयिम्' । शत्रुजयपरिचयवान् 'रयिः' न तु अशिक्षितः, अतः 'वर्षिष्ठं रयिम्' ॥

द्वितीयामृचमाह—

नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै । त्वोतासो न्यर्वता ॥२॥

नि येन मुष्टिऽहत्यया नि वृत्रा रुणधामहै त्वाऽऊतासः नि अर्वता ॥

येन पूर्वोक्तलक्षणेन धनेन दिव्यतेजोबलेन **वृत्रा** आवरकतमोघनान् असुरान् शत्रून् **नि** नितरां **मुष्टिहत्यया** मुष्टिभिः प्रहरणेन **निरुणधामहै** निरुद्धान् करवाम वयम् । कीदृशो वयम्? **त्वोतासः** त्वया रक्षिताः [त्वद् इत्यत्र दकारलोपः छान्दसः, ऊतासः अवतेर्निष्ठायां इडभावः, अन्यत् छान्दसम्] पुनः कीदृशा वयम्? **नि** नितरां **अर्वता** अश्वेन तल्लक्षितेन प्राणबलेन युक्ताः इति सहयोगलक्षणा तृतीया ॥

तृतीयामृचमाह—

इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि । जयेम सं युधि स्पृधः ॥३॥

इन्द्र त्वाऽऊतासः आ वयं वज्रं घना ददीमहि जयेम सम् युधि स्पृधः ॥

हे इन्द्र त्वोतासः त्वद्रक्षिताः वयम् वज्रम् दिव्यमायुधं घनीभूत-अरिष्ट-अनृतज्ञानादिभेदकं घना घनत्वेन, तृतीयाविभक्तिः भावप्रधानम् आददीमहि लभेमहि, युधि युद्धे स्पृधः स्पर्धमानान् शत्रून् सञ्जयेम सम्यग्जितवन्तः स्याम ।

वज्रम्– वज व्रज गतौ, रन्-प्रत्ययो निपात्यते । घना– वज्रविशेषणतया गृहीतं सायणीये । तत्रापि अस्मदीयतात्पर्यस्य न क्षतिः ॥

चतुर्थीमृचमाह—

वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम् । सासह्याम पृतन्यतः ॥४॥

वयम् शूरेभिः अस्तृऽभिः इन्द्र त्वया युजा वयम् । ससह्याम पृतन्यतः ॥

हे इन्द्र वयं त्वदाराधका अन्तर्यागानुष्ठायिनः शूरेभिः शूरैः शौर्ययुक्तैः अस्तृभिः दूरादेव आयुधप्रक्षेपणशीलैः (असु-क्षेपणे, तृन् ताच्छील्ये) शत्रुभिः सह युद्धे जेतारः स्यामेति शेषः । केचन देवद्विषो यागशत्रवः क्वापि निलीय दूराद्वा अस्त्राणि प्रयुञ्जते तान् प्रति इदमुक्तम् । कीदृशो वयं एवं जेतारो भवाम इति चेत् युजा त्वया युञ्जता युक्तेनास्मन्नित्यसहायेनेत्युक्तम् । तथाभूता वयं पृतन्यतः सेनामिच्छतः, सम्मुखीनं युद्धं कर्तुमिच्छतः शत्रूनपि ससह्याम अतिशयेन साहयेम अभिभवेम ॥

पृतन्यतः– पृतनामात्मन इच्छतः-क्यच्, आकारलोपः लटः शतरि, द्वितीया-बहुवचनान्तं रूपम् ॥

पञ्चमीमृचमाह—

महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ॥५॥

महान् इन्द्रः परः च नु महिऽत्वम् अस्तु वज्रिणे द्यौः न प्रथिना शवः ॥

महान् बृहत्स्वरूपः इन्द्रः परश्च उत्कृष्टोऽपि भवति । न केवलं स्वरूपेण

बृहत्त्वयं, प्रभावेण सर्वोत्कृष्टश्च । नु पादपूरणः (बह्वर्थोऽयं निपातः) वज्रिणे वज्र-युक्ताय इन्द्राय **महित्वम्** महत्त्वं परत्वं च पूर्वोक्तं द्विविधं गुरुत्वं **अस्तु** भवतु । इदं च भक्तेन ऋषिणा भगवते कृतं मङ्गलाशासनम् । तस्मादुपपन्नमिदं स्वभावसिद्ध-महत्त्वादिविशिष्टस्येन्द्रस्य स्तोत्रे । अद्यापि गुरुदेवाद्याराधने मङ्गलाशासनसम्प्रदायः जयवादो लौकिक इव सुप्रसिद्धः । **द्यौर्न** द्युलोक इव **प्रथिना** पृथुलत्वेन वैपुल्येन **शवः** दीप्तं बलं अस्येति शेषः, अस्तु जयत्विति वा अध्याहारः ॥

प्रथिना– प्रथिम्ना, मकारलोपश्छान्दसः ॥

इति प्रथमस्य प्रथमे पञ्चदशो वर्गः

अथास्मिन् सूक्ते षष्ठीमृचमाह—

स॒मो॒हे वा॒ य आश॑त॒ नर॑स्तो॒कस्य॒ सनि॑तौ । विप्रा॑सो वा धि॒या॒यवः॑ ॥६॥

सम्ऽओ॒हे वा॒ ये आश॑त नरः॑ तो॒कस्य॑ सनि॑तौ विप्रा॑सः वा॒ धि॒य॒ाऽयवः॑ ॥

ये **नरः** पुरुषाः **समोहे** सङ्ग्रामे, देववैरिभिः सहेति बोध्यम् । **तोकस्य** अपत्यस्य **सनितौ वा** लाभे वा **आशत** प्राप्तवन्तः, (अश् व्याप्तौ लुङि छान्दसं रूपम्,) ये पुरुषा इन्द्रमाश्रयन्ते ते लभन्त इति शेषः । **वा** अथवा **धियायवः** प्रज्ञा-कामाः **विप्रासः** विप्राः मेधाविनः ये इन्द्रं 'आशत', तेऽपि लभन्त इत्यर्थः । **नरः** पुरुषा देवा मनुष्या वा बलिनः । देवानां अपत्यलाभस्तु मनुष्ये स्वांशप्रादुर्भावः । मनुष्याणामपि स्वान्तरे दैवतजन्मैव तोकपदवाच्यमपत्यं भवति । उभयथाऽपि अपत्य-लाभप्रतिरोधकैर्विरोधिभिर्योद्धव्यमवश्यं भवति । अतः 'समोहे सङ्ग्रामे' इति निघण्टु-पठितमभ्युपगम्य व्याख्यातम् ॥

सप्तमीमृचमाह—

यः कु॒क्षिः सो॑म॒पात॑मः समु॒द्र इ॑व॒ पिन्व॑ते । उ॒र्वीरापो॒ न का॒कुदः॑ ॥७॥

यः कु॒क्षिः सो॒म॒ऽपात॑मः स॒मु॒द्रःऽइ॑व पिन्व॑ते उ॒र्वीः आपः॑ न का॒कुदः॑ ॥

अस्येन्द्रस्य **यः कुक्षिः** उदरदेशः **सोमपातमः** अतिशयेन सोमरसस्य पाता, स **समुद्र इव पिन्वते** वर्धते, यथा समुद्रः अक्षयो गभीरो विपुलश्च भवति,

सर्वसिन्धु-समागमेन विशेषतः पोषवान् लक्ष्यते, तथा इन्द्रकुक्षिः सर्वलोकरसभूयिष्ठः न कदाऽपि शुष्यति, सदा सिक्त आर्द्र एव भवति 'पिवि सेचने' इति धातोः पिन्वति नुमागमः, औचित्यात् वर्धते इति पूर्वैर्व्याख्यातम् । इन्द्रकुक्षेर्नित्यबृहत्त्वसोमसिक्तत्वबोधनाय उपमान्तरमाह— **उर्वीरापो न काकुदः** इति । ककुत् उच्छ्रितः प्रदेशः शिखरभूतः 'अग्निर्मूर्धा दिवः ककुत्' इत्याद्यवधेयम् । स च द्युलोकः तत्सम्बन्धिन्यः काकुदः **उर्वीः** बृहत्यः **आपो न** आपः जलानीव, दिव्या आप इव बृहत्त्वं स्वभावसिद्धरसार्द्रत्वं च धत्ते कुक्षिरिति भावः । अत्र पूर्वे प्राहुः— 'काकुत् जिह्वा' इति निघण्टुपाठमालम्ब्य 'जिह्वासम्बन्धमास्योदकं यथा न कदाचिदपि शुष्यति तथेन्द्रस्य कुक्षिः सोमपूरितो न शुष्यतीति ॥

अष्टमीमृचमाह—

एवा ह्यस्य सूनृता विरप्शी गोमती मही । पक्वा शाखा न दाशुषे ॥८॥

एव हि अस्य सूनृता विऽरप्शी गोऽमती मही पक्वा शाखा न दाशुषे ॥

एव हि एवं खलु वक्ष्यमाणप्रकारेण **अस्य** इन्द्रस्य **सूनृता** वाक् (प्रियसत्येति सामान्यवादः) वस्तुतस्तु कल्याणी सत्या वाक् सम्पद्यत इति शेषः । 'चोदयित्री सूनृतानाम्' इति मन्त्रस्य व्याख्याने प्रतिपादितम् । का सा सूनृता ? **मही** भारतीति प्रसिद्धा इळासरस्वत्योः सहचरी ऋतज्योतिषो बृहत्त्वद्योतिनी, न केवलं महतीत्यर्थः, न विशेषणं किं तु विशेष्यम्, 'इळा सरस्वती मही' इति भारतीपर्यायत्वात् । पुनः कीदृश्येषा मही इन्द्रसम्बन्धिनी सम्पन्ना भवति ? **विरप्शी** वैपुल्यवाहिनी महन्नामैतदिति बहुषु मन्त्रेषु सायणव्याख्या । इह तु विविधरपणशीला विविधोपचारवादिनीत्यादि दृश्यते । पुनश्च सा **गोमती** अंशुमती प्रज्ञाकिरणवती । अत्रोपमामाह— **पक्वा** पक्वफला **शाखा दाशुषे न** यजमानाय यथा । पक्वफलगुच्छसम्पन्ना शाखा भोग्या यथा यजमानाय सन्तृप्तये भवति तथा इन्द्रकृते उक्तगुणसम्पन्ना भारती भवतीति भावः ॥

नवमीमृचमाह—

एवा हि ते विभूतय ऊतय इन्द्र मावते । सद्यश्चित्सन्ति दाशुषे ॥९॥

एव हि ते विऽभूतयः ऊतयः इन्द्र माऽवते सद्यः चित् सन्ति दाशुषे ॥

हे इन्द्र! एव हि एवं महीपदवाच्यभारतीसमाश्रितः खलु त्वम् । ते तव विभूतयः विभवा ऐश्वर्यविशेषाः मावते मत्सदृशाय मद्विधायेत्यर्थः (अस्मच्छब्दात् छन्दसि वतुप्) दाशुषे यजमानाय सद्यश्चित् सपद्येव ऊतयः सन्ति अस्मदभिवर्धनानि भवन्ति । अन्यथाऽपि व्याख्येयम् । 'एव हि' एवं वक्ष्यमाणरीत्या खलु । 'ते विभूतयो मावते दाशुषे सद्यश्चित् ऊतयः सन्ति' इति ॥

दशमीमृचमाह—

एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या । इन्द्राय सोमपीतये ॥१०॥

एव हि अस्य काम्या स्तोमः उक्थम् च शंस्या इन्द्राय सोमऽपीतये ॥

एव हि एवं खलु अस्मदनुष्ठानप्रकारेणेत्यर्थः । अस्य इन्द्रस्य काम्या कामनायोग्ये स्पृहणीये प्रिये इत्यर्थः, स्तोमः उक्थम् च सामगानात्मकं ऋग्रूपं च शंस्या शंसनीये । किमर्थम्? इन्द्राय इन्द्रार्थम्, सोमपीतये तदीयसोमपानाय तदीयसोमस्वीकारः सर्वशिवङ्करः यजमानस्यैपस्तेजोबलवृद्धि-दैवतापत्यलाभादये प्रभवति इति सूक्तमन्त्रार्थपर्यालोचनया दृढं भवेदित्यसंशयम् ॥

इति प्रथमस्य प्रथमे षोडशो वर्गः

तृतीयेऽनुवाके द्वितीयं 'इन्द्रेहि' इत्यादिकं दशर्चं सूक्तम् ऋषिच्छन्दोदेवताः पूर्ववत् ॥

तत्र प्रथमामृचमाह—

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ अभिष्टिरोजसा ॥१॥

इन्द्र आ इहि मत्सि अन्धसः विश्वेभिः सोमपर्वऽभिः महान् अभिष्टिः ओजसा ॥

हे इन्द्र एहि आगच्छ । अन्धसः अन्नैः सोमात्मकैर्भोग्यैः (व्यत्ययेन तृतीया) मत्सि माद्य हृष्टो भव । विश्वेभिः सर्वैः सोमपर्वभिः सोममयानि

रसभरितानि पर्वाणि अङ्गानि अवयवसन्धयो वा येषां तैः देवैः सह आगत्य सोमैः स्वीकृतैः प्रहृष्टो भवेत्यर्थः । ततः **ओजसा** स्पष्टेन बलेन **महान्** प्रभूतस्त्वं **अभिष्टिः** अभिगन्ता शत्रूणां भवसि । ओजसा–व्यक्तीभावार्थात् आर्जनार्थाद्वा उब्जतेर्धातोः ओजतेर्वा । अभिष्टिः– अभिपूर्वकात् इष-धातोः । इष्टिरिति भावप्रधानं पदं, तेन भविता लक्ष्यते । सोमपर्वभिः सोमरसपूर्णैः 'अन्धसः' अन्नैरिति पूर्वेषां व्याख्या । पर्व पूरणे इति धात्वर्थानुसारेणेदं समर्थयन्ति । 'पर्व' अङ्गं, तेन शरीरं, अवयवसन्धिश्च, द्विधाऽपि वेदे प्रयुक्तम् । तथा सायणव्याख्या च (१-६१-१२, ४-१९-९, ७-१०३-५, १०-१६३-६.) ॥

द्वितीयामृचमाह —

एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने । चक्रिं विश्वानि चक्रये ॥२॥

आ ईम् एनम् सृजत सुते मन्दिं इन्द्राय मन्दिने चक्रिम् विश्वानि चक्रये ॥

अन्तर्यागे प्रवृत्तान् सखीन् सम्बोधयति । **ईम्** पादपूरणाय । **सुते** अभिषुते अभिपवे समाप्ते निष्पीडिते रसे संस्कृते सति, **एनम् मन्दिम्** मोदमानं सोमं रसात्मानं **इन्द्राय आसृजत** अतिसृजत, अभ्युन्नयनार्थं दत्त । कीदृशम् मन्दिम्? **चक्रिम्** साधुकार्यकरणशीलम् (करोतेरभ्यासः, किन् ताच्छील्ये, अन्यच्छान्दसम्) कीदृशे इन्द्राय? **मन्दिने** मोदहेतवे, मोदमानाय वा । पुनः **कीदृशे? विश्वानि चक्रये** विश्वेषां कार्याणां कर्त्रे । अन्तर्याजिना स्वानुभूतिरसार्पणेन स्वाभ्युन्नतये स्वस्मिन् स्रष्टव्यानि सर्वाणि समोद इन्द्रः स्रष्टा साध्नोति ॥

तृतीयामृचमाह—

मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे । सचैषु सवनेष्वा ॥३॥

मत्स्व सुऽशिप्र मन्दिऽभिः स्तोमेभिः विश्वऽचर्षणे सचा एषु सवनेषु आ ॥

सुशिप्र शोभनहनो, सुनस, वा (शिप्रं हनुर्नासा वा) सुमुखेति दर्शनीयत्वं द्योतितं, मुखैकदेशेन मुखं लक्षितम् । **विश्वचर्षणे** (पश्यतिकर्माऽयं निघण्टुपठितः) विश्वद्रष्टे, इन्द्र! **मत्स्व** मोदस्व, कान्तो भव वा, कैः? **मन्दिभिः स्तोमैः** मोदहेतुभिः, कान्तिहेतुभिर्वा, अस्मदीयैः स्तोत्रैः । अथ च **सचा** सह त्वदीयैः विभूतिभूतैरन्यैर्देवैर्वा, इति शेषः, **एषु सवनेषु** अस्मदीयेषु यज्ञेषु देवाराधनेषु, **आ** आगत्य सन्निहितो भव । भोः विश्वदर्शिन्! अस्माकं मदकरैः स्तोत्रैः हर्षितः कमनीयवदनः सन् अस्मदीयदेवताराधनकर्मसु अन्तर्यागेषु सन्निधिं कुरु, इति भावः ॥

चतुर्थीमृचमाह—

असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत । अजोषा वृषभं पतिम् ॥४॥

असृग्रम् इन्द्र ते गिरः प्रति त्वाम् उत् अहासत अजोषाः वृषभम् पतिम् ॥

हे इन्द्र! **ते** तुभ्यं **गिरः** स्तुतीः **असृग्रम्** असृजं, सृष्टवानस्मि । (जकारस्य गकारः छान्दसः रुडागमश्च) ताश्च गिरः **त्वां प्रति उदहासत** स्वर्वासिनं त्वां प्रति ऊर्ध्वं गताः (ओहाङ् गतौ, लुङ्, छान्दसम्) **अजोषाः** सेवितवानसि, ताः स्तुतीः (जुषी प्रीति-सेवनयोः, लङ् छान्दसम्) । कीदृशं त्वां गिरः उद्गत्य प्राप्नुवन्? **वृषभम्** वर्षितारम्, पुनः कीदृशम्? **पतिम्** पातारं रक्षकम् ।

पञ्चमीमृचमाह—

सञ्चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम् । असदित्ते विभु प्रभु ॥५॥

सम् चोदय चित्रम् अर्वाक् राधः इन्द्र वरेण्यम् असत् इत् ते विऽभु प्रऽभु ॥

हे इन्द्र! **चित्रम्** विविधम् **वरेण्यम्** श्रेष्ठं **राधः** धनम् **अर्वाक्** अस्मदभिमुखं **सञ्चोदय** सम्यक् प्रेरय । नेदं लौकिकं पश्वादि धनं, इन्द्रस्यैवेदमिति

तत्स्वरूपं तृतीयचरणेनाह– **ते** तव इदं 'राधः' **असत् इत्** अस्त्येव, अस भुवि, (छन्दसि लेट्) कीदृशम् तत्? **विभु** विततं भवति, अपि च **प्रभु** प्रकर्षेण भवति। प्रभुत्वं एकत्र संहत्य स्थित्वा राजमानत्वं ईशितृत्वरूपं ऐश्वर्यम्। विभुत्वं तु विततत्व व्यापकतया विभूतिभूतत्वं ऐश्वर्यम्। एवं द्विविधमपि 'राधः' ऐश्वर्यमिन्द्रस्य, तदीश्वर-प्रेरणया विना नेषदपि प्राप्यम्। अन्यत्सर्वं धीमद्भिरूह्यम्॥

इति प्रथमस्य प्रथमे सप्तदशो वर्गः

अथास्मिन् सूक्ते षष्ठीमृचमाह–

अ॒स्मान्त्सु तत्र॑ चोदयेन्द्र॑ रा॒ये रभ॑स्वतः। तुवि॑द्युम्न॒ यश॑स्वतः॥६॥

अ॒स्मान् सु तत्र॑ चो॒द॒य॒ इन्द्र॑ रा॒ये रभ॑स्वतः तुवि॑ऽद्युम्न॒ यश॑स्वतः॥

हे **इन्द्र तुविद्युम्न** बहुद्युते चित्रभानो इत्यर्थः (तुवि बहुनाम, द्युम्नं द्युतिः) **अस्मान्** तव स्तावकान् **तत्र** यत्र 'विभु प्रभु राधः' वर्तते तत्र **सु** सुष्ठु **चोदय** प्रेरय। किमर्थम्? **राये** धनाय पूर्वोक्तलक्षणाय। कीदृशे? **रभस्वतः** (चतुर्थ्यर्थे षष्ठ्येकवचनम्) तीव्रवेगाय (रभ राभस्ये, तीव्रवेगेन उद्योगवते इत्यर्थः)। पुनः **यश-स्वतः** विश्रुताय चतुर्थ्यर्थे षष्ठी। पूर्वस्यामृचि तत्र तव धाम्नि स्थितं विभु प्रभु धनं अस्मदर्थं प्रेरय 'सञ्चोदय' इत्युक्तम्। अस्यां ऋचि तस्मा एव धनाय अस्मान् प्रेरय 'सुचोदय' इत्युक्तम्। तच्च दिव्यं धनं ऊर्ध्वे वर्तते, तस्मिन्नस्माकं इह लब्धव्ये स्वामिन इन्द्रस्य प्रेरणमवश्यं भवति। तेन तदस्मदर्थमिह आगच्छेत्। अस्माभिरपि तत्र गन्त-व्यम्। तत्रापि इन्द्रप्रेरणया विना गमनशक्तिर्न सिद्ध्यति। उभयथाऽपि गत्यागती स्याताम्। ऊर्ध्वस्थस्य धनस्येहागमनम्, इतश्चास्माकमूर्ध्वगमनं उभयं च इन्द्रकृतप्रेरणा-साध्यम्। प्रेर्यमाणस्य 'रायः' रभसा गतिसामर्थ्यं, तस्य विश्रुतत्वं च द्योतयितुं 'रभ-स्वतः' 'यशस्वतः' इति विशेषणद्वयम्। नेमे 'अस्मान्' इत्यस्य विशेषणे। स्तोतारः स्वयमेव 'वयं यशस्विनः सरभसं प्रार्थयामहे, अतः प्रेरय ते धनम्' इति आविष्कृतं व्याख्यानमसमञ्जसम्। तस्य ऐन्द्रस्य धनस्य स्वरूपमुत्तरत्रापि वक्ष्यते॥

सप्तमीमृचमाह–

सं गोम॑दिन्द्र वाज॑वद॒स्मे पृथु श्रवो॑ बृहत् । वि॒श्वायु॑र्धे॒ह्यक्षि॑तम् ॥७॥

सम् गोऽम॑त् इन्द्र वाज॑ऽवत् अ॒स्मे इति॑ पृथु श्रव॑ः बृहत् वि॒श्वऽआ॑युः धे॒हि अक्षि॑तम् ॥

हे इन्द्र! अस्मे अस्मभ्यं सन्धेहि सन्धानं कुरु अविच्छिन्नं यथा तथा सम्बन्धय पूर्वोक्तं रायं इति शेषः । तस्य 'राधसः' धनस्य विशेषणानि भवन्ति । 'गोमत्' प्रज्ञांशुमत् 'वाजवत्' समृद्धिमत् । अन्यच्च सन्धेहि पृथु पृथुलं विस्तीर्णं श्रवः दिव्यावेशश्रवणम् बृहत् प्रभावेण महत् च अपि च अक्षितम् क्षयरहितं विश्वायुः विश्वायुष्यं विश्वजीवितं सन्धेहि । यजमानव्यष्टौ विश्वायुष्ट्वं धातव्यमिति प्रार्थना । अत्र 'श्रवः' धनमिति कृत्वा तद्विशेषणानि गोमदादीनि गृहीतानि स्थूल-व्याख्यानेषु ॥

अष्टमीमृचमाह—

अ॒स्मे धे॑हि॒ श्रवो॑ बृ॒हद्द्यु॒म्नं स॑ह॒स्र॒सात॑मम् । इन्द्र॒ ता र॒थिनी॒रिष॑ः ॥८॥

अ॒स्मे इति॑ धे॒हि श्रव॑ः बृहत् द्युम्नं स॒ह॒स्र॒ऽसात॑मम् इन्द्र॑ ताः र॒थिनी॑ः इष॑ः ॥

हे इन्द्र अस्मे अस्मभ्यं बृहत् महत् श्रवः श्रवणं दिव्यावेशप्रेरितं धेहि धारय, देहीत्यर्थः । सहस्रसातमम् अतिशयेन सहस्रसङ्ख्यालक्षित-बाहुल्य-सम्भक्तृबह्वर्थसम्भजनसमर्थमित्यर्थः, द्युम्नम् प्रकाशं तेजो वा धेहि । रथिनीः रथः आसामस्तीति रथिन्यः ताः, (रथो रंहतेः) शीघ्रगमना इत्यर्थः इषः प्रेरणाः धेहि । ताः याः पूर्वं प्रार्थिताः 'सञ्चोदय, सुचोदय' इति । अत्र इषः अन्नानि कर्मठानां, तदनुसारेण विशेषणस्य बहुरथोपेता इति व्याख्या ॥

नवमीमृचमाह—

वसो॒रिन्द्रं॒ वसु॑पतिं गी॒र्भिर्गृ॒णन्त॑ ऋ॒ग्मिय॑म् । होम॒ गन्ता॑रमू॒तये॑ ॥९॥

वसोः इन्द्रम् वसुऽपतिम् गीःऽभिः गृणन्तः ऋग्मियम् होम गन्तारम् ऊतये ॥

वसोः वसुनः (यावल्लब्धं अन्तर्धनस्य) **ऊतये** वृद्धये **इन्द्रम् होम** वयं आह्वयामः ह्वेञ् स्पर्धायां गमने चेत्यस्य रूपम्, लट् छान्दसम् । वयं किं कुर्वन्तः? **गीर्भिर्गृणन्तः** स्तुतिभिः स्तुवन्तः। कीदृशमिन्द्रम्? **वसुपतिम्** वसूनां धनानां पतिं पालकम्, पुनश्च, **ऋग्मियम्** ऋचां मातारं (ऋचो मिमीत इति ऋग्मीः तमिति सायणव्याख्या) । अर्चना ऋक् तद्वन्तं (स्तुतियोग्यमिति स्कन्दस्वामीयम्) पुनः कीदृशम्? **गन्तारम्** यजमानं तदीयं यजनं वा गन्तुं शीलमस्येति गन्ता, तम् । अत्र 'वसोः वसुपतिम्' अन्वयं उपपादयति स्कन्दस्वामी। प्रकृष्टो वीणायामिति प्रवीणशब्दव्युत्पत्तौ सिद्धायामपि वीणायां प्रवीण इति प्रयोगो दृश्यते, एवं वसोर्वसुपतिरिति ॥

दशमीमृचमाह—

सुतेसुते न्योकसे बृहद्बृहत एदरिः । इन्द्राय शूषमर्चति ॥१०॥

सुतेऽसुते निऽओकसे बृहत् बृहते आ इत् अरिः इन्द्राय शूषम् अर्चति ॥

सुतेसुते यत्र यत्र अभिषुतः सोमः तत्र तत्रेत्यर्थः, **इन्द्राय** सोमपायिने **अरिः** स्वामी यजमानः (इयर्ति गच्छति कर्तव्यमित्यरिरित्याहुः, अरणशीलोऽरिरर्यः इत्यादि प्रागुक्तम्) **शूषम्** बलम् (इन्द्रसम्बन्धि) **अर्चति** स्तौति । कीदृशं शूषम्? **बृहत्** महत् । कीदृशे इन्द्राय? **न्योकसे** नियतं ओकः स्थानं यस्य तस्मै नियतवासस्थानाय **बृहते** महते (स्वरूपतः प्रभावतश्चेति बोध्यम्) । इन्द्रस्य नियतं दिव्यं धाम स्वर्लोकः, तत्स्वरूपं प्रागुक्तं अवधातव्यम् । आकारः इच्छब्दश्च पादपूरणौ ॥

इति प्रथमस्य प्रथमेऽष्टादशो वर्गः

तृतीयेऽनुवाके तृतीयं 'गायन्ति' इति द्वादशर्चं सूक्तम् ॥ अनुष्टुप्-छन्दस्कम् । ऋषिदेवते पूर्ववत् ॥

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥१॥

गायन्ति त्वा गायत्रिणः अर्चन्ति अर्कम् अर्किणः ब्रह्माणः त्वा शतक्रतो इति शतऽक्रतो उत् वंशम्ऽइव येमिरे ॥

हे शतक्रतो शतसङ्ख्यालक्षितबहुप्राज्ञकर्मन्, त्वा त्वां गायत्रिणः स्तोतारः गायन्ति सामभिः स्तुवन्ति, अर्किणः ऋग्भिर्मन्त्रैः अर्चन्तः, अर्कम् अर्चनीयं त्वां अर्चन्ति स्तुवन्ति । ब्रह्माणः स्वयं साक्षात्कृत-ब्रह्मपदवाच्यमन्त्राः मन्त्रदर्शिनः त्वाम् उद्येमिरे उद्धृत्य प्राप्नुवन्ति । तत्र दृष्टान्तः– वंशमिव यथा वंशं वंशनिर्मितं सोपानपथमारोहन्ति तथा, वंशः वेणुः प्रकृतिः तद्विकारः आरोहण-साधनभूतः सोपानपथोऽपि प्रकृत्या वंशेन प्रतिपाद्यते । अयं च प्रयोगः साधारणो वेदे । 'गोभिः श्रीणीतमत्सरम्' (९-४६-४) अत्र 'गोभिः गोविकारैः पयोभिः सोमं संस्कुरुत' इति सायणीयम् । इन्द्रमेव सानुमन्तं बृहन्तं शिखरिणमिव आरोहन्ति पदे पदे क्रमश इति भावः । अयमर्थः स्पष्टं समर्थितो भवति 'यत् सानोः सानुम्' इति मन्त्रवर्णेनेति न सन्देहः । 'यथा वंशाग्रे नृत्यन्तः शिल्पिनः प्रौढं वंशं उन्नतं कुर्वन्ति, यथा वा सन्मार्गवर्तिनः स्वकीयं कुलं उन्नतं कुर्वन्ति तद्वत्' इति पूर्वव्याख्या । अर्थ-सङ्गतिर्मृग्या ॥

द्वितीयामृचमाह–

यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वम् ।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥

यत् सानोः सानुम् आ अरुहत् भूरि अस्पष्ट कर्त्वम् । तत् इन्द्रः अर्थम् चेतति यूथेन वृष्णिः एजति ॥

यत् यदा सानोः एकस्मात् पर्वतसंविभागात् सानुम् अन्यं उपरिष्टात् स्थितं पर्वतप्रस्थं आरुहत् आरोहति ऋषिरन्तर्यजनाध्वगामीति शेषः (लडर्थे लङ्) भूरि प्रभूतं कर्त्वम् कर्तव्यं (कर्मनाम) आरोहणकर्मसाध्यं अस्पष्ट अस्पशत स्पृष्टवान् (स्पश स्पर्शने, लङ् लडर्थे) आरोहणीयं अवशिष्टं प्रभूतमिति स्पष्टं भवती-

त्यर्थः । **तत्** तदा **इन्द्रः अर्थम्** आरोहणलक्ष्यभूतं प्रयोजनं उच्चैर्धामेत्यर्थः, **चेतति** चेतयति (अन्तर्भावितण्यर्थः) संज्ञपयति प्रकाशयतीति यावत् । **अथ च वृष्णिः** वर्षिता स इन्द्रः **यूथेन** गणेन, स्वीयविभूतिभूतदैवतगणेन सहेत्यर्थः (मरुद्गणेनेति सायणीयम्) **एजति** कम्पते, ईषच्चलति ऋषेरिन्द्रकामस्यानुग्रहाय तदभिमुखं तद्वाचः श्रोतुं प्रवर्तत इत्यर्थः । अनयोरुभयो ऋचोरात्यन्तिकः सम्बन्धः अन्तर्यागपरेऽर्थे स्पष्टो भवति, तथा च व्याख्यातम् । विस्तरभिया नातोऽपि विवृतिः क्रियते । क्रमनियमानुसारेण ऊर्ध्वगतौ शरीरिणा पुरुषेण लभ्यमानायां, उत्तरोत्तराधिरोहे प्रभूतं प्राप्तव्यमिति स्पष्टं भवति । तादृश्यां दशायां देवराज इन्द्रः सगण 'एजति' भक्तं गम्यं समग्रं स्वधाम नेतुम् । एवं साधनरहस्यं किञ्चित् प्रदर्श्य ऋषिरिन्द्रं आसूक्तसमाप्ति स्तौति ॥

तृतीयामृचमाह—

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥३॥

युक्ष्व हि केशिना हरी इति वृषणा कक्ष्यऽप्रा अथ नः इन्द्र सोमऽपाः गिराम् उपऽश्रुतिं चर ॥

हे **सोमपाः** सोमस्य पातः, **इन्द्र! हरी** त्वदीयावश्वौ **युक्ष्व हि** संयोजय (छान्दसः श्नम्लोपः) । कीदृशौ हरी? **केशिना** केशिनौ, प्रशस्ताः स्कन्धप्रदेशे लम्बमानाः केशाः अनयोः । पुनः कीदृशौ? **वृषणा** वर्षितारौ स्वीयेन ओजसा सेक्तारौ । पुनः कीदृशौ? **कक्ष्यप्रा** पुष्टाङ्गौ (कक्ष्या उदरबन्धनरज्जुः तस्याः पूरकौ, अतः शरीरपुष्टिं द्योतयितुमिदं विशेषणम्) **अथ** एवं अश्वयोगसन्नाहादनन्तरं **नः** अस्माकं **गिराम्** स्तुतीनां **उपश्रुतिम्** श्रुतेः समीपं **चर** आगच्छ, यावति देशे नः स्तुतयः त्वदीयश्रवणगोचराः भवन्ति तावन्तं देशं प्राप्नुहीत्यर्थः । अश्वः प्राणबलसङ्केतोऽस्माकं परिचितः । इन्द्रहयोर्विशेषतः कान्तिमत्त्वं स्मार्यम् । 'केशिनौ' केशैः मशकमक्षिकादयः तामसाः शकयो विधूयन्ते । 'वृषणौ' अन्तर्याजिन ओजसो वर्धयितारौ ।

'कक्ष्यप्रा' पुष्टौ सन्तौ आयासवर्जं देवराजं वहतः यजमानानुग्रहाय । अत्र तात्पर्यग्रहणपद्धतिः सूचिता । अन्यत् स्पष्टं भवेन्मतिमताम् ॥

चतुर्थीमृचमाह–

एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव ।
ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥४॥

आ इहि स्तोमान् अभि स्वर अभि गृणीहि आ रुव ब्रह्म च नः वसो इति सचा इन्द्र यज्ञं च वर्धय ॥

हे इन्द्र एहि आगच्छ । स्तोमान् अस्मदीयानि स्तोत्राणि अभिस्वर अभिमुखीभूय ॐ इति अनुज्ञाक्षरं शब्दय, 'ओमित्यनुज्ञाक्षरं' 'ओमिति स्वरन्नुदेति' इति छन्दोगाः (स्वरतिर्न शब्दसामान्यार्थकः, तत्र वैशिष्ट्यं बोध्यम् । ओमिति स्वरात्मकं शब्दं कुर्वित्यर्थः) एवमनुज्ञानात्परं अभिगृणीहि आरुव अभितः गृणीहि, सर्वतः शब्दय (हेतुमत्कर्तृतया उभयत्रापि इन्द्रस्य कर्तृत्वं इति स्कन्दस्वामीयं उपपन्नतरं, त्वमेव स्तावय उच्चारयेत्यर्थः) । वसो वसुभूत, सर्वस्यापि प्राप्तव्यत्वेन धनभूत, (अन्तर्णीतमत्वर्थे) धनवन्, (शतपथे वसिष्ठ इति वसुशब्दः प्रशस्यनामेति च स्कन्दस्वामी) नः अस्माकं ब्रह्म च मन्त्रं च यज्ञं च सचा सह वर्धय वृद्धिं प्रापय । मन्त्रात्मकं ब्रह्म ज्ञानसम्पाद्यं ज्ञानसम्पादकं च भवति । यज्ञो यजनम्, तच्च योगयुक्तकर्मानुष्ठानेन सम्पाद्यं तस्य सम्पादकं च भवति । इदमुभयं भक्तस्येन्द्रानुग्रहलभ्यम् । तस्माद्वर्धय इति प्रार्थना ॥

पञ्चमीमृचमाह–

उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
शक्रो यथा सुतेषु णो रारणत् सख्येषु च ॥५॥

उक्थम् इन्द्राय शंस्यम् वर्धनम् पुरुनिःऽसिधे शक्रः यथा सुतेषु नः ररणत् सख्येषु च ॥

इन्द्राय उक्थम् ऋग्रूपं शस्त्राख्यं स्तोत्रम् **शंस्यम्** शंसनीयम् । कीदृशं उक्थम्? **वर्धनम्** सामर्थ्यात् इन्द्रस्य, उपास्या स्तुता देवता उपासके वर्धते । कीदृशायेन्द्राय? **पुरुनिष्षिधे** पुरूणां शत्रूणां निषेधकाय निवारकायेत्यर्थः (निरुपसर्गस्य निशब्दार्थः, षिध गत्याम्, क्विप्) । केन प्रकारेण शंस्यम्? यथा पुत्रेषु पिता, सख्येषु विषये सखा वा रमते तथेत्याह । **शक्रः** शक्त इन्द्रः (शक्नोतेः) **नः** अस्मदर्थं **सुतेषु** पुत्रेषु, **सख्येषु** सखित्वेषु च **यथा** **रारणत्** रमेत तथा शंस्यम् । (रारणत्, रमेर्द्विर्भावः मस्य णः छान्दसः लेट्) ॥

षष्ठीमृचमाह—

तमित्सखित्व ईमहे तं राये तं सुवीर्ये ।
स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥६॥

तम् इत् सखिऽत्वे ईमहे तम् राये तम् सुऽवीर्ये स शक्रः उत नः शकत् इन्द्रः वसु दयमानः ॥

तमित् तमेवेन्द्रं **सखित्वे** सख्ये (निमित्तसप्तमी) **ईमहे** प्रार्थयामहे । **तम् राये** धनार्थं 'ईमहे' । **तम्** सुवीर्ये शोभनाय सामर्थ्याय च (निमित्तसप्तमी) 'ईमहे' । **उत** अपि च **सः शक्रः** शक्तः **इन्द्रः वसु** धनं दिव्यं श्रेष्ठं **नः** अस्मभ्यं **दयमानः** वितरन् **शकत्** शक्नोति शक्तो भवति ॥

इति प्रथमस्य प्रथमे एकोनविंशो वर्गः

सप्तमीमृचमाह—

सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः ।
गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥७॥

सुऽविवृतम् सुनिःऽअजम् इन्द्र त्वाऽदातम् इत् यशः गवाम् अप व्रजम् वृधि कृणुष्व राधः अद्रिऽवः ॥

हे इन्द्र यशः त्वदीयं वैभवं (प्रभावप्रसारशालिव्यापकत्वमेव यशः) **सुविवृतं** सुष्ठु अनावृतं, प्रकटमित्यर्थः । **सुनिरजम्** सुखेनानायासेन निर्गन्तुं शक्यम्, निष्प्रतिबन्धविसारक्षममित्यर्थः, सुनिष्पूर्वकस्य गत्यर्थस्य अज-धातोः खलि रूपम् । **त्वादातम् इत्** त्वया शोधितमेव (दैप् शोधने कर्मणि क्तः) वृत्रतद्विभूतिभूतास्त्वद्वैभवविघातका अपसारिताः । तेन शोधनेन निष्प्रतिरोधं त्वद्यशोऽस्मान् परितो विलसतीति भावः । अतः परं इन्द्रस्यैव कार्यमाह । हे **अद्रिवः** पर्वतलक्षितवज्रोपेत अद्रिरस्येति मतुप् छान्दसम्, गावो यत्र गूढा आसन् स पर्वतः अधुना तव वशं गतः, तस्मात् पर्वतवन् पर्वतस्वामिन् इति युक्तमामन्त्रणम् (पर्वतो जडस्य सङ्केतः स्मार्यः) । **गवां व्रजम्** प्रज्ञानरश्मीनां आवासस्थानम् **अपवृधि** उद्घाटितद्वारं कुरु । **राधः** वृद्धिरूपं सिद्धिरूपं वा धनं **कृणुष्व** कुरु सम्पादयेत्यर्थः । राध्यतेः राध्नोतेर्वा राधः । त्वद्वैभवं अस्मान् परितो लब्धप्रसरं ज्योतिः शत्रूणामपगमेन त्वयैव स्वच्छं कृतमधुना । तदस्मभ्यं दिव्यचिद्रश्मीन् तद्धाम्नः द्वारमुद्घाट्य विसर्जय, एवं सिद्धिं नः सम्पादयेति समस्तार्थः । स्थूलव्याख्यानेषु 'यशः अन्नं' इति कृत्वा कथमपि तात्पर्यमाविष्कृतम् ॥

अष्टमीमृचमाह–

> न हि त्वा रोदसी उभे ऋघायमाणमिन्वतः ।
> जेषः स्वर्वतीरपः सङ्गा अस्मभ्यं धूनुहि ॥८॥

न हि त्वा रोदसी इति उभे इति ऋघायमाणम् इन्वतः जेषः स्वःऽवतीः अपः सम् गाः अस्मभ्यम् धूनुहि ॥

हे इन्द्र! **रोदसी** द्यौः पृथिवी उभे अपि **ऋघायमाणम्** उग्रतया अवतिष्ठमानं **त्वाम् न हि इन्वतः** न व्याप्नुतः, त्वां धर्तुं न शक्नुत इत्यर्थः (नेत्यर्थे 'नहि' इति निपातः) । त्वं **स्वर्वतीः** स्वरादित्यः स्वर्लोको वा तद्वत्यः ज्योतिष्मत्यः ताः **अपः** अप्छन्दसङ्केतिताः ब्रह्माण्डधारणपोषणात्मिकाः ज्योतिर्वाहिनीः शक्तीः **जेषः** जयसि (जयतेः लेट् छान्दसं, जयेरित्याशासनम् । तात्त्विकी सार्वकालिकजय-

क्रिया, अतो लडर्थे) । चिडयोतिरावरकवृत्ररूपतमोद्रिभेदनात् उक्तलक्षणानां अपां जयः बोध्यः । अत आह- अस्मभ्यं गाः प्रज्ञानमरीचीः सन्धूनुहि प्रेरय । ऋघायमाणम्- अत्र शत्रुहिंसां कुर्वन्तमिति व्याख्यातारः । 'नॄन् हन्तीति नृहा, नकारलोपः, हकारस्य घकारः, एवं ऋघा ततः अभूततद्भावे लोहितादि-डाज्भ्यः क्यष् । तस्मादात्मनेपदम्, लटः शानच्' इति सायणीया व्युत्पत्तिः ॥

नवमीमृचमाह-

आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः ।
इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥९॥

आश्रुत्ऽकर्ण श्रुधि हवम् नु चित् दधिष्व मे गिरः इन्द्र स्तोमम् इमम् मम कृष्व युजः चित् अन्तरम् ॥

आश्रुत्कर्ण आ सर्वतः शृणुत इति आश्रुतौ (क्विप्) तौ कर्णौ यस्य तादृश, इन्द्र मे मम हवम् आह्वानं श्रुधि शृणु नु क्षिप्रम् । शीघ्रश्रवणशालिनौ कर्णौ तीव्रौ, न मन्दौ, तस्मात् क्षिप्रमाकर्णनं प्रार्थ्यते । गिरः चित् स्तुतीरपि दधिष्व धत्स्व (दधातेः छान्दसम्) चित्ते धारयेत्यर्थः । युजः युञ्जतः त्वयि युक्तस्य सख्युः मम इमं स्तोमम् स्तोत्रं अन्तरम् चित् अत्यासन्नमपि कृष्व कुरु [अन्ततरं समीपम् । अत एव 'आसन्नं' इति सायणीयम् । अर्थात् प्रियं हृद्यमिति बोध्यम् । तरप्-तमपोः तकारलोपः छान्दसः 'अन्तमानाम्' इति प्रयोगेऽपि द्रष्टव्यः] आह्वानस्य श्रवणम्, गिरां चित्ते धारणम्, स्तोमस्य हृद्यत्वेन स्वीकरणम्, इति पदत्रयवान् क्रमः ऋषेः स्तवप्रकारगतः, तदनुरोधेन इन्द्रस्य तत्स्वीकारगतश्चेति लक्षणीयम् ॥

दशमीमृचमाह-

विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम् ।
वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् ॥१०॥

विद्म हि त्वा वृषन्ऽतमम् वाजेषु हवनऽश्रुतम् वृषन्ऽतमस्य हूमहे ऊतिम् सहस्रऽसातमाम् ॥

हे इन्द्र, त्वा त्वां वृषन्तमम् अतिशयेन वर्षितारं दिव्यानाममीष्टानाम् । वाजेषु समृद्धिषु निमित्तभूतासु हवनश्रुतम् आह्वानस्य श्रोतारम् (विधेयविशेषणे द्वे अपि) विद्म विद्मः (मसो मादेशः) । हि यस्मादेवं जानीमः तस्मात् वृषन्तमस्य अतिशयेन वर्षितुस्तव ऊतिम् त्वत्कर्तृकां वृद्धिं हूमहे आह्वयामः । कीदृशीमूतिम्? सहस्रसातमाम् अतिशयेन सहस्रस्य दात्रीम् । सहस्रं बहुविधस्य ऐश्वर्यस्य द्योतकम् ॥

एकादशीमृचमाह–

आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब ।
नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम् ॥११॥

आ तु नः इन्द्र कौशिक मन्दसानः सुतम् पिब नव्यम् आयुः प्र सु तिर कृधि सहस्रऽसाम् ऋषिम् ॥

ऐषिरथेः कुशिकस्य प्रार्थनानुरोधेन इन्द्र एव तत्पुत्रो विश्वामित्रो जात इति वृत्तान्तमुदाहृत्य 'कौशिक' इति अस्यामृचि इन्द्रस्य सम्बोधनमुपपादयन्ति व्याख्यातारः । ऋग्वेदे बहुषु सूक्तेषु उपासक ऋषिरुपास्यमानं देवं स्वनाम्नाऽभिधत्ते । अत्र कारणमिदं भवति । उपासके मानुषे उपास्यस्य दैवतस्य जन्मलाभात् स्वनाम्ना ऋषिर्व्यवहरति साक्षात्कृतं तद्दैवतम् । स्वात्मरूपतया दैवतं पश्यतीत्युक्तम् भवति । अन्यच्च, ऋषेः स्वनाम्ना गोत्रनाम्ना वा देवतायां अभिहितायां, ऋषौ देवतायां च अवयवार्थ उपपद्यते । गोतम-जमदग्नि-भरद्वाजादयोऽत्र निदर्शनम् । अस्मिन्, कुशिकस्य गोत्रापत्यं कौशिको मधुच्छन्दाः । कोशादृषेः शारीरकोशाद्भवति, ब्रह्माण्डकोशे वा भवतीति कौशिकः (भवार्थे ठक्) । अथ ऋगर्थः स्पष्टो भवति । हे इन्द्र कौशिक नः अस्मदर्थं आ आगच्छ । तु पादपूरणः । कीदृशः सन्? मन्दसानः (मन्दतेः असानच्) मोदमानः ।

आगत्य **सुतम्** अभिषुतं सोमं पिब । **नव्यम्** स्तुत्यं उत्कृष्टं नवं नूतनं वा **आयुः** जीवितं अस्मदीयमिति शेषः । **प्रसुतिर** प्रकर्षेण सुष्ठु वर्धय (तरतेर्व्यत्यय इति सायणीयम्) । अपि च **सहस्रसाम्** सहस्रस्य संभक्तारं **ऋषिम्** अतीन्द्रियार्थदर्शिनं **कृधि** कुरु । अतीन्द्रियदर्शने सिद्धे विभवसहस्रप्राप्तेः सम्भव इति तथाविधमृषित्वं मे सम्पादयेत्युक्तम् ॥

द्वादशीमृचमाह—

परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वतः॑ ।

वृ॒द्धायु॒मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः ॥१२॥

परि॑ त्वा॒ गि॒र्व॒णः॒ गिरः॑ इ॒माः भ॒व॒न्तु॒ वि॒श्वतः॑ वृ॒द्धऽआ॑युम् अनु॑ वृद्ध॑यः जुष्टाः॑ भ॒व॒न्तु॒ जुष्ट॑यः ॥

हे **गिर्वणः** गीर्भिर्वननीय स्तोत्रभागित्यर्थः, **विश्वतः** सर्वथा, सर्वासु अवस्थासु सर्वेष्वाराधनेषु, **इमाः** मदीयाः **गिरः** स्तुतयः **त्वा परि** त्वां परितः **भवन्तु** प्राप्नुवन्तु । कीदृश्यो गिरः? **वृद्धायुम् अनु** (अस्मासु) प्रवृद्धजीवितं (त्वां) अनुसृत्य **वृद्धयः** वर्धमानाः, **जुष्टाः** सेविताः, त्वया प्रीत्या स्वीकृता इत्यर्थः, **जुष्टयः** प्रीतिहेतवः **भवन्तु** (त्वत्प्रीतिरेवास्माकं प्रीतिहेतुरिति हृदयम्) ।

इति प्रथमस्य प्रथमे विंशो वर्गः

अथ 'इन्द्रं विश्वा' इत्यनुष्टुप्छन्दस्कं अष्टर्चं सूक्तम् । अस्य जेता मधुच्छन्दसः पुत्र ऋषिः, इन्द्र एव देवता । तत्र प्रथमामृचमाह—

इन्द्रं॒ विश्वा॑ अवीवृधन्त्समु॒द्रव्य॑चसं॒ गिरः॑ ।

र॒थीत॑मं र॒थीनां॒ वाजा॑नां॒ सत्प॑तिं॒ पति॑म् ॥१॥

इन्द्र॑म् विश्वाः॑ अ॒वी॒वृ॒ध॒न् स॒मु॒द्रऽव्य॑चसम् गिरः॑ र॒थिऽत॑मम् र॒थिना॑म् वाजा॑नाम् सत्ऽप॑तिम् पति॑म् ॥

विश्वाः समस्ताः गिरः स्तुतयः इन्द्रम् अवीवृधन् वर्धितवत्यः, स्तूयमानो देवः स्तोतरि आधारे वर्धते । कीदृशम्? समुद्रव्यचसम् समुद्रवद् व्याप्तवन्तम्, अन्तरिक्षवत् सर्वव्यापिनम् इति साधीयानर्थः, अन्तरिक्षपर्यायत्वात् समुद्रस्य (व्याप्त्यर्थाद्व्यचेरसुन्) । पुनः रथिनाम् रथयुक्तानां मध्ये रथितमम् अतिशयेन रथिनम् वेगार्थाद्रंहतेः रथः प्रागुक्तः, इदं च विशेषणं सर्वव्यापक आकाश इव न केवलं निश्चलः, सर्वत्र शीघ्रगामीति प्रतिपादनार्थम् । पुनश्च वाजानां पतिम् बहुविधानां समृद्धीनां पालकं ईश्वरम्, अपि च सत्पतिम् सतां प्राप्तसत्ताकानां सर्वेषामपि सृष्टानां पालकं, ईश्वरम् ॥

द्वितीयामृचमाह—

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।
त्वामभि प्र णोनुमो जेतारमपराजितम् ॥२॥

सख्ये ते इन्द्र वाजिनः मा भेम शवसः पते त्वाम् अभि प्र नोनुमः जेतारम् अपराऽजितम् ॥

हे शवसः पते दीप्तिमद्बलस्य स्वामिन् इन्द्र! ते तव सख्ये सखित्वे वर्तमानाः वाजिनः समृद्धिमन्तः वयम् मा भेम मा भैष्म (च्लेर्लोपादि छान्दसम्) शत्रुभ्यो भीता मा भूमेत्यर्थः । त्वाम् अभिप्रणोनुमः सर्वतः प्रकर्षेण स्तुमः । कीदृशं त्वाम्? जेतारम् सर्वत्र जयशीलम् । अपराजितम् पराजयरहितम् । अत्र ऋषिर्भक्तः स्वनाम्ना भगवन्तं स्तौति । तत्र युक्तिः प्रागुक्ता अवधेया ॥

तृतीयामृचमाह—

पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः ।
यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥३॥

पूर्वीः इन्द्रस्य रातयः न वि दस्यन्ति ऊतयः यदि वाजस्य गोऽमतः स्तोतृऽभ्यः मंहते मघम् ॥

इन्द्रस्य रातयः दानानि रातिर्दानकर्मा, पूर्वीः बह्वयः बहूनि तस्यानुग्रहकार्याणि दानानीत्यर्थः । अथवा पूर्वीश्चिरन्तन्यो रातयः, स्वभावसिद्धास्तस्येत्यर्थः । तस्मात् स इन्द्रः स्तोतृभ्यः भक्तेभ्यः गोमतः प्रज्ञानकिरणसम्पन्नस्य वाजस्य समृद्धिवाचिनो धनस्य सम्बन्धिनं अंशभूतं मघम् धनं मंहते ददाति यदि, ऊतयः तस्य वृद्धयो नित्याः न विदस्यन्ति नोपक्षीयन्ते । इन्द्रस्य अगण्यानां ऐश्वर्याणां नित्यवर्धनानां नित्यदानैरपि नास्ति क्षयः । ऐश्वर्यस्य धनस्य स्वरूपं गोमद्वाजशब्दप्रयोगेणोक्तम् ॥

चतुर्थीमृचमाह—

पुरां भिन्दुर्युवा कविरमितौजा अजायत　　।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥४॥

पुराम् भिन्दुः युवा कविः अमितऽओजाः अजायत इन्द्रः विश्वस्य कर्मणः धर्ता वज्री पुरुऽस्तुतः ॥

अयं इन्द्रः अजायत समपद्यत । किंप्रभावः, किंगुणविशिष्टः? पुरां भिन्दुः असुरवासपुराणां भेदकः । भिदेर्भेदनार्थाद्धातोर्भिन्दुः तेन दुर्भेद्यानि दुर्गवन्ति पुराणि, तेषां भेदनीयत्वाक्षेपात् तानि देवद्विषां सम्बन्धीनीति च द्योतितम् । युवा यौवनसम्पन्नः औद्धत्यं असुरपुरध्वंसायावश्यम्, यौवनेन तल्लक्षितम् । कविः द्रष्टा सर्वान्तरदर्शी, गूढानामसुरदुर्गवासस्थानानां दर्शने समर्थः । अमितौजाः अमितं प्रभूतं ओजो बलमस्य । विश्वस्य कर्मणः धर्ता धारयिता, तेनैव धार्यन्ते सर्वाणि अस्मदन्तर्यजनानि । वज्री वज्रयुक्तः तमोवृत्रादिशत्रुभेदनाय । पुरुष्टुतः बहुभिः बहुषु कार्येषु वा स्तुतः स्तुत्या आश्रितः ॥

पञ्चमीमृचमाह—

त्वं वलस्य गोमतोऽपावरद्रिवो बिलम्　　।
त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥५॥

त्वम् वलस्य गोऽमतः अप अवः अद्रिऽवः बिलम् त्वाम् देवाः अबिभ्युषः तुज्यमानासः आविषुः ॥

स्वर्वतीर्गाः अपहृत्य पर्वतगुहायां क्वापि अन्धतमसे जडोपलक्षणे निहितवानसुरो वलो वृत्रबन्धुः । पिहितद्वारं तद्बिलं अभियां देवानां साहाय्येन उद्घाट्य, तास्सौरीः ऐन्द्रीर्वा गा विमोच्य पुनर्लब्धवान् । जडांशभूयिष्ठे देहे तामसेषु छिद्रेषु चिज्ज्योतिर्मरीचयो गोपिताः दिव्यज्योतिश्शत्रूणां एकेनासुरेण वलयित्रा शक्तिविशेषेण । ऋतचित्तेजोबलभासिना चेतसा साधनेन तदध्यक्षेण स्वर्धाम्ना इन्द्रेण गूढं घनं छिद्रं प्रविश्य उक्तस्वरूपाः गावो निस्सारिताः । इदं च वृत्तान्तान्वाख्यानस्य तत्त्वं सङ्क्षेपत उक्तम् । सुरूपकृत्नुमिति सूक्तस्य व्याख्याऽप्यत्रावधेया । अद्रिवः हे वज्रिन्! त्वम् गोमतः गोयुक्तस्य वलस्य उक्तलक्षणस्य बिलम् छिद्रं अपावः अपावृणोः वृञ्-वरणे लङ् छान्दसम्, देवाः त्वत्सहायाः मरुत इति व्याख्यातारः ब्राह्मणमुदाहरन्ति, अबिभ्युषः अबिभिवांसः प्रथमार्थे द्वितीया, अभीताः शत्रोरित्यर्थः, तुज्यमानासः क्षिप्रनामैतत्, त्वरमाणा इति स्कन्दस्वामी । त्वाम् आविषुः आविविशुः (लिट् विशेः, अभ्यासाभावः छान्दसः शकारस्य षश्च) ॥

षष्ठीमृचमाह—

तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन् ।
उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ॥६॥

तव अहं शूर रातिऽभिः प्रति आयम् सिन्धुम् आऽवदन् उप अतिष्ठन्त गिर्वणः विदुः ते तस्य कारवः ॥

गिर्वणः स्तुतिभिः सम्भजनीय! शूर शौर्योपेत इन्द्र तव रातिभिः अनुग्रहलक्षणैः दानैः सिन्धुम् स्यन्दमानं सिन्धुवत् प्रवहन्तं त्वां, सोममित्येके व्याख्यातारः प्रत्यायम् प्रत्यागमं त्वत्सन्निधिमहमागतवानस्मीत्यर्थः । आयम्, इण् गतौ लङ् । किं कुर्वन्? आ वदन् सर्वतः उच्चारयन् ख्यापयन्नित्यर्थः, तव महिमानमिति शेषः ।

शूरस्य तव प्रसादाल्लब्धैः तेजो-बल-पराक्रमैरेव सर्वत्र कृतयानस्मि योगयात्राम् । अस्मदीयान्न-प्राण-मनोगतसोमरसशोषणैरसुरैरशोषितः सन् सिन्धुवन्नित्यरसप्रवाहं त्वां प्राप्तवानस्मीति भावः । 'शूर' 'सिन्धुम्' इति प्रयोगस्य प्रयोजनं बोध्यम् । 'मायाभिः' इत्युत्तरर्चा सम्बन्धोऽस्या ग्राह्यः । तदिदं ते माहात्म्यं यद् विशुद्धबुद्धयो यज्ञशालिनो वा त्वामुपतिष्ठन्ते । मन्त्रकृतामृषीणां तत्त्वे विदितमिति चेत्युत्तरार्धेनाह । गिर्वणः गीर्भिर्वननीय हे इन्द्र, मेधाविनो यज्ञवन्तो वा उपातिष्ठन्त उपतिष्ठन्ते स्तुतिभिस्त्वामिति शेषः । तस्य तादृशस्य ते तव महिमानं कारवः कर्तारः स्तोत्राणाम् विदुः जानन्ति ॥

सप्तमीमृचमाह—

मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः ।
विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥७॥

मायाभिः इन्द्र मायिनं त्वम् शुष्णम् अव अतिरः विदुः ते तस्य मेधिराः तेषां श्रवांसि उत् तिर ॥

हे इन्द्र त्वम् मायाभिः तव प्रज्ञाभिः कापट्यगवेषणदर्शनविध्वंसनकुशलाभिः विविधाभिरित्यर्थः मायिनम् विविधकपटप्रज्ञोपेतं शुष्णम् एतन्नामकं असुरं अवातिरः हतवानसि अवतिरतिर्वधकर्मेति स्कन्दस्वामी, अधस्तात् कृतवान् इत्युपपन्नः पदार्थः । मेधिराः मेधाविन ऋषयः तस्य ते तादृशस्तव महिमानं विदुः जानन्ति । तेषां ऋषीणां श्रवांसि श्रवणानि दिव्यानि उत्तिर वर्धय, उत्कृष्टानि कुरु । वृत्रबन्धुर्वल इव तज्जातीयकोऽसुरः शुष्णः शोषयिता रसानां [भूतानां इत्येके] । अन्यत्प्राग्व्याख्यातं 'सिन्धुम्' इति प्रसक्तौ । 'विदुष्टे तस्य' इति आवृत्तिः 'मेधिराः' 'कारवः' इति श्रवणं च उभयोर्ऋचोः सम्बन्धं द्योतयेताम् ॥

अष्टमीमृचमाह—

इन्द्रमीशानमोजसाभि स्तोमा अनूषत ।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥८॥

इन्द्रम् ईशानम् ओजसा अभि स्तोमाः अनूषत सहस्रम् यस्य रातयः उत वा सन्ति भूयसीः ॥

ओजसा बलेन ईशानम् विश्वस्य नियामकं ईश्वरं (ईशे इत्यस्मात् शानच्)। इन्द्रं स्तोमाः स्तोतारः अभ्यनूषत अभिमुखं स्तुवन्ति, लडर्थे लुङ् । यस्य इन्द्रस्य रातयः दानानि सहस्रम् बहुसङ्ख्योपलक्षणमिदम्, सन्ति, उत वा अपि वा भूयसीः भूयस्यः विभक्तिव्यत्ययः, बहुतराः सन्ति भवन्ति ॥

सूक्तेऽस्मिन् ऋचां पदार्थकथन एव सामान्यतस्तत्र तत्र तात्पर्यमाविष्कृतमिति नेह विस्तर इष्यते । मधुच्छन्दस एवेदमपि सूक्तं न तत्पुत्रस्येति प्राहुरेके । तथा आनन्दतीर्थ-आचार्यो मन्यते । ऋषिर्जेतैव भवतु मा वा । तात्पर्यावगतौ ऋषिनिर्णयं अधिकृत्य मतभेदोऽकिञ्चित्करः, विशेषतो गतिसामान्यात् । माधुच्छन्दसानि सूक्तानि एकादश दाशतय्यामाद्यानि व्याख्यातानि । अग्नीन्द्रादि-देवतानां तत्त्वं भूमिकायां प्रतिपादितमवधृत्य एषां सूक्तानां अवलोकने गूढार्थपद्धतिर्विशदा भवेदित्यसंशयम् ॥

इति प्रथमस्य प्रथमे एकविंशो वर्गः

इति तृतीयोऽनुवाकः

अथ चतुर्थोऽनुवाकः । तत्र षट्सूक्तानि । ऋषिर्मेधातिथिः कण्वपुत्रः । आद्यं अग्निंदूतमिति द्वादशर्चं आग्नेयं गायत्रं सूक्तम् । तत्र प्रथमामृचमाह–

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥१॥

अग्निं दूतं वृणीमहे होतारम् विश्वऽवेदसम् अस्य यज्ञस्य सुऽक्रतुम् ॥

अग्निम् वृणीमहे अभ्यर्थयामहे इति स्कन्दस्वामी । अस्मदर्थं देवान् प्रति दूतत्वे अध्येषामहे इत्युपपन्नतरम् । कीदृशम्? दूतम् सामर्थ्याद्विधेयविशेषणं ग्राह्यम् । पुनः कीदृशम्? होतारम् आह्वातारम् । पुनश्च विश्ववेदसम् विश्वस्य वेत्तारम् । अस्य प्रवर्तमानस्य यज्ञस्य सुक्रतुम् शोभनकर्माणम् । कर्मणि प्रज्ञायां च वर्तते क्रतुशब्दः । अत्र विश्वज्ञानसम्पन्नमिति विशेषणमन्यत् प्रयुक्तमवधेयम् । तस्मात् कर्मेति ग्रहणमुपपद्यते ॥

द्वितीयामृचमाह—

अ॒ग्निम॑ग्निं॒ हवी॑मभिः॒ सदा॑ हवन्त वि॒श्पति॑म् । ह॒व्य॒वाहं॑ पुरुप्रि॒यम् ॥२॥

अ॒ग्निम्ऽअ॑ग्निम् हवी॑मऽभिः सदा॑ ह॒व॒न्त॒ वि॒श्पति॑म् ह॒व्य॒ऽवाह॑म् पु॒रु॒ऽप्रि॒यम् ॥

अग्निमग्निम् वीप्सायां द्विर्भावः, अग्निमेव सर्वत्र यजमाना ऋषयः हवीमभिः आह्वानमन्त्रैः, ह्वेञ्-धातोः मनिन् छान्दसम् । सदा हवन्त आह्वयन्ति, लडर्थे लङ् छान्दसम् । कीदृशम्? विश्पतिम् प्रजानां पालकम् । हव्यवाहम् यजमानेन समर्प्यमाणानां हव्यानां देवान् प्रति वोढारं प्रापकमित्यर्थः । पुरुप्रियम् पुरूणां बहूनां प्रियम् । अन्तर्यजने हविरादीनि धनद्रव्याणि शरीरसम्बन्धीनि अंशतः साकल्येन च अर्पणीयानि ग्राह्याणि । येनार्पणेन देवाधीनं क्रियते शरीरम् । अन्यत् सर्वं सुगमं अन्तरर्थे ॥

अग्ने॑ दे॒वाँ इ॒हा व॑ह जज्ञा॒नो वृ॒क्तब॑र्हिषे । असि॒ होता॑ न॒ ईड्यः॑ ॥३॥

अग्ने॑ दे॒वान् इ॒ह आ व॒ह॒ ज॒ज्ञा॒नः वृ॒क्तऽब॑र्हिषे असि॑ होता॑ न॒ः ईड्यः॑ ॥

हे अग्ने त्वं जज्ञानः जायमानः, अन्तर्यजमाने मयि प्रादुर्भवन्नित्यर्थः, जनेः लिटि कानच्, जानातेर्वा इति स्कन्दस्वामी । वृक्तबर्हिषे वृक्तं आस्तीर्णं बर्हिर्येन तस्मै यजमानाय देवान् इह अत्रेदं मम यजनं आवह आनय । नः अस्माकं ईड्यः अध्येषणीयत्वेन स्तुत्यः त्वं होता आह्वाता देवानां असि ॥

वृक्तबर्हिषे— व्याख्यातम्, अन्तर्यजने देवानामागमने आसनसमाह इत्यादि प्रागुक्तम् 'दस्रा युवाकवः' इति मन्त्रस्य विचारे (पृ. ११३-११५) ॥

चतुर्थीमृचमाह—

ताँ उ॑श॒तो वि बो॑धय॒ यद॑ग्ने॒ यासि॑ दू॒त्य॑म् । दे॒वैरा स॑त्सि ब॒र्हिषि॑ ॥४॥

तान् उ॒श॒तः वि बो॒ध॒य॒ यत् अ॒ग्ने॒ यासि॑ दू॒त्य॑म् दे॒वैः आ स॒त्सि॒ ब॒र्हिषि॑ ॥

हे अग्ने यत् यस्मात्कारणात्, येषां यान् प्रति वा दूत्यं दूतकर्म यासि गच्छसि वहसीत्यर्थः, तस्मात्, तान् उशतः कामयमानान् यज्ञमिति शेषः, देवान् विबोधय प्रबुद्धान् कुरु। विबोध्य च तैः देवैः सह बर्हिषि उचिते सिद्धे च अस्मिन्नासने आसत्सि आसीदसि, आसीदेत्यर्थः, सीदतेर्लट् छान्दसम् ॥

पञ्चमीमृचमाह–

घृताहवन दीदिवः प्रति ष्म रिषतो दह । अग्ने त्वं रक्षस्विनः ॥५॥

घृतऽआहवन दीदिऽवः प्रति स्म रिषतः दह अग्ने त्वम् रक्षस्विनः ॥

हे अग्ने घृताहवन घृतेनाहूयमान, दीप्तया धिया आहूयतेऽग्निरन्तर्यजने, 'धियं घृताचीम्' इत्यत्र घृतं व्याख्यातम् (पृ. १०७)। दीदिवः द्योतमान, द्योतनार्थाद् दीव्यतेः लिटः क्वसुन्, अन्यत् छान्दसम्। प्रति प्रतिकूलमाचरतो रिषतः शत्रून् हिंसार्थाद् रिषतेः शतृ। दह स्म भस्मीकुरु। स्मेति पादपूरणो वा। कीदृशान् रिषतः? रक्षस्विनः रक्षोयुक्तान्, रक्षश्शब्दान्मतुबर्थे विनिः ॥

षष्ठीमृचमाह–

अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः ॥६॥

अग्निना अग्निः सम् इध्यते कविः गृहऽपतिः युवा हव्यऽवाट् जुहुऽआस्यः ॥

अग्निः आहवनीयः, अन्तर्यजननिर्वाहार्थं आह्वातव्यः ऋतचिद्धामा दिव्यः। अग्निना यजमानतपोबलादन्तर्निर्मथ्येनाग्निना समिध्यते सम्यग्दीप्यते [तपो ब्रह्म, तपसा विजिज्ञासस्वेतिवत् अग्निना अग्निः सम्पाद्यः। अलसस्य स दुर्लभः, ऋषेरार्यस्य कृष्टेरग्निहोत्रं स्वभावसिद्धं सहजं कर्म]। कीदृशोऽग्निः? कविः अतीन्द्रियदर्शी। गृहपतिः अग्नये भगवते सर्वथा यजमानेन आत्मसमर्पणे क्रियमाणे, तस्य गृहस्य वासस्थानस्य स्वामी भवत्यग्निः, गृहस्य पालकः। युवा स नित्ययौवनः, हव्यवाट् हव्यानां वोढा [व्याख्यातम्], जुह्वास्यः जुहूरास्यं मुखमस्य, जिह्वा ज्वाला भवति।

अग्नेः सैव मुखम् (जुहोतेर्जुहूः) 'जुहूभिर्जिह्वाभिः' सायणीयम् (१-५८-४) 'उत्तानं ऊर्ध्वः अभयत् जुहूभिः' (५-१-३) ॥

इति प्रथमस्य प्रथमे द्वाविंशो वर्गः

अथास्मिन् सप्तमीमृचमाह—

कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे । देवममीवचातनम् ॥७॥

कविम् अग्निम् उप स्तुहि सत्यऽधर्माणम् अध्वरे देवम् अमीवऽचातनम् ॥

अग्निम् उप उपेत्य स्तुहि स्तुतिं कुरु । सखायमन्तर्यामिनं अन्तरात्मानं एव वा आमन्त्र्य ऋषेर्वचनम् । कीदृशम्? कविम् द्रष्टारमतीन्द्रियार्थानां अध्वरे अनुष्ठात्रे दिव्यपथस्य दातरि यज्ञे, सत्यधर्माणम् सत्यं ऋतमेव धर्मो यस्य तम् (विस्तरभिया न व्याख्यायते, इदं तत्त्वधेयम् । सत्यधर्म एव परमं श्रेयः यदर्थमेव ऋषीणां सर्वाण्यनुष्ठानानि प्रवर्तन्ते । उपनिषदि 'सत्यधर्माय दृष्टये' इत्युक्तिश्चानुसन्धेया) । देवम् दीप्तिमन्तम् । अमीवचातनम् अमीवानां हिंसकानां रोगाणां वा चातनं नाशयितारं, (अम रोगे इत्यस्मात् ईडागमो वन् प्रत्ययश्च । चते याचने इत्यस्य णिचि रूपमित्याहुः । किं तु 'चातयते नाशयति' इति सायणीयम् । 'अयं वृतः चातयते' (४-१७-९)) अन्यत्रापि एवमेव ॥

अष्टमीमृचमाह—

यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति । तस्य स्म प्राविता भव ॥८॥

यः त्वाम् अग्ने हविःऽपतिः दूतम् देव सपर्यति तस्य स्म प्रऽअविता भव ॥

हे अग्ने देव यः हविष्पतिः हविषः स्वामी यजमानः । हविरग्नये अर्पणयोग्यं द्रव्यम् । सङ्कृतः प्राग्विवृतः । दूतम् देवानां अस्मदर्थमिति शेषः, त्वाम् सपर्यति परिचरति तस्य हविरर्पणं कुर्वतो यजमानस्य त्वम् प्राविता प्रकर्षेण वर्धयिता भव स्म असीत्यर्थः, 'स्म' पादपूरणो वा ॥

नवमीमृचमाह—

यो अ॒ग्निं दे॒ववी॑तये ह॒विष्माँ॑ आ॒विवा॑सति । तस्मै॑ पावक मृळय ॥९॥

यः अ॒ग्निम् दे॒वऽवी॑तये ह॒विष्मा॑न् आ॒ऽविवा॑सति तस्मै॑ पा॒व॒क॒ मृ॒ळ॒य॒ ॥

यः हविष्मान् हविर्युक्तः यजमानः देववीतये देवानां वीतिरागमनं यस्मिन् यज्ञे तस्मै (बहुव्रीहिः, तस्माद्विशेषणमध्याहार्यस्य यज्ञस्य) अग्निम् आविवासति परिचरति (अन्तर्भावितण्यर्थः, गत्यर्थो वातिर्धातुः तस्मात् सन्, आगमयितुं इच्छतीति धात्वर्थः, तादृशीच्छैव परिचर्यायां पर्यवस्यतीति हेतोः निघण्टौ तथा पठितम्) । तस्मै यजमानाय हे पावक शोधक अग्ने मृळय सुखं कुरु । यज्ञं प्रति देवानां 'वीतिः' यजमाने तेषां प्रादुर्भाव एव भवति । पुनातेः पावको रूढिरग्नौ । अर्पण-द्रव्यस्य हविषः स्वरूपं प्रागुक्तम् ।

दशमीमृचमाह—

स नः॑ पावक दीदि॒वोऽग्ने॑ दे॒वाँ इ॒हा व॑ह । उप॑ य॒ज्ञं ह॒विश्च॑ नः ॥१०॥

सः न॒ः पा॒व॒क॒ दी॒दि॒ऽवः॒ अग्ने॑ दे॒वान् इ॒ह आ व॒ह॒ उप॑ य॒ज्ञम् ह॒विः च॒ न॒ः ॥

हे पावक शोधयितः, दीदिवः दीप्तिमन्, अग्ने सः त्वं नः अस्मभ्यं तादर्थ्ये चतुर्थी, देवान् इह अत्र अस्मदीययजनस्थाने आवह आहर । नः अस्माकं यज्ञम् यजनम् हविश्च उप समीपं तेषां, प्रापयेत्यर्थः ॥

एकादशीमृचमाह—

स नः॑ स्तवा॑न॒ आ भ॑र गाय॒त्रेण॒ नवी॑यसा । र॒यिं वी॒रव॑ती॒मिष॑म् ॥११॥

सः न॒ः स्तवा॑नः आ भ॒र॒ गा॒य॒त्रेण॑ नवी॑यसा र॒यिम् वी॒रऽव॑तीम् इष॑म् ॥

सः त्वम् नवीयसा नवतरेण गायत्रेण स्तोत्रेण गायत्र्या इदं गायत्रम् तेन स्तवानः स्तूयमानः नः अस्मदर्थं आभर आहर सम्पादयेत्यर्थः । आहरणीयं आह । रयिम् धनम् वीरवतीम् वीर्योपेतां इषम् प्रेरयित्रीं शक्तिं च । 'इषं अन्नं' इति स्थूलः पक्षः । सूक्ष्मे तु सर्वत्र प्रेरणबलं, एषणाशक्तिरिति वा बोध्यम् । केवलं प्रेरणा निर्बलाऽपि स्यात्, अत एव वीरवतीति विशेषणम् । वीरशब्देन वीर्यं लक्षितं ग्राह्यम् । रयिर्धनं अन्तर्याजिनः प्राधान्येन दिव्यं धनमेव भवति । (स्तवानः ष्टुञ् स्तुतौ कर्मणि शानच् छांन्दसं रूपम्) 'नवीयसा गायत्रेण' पूर्वकैरप्यसम्पादितमिदं गायत्रं सूक्तमिति सायणः । अन्यैरकृतपूर्वेण इति स्कन्दस्वामी ॥

द्वादशीमृचमाह–

अग्ने॑ शु॒क्रेण॑ शो॒चिषा॒ विश्वा॑भिर्दे॒वहू॑तिभिः । इ॒मं स्तोमं॑ जुषस्व नः ॥१२॥

अग्ने॑ । शु॒क्रेण॑ । शो॒चिषा॑ । विश्वा॑भिः । दे॒वहू॑तिऽभिः । इ॒मम् । स्तोम॑म् । जु॒षस्व॑ । नः॒ ॥

हे अग्ने शुक्रेण शुभ्रेण शोचिषा रोचिषा विश्वाभिः सर्वाभिः देवहूतिभिः देवाह्वानसाधनभूताभिः स्तुतिभिश्च युक्तः, (बहुव्रीहिः, देवानां हूतयः यासु ताः स्तुतयः) नः अस्माकं इमम् स्तोमम् जुषस्व सेवस्व ॥

इति प्रथमस्य प्रथमे त्रयोविंशो वर्गः

व्याख्यातं काण्वस्य मेधातिथेराद्यं आग्नेयं सूक्तम् । अथ तस्यैव द्वितीयं गायत्रं द्वादशर्चं आप्री-संज्ञकं सूक्तमारभ्यते । तत्र प्रत्यृचं प्रतिपाद्यमाना द्वादश देवता इति अनुक्रमणिका । अग्निरेक एव द्वादशविभागभूतदेवतात्मकतया स्तूयत इति हेतोराग्नेयेषु सूक्तेषु मध्ये पठ्यत इदमाप्रीसूक्तम् । अग्नीषोमीयं पशुं विधाय तत्र एकादश प्रयाजान् विधत्ते 'आप्रीभिराप्रीणाति' इति ऐतरेयिणः समामनन्ति । प्रयाजदेवतानां याज्याः (स्तुतयः) प्रीतिहेतुत्वात् आप्रीशब्देनोच्यन्ते । एवं कर्मसु विनियोगः स्पष्टः स्थूलपक्षे, तथा मन्त्राणामर्थोऽपि सुखेन योजनीयतां लभते । सूक्ष्मार्थ एव विचारणीयः । कथं अग्निराधातव्यो यजमाने? कीदृशं यजमानस्वरूपम्? कीदृशोऽग्नेर्व्यापारः? इतीमानि अधिकृत्य तत्त्वे दृढं गृहीते आप्रीमन्त्रार्थानां रहस्यं अनायासेन स्पष्टं भवेदित्यसंशयम् ।

मनः-प्राण-शरीरात्मकस्य त्रिकस्योपयोक्ता उपभोक्ता अधिष्ठाता योऽन्तरे स्फुरन्नात्मा भवति स जीवो यजमानः पुरुष उच्यते । परिपाकवशात्तस्य दिव्यसम्पदे दिव्यजन्मने देवतानुग्रहसम्पादनाय प्रवृत्तौ जातायाम्, तस्य दृढता काङ्क्षा तीव्रा भवति । सा च भक्तिपरवशया धिया तपोबलेन वा उभयथाऽपि वा विशेषतो ज्वलिता भवति । एवं देवकामस्य जीवस्य ज्वलितायां काङ्क्षायां, स्वयमेवेश्वरो द्रष्टा दर्शयिता च सर्वस्य, 'कविः' कर्ता कारयिता च कर्तव्यस्य 'क्रतुः' प्रादुर्भवति । अत एव 'अग्निनाग्निः समिध्यते' इति मन्त्रदृष्टिः । तथा तस्याग्नेर्यजमाने जन्मनः परं क्रमेण स एव यजमानस्य सर्वं भारं वहन् कार्यं साधयति । स होता पुरोहितः सत्यः सत्यधर्मा गृहपतिः इत्यादीनां विशेषणानां प्रयोजनमधुना सुगमं भवेत् । स जातो वर्धयितव्यः, ज्वलयितव्यः अस्मदीयैः स्तोत्रैर्ध्यानैः कर्मभिश्च । स एव नः कर्तव्येषु अध्येषणीयः । सर्वथा स प्रीणनीयः । प्रीते तस्मिन्, तस्योद्योगे सति तद्विभूतिभूतानि दैवतान्यन्यानि आविर्भूय स्वीयाः सम्पदो यजमानं प्रापयन्ति । ता एव देवताः आप्रियः अस्मिन् सूक्ते प्रतिपादिताः । सर्वाश्च ता अग्निसम्पद एवेति ग्राह्याः । प्रीञ् प्रीणने इति धातोः आप्रीशब्दनिर्वचनं प्राहुः, तर्हि आप्रियः स्तुतय इति युक्तम् । पॄ-पालनपूरणयोरिति धातोश्च निष्पाद्यः शब्दः, तर्हि देवताः आप्रियः आपूरयित्र्यः यजमानस्येति शेषः । यजमानं इमाः स्वात्मना पूरयन्ति अग्निविभूतय इत्यर्थः । 'स विद्वाँ आ च पिप्रयः' (२-६-८) स त्वं विद्वान् विशेषाभिज्ञः सन् आ च सर्वतोऽस्मान् 'पूरय' कामैः इति सायणव्याख्या लक्षणीया ॥

तदस्मिन् सूक्ते इध्मापरनामकसमिधाद्याः आप्रियः यजमाने लब्धजन्मनोऽग्नेः वर्धमानस्य दशाविशेषान् प्राप्नुवतः पूर्णाविष्कारायोपकरणभूताः काश्चन विभूतिविशेषा मूर्तिविशेषाश्च प्रतिपादिता भवन्ति । अथ च इदमवधातव्यम् । आप्रीसूक्तेषु सर्वत्र सर्वाश्च प्रधानदेवताः यज्ञे सान्निध्यं कर्तुं स्तूयन्ते । अग्निमुखेन ता आहूयन्ते । अतोऽग्निमुखा देवा भवन्तीति अग्निदैवत्यमाप्रीसूक्तमित्याहुः । यद्यपि परदैवतस्य मूर्तय एव सर्वाश्च देवताः, तथाऽपि व्यापारभेदो व्यक्तिभेदश्च बोध्यौ । ऋचां व्याख्याने तत्सर्वं यावदपेक्षितं प्रदर्शयिष्यामः ॥

तत्र प्रथमामृचमाह–

सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते । होतः पावक यक्षि च ॥१॥

सुऽसंमिद्धः नः आ वह देवान् अग्ने हविष्मते होतरिति पावक यक्षि च ॥

हे अग्ने सुसमिद्धः शोभनत्व-विशिष्टः सम्यग्दीप्तः त्वं नः मह्यम् (वचनव्यत्ययेन बहुवचनमुक्तम्) हविष्मते हविर्युक्ताय यजमानाय देवान् आवह आनय । हे होतः आह्वातः, पावक शोधक, यक्षि च यज च । सुसमिद्धः- सम् इति सम्यगर्थे इन्धनक्रियाविशेषणम्, तस्मात् समिद्धः गतिसमासः, सुशब्दः शोभनवाची तस्मात् कर्मधारयः । यक्षि-यजेति लोटि मध्यमपुरुषैकवचनम् । सुसमिद्धशब्देन इध्मनामकोऽग्निः सूचित इत्याहुः । प्रादुर्भूतस्य प्रथमं अल्पाकारस्य ज्वालावर्धनं स्तोत्रध्यानकर्मानुष्ठानैः समित्सङ्कृतितैः सम्पद्यते । अत्र 'अग्ने' इति तत्संवर्धनोपकरणभूतसमिधः सम्बोधनं अवधेयम् । अन्यत् प्रागुक्तम् ॥

द्वितीयामृचमाह–

मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे । अद्या कृणुहि वीतये ॥२॥

मधुऽमन्तम् तनूऽनपात् यज्ञं देवेषु नः कवे अद्य कृणुहि वीतये ॥

हे अग्ने, तनूनपात् एतत्संज्ञक, कवे द्रष्टः, सर्वार्थदर्शिन्, अद्य नः अस्माकं अस्मदीयं मधुमन्तम् रसवन्तमुपभोगक्षममित्यर्थः यज्ञं इमं सवं देवेषु देवानां मध्ये तत्समीपमित्यर्थः कृणुहि कुरु, नय । किमर्थम्? वीतये आगतये तेषामिति शेषः । इमं यज्ञं निवेदय देवानाम्, येन ते च आगताः स्युः । अत्र अग्निरेव तनूनपात् प्रोक्तः । शरीरे प्रादुर्भूतोऽग्निरस्माभिः प्राग्व्याख्यातलक्षणस्तनूनपात् । ऊर्जोनपात्, अपां नपात् इत्यादौ यथा शक्तेर्जातोऽग्निरुच्यते, तथा यजमानस्य तन्वा जातः पुत्रः ॥

तृतीयामृचमाह–

नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये । मधुजिह्वं हविष्कृतम् ॥३॥

नराशंसम् इह प्रियम् अस्मिन् यज्ञे उप ह्वये मधुऽजिह्वम् हविःऽकृतम् ॥

नराशंसम् एतन्नामकमग्निं इह अस्मिन् यज्ञे अस्मदीयेऽत्र प्रवर्तमाने यजने उपह्वये आह्वयामि । कीदृशम्? प्रियम् प्रीणनशीलं, देवानां प्रीतिं जनयति, यजमानस्यापि प्रीतिहेतुरग्निः । मधुजिह्वं मधुरवाचम्, जिह्वया वाग्लक्ष्यते । हविष्कृतम् हविषः कर्तारम्, हविषि य आस्वाद्यो रसः तस्य ग्रहणे समर्था जिह्वा तस्याग्नेः, हविरन्नमपि अग्निनैव पक्वं भवति, तस्माद्विशेषणद्वयमिदं उपपद्यते स्थूले बाह्ये कर्मणि । अन्तरर्थे तु देवाह्वानसमर्था मधुरभाषिणीव ज्वाला दिव्यमध्वानमूर्ध्वं गत्वा देवानधिगम्य आकर्षति, यजमानेनार्पणीयं देवाह्वानसाधनं हविरपि कविक्रतुना अग्निनैव साधितं भवति, यजमानप्रयाससाध्यं हव्यं अग्निनैव भगवता सफलं क्रियते । एवमुपपद्यते विशेषणद्वयम् । नराशंस इत्यग्निरेवोक्तोऽस्यामृचि । नराणां देवानां शंस इति व्युत्पत्तिः । देवानां शंसनेन देवकामं यजमानमुत्तेजयत्यग्निः ॥

चतुर्थीमृचमाह–

अग्ने सुखतमे रथे देवाँ ईळित आ वह । असि होता मनुर्हितः ॥४॥

अग्ने सुखऽतमे रथे देवान् ईळितः आ वह असि होता मनुःऽहितः ॥

हे अग्ने, ईळितः इट्-शब्दाभिधेयोऽग्निः आप्रीषु प्रतिपादितानामेकः ईळित्-शब्देनोक्त इत्याहुः । यद्यपि अस्य शब्दस्य सामान्यार्थः स्तुतोऽस्माभिरिति भवति, तथाऽपि अस्माभिः काङ्क्षितः, कर्तव्ये देवकार्येऽस्मिन् यजने सत्कारपूर्वकं नियोजित इति भवति । अत एव अध्येषित इति प्राग्वद् ग्राह्यम् । तथाभूतस्त्वं सुखतमे अत्यन्तसुखहेतौ रथे शीघ्रगतिके याने देवान् उपवेश्य, आवह आनय । सुखतमेन रथेन आवहनसाधनेनेति, तृतीयार्थे सप्तमी । तथा देवानां आनयनं अग्नेः कार्यम् । अत आह । त्वं होता आह्वाता असि आह्वानं तव धर्मः । किं च मनुर्हितः मनुना मन्त्रेण अस्माभिः हितः दृढं निहितः स्थापितः । 'मन ज्ञाने' मन्यत इति मनुः

छान्दसः सु इत्यादेशः तस्य लुक् । मन्त्रा ज्ञात्रा यजमानेन हित इति विग्रहः । मन्त्रेण ब्रह्मपदवाच्येन हार्दवाग्विभवेन स्थापितोऽग्निर्यजननिर्वाहायेत्यपि बोध्यम् । अद्यापि मनुशब्दः तन्त्रशास्त्रेषु मन्त्रपर्यायतया प्रसिद्धः । अत्र ईळितः साक्षादग्निरेवेति स्पष्टम् ॥

पञ्चमीमृचमाह–

स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः । यत्रामृतस्य चक्षणम् ॥५॥

स्तृणीत बर्हिः आनुषक् घृतऽपृष्ठम् मनीषिणः यत्र अमृतस्य चक्षणम् ॥

हे **मनीषिणः** बुद्धिमन्तः सखायः, **बर्हिः** दर्भं (अन्तरे देवानामासनं बर्हिषा सङ्केतितं बोध्यम्) । **स्तृणीत** आस्तीर्णं कुरुत, वेदेरुपरिभागं आच्छादयत, अन्तर्वेद्यामासनं सुखं सिद्धं कुरुत । अन्यत्रापि वेद्यां बर्हिः सुखासनं भवतु देवानामिति द्योतयितुं ऊर्णाकम्बलवन्मृद्वित्युक्तं 'ऊर्णाम्रदाः' (५-५-४) । कीदृशं बर्हिः? **आनुषक्** आ समन्तादनुक्रमेण अनुषजति, परस्परसम्बद्धं सुसङ्गतमित्यर्थः । **घृतपृष्ठम्** घृतशब्दवाच्यदीप्तियुक्तं पृष्ठं उपरिभागोऽस्य बर्हिर्वाच्यस्यासनस्य । **यत्र** बर्हिषि **अमृतस्य** मरणरहितस्य नित्यस्य देवस्य, देवानां आगतौ तदासनरूपतयाऽप्यवस्थितस्याग्नेः, **चक्षणम्** दर्शनं भवति । अमृतचक्षुःस्थानं भवति अन्तर्वेद्यां आसनमित्युक्तम् ॥

षष्ठीमृचमाह–

वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः । अद्या नूनं च यष्टवे ॥६॥

वि श्रयन्ताम् ऋतऽवृधः द्वारः देवीः असश्चतः अद्य नूनम् च यष्टवे ॥

यज्ञ ऊर्ध्वं गच्छतीति प्रसिद्धिर्वेदे । अन्यत्रापि आप्रीसूक्तेषु यज्ञमूर्ध्वं कुरुतेति प्रार्थना श्रूयते । तेन यजमानस्यैवोर्ध्वगतिः । ऊर्ध्वगमनाय द्वाराणि विवृतानि भवेयुः । अयज्वनः पुरुषस्य तानि पिहितानि भवन्ति । ततो यजमानस्तेषां ऊर्ध्वगतिद्वाराणां

उद्घाटनाय देवीः शक्तीः प्रार्थयते । देवीः द्योतमानाः द्वारः यज्ञगतिद्वाराणीत्यर्थः विश्रयन्ताम् विवृता भवन्तु । कीदृश्यो द्वारः? ऋतवृधः ऋतस्य सत्यस्य वर्धयित्र्यः, असश्चतः सश्चतिः सङ्गकर्मा असक्ताः कवाटबन्धने, सुखोद्घाटना इत्यर्थः । किमर्थम्? अद्य इदानीं नूनम् च अवश्यं यष्टवे यष्टुम् यज्ञायेत्यर्थः ॥

इति प्रथमस्य प्रथमे चतुर्विंशो वर्गः

सप्तमीमृचमाह—

नक्तोषासा सुपेशसास्मिन् यज्ञ उप ह्वये । इदं नो बर्हिरासदे ॥७॥

नक्तोषासा सुऽपेशसा अस्मिन् यज्ञे उप ह्वये इदम् नः बर्हिः आऽसदे ॥

नक्तशब्द उषश्शब्दश्च रात्रिं प्रभातं च अभिदधाते । रात्रिशब्देन अस्माकं साधारणी मानुषी प्रज्ञा, उषोलक्षितेन अह्ना दैवी प्रज्ञा च सङ्केतिते । दिने प्रकाशमानं सर्वं रात्रिगर्भे वर्तते । दैवप्रज्ञायां प्रकाशमानं सर्वं मानुषप्रज्ञागर्भे वर्तते । पर्यायेण वर्तमाने उभे अपि प्रज्ञे यज्ञेऽस्मिन् आह्वयामीति मन्त्रार्थः ॥

नक्तोषसा नक्तं च उषाश्च नक्तोषसा, आकारश्छान्दसः (द्वितीयाद्विवचनम्) अस्मिन् यज्ञे उपह्वये आह्वयामि । कीदृश्यौ? सुपेशसा शोभनरूपयुक्ते विविच्य ग्राह्ये शुभप्रदे च । किमर्थम्? नः अस्माकं अस्माभिः आस्तीर्णं साधितं इदं बर्हिः आसदे आसत्तुं प्राप्तुमित्यर्थः । आङ्-पूर्वकात् सीदतेः भावे क्विप्, प्रादिसमासः, आसत् तस्मै आसदे । 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह' इत्याद्युपनिषद्वाक्यानां ईदृशी मन्त्रदृष्टिर्मूलमिति धीमद्भिरूह्यम् ॥

अष्टमीमृचमाह—

ता सुजिह्वा उप ह्वये होतारा दैव्या कवी । यज्ञं नो यक्षतामिमम् ॥८॥

ता सुऽजिह्वौ उप ह्वये होतारा दैव्या कवी इति यज्ञं नः यक्षताम् इमम् ॥

ता तौ (आकारश्छान्दसः) **सुजिह्वौ** शोभनवाचौ, जिह्वया आह्वात्री वाग् लक्ष्यते । **दैव्या** दैव्यौ देवसम्बन्धिनौ **होतारा** होतारौ आह्वातारौ, अत एव अग्नि-मूर्तिविशेषौ **कवी** अतीन्द्रियदर्शिनौ **उपह्वये** आह्वयामि । **नः** अस्माकं **इमं यज्ञं** तौ **यक्षतां** यजताम् [लोटि प्रथमपुरुषद्विवचनं छान्दसम्] ॥

नवमीमृचमाह–

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीदन्त्वस्रिधः ॥९॥

इळा सरस्वती मही तिस्रः देवीः मयःऽभुवः बर्हिः सीदन्तु अस्रिधः ॥

'तिस्रो देवीः' इति अन्यत्रापि आप्रीसूक्तेषु श्रूयमाणत्वात् तिसृणामासां साहचर्यश्रवणाच्च तासामेका भारतीति प्रसिद्धेश्च अत्र 'मही' भारतीति न सन्देहः । **इळा** एतदाख्या **सरस्वती** एतन्नाम्नी **मही** महती भारती इति **तिस्रः** देवीः दिव्याः शक्तिमूर्तयः। **बर्हिः** सिद्धमासनमिति बोध्यम् । **सीदन्तु** प्राप्नुवन्तु । कीदृश्यः? **मयोभुवः** मयः सुखनाम, तस्य सुखस्य अन्तर्भावितण्यर्थात् 'भुवः' भावयित्र्यः । पुनः कीदृश्यः? **अस्रिधः** अहिंसिताः अबाधिताः, अथवा शोषणरहिताः, स्रिधेः शोषणार्थो हिंसार्थश्च भवतः । इळा ज्ञानदृष्टिर्दैवी शक्तिः, इति सारतोऽवगन्तव्यम् ॥*

---

* इळा सरस्वती भारती इति तिस्रो देव्यः सर्वत्र दाशतय्यां दशस्वपि आप्रीसूक्तेषु प्रथिताः संलक्ष्यन्ते । प्रत्येकं चेमाः क्वचित् प्रस्तूयन्ते । तत्रासां स्वरूपाणि विविच्य वक्तव्यानि भवन्ति । पुराणानि भारती-सरस्वत्योः अभेदमाहुः । इळः पुमान् चन्द्रवंशमूलभूतः मनोः पुत्रः स्त्रीत्वं प्राप्य इळाऽभवदिति च पुराणकथा । वेदे तु इमास्तिस्रः सहचर्यः यजमानस्य ऋषेः दृष्टिश्रुतिमहत्त्वान्यनुगृह्णन्त्यः स्वर्निवासा इति बोध्यम् । तत्र 'मही'पदवाच्या भारती बृहज्ज्योतिस्सम्बन्धिनी दैवी शक्तिः सौरधाम्नः प्रस्थिता कवेर्द्रष्टुः प्रथमं बृहत्त्वमाहरति, बृहत्त्वानुरूपां प्रज्ञामयीं दृष्टिमनुगृह्णाति 'इळा' । सरस्वती तु श्रुतिवाहिनी कविं दिव्यावेशश्रवणशालिनं सत्यश्रुतं विधत्ते । 'सूनृता विरप्शी गोमती मही' इत्यत्र व्याख्यायां भारती अनुसन्धेया । 'चोदयित्री सूनृतानाम्' इत्यादौ सरस्वतीमधिकृत्य प्रोक्तं अवधातव्यम् । यद्यपि तिसृणां देवीनामपि 'सूनृता, चोदयित्री' इत्यादि विशेषणानि प्रयुक्तानि भवन्ति, तथाऽपि प्रत्येकं तासां वैशिष्ट्यं ग्राह्यमिति क्रमशः दृष्टि-श्रुति-बृहत्त्वानां अनुग्राहिण्यः दिव्याः ऋतज्योतिरुद्भवाः इळा-सरस्वती-भारत्यः विश्वप्रचोदनाधुरन्धरस्य ऋतज्योतिषः सूर्यस्यैव शक्त्यो भवन्ति । यो नः धियः प्रचोदयात् तस्यैव प्रेरकस्य सम्बन्धिनी भारती इति बृहत्यास्तस्या 'विश्वतूर्तिः' इति विशेषणं प्रतिपादयति । एतास्तिस्रोऽपि परमस्य सुखस्य जनयित्र्यः 'मयोभुवः' । अस्पष्टा अरूपा वा

दशमीमृचमाह–

इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये । अस्माकमस्तु केवलः ॥१०॥

इह त्वष्टारम् अग्रियम् विश्वऽरूपम् उप ह्वये अस्माकम् अस्तु केवलः ॥

इह अत्र यजने त्वष्टारम् एतन्नामकं सर्वेषां रूपाणां तक्षाणं देवम् उपह्वये आह्वयामि । कीदृशम्? अग्रियम् श्रेष्ठम् सर्वदेवात्मकस्य ईश्वरस्यैव त्वष्टृभूतत्वात् यजमाने नवनवदिव्यरूपाणां आविष्कारायेति बोध्यम् । विश्वरूपम् विश्वानि सर्वाणि रूपाणि यस्य तम्, न केवलं स विश्वेषां रूपाणां साधु निष्पादकः स एव भवति विश्वरूपसामग्री । सः अस्माकम् केवलः अनन्याराधनविषयभूतः अस्तु भवतु । अत्र त्वष्टा 'अस्माकमस्तु केवलः' इति मधुच्छन्दसा स्तुत इन्द्रः 'सुरूपकृत्नुः' इव लक्ष्यते । यद्यपि अग्नेरेव मूर्तिविशेष एष इति व्याख्यातारः प्राहुः, देवदेवस्यैकत्वेऽपि देवानां पृथगात्मकत्वाभ्युपगमात् द्युस्थानोऽयं ऐन्द्रो देवः, इन्द्रकार्यनिर्वाही, तदात्मकतयाऽवस्थितः सर्वेश्वर इति वक्तव्यम्, विशेषतः केवलशब्दश्रवणात् ॥

एकादशीमृचमाह–

अव सृजा वनस्पते देव देवेभ्यो हविः । प्र दातुरस्तु चेतनम् ॥११॥

अव सृज वनस्पते देव देवेभ्यः हविः प्र दातुः अस्तु चेतनम् ॥

काश्चन दिव्याः शक्तय इति न ग्राह्यम्, परस्परसाहचर्यसम्पन्नान्यपि विविक्तानि शोभनान्यासां रूपाणीति कवयः पश्यन्ति 'सुपेशसः' । ऋषौ मानुषे स्वीयानि उक्तलक्षणानि वैभवानि अविच्छिन्नं अच्छिद्रं च रक्षन्तीमा देव्य इति मन्त्रवर्णाः स्तुवन्ति 'अच्छिन्नं पान्तु शरणं निषद्य' (२-३-८) । वाजसनेयिनोऽपि 'अच्छिन्नं तन्तुं पयसा सरस्वती इळा देवी भारती विश्वतूर्तिः' इत्यामनन्ति ॥

पाठकानां निरीक्षणायार्थानुसन्धानाय ऋक्संहितायां यत्र आसां श्रवणं भवति, तानि स्थलानि मण्डलानुक्रमेण इह दर्शितानि भवन्ति । १-१३-८, १-१४२-९, १-१८८-८, २-३-८, ३-४-८, ५-५-८, ७-२-८, ९-५-८, १०-७०-८, १०-११०-८. ॥

हे **वनस्पते** सोम, **देव**! त्वं देवोऽसि, तस्मात् **देवेभ्यः** इन्द्रादिभ्यः **हविः** अस्मदीयं रसवदर्पितम् **अवसृज** समर्पय । **प्रदातुः** तथा देवेभ्यः स्वीयं सर्वानुभूतिसारात्मकं दैवतस्वीकरणक्षमं संस्कृतं हव्यं ददते यजमानाय, **चेतनं अस्तु** संज्ञानं भवतु । चिती संज्ञान इति धात्वर्थानुगमो बोध्यः । साक्षात्सम्पर्करूपं ज्ञानं संज्ञानं, दैवत-तदावासधामविषयकं ज्ञानं अस्माभिः सम्यक् स्पृष्टं लब्धं च भवत्विति भावः ॥

सोमस्य ओषधीशत्वं रसमयत्वं, अत एव आनन्दमयत्वं च प्रसिद्धम् ॥

द्वादशीमृचमाह–

स्वाहा॑ य॒ज्ञं कृ॑णोत॒नेन्द्रा॑य॒ यज्व॑नो गृ॒हे । तत्र॑ दे॒वाँ उप॑ ह्वये ॥१२॥

स्वाहा॑ य॒ज्ञम् कृ॒णो॒त॒न इन्द्रा॑य यज्व॑नः गृ॒हे तत्र॑ दे॒वान् उप॑ ह्व॒ये ॥

समानप्रवृत्तिकान् सखीनाह– हे यजमानाः, **इन्द्राय** इन्द्रार्थम् **यज्ञं स्वाहा** सुहुतं **कृणोतन** कुरुत । हविःप्रदानवाची स्वाहाशब्दः देवतासन्तृप्तिकारिणः सुहुतस्य प्रतिपादको भवति । कुत्र? **यज्वनो गृहे** यजमानस्य निकेतने मनःप्राणशरीरात्मक इति ग्राह्यम् । **तत्र** पूर्वोक्ते गृहे **देवान्** यष्टव्यान् **उपह्वये** आह्वयामि ॥

इति प्रथमस्य प्रथमे पञ्चविंशो वर्गः

अथ चतुर्थेऽनुवाके काण्वस्य मेधातिथेः तृतीयं द्वादशर्चं सूक्तं गायत्रम् । अग्न्यादिबहुदेवताकमिदं व्याख्याने स्पष्टं भवति ॥

तत्र प्रथमामृचमाह–

ऐभि॑रग्ने॒ दुवो॒ गिरो॒ विश्वे॑भिः॒ सोम॑पीतये । दे॒वेभि॑र्याहि॒ यक्षि॑ च ॥१॥

आ ए॒भिः अ॒ग्ने॒ दुवः॑ गिरः॑ विश्वे॑भिः सोम॑ऽपीतये दे॒वेभिः॑ या॒हि॒ यक्षि॑ च॒ ॥

हे **अग्ने**, **एभिः विश्वेभिः देवेभिः** सह, पूर्वनिर्दिष्टानां सर्वेषां देवानां परामर्शः

'एभिः' इत्यनेन बोध्यः । आयाहि आगच्छ, यक्षि यज च (यजतेर्लोटि, छान्दसः) किमर्थम्? सोमपीतये सोमपानाय । दुवः अस्मदीयपरिश्रमरूपं कर्म प्रति गिरः स्तुतीश्च प्रति आयाहीति सम्बन्धयितव्यः । अस्मदीयस्तुतिषु परिश्रमेषु च यः सारांशो वर्तते तं रसभरितं सोमपदवाच्यं सम्मर्दं स्वीकर्तुं देवैः सहागत्य त्वमेव यजमानो भूत्वा यजेत्युक्तम् ॥

द्वितीयामृचमाह-

आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः । देवेभिरग्न आ गहि ॥२॥

आ त्वा कण्वाः अहूषत गृणन्ति विप्र ते धियः देवेभिः अग्ने आ गहि ॥

आ अहूषतेति क्रियया सम्बन्धयितव्यः । हे अग्ने त्वा त्वां कण्वाः मेधाविनः (वयं कण्ववंशजा वा) आहूषत आह्वयन्ति (ह्वेञ् धातोर्लुङ् छान्दसः, लडर्थे) । हे विप्र विपश्चित्, किञ्च, ते तव धियः धारणात्मिकाः प्रज्ञावृत्तीः गृणन्ति स्तुवन्ति । देवेभिः देवैः सह आगहि आगच्छ । न साधारणाः किं तु विशिष्टाः प्राज्ञाः आह्वानसमर्थास्त्वामाह्वयन्ति, तदागच्छ देवैः सह ॥

तृतीयामृचमाह-

इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् । आदित्यान् मारुतं गणम् ॥३॥

इन्द्रवायू इति बृहस्पतिम् मित्रा अग्निम् पूषणम् भगम् आदित्यान् मारुतम् गणम् ॥

अत्र द्वितीयानिर्देशात् तान् सर्वान् देवान् आह्वयामि सोमपीतये यैः सह अग्नेः आगमनं प्रार्थितवानहमिति बोध्यम् । अथ देवानां नाम्ना निर्देशः । इन्द्रवायू इन्द्रं च वायुं च बृहस्पतिम् (पारस्करप्रभृतीनि च संज्ञायामिति सूत्रस्य वार्त्तिकानुसारेण बृहतः तलोपः सुडागमश्च) । मित्रा मित्रावरुणौ, द्विवचनश्रवणं साहचर्याद्वरुणग्रहणार्थम् । अग्निम् पूषणम् भगम् आदित्यान् अदितिसम्भवान् मारुतं

गणम् मरुद्गणम्– इमान् आह्वयामीति शेषः ॥

चतुर्थीमृचमाह–

प्र वो॑ भ्रियन्त॒ इन्द॑वो मत्स॒रा मा॑दयि॒ष्णव॑: । द्र॒प्सा मध्व॑श्चमू॒षद॑: ॥४॥

प्र व॒: भ्रि॒य॒न्ते॒ इन्द॑वः म॒त्स॒राः मा॒द॒यि॒ष्णव॑: द्र॒प्साः मध्व॑: च॒मू॒ऽसद॑: ॥

वः युष्माकमर्थाय तादर्थ्ये चतुर्थी, प्रकृतानामिन्द्रादीनामर्थाय **प्रभ्रियन्ते** प्रकर्षेण भृताः भवन्ति इत्यर्थः । के? **इन्दवः** क्लेदनशीलाः सोमाः । कीदृशाः? **मत्सराः** तृप्तिकराः (मन्दतेः तृप्तिकर्मणः सरप्रत्ययः, कुसर-धूसरवत्) **मादयिष्णवः** हर्षयितारः । पुनः के ते? **द्रप्साः** रसबिन्दवः । **मध्वः** मधुस्वादाः मधुरा इत्यर्थः (मध्व इति लिङ्गव्यत्ययः जसि गुणाभावश्च) **चमूषदः** शरीरात्मकपात्रे सीदन्ति गच्छन्ति । चमू-चमसादिशब्दोपलक्षित-यजमानशरीरात्मकपात्रगताः सोमा इति भावः । देवेभ्यः समर्पणाय मनः-प्राण-शरीरात्मके पात्रे कणशः कणशः (द्रप्साः) सम्पाद्य भूयांसो भूत्वा सम्भृताः (प्रभ्रियन्त) सुखार्द्रा 'इन्दवः' तृप्तिकारिणः हर्षहेतवः सुताः सिद्धा भवन्तीत्यर्थः । द्रुधातोर्निष्पन्नः द्रप्सशब्दः, ईरणचलनादौ वर्तमानः ध्वजपर्यायो भवति क्वचित्, यथा 'ऊर्ध्वं भानुं सविता देवो अश्रेद्द्रप्सम्' (४-१३-२) । प्रायशः अत्यन्तमल्पांशद्योतक-बिन्दु-स्फुलिङ्ग-ज्वालैकदेशाद्यर्थे प्रयुक्तो लक्ष्यते । अत्र द्रप्सशब्दः द्रवणशीलो द्रुतोत्पतनो वा बिन्दुरित्यर्थे गृहीतः । अत एव कणशः सम्भृताः सोमा इत्युक्तम् । चमू-चमसादिवाच्यं पात्रं अन्तर्यजने शरीरमिति पुरस्ताद् आर्भवसूक्तव्याख्यानावसरे प्रपञ्चयिष्यामः ॥

पञ्चमीमृचमाह—

ई॒ळते॒ त्वाम॑व॒स्यव॒: कण्वा॑सो वृ॒क्तब॑र्हिषः । ह॒विष्म॑न्तो अ॒रंकृत॑: ॥५॥

ई॒ळते त्वाम् अ॒व॒स्यव॑: कण्वा॑सः वृ॒क्तऽब॑र्हिषः ह॒विष्म॑न्तः अ॒रम्ऽकृत॑: ॥

हे अग्ने **त्वाम् ईळते** अध्येषन्ते । के? **अवस्यवः** वर्धनकामाः **कण्वासः**

मेधाविनः, वयममी कण्वा इति वा । कीदृशाः? वृक्तबर्हिषः स्तीर्णासनाः, देवेभ्य इति शेषः । हविष्मन्तः देवार्थं उपकल्पितहव्याः । अरंकृतः अलं पर्याप्तं कुर्वन्तीति उपपदसमासः । अन्यूनकारिणः समृद्धकर्माण इत्यर्थः ॥

षष्ठीमृचमाह—

घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः । आ देवान्त्सोमपीतये ॥६॥

घृतऽपृष्ठाः मनःऽयुजः ये त्वा वहन्ति वह्नयः आ देवान् सोमऽपीतये ॥

हे अग्ने घृतपृष्ठाः घृतं दीप्तं पृष्ठं बहिरङ्गं येषां ते दीप्तबाह्यशरीरभागा इत्यर्थः । मनोयुजः मनसा युज्यमानाश्च ये वह्नयः अश्वाः त्वां वहन्ति, तैः आनयनसाधनैर्वाहैः देवान् इन्द्रादीन् सोमपीतये सोमस्य पानाय आ आवह । यजमानमनोयुक्त्वं एषां अग्निवाहानां उक्तम् । ब्रह्मयुजौ इन्द्राश्वौ प्राग्व्याख्यातौ । उभयं अपि सजातीयमभिप्रायं द्योतयति ॥

इति प्रथमस्य प्रथमे षड्विंशो वर्गः

सप्तमीमृचमाह—

तान्यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि । मध्वः सुजिह्व पायय ॥७॥

तान् यजत्रान् ऋतऽवृधः अग्ने पत्नीऽवतः कृधि मध्वः सुऽजिह्व पायय ॥७॥

हे अग्ने तान् इन्द्रादीन् यजत्रान् यजनीयान् ऋतवृधः ऋतस्य सत्यस्य वर्धयितॄन् देवान् पत्नीवतः पत्नीयुक्तान् कृधि कुरु । हे सुजिह्व शोभनवाग्युक्त, अग्ने, तान् देवान् मध्वः मधुरस्य सोमस्य भागं पायय पिबतेर्हेतुमण्णिच् ॥

अत्रेदमवधेयम् । पुमांस इन्द्रादयो देवाः, तच्छक्तय इन्द्राण्यादयो देव्यः । अयं विषयो भूमिकायां (पृ. २९) आवेदितः । पुंसो देवस्य महिमा शक्त्या देव्या प्रख्याप्यते देवप्रभावविसारो देव्या निरुह्यते । तस्मात् शक्तिं देवीं विना शक्तस्य देव-

स्याविष्कारो दुर्घटः । अतो यजमाने वर्धयतो यष्टव्यान् इन्द्रादीन् तत्कार्यनिर्वाहशक्ति-युक्तान् विधेहीति तात्पर्यम् ॥

अष्टमीमृचमाह—

ये यजत्रा य ईड्यास्ते ते पिबन्तु जिह्वया । मधोरग्ने वषट्कृति ॥८॥

ये यजत्राः ये ईड्याः ते ते पिबन्तु जिह्वया मधोः अग्ने वषट्ऽकृति ॥

हे **अग्ने, ये यजत्राः** यजनीयाः **ये ईड्याः** स्तुत्याः अध्येषणार्थमिति शेषः, **ते** देवाः **ते** तव त्वदीयया **जिह्वया** ज्वालारूपया वाचा **मधोः** मधुरस्य सोमस्य भागं **पिबन्तु वषट्कृति** वषट्कारयुक्ते यज्ञे पिबन्त्विति सम्बन्धः । वषट्-कृति— करोतेः भावे क्विप्, वषडिति करणं यस्मिन् सः वषट्कृत् तस्मिन् वषट्कृति यज्ञे । स्वाहाकार इव वषट्कारः देवेभ्यः सम्प्रदाने प्रयुज्यते ।

नवमीमृचमाह—

आकीं सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः । विप्रो होतेह वक्षति ॥९॥

आकीम् सूर्यस्य रोचनात् विश्वान् देवान् उषःऽबुधः विप्रः होता इह वक्षति ॥

आकीम् आ इत्यर्थे निपातः योग्यक्रियया सम्बन्धयितव्यः । **विप्रो** मेधावी **होता** आह्वाता अग्निः **सूर्यस्य** सर्वप्रेरकस्य सर्वोत्तमस्य देवस्य **रोचनात्** दीप्तात् स्वर्धाम्नः **उषर्बुधः** उषसि प्रबुध्यमानान् (सत्यज्योतिराविर्भावे आसन्ने देवाः यजमानस्य यजनमास्थातुं सिद्धा भवन्तीत्यर्थः) **विश्वान् देवान् (आ) वक्षति** आवहतु (वहेः प्रार्थनायां लिङर्थे लेट्) ॥

दशमीमृचमाह—

विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना । पिबा मित्रस्य धामभिः ॥१०॥

विश्वेभिः सोम्यम् मधु अग्ने इन्द्रेण वायुना । पिब मित्रस्य धामऽभिः ॥

हे अग्ने विश्वेभिः सर्वैर्देवैः इन्द्रेण वायुना, मित्रस्य एतदाख्यस्य देवस्य धामभिः तेजोविशेषैः सह सोम्यं सोममयं मधु मधुरं आस्वादनीयं रसं पिब । सोमस्य विकारः सोम्यमिति मयट् ॥

एकादशीमृचमाह–

त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि । सेमं नो अध्वरं यज ॥११॥

त्वम् होता मनुःऽहितः अग्ने यज्ञेषु सीदसि सः इमम् नः अध्वरम् यज ॥

हे अग्ने त्वम् होता आह्वाता देवानाम्, मनुर्हितः मनुना मन्त्रेण मन्त्रा वा हितः स्थापितः यज्ञेषु सीदसि स्थितो भवसि । सः तादृक् त्वं नः इमम् अध्वरम् अस्मदीयमिमं यज्ञं प्राप्य यज यजनं निर्वह । सेमम्– संहितायां सोर्लोपे गुणः । मनुर्हितः प्राग्व्याख्यातम् ॥

द्वादशीमृचमाह–

युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः । ताभिर्देवाँ इहा वह ॥१२॥

युक्ष्व हि अरुषीः रथे हरितः देव रोहितः ताभिः देवान् इह आ वह ॥

देव, हे अग्ने रथे युक्ष्व योजय । काः? त्वदीयाः रोहितः रोहिच्छब्दाभिधेयाः वडवाः, कीदृशीः? अरुषीः आरोचमानाः हरितः हरणसमर्थाश्च । ताभिः अश्वाभिः देवान् इह अस्मिन् यजने आवह आहर । अत्र पूर्वे व्याख्यातारः स्थूलदृष्ट्या बाह्यार्थानुसारेणैवं प्राहुः– 'रोहितः' अग्नेरश्वाः रोहिदाख्याः प्रसिद्धाः । 'अरुषीः'– गतिमतीः, ऋ-गतौ इति धातोः शब्दनिष्पत्तिः । 'हरितः' हर्तुं अश्वारूढान्

नेतुं समर्था इति च । अत्रेदमवधेयम् । अश्वानां गतिमत्त्वे आरूढजनहरणसामर्थ्ये वा न कस्यापि स्यात् सन्देहः । किं तु साभिप्रायविशेषणप्रयोगः मतिमत्पथं नावतरेत्, यदि गतिमत्त्वादिकमेव विवक्षितमित्यभ्युपगच्छेम । किं तर्हि? विस्तरभिया किञ्चिदेव उपक्षिप्यते । अरुषपदेन आरोचमानं सांध्यरागं अरुणम्, हरिच्छब्देन हरिद्वर्णं कमनीयं ऐन्द्रम्, रोहिच्छब्देन लोहितप्रभमाग्नेयं च वाहं वाहसमूहं वा द्योतितवान् मन्त्रद्रष्टा । सर्वान् देवानानेतुं तत्तद्देवतायोग्यवाहशक्तिविशेषैर्युक्तानावह, भोः, इति ॥

इति प्रथमस्य प्रथमे सप्तविंशो वर्गः

चतुर्थेऽनुवाके काण्वस्य मेधातिथेश्चतुर्थं द्वादशर्चं सूक्तं गायत्रम् । ऋतुसहिता इन्द्राद्या देवताः प्रतिपादिता इति सूक्तमिदं ऋतुदेवताकं ऋतव्यं इत्याहुः । यथा लोके अहोरात्रमासर्त्वादिभिः भिन्नभिन्नक्रियाफललक्षितैः कालविभागैः महीरुहादिमानवान्तानां तत्तद्योग्यपरिपाकविशेषाः सम्पाद्यमानाः संलक्ष्यन्ते, तथा अन्तर्यजनेऽपि देवतानामिन्द्राद्यानां तत्तद्युक्तकालविध्यनुसारेण सम्पाद्यमाना विलासविशेषाः यजमाने पूर्णाहुतिपरे सम्पूर्णऋतधामकामे, अत एव तदङ्गभूतबहुदैवतयोगनिष्ठे तत्तद्युक्तान् परिपाकान् विदधते । ऋतुशब्देनायमर्थो लक्षितः, यद्देवताभिः अस्मदन्तर्निरुह्यमानानां कर्मणां कालविधिः दैवतरहस्यभाक् यजमानपरिपाकदशानुसारीति, तस्मात् मन्त्रेषु व्याख्यास्यमानेषु 'ऋतुना' सह इत्यत्र दिव्यसमयानुसारेण इति ग्राह्यम् । विवरणमन्तरेण ऋतुशब्दः प्रयुज्यते मा भून्मन्त्रशोभाहानिरिति ॥

तत्र प्रथमामृचमाह—

इन्द्र सोमं पिब ऋतुना त्वा विशन्त्विन्दवः । मत्सरासस्तदोकसः ॥१॥

इन्द्र सोमम् पिब ऋतुना आ त्वा विशन्तु इन्दवः मत्सरासः तत्ऽओकसः ॥

हे इन्द्र ऋतुना उक्तलक्षणेन सह सोमम् पिब । इन्दवः सोमाः त्वा त्वां आविशन्तु सर्वतः प्रविशन्तु । कीदृशास्ते? मत्सरासः तृप्तिकराः तदोकसः तन्निवासाः (तच्छब्दवाच्य इन्द्रस्य कुक्षिः ओको येषां ते) । एवं 'यः कुक्षिः सोमपातमः' (१-८-७) इति सङ्गच्छते ॥

द्वितीयामृचमाह—

मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥२॥

मरुतः पिबत ऋतुना पोत्रात् यज्ञम् पुनीतन यूयं हि स्थ सुऽदानवः ॥

हे सुदानवः शोभनदानाः हे मरुतः ऋतुना युष्मदीययोग्यकालानुसारेण पिबत सोममिति शेषः । कुतः? पोत्रात् पोतुः पात्रात् (पुनातेः पोता, तस्येदं इत्यण्, वृद्ध्यभावो वैकल्पिकश्छन्दसि) । यज्ञम् इमं पुनीतन पुनीत, शोधयत (छन्दसि तनादेशः) । हि यस्मात् यूयं स्थ भवथ पवने प्रसिद्धा इति शेषः । सुदानवः– दानुशब्दः दानवचनो दातृवचनो वा, प्रादिसमासः । पोतृनामक ऋत्विक् अन्तर्यजने पविता शोधको देवताविशेषः । ऋत्विजः सर्वेऽपि देवा एव ह्युक्ताः । प्रथम-मेवोक्तमग्निमधिकृत्य 'यज्ञस्य देवमृत्विजं' इति । पवितुस्तस्य पात्रात्सोमग्रहणाश्रय-भूतात् पीता मरुतोऽपि पवितारः प्रसिद्धाः यज्ञं पूतं निर्दोषं विधातुं प्रभवन्ति । तथा तत्कर्तृकपारिशुद्ध्यदाने शोभनत्वमत्यन्तस्पृहणीयम् 'सुदानवः' ॥

तृतीयामृचमाह—

अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना । त्वं हि रत्नधा असि ॥३॥

अभि यज्ञं गृणीहि नः ग्नावः नेष्टरिति पिब ऋतुना त्वम् हि रत्नऽधाः असि ॥

हे ग्नावः ग्नाः स्त्रियः अस्य सन्तीति ग्नावान् तस्य सम्बोधनं ग्नावन्, (व्यत्ययेन वः छान्दसः) पत्नीसमेत, हे नेष्टः, 'नेष्टा' ऋत्विग्भूतो देवताविशेषः, णिजिर् शौच-पोषणयोरित्यस्मान्निष्पन्नः । यदि पोता यज्ञं शोधयित्वा दोषव्यतिरिक्तं विधत्ते, नेष्टा तं शुचिं शुभ्रं अत एव शोभावहगुणान्वितं करोति अत्र देवशिल्पी त्वष्टा नेष्टरिति आमन्त्रित इत्यामनन्ति । तर्हि शुभ्रत्वापादनरूपः परिष्कारः त्वाष्ट्रकर्मैकदेश इत्यदोषः । उक्तलक्षणं स्वशक्तियुक्तं ऋत्विजं देवमामन्त्र्य ऋषिराह– नः अस्माकं यज्ञम् अभि-गृणीहि अभिष्टुहि प्रशंसास्पदं कुरु । ऋतुना सह पिब सोमम्, हि यस्मात्

त्वम् रत्नधाः असि (रत्नधाः व्याख्यातम्) रत्नानां धारकोऽसि, तस्मात् रत्यति-शयजनकं सोमं पिब ॥

चतुर्थीमृचमाह—

अग्ने॑ दे॒वाँ इ॒हा व॑ह सा॒दया॒ योनि॑षु त्रि॒षु । परि॑ भू॒ष पिब॑ ऋ॒तुना॑ ॥४॥

अग्ने॑ दे॒वान् इ॒ह आ व॒ह॒ सा॒दय॑ योनि॑षु त्रि॒षु परि॑ भू॒ष पिब॑ ऋ॒तुना॑ ॥

हे **अग्ने देवान् इह आवह** (व्याख्यातः पादः)। आहूतान् देवान् **सादय** उपवेशय। कुत्र? **त्रिषु योनिषु** स्थानेषु सवनेषु **परिभूष** परितोऽलंकुरु, **ऋतुना** समयानुसारेण **पिब**। इदं सवनानां सदनानां वा त्रयस्य रहस्यं बोद्धव्यम्। अन्न-प्राण-मनोमयात्मकशरीरस्य यानि मूलभूतानि व्याहृतित्रयवाच्यपृथिव्यन्तरिक्षद्युलोकस्थानानि भवन्ति, तेषां तत्तद्विशिष्टवैभवस्थानानि मानवस्यान्तरे गुप्तानि किञ्चिद्व्यक्तानि वा भवन्तीति बोध्यम्। आहिताग्नेस्त्वन्तर्यजने इमानि त्रीणि देवसदनानि सन्नद्धानि भवन्ति, यान्यग्निपुरोहिताः देवा यष्टव्यत्वेन अलंकुर्वन्ति ॥

पञ्चमीमृचमाह—

ब्रा॒ह्म॑णादिन्द्र॒ राध॑सः॒ पिबा॒ सोम॑मृ॒तूँरनु॑ । तवेद्धि स॒ख्यमस्तृ॑तम् ॥५॥

ब्रा॒ह्म॑णात् इन्द्र॒ राध॑सः पिब॑ सोम॑म् ऋ॒तून् अनु॑ तव॑ इत् हि स॒ख्यम् अस्तृ॑तम् ॥

हे **इन्द्र ब्राह्मणात्** ऋत्विग्विशेषो देवो ब्रह्मा ब्राह्मणाच्छंसीत्याहुः, तस्येदं ब्राह्मणं तस्मात्। **राधसः** सोमरसरूपधनाश्रयभूतात् स्थानात् (पात्रात् इति वाक्यपक्षे वक्तव्यम्, । पात्रशब्दव्याख्याऽवधेया)। **ऋतून् अनु** अनुसृत्य **सोमम् पिब**। **तव इत् सख्यम्** तव सखित्वमेव **अस्तृतम्** अबाधितम्। **हि** अवधारणे। देव-कामस्य यजमानस्य अन्तरुन्मेषशालिनः सर्वस्वं देवेभ्योऽर्पयतः परदैवतनिष्ठस्य विषये इन्द्रसख्यं नित्यमेव भवति ॥

षष्ठीमृचमाह—

युवं दक्षं धृतव्रत मित्रावरुण दूळभम् । ऋतुना यज्ञमाशाथे ॥६॥

युवम् दक्षम् धृतव्रता मित्रावरुणा दुःऽदभम् ऋतुना यज्ञम् आशाथे इति ॥

हे धृतव्रता धृतव्रतौ ऋतानुरोधेन विहितानां कर्मणां धारयितारौ **मित्रावरुणा** मित्रो वरुणश्च (संहितायां उभयत्र च ह्रस्वश्छान्दसः) **युवम्** युवां उभौ **दक्षम्** विवेचनपरं (व्याख्यातम्) **दुर्दभम्** दुर्दहं दुःखेन दग्धुं शक्यम्, अन्यैः विनाशयितुं अशक्यमित्यर्थः, **यज्ञम् ऋतुना** योग्यकालानुसारेण **आशाथे** व्याप्नुतः भोक्तुमिति शेषः । दूळभम्— दुःपूर्वकाद्दहतेः खल्, दुरित्यत्र दूरिति दीर्घश्छान्दसः, तथा रेफस्य लोपः, दकारस्य डकारो ह्रस्व भश्च ॥

इति प्रथमस्य प्रथमे अष्टाविंशो वर्गः

अथास्मिन् सूक्ते सप्तमीमृचमाह—

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे । यज्ञेषु देवमीळते ॥७॥

द्रविणःऽदाः द्रविणसः ग्रावऽहस्तासः अध्वरे यज्ञेषु देवम् ईळते ॥

यो **द्रविणोदाः** द्रविणप्रदः तं **देवम्** अग्निं **ईळते** अध्येष्यत्वेन स्तुवन्ति ऋत्विज इति शेषः । कुत्र? **अध्वरे** यज्ञसामान्ये **यज्ञेषु** यज्ञविशेषेषु । प्रकृतिभूतोऽध्वरः अग्निष्टोमः, तद्विकृतयः उक्थादय इति बाह्यपक्षानुसारिणः । अन्तर्यजने तु सामान्येन परदैवताय स्वात्मीयतात्यागपूर्वकं यजमानकृतस्वात्मार्पणम्, विशेषेण स्वीयसर्वस्वभूताङ्गप्रत्यङ्गसमर्पणं परदैवतायैव तदङ्गभूतनानादेवतायजनद्वारेण चेति प्रकृति-विकृतिसारांशो बोध्यः । ते च ऋत्विजः **द्रविणसः** द्रविणार्थिनः **ग्रावहस्तासः** सोमाभिषवसाधनभूताः ग्रावाणः पाषाणाः हस्तेषु येषां ते । यजमानार्थं ऋत्विजो देवा एव द्रविणार्थिनः सोमाभिषवाय सन्नद्धाः सन्तः अग्निं द्रविणदायिनं सत्कारपूर्वकं ईरयन्तीत्यर्थः । द्रविणम् धनं वा बलं वा भवतु । तद्दिव्यं वस्तु द्रव्यं भवति । यजमानकृते स्वयमग्निरेव तद्द्रविणं गवेषयति साधयति चेति मन्त्रवर्णेभ्योऽवगम्यते । तस्मादग्निर्द्रविणस्युरपि भवति । न केवलं द्रविणोदाः । अत्र अन्ये देवाः

ऋत्विग्भूता यजमानकृते द्रविणार्थिनो भवन्तीति बोध्यम् । द्रुदक्षिभ्यामिनन्, द्रविणं ददाति द्रविणोदाः, पूर्वपदस्य सकारश्छान्दसः । उत्तरपदात् 'सु' आदेशोऽपि छान्दसः । द्रविणसः– द्रविणमात्मन इच्छन्तीति द्रविणस्यवः, द्रविणस्यतेः छान्दसत्वात् क्विप् । द्रविणेच्छव इत्यवयवार्थः ॥

अष्टमीमृचमाह—

द्रविणोदा ददातु नो वसूनि यानि शृण्विरे । देवेषु ता वनामहे ॥८॥

द्रविणःऽदाः ददातु नः वसूनि यानि शृण्विरे देवेषु ता वनामहे ॥

द्रविणोदाः एतन्नामको देवोऽग्निः नः अस्मभ्यं ददातु प्रयच्छतु । कानि? वसूनि द्रविणानि यानि शृण्विरे श्रूयन्ते (छन्दसि लटः लिट्, अन्यच्छान्दसम्) यानि दिव्यानि वसूनि विश्रुतानि भवन्ति, देवरहस्यवेदिनां ऋषीणां विदितानि ता तानि देवेषु निमित्तभूतेषु वनामहे सम्भजामहे, देवार्थं देवेषु मध्ये भुञ्जमः । न स्वार्थपरा वयं सोमयाजिनः, अपि तु देवार्थपराः, अतः देवेष्वेव नो वसूपभोगः ॥

नवमीमृचमाह—

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत । नेष्ट्रादृतुभिरिष्यत ॥९॥

द्रविणःऽदाः पिपीषति जुहोत प्र च तिष्ठत नेष्ट्रात् ऋतुऽभिः इष्यत ॥

द्रविणोदाः देवः ऋतुभिः सह परिपाकविधि-विभवसम्पन्न-समयानुसारेणेत्यर्थः, पिपीषति पिपासति (छान्दसम्) सोममिति शेषः । कस्मात्? नेष्ट्रात् नेष्टृसम्बन्धिनः पात्रात् (प्रागुक्तं द्रष्टव्यम्) । तस्मात् जुहोत हवनं कुरुत, प्रतिष्ठत च तदीयं स्थानं प्रति प्रस्थानं कुरुत । इष्यत तमुद्दिश्य एषणं कुरुत श्यन्विकरणिनः इषधातोः न केवला गतिरर्थः, प्रेरणबलसम्पन्ना गतिरिति बोध्यम् । जुहोत-लोट्, मध्यमबहुवचनं छान्दसम् ॥

दशमीमृचमाह—

यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे । अध स्मा नो ददिर्भव ॥१०॥

यत् त्वा तुरीयम् ऋतुभिः द्रविणःऽदः यजामहे अध स्म नः ददिः भव ॥

हे **द्रविणोदः** भगवन्, **यत्** यस्मात् **ऋतुभिः** मदीयदिव्यवेलानुसारेण **तुरीयम्** चतुर्णां पूरणं **त्वा** त्वाम् **यजामहे अध** तस्मात् कारणात् **नः** अस्मभ्यं **ददिः** दाता द्रविणस्येति शेषः, **भव** । **स्म** पादपूरणः । ददिः किप्रत्ययः, लिड्वद्भावात् द्विर्वचनादि, आतो लोपश्च । अत्रेदमवधातव्यम् । पूर्वं द्रविणोदाः स्थानत्रयापेक्षया त्रिः स्तुतः । अधुना चतुर्थवारं व्याहृतित्रयप्रतिपादित-त्रिलोकस्थानान्यतीत्य वर्तमानं तुरीयं सर्वोत्कृष्टं दिव्यं द्रविणं सम्पादयितुं तत्रस्थो द्रविणोदाः तुरीयस्थानः प्रार्थ्यते । चतुर्थवारं यजामह इति यजनक्रियाविशेषणतया तुरीयपादग्रहणेऽपि समानमेव भवति तात्पर्यम् ॥

एकादशीमृचमाह–

अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा ॥११॥
अश्विना पिबतम् मधु दीद्यग्नी इति दीदिऽअग्नी शुचिऽव्रता ऋतुना यज्ञऽवाहसा ॥

हे **अश्विना** अश्विनौ, **ऋतुना** दिव्यसमयानुसारेण **मधु** मधुरं सोमं **पिबतम्** । कीदृशौ? **दीद्यग्नी** दीदिः दीप्तः अग्निः ययोस्तौ (दिवु धातोरभ्यासः छन्दसि रूपम्) 'अश्विनौ वै देवानां भिषजावश्विनावध्वर्यू घर्मं सम्भरतः' इति ऐतरेयब्राह्मणं अश्विनोः अग्निमन्थनमुपपादयति । ऋक्संहितायामन्यत्र (१०-२४-४) ऋषिणा विमदेन 'ईळितौ' अश्विनौ परस्परसङ्गतौ अग्निं निर्मथितवन्तौ-इत्यर्थको मन्त्रवर्णश्च भवति । अन्तरर्थानुसारेण तात्पर्ययोजने रसवान् भवति 'दीद्यग्नी' इति मन्त्रस्थशब्दार्थः । अश्विनोर्व्यापारः प्रथमानुवाके प्रतिपादितः । 'दीद्यग्नी' इति सकृदेव प्रयुक्तं ऋक्संहितायाम् । अन्यत्र बालखिल्यसूक्तेषु सकृत् । उभयत्र च अश्विनोर्विशेषणम् । **शुचिव्रता** शुद्धकर्माणौ **यज्ञवाहसा** यज्ञस्य प्रापयितारौ ॥

द्वादशीमृचमाह–

गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि । देवान् देवयते यज ॥१२॥

गार्हऽपत्येन सन्त्य ऋतुना यज्ञऽनीः असि देवान् देवऽयते यज ॥

गार्हपत्येन गृहपतित्वेन हेतुना **सन्त्य** सनने दाने भव (षणु दाने भवेत् छन्दसीति यत्, अन्यच्च छान्दसम्) हे अग्ने **ऋतुना** ऋत्वनुसारेण **यज्ञनीः** यज्ञस्य प्रापयिता **असि** भवसि । **देवयते** देवकामाय यजमानाय **देवान्** यज । अग्निः यजमानाय स्वयं गार्हपत्यं वहन् दानाधिकारी भवति, तस्मात् यजमानस्वार्थाय स एव देवान् यष्टुं प्रभवति । सन्त्य इत्यत्र सनने भवः साधुर्वा स्यात् । भवश्चेत् यजमानेन कृते स्वार्थत्यागरूपे दाने इति ग्राह्यम् । साधुश्चेत् दाता सोऽग्निरिति स्पष्टम् ॥

इति प्रथमस्य प्रथमे एकोनत्रिंशो वर्गः

चतुर्थेऽनुवाके आ त्वा वहन्त्विति पञ्चमं नवर्चं सूक्तम् । ऋषिच्छन्दसी पूर्ववत् । इन्द्रो देवता ॥

तत्र प्रथमामृचमाह—

आ त्वा वहन्तु हरयो वृषणं सोमपीतये । इन्द्र त्वा सूरचक्षसः ॥१॥

आ त्वा वहन्तु हरयः वृषणम् सोमऽपीतये इन्द्र त्वा सूरऽचक्षसः ॥

हे **इन्द्र वृषणम्** वर्षितारं **त्वा** त्वां **हरयः** अश्वाः त्वदीयाः **सोमपीतये** सोमपानाय **आवहन्तु** आनयन्तु । **त्वा** त्वां **सूरचक्षसः** सूरवत् चक्षो दर्शनं येषां ते सूर्यतुल्यदृष्टय इत्यर्थः (चक्षेरसुन् छन्दसि) । ते हरयः आवहन्त्विति सम्बन्धः । त्वा इति द्विरावृत्तिरादरार्था, अर्धर्चभेदाच्च । इन्द्रस्य हरीणां दर्शनानि सूर्यस्येव दूरगामीनि दीप्तानि च भवन्ति । सूर्यदर्शिनस्ते हरय इत्येकेषां व्याख्यानेऽप्यदोषः । सूरचक्षस ऋत्विज इति सायणीयम् । तर्हि न तैर्मानुषैर्भाव्यम् । ये च यज्ञशालामलङ्कुर्वाणाः यथाविधि वेदपाठिनः यज्ञकर्मपरिसमाप्तौ स्वकर्मपरिश्रमानुरोधेन यथोक्तदक्षिणालाभसन्तुष्टाः निवर्तन्ते, न ते सूरचक्षसः । अथेमे च ऋत्विजो देवाश्चेत्, तेषां न तत् कर्तव्यम् । इन्द्रस्य वोढारो हरयः, न ऋत्विजः, सर्वान् देवान् आवहन्नग्निः गीयते । इन्द्रश्च सर्वैर्देवैरागच्छतीति च श्रूयते । क्व श्रूयते देवा ऋत्विग्भूता इन्द्रं

आवहन्तीति? 'सूरचक्षसो' देवाः स्युः, देवत्वं प्राप्ता ऋषयः स्युः । इह तु न सा प्रसक्तिः । हरय एव प्रसक्ताः उत्तरत्रापि सूक्तेऽस्मिन् हरिप्रशंसैव प्रकृतेत्यसंशयम् । नैतद्युक्तं यत् सूरचक्षस ऋत्विज इन्द्रावहनाय आहूयन्त इति ॥

द्वितीयामृचमाह—

इ॒मा धा॒ना घृ॑त॒स्नुवो॒ हरी॑ इ॒होप॑ वक्षतः । इन्द्रं॑ सु॒खत॑मे॒ रथे॑ ॥२॥

इ॒माः धा॒नाः घृ॒त॒ऽस्नुवः॑ हरी॒ इति॑ इ॒ह उप॑ व॒क्ष॒तः॒ इन्द्र॑म् सु॒ख॒ऽत॑मे रथे॑ ॥

इमाः पुरोवर्तिन्यः घृतसाधिताः अत एव घृतस्नुवः घृतं स्नुवन्ति प्रस्रावयन्तीति घृतस्नुवः ताः धानाः भृष्टयवतण्डुलरूपाः उद्दिश्य, हरी इन्द्रस्याश्वौ इह यजनकर्मणि इन्द्रम् सुखतमे रथे अवस्थाप्य उपवक्षतः वेदिसमीपे वहताम्, प्रार्थनायां लिङर्थे लोडर्थे वा लेट् । घृतेन यवतण्डुलानां भर्जनेन साधु साधिताः धानाः घृतं स्रावयन्ति । ता इमाः हर्योः प्रोत्साहनार्थाः । यज्ञे हर्योः ऋजीषं भागो धानाश्च इति स्कन्दस्वामी । बहिर्यागपरस्य तात्पर्यस्यास्य जीवभूतो धानाशब्दः भृष्टयवतण्डुलेषु रूढः । यागोपयोगार्थानि द्रव्याणि घृतपयोदधिप्रभृतीनि सङ्केतभूतानीति अस्माभिः प्रतिपादितं अत्रावधातव्यम्, यवतण्डुलतद्विकारधानापुरोडाशादयः अन्नमयशरीरसम्बन्धलक्षकाः । यद्यपि धानं धानी धानाः इति त्रीण्यपि धारणार्थस्य दधातेः रूपाणि, रूढिभेदात् धानं धानी वा आधारपात्रं आसनं वा अभिधत्ते, न तथा धानाः । तथाऽपि तासां शरीरधारकत्वं, बुद्धिगतदीप्तिवाचकघृतस्राविणीत्वं च अवयवार्थबलात् सङ्केतार्थबलात् घृतस्नुव इति विशेषणोपादानाच्च बोध्ये । बहिर्यागे हर्योर्भोज्या धानाः । अन्तर्यागे हर्योः प्रदीप्तप्राणबलयोर्भोग्याः अन्नमयशरीरगतधारणाशक्तिविशेषाः । ऋक्संहितायां प्रायशः सर्वत्र इन्द्रायैव धानाः पच्यन्त इति श्रूयते । याज्ञिकग्रन्थेष्वेव हर्योर्भागो धाना उक्ताः । तत्रापि अन्तरर्थ उपपादितः । इन्द्रायैव धाना इति निर्णायका मन्त्रवर्णा बहवो भवन्ति । इन्द्रस्वीकार्या 'घृतस्नुवो धानाः' तु अन्नमयशरीरोपहितदीप्तिभरित-धीवृत्तिविशेषा इति ग्राह्यम् । तादृशीर्धानाः दिव्यप्रकाशमनोधामस्वामिनः इन्द्रस्य स्वीकार्या भवन्ति । प्रत्यहं ईदृशीः 'धानाः' परस्परं सुसङ्गता इन्द्रमुद्दिश्य

ऋषिर्निवेदयन् 'भुङ्क्ष्व' इति प्रार्थयते 'दिवे दिवे सदृशीः अद्धि धानाः' (३-३५-३) इति। अन्यत्र 'य इन्द्राय सुनवत् सोममद्य पचात् पक्तीः उत भृज्जाति धानाः' (४-२४-७)। यागद्रव्याणां सङ्केतात्मकत्वे विचार्यमाणे, दधि-धानादिशब्दानामन्वयवार्थो गूढार्थ-द्वारमुद्धाटयेदिति बोध्यम्। उद्देशपूर्वकं धानादिद्रव्याणि सङ्केतरूपतया स्थापयित्वा अन्तर्यागार्थाः मन्त्रवर्णाः प्रवृत्ता इति प्रदर्शयितुं धानाशब्दप्रस्तावेऽत्र किञ्चिद्विस्तृतं विवरणम्॥

तृतीयामृचमाह–

इन्द्रं॑ प्रा॒तर्ह॑वामह॒ इन्द्रं॑ प्रय॒त्य॑ध्व॒रे। इन्द्रं॒ सोम॑स्य पी॒तये॑ ॥३॥

इन्द्र॑म् प्रा॒तः ह॒वा॒म॒हे॒ इन्द्र॑म् प्र॒ऽय॒ति अ॒ध्व॒रे इन्द्र॑म् सोम॑स्य पी॒तये॑ ॥

इन्द्रम् प्रातः सवनारम्भे **हवामहे** आह्वयामः। **अध्वरे** यज्ञे **प्रयति** प्रवृत्ते चलति सति **इन्द्रम्** हवामहे इति सम्बन्धः। **इन्द्रम् सोमस्य पीतये** पानाय हवामहे। अस्माकं सर्वानुभूतिरसः सोमशब्दलक्षितः इन्द्रायार्प्यते, तस्मात् सवने प्रक्रान्ते प्रवृत्ते समाप्ते च इन्द्राह्वानमेव नः सर्वदा साधनं शरणं चेति भावः॥

चतुर्थीमृचमाह–

उप॑ नः सु॒तमा ग॑हि॒ हरि॑भिरिन्द्र के॒शिभिः॑। सु॒ते हि त्वा॒ हवा॑महे ॥४॥

उप॑ नः॒ सु॒तम् आ ग॒हि॒ हरि॑ऽभिः इ॒न्द्र॒ के॒शिऽभिः॑ सु॒ते हि त्वा॒ हवा॑महे ॥

हे **इन्द्र, नः** अस्माकं **सुतम्** सोमं प्रति **उपागहि** समीपमागच्छ। कैः वोढृभिः? **केशिभिः हरिभिः** प्रलम्बकेसरैरश्वैः। **हि** यस्मात् **सुते** सोमे अभि-षुते (निमित्तसप्तमी) **त्वा** त्वां **हवामहे** आह्वयामः, तस्मात् 'उपागहि' इति सम्बन्धः। केशिभिरिति हरिविशेषणस्य प्रयोजनं प्रागुक्तम्॥

पञ्चमीमृचमाह–

सेमं नः॒ स्तोम॒मा ग॒ह्युपे॒दं॒ सव॑नं सु॒तम्। गौ॒रो न तृ॒षि॒तः॑ पिब ॥५॥

सः इ॒मम् नः॒ स्तोम॑म् आ ग॒हि॒ उप॑ इ॒दम् सव॑नम् सु॒तम् गौ॒रः न तृ॒षि॒तः पि॒ब ॥

सः इमं इति संहितायां सुलोपः । सः त्वं नः अस्माकं **इमं स्तोमम्** त्वं **आगहि** आगच्छ, आकर्ण्य अङ्गीकुर्वित्यर्थः । **सुतम्** अभिषुतसोमं **इदम् सवनम्** यजनं **उप** उपेहि । उपेत्य **तृषितः गौरो न** तीव्रपिपासुः गौरमृग इव **पिब** सोममिति शेषः ॥

इति प्रथमस्य प्रथमे त्रिंशो वर्गः

षष्ठीमृचमाह–

इमे सोमास इन्दवः सुतासो अधि बर्हिषि । ताँ इन्द्र सहसे पिब ॥६॥

इमे सोमासः इन्दवः सुतासः अधि बर्हिषि तान् इन्द्र सहसे पिब ॥

इमे सोमासः सोमाः **इन्दवः** (उन्दी क्लेदने इत्यस्य रूपम्) क्लेदनयुक्ताः आर्द्राः सुखकरा इत्यर्थः । **बर्हिषि** अन्तरे वेद्यां आसने **अधि** उपरि **सुतासः** अभिषुताः अवस्थिताः । **तान्** तथा त्वत्पानाय संस्कृतान् अंशबाहुल्यलक्षकपात्रभेदेषु अवस्थितान् सोमान् हे **इन्द्र सहसे** बलार्थं **पिब** । अत्र 'अधि' आधिक्येन 'सुतासः', 'बर्हिषि' यज्ञे इति सायणः । 'अधि बर्हिषि' इत्यत्र अस्मदुक्तार्थो न क्षपयति स्थूलपक्षीयं आशयम्, बर्हिश्शब्दस्य कर्मणि दर्भे रूढेः । 'अधि' उपरि 'बर्हिषि' इत्येव स्कन्दस्वामी ॥

सप्तमीमृचमाह–

अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शन्तमः ।
अथा सोमं सुतं पिब ॥७॥

अयं ते स्तोमः अग्रियः हृदिऽस्पृक् अस्तु शम्ऽतमः अथ सोमम् सुतम् पिब ॥

हे इन्द्र, **अयम्** अस्मदीयः **स्तोमः** स्तोत्रविशेषः **अग्रियः** श्रेष्ठः **ते** तव **हृदिस्पृक्** हृदि स्पृशतीति हृदिस्पृक् (तत्पुरुषे कृति बहुलमित्यलुक्) हृदयङ्गमः **शन्तमः** सुखतमः **अस्तु** भवतु । **अथ** हृदयस्पृशः अत्यन्तसुखप्रदस्य अस्य स्तोत्रविशेषस्य अङ्गीकारात् परं **सुतम्** अभिषुतं **सोमम् पिब** ॥

अष्टमीमृचमाह–

विश्वमित्सवनं सुतमिन्द्रो मदाय गच्छति । वृत्रहा सोमपीतये ॥८॥

विश्वम् इत् सवनम् सुतम् इन्द्रः मदाय गच्छति वृत्रऽहा सोमऽपीतये ॥

वृत्रहा सर्वावरकतमश्शरीरस्य ज्योतिर्विज्ञानशक्तिसंहतिशत्रोरसुरस्य वृत्रस्य घातक **इन्द्रः सुतम्** सुतसोमम् सोमाभिषवयुक्तमिति यावत् **विश्वम् इत्** सर्वमपि **सवनम्** यजनम् **सोमपीतये** सोमपानाय **मदाय** तज्जन्यसम्मदाय आनन्दाय इत्यर्थः **गच्छति** प्राप्नोति । यत्र यत्र सोमेन देवयजनं चलति तत्र सर्वत्र तदङ्गी-काराय सिद्धो भवन्निन्द्रः सन्निहितो भवति ॥

नवमीमृचमाह–

सेमं नः काममा पृण गोभिरश्वैः शतक्रतो । स्तवाम त्वा स्वाध्यः ॥९॥

सः इमम् नः कामम् आ पृण गोभिः अश्वैः शतक्रतो इति शतऽक्रतो स्तवाम त्वा सुऽआध्यः ॥

हे **शतक्रतो** बहुकर्मन् बहुप्रज्ञ वा, **सः** तादृशस्त्वं **नः** अस्माकं **कामम्** अभीप्सितमर्थं **आपृण** आपूरय (पृण प्रीणने, इत्यस्य रूपम्) । **गोभिः अश्वैः** च सह काममापृणेति सम्बन्धः । वयं **स्वाध्यः** सुष्ठु आध्यानपराः सन्तः **त्वा** त्वाम् **स्तवाम** । सु-आङ्-पूर्वकस्य ध्यै चिन्तायामित्यस्य स्वाधीः इति प्रथमैकवचनान्तं रूपम् । स्वाध्य इति बहुवचनम् । गावः अश्वाश्च चतुष्पादः पशवः प्रेप्सिता इति स्थूलार्थ-पराणां मतम् । गोशब्दलक्षिताः प्रज्ञांशवः, अश्वशब्दलक्षिता भोगसामर्थ्यसम्पन्नाः क्रियाशक्तिमूलभूतप्राणबलवाहिन इति सर्वत्राभिमतमस्माकम् ॥

इति प्रथमस्य प्रथमे एकत्रिंशो वर्गः

चतुर्थेऽनुवाके इन्द्रावरुणयोरित्यादिकं षष्ठं नवर्चं सूक्तम् । इन्द्रावरुणदेवताकम् । ऋषिश्छन्दसी पूर्ववत् । युवाकु हीत्यादिके द्वे ऋचौ पादनिचृन्नामकच्छन्दोयुक्ते इत्ययं विशेषः ॥

तत्र प्रथमामृचमाह–

इन्द्रावरु॑णयोर॒हं स॒म्राजो॒रव॒ आ वृ॑णे। ता नो॑ मृळात ई॒दृशे॑ ॥१॥

इन्द्रावरु॑णयोः अ॒हम् स॒म्ऽराजोः॑ अवः॑ आ वृ॒णे॒ ता नः॒ मृ॒ळा॒तः॒ ई॒दृशे॑ ॥

अहम् सम्राजोः सम्यग्राजमानयोः **इन्द्रावरुणयोः** इन्द्रो वरुणश्च तयोः **अवः** वर्धनं मयीति शेषः, **आवृणे** प्रार्थये। **ता** तौ देवौ **ईदृशे** एवंविधेऽस्मदीय-वरणे निमित्तभूते **नः** अस्मान् **मृळातः** सुखयतः। अवः-अवधातोरसुन्, रक्षणं वर्धनं वा भवति। उपासकस्य अन्तरे देवानां जन्म वर्धनं च अन्तर्यागफलांशभूते स्तः। मृळातः– मृड सुखने, प्रार्थनायां लिङर्थे लेट्। इन्द्रः स्वर्धामाऽपि दिव्येन मनसा धीसम्राड् भवति। वरुणस्तु ऋतसद्मा, ऋतवर्धनः, ऋतस्पृक् ज्योतिर्मय इति विशेषो ग्राह्यः। उभयोस्तत्त्वं प्रथमानुवाके प्रस्तुतम् ॥

द्वितीयामृचमाह—

गन्ता॑रा हि स्थोऽव॑से॒ हवं॒ विप्र॑स्य॒ माव॑तः। ध॒र्तारा॑ चर्षणी॒नाम् ॥२॥

गन्ता॑रा हि स्थः अव॑से हव॑म् विप्र॑स्य माऽव॑तः ध॒र्तारा॑ च॒र्ष॒णी॒नाम् ॥

हे इन्द्रावरुणौ, युवां **अवसे** अवितुं (अवतेः तुमर्थे से) अन्तर्याजिनो वर्धनायेत्यर्थः, **मावतः** मद्विधस्य (वतुप्-प्रकरणे छन्दसि सादृश्य उपसङ्ख्यानम्) **विप्रस्य** मेधाविनः **हवम्** आह्वानं **गन्तारौ** प्राप्तारौ **स्थः** भवथः। कीदृशौ? **चर्षणीनाम् धर्तारा** सूक्ष्मं तत्त्वं देवतारहस्यं वा पश्यतां पुरुषाणां धारयितारौ। चर्षणिः पश्यति-कर्मा। द्रष्टॄणां ऋषीणां योगक्षेमं बिभृतो देवाविन्द्रावरुणौ। 'चर्षणयः', न मनुष्य-सामान्यवाचकोऽवधेयः ॥

तृतीयामृचमाह—

अ॒नु॒का॒मं त॒र्पये॑था॒मिन्द्रा॑वरुण रा॒य आ। ता वां॒ नेदि॑ष्ठमीमहे ॥३॥

अनु॒ऽकाम॑म् त॒र्प॒ये॒था॒म् इन्द्रा॑वरुणा रा॒यः आ ता वा॒म् नेदि॑ष्ठम् ई॒म॒हे ॥

हे **इन्द्रावरुणा** (सांहितिकः ह्रस्वः अकारः) इन्द्रो वरुणश्च उभौ युवां **अनुकामम्** कामम् अनु कर्मप्रवचनीयः। अनुरिह यथापर्यायत्वेन ग्रहीतुं शक्य इति सायणस्याभिमतम्, कामस्य पश्चादनुकाममिति च युक्तो विग्रहः। प्रथमोक्ते यथेष्टमित्यर्थः, द्वितीयोक्ते, स्तोमाकर्णन-सोमपानादिरूप-कामपूर्तेरनन्तरं इत्यर्थः । एवमेव मन्यते स्कन्दस्वामी– 'सोमस्य च पश्चादनुकामं कामयित्वा तत्पानानन्तरमित्यर्थः' इति। उभयथाऽप्यस्मत्पक्षे इन्द्रावरुणयोः कामः गृह्यते। तस्मात् तयोर्यथाकामं कामपूर्तेः पश्चाद्वेति बोध्यम्। **रायः** (तृतीयार्थे षष्ठी) दिव्येन युवयोर्धनेन **आतर्पयेथाम्** सर्वतः अस्मान् तृप्तान् कुरुतम् । **ता** तौ **वाम्** युवाम् **नेदिष्ठम्** अतिशयेन सामीप्यं **ईमहे** याचामहे । युवयोरत्यन्तसन्निकर्षं युवां याचामहे इति याच्ञार्थकक्रियायाः द्विकर्मकत्वं अभ्युपगम्य तात्पर्यं ग्राह्यम् । अथवा तौ युवां नेदिष्ठं युष्मदीयं रायं ईमहे इति स्याद्वा भावः। पूर्वे व्याख्यातारः सर्वेऽपि 'नेदिष्ठम्' इत्यस्य तात्पर्यविवरणे विप्रतिपद्यन्ते। युवाकु हि' इति उत्तरस्यामृचि प्रार्थितस्य दिव्यस्य धनस्य प्रज्ञाबलसमृद्धिनिधेः 'नेदिष्ठस्य' 'रायः'गूढं प्रतिपादनं भवति। तत्संप्रत्यावेदयामः ॥

चतुर्थीमृचमाह—

* यु॒वाकु॒ हि शची॑नां यु॒वाकु॑ सुम॒ती॒नाम् । भू॒याम॑ वाज॒दाव्ना॑म् ॥४॥

यु॒वाकु॑ हि शची॑नाम् यु॒वाकु॑ सु॒ऽम॒ती॒नाम् भू॒याम॑ वा॒ज॒ऽदाव्ना॑म् ॥

---

* युवाकुपदार्थनिर्णयेन मन्त्रार्थावगतौ क्लेशः शिथिलितः स्यात्। यौतेर्मिश्रणार्थात् औणादिके काकु-प्रत्यये परे युवाकुपदं निष्पन्नं, मिश्रितमित्यर्थः। अयमर्थः सायणीयः कर्मपरव्याख्यानोपयोगी भवति। अस्यामृचि द्विः प्रयुक्तं युवाकुपदम्। प्रथमं 'युवाकु' 'शचीनाम्' कर्मणां सम्बन्धि द्रव्यं सोमरूपं हविः उदकैः द्रव्यान्तरैश्च 'मिश्रितम्'। द्वितीयं तु 'सुमतीनाम्' ऋत्विजां सम्बन्धि स्तोत्रं स्तुत्यगुणैः 'मिश्रितम्'। इदं द्वयं सिद्धं भवति, तस्मात् 'वाजदाव्नाम्' अन्नदानप्रभूणां मध्ये वयं स्याम, इति मन्त्रसारांशः कर्मठपक्षानुसारेण। युवां कामयते युवाकुरिति बहुषु स्थलेषु सायणः। 'दस्रा युवाकवः सुताः' इत्यत्र वीर्यशालिनो बलिनः सोमा इत्यस्माभिः व्याख्यातम्। तत्र सायणव्याख्यामवलम्ब्य (३-६२-१) युवपदलक्षितं बलमित्यवोचाम। अत्रापि वीर्यवद्बलवद्वा युवाकु भवति। स्कन्दस्वामिनो वैकल्पिकपक्षानुसारेण युवाकव इति बहुवचनस्थाने एकवचनं प्रयुक्तमिति चेदभिमतमेव तत्त्वः ॥

हि यस्मात् **शचीनाम्** शक्तीनाम् **युवाकु** वीर्यं, **सुमतीनाम्** साधु-धी-वृत्तीनां **युवाकु** वीर्यं **भूयाम** भूयास्म (प्रार्थनायां लिङ् सकारलोपश्छान्दसः)। तस्मात् इन्द्रावरुणौ 'नेदिष्ठं ईमहे' इति पूर्वया सम्बन्धः। कीदृशां शचीनां सुमतीनां वा? **वाजदाव्नाम्** वाजं समृद्धिं ददतीति वाजदावानः (आतो मनिन्निस्यादिना वनिप्, छान्दसम्) समृद्धिप्रदानां शक्तीनां शोभनानां साध्वीनां वा प्रज्ञावृत्तीनां च वयं बलभूताः भूयास्म इत्यर्थः। समृद्धिप्रदानां शक्तीनां प्रज्ञावृत्तीनां च यद्वीर्यं भवति तद्वन्तः स्याम तदेव वा भवेम। तस्मान्नेदिष्ठमीमहे, येनेयं सिद्धिः स्यात्। प्रकारान्तर-व्याख्यायां पूर्वयर्चा नास्ति सम्बन्धः। सेयं भवति-हि यस्मात् शचीनां युवाकु (वयं) सुमतीनां युवाकु (वयं) तस्मात् 'वाजदाव्नां' समृद्धिप्रदानां देवानां मध्ये भूयास्मेति ॥

पञ्चमीमृचमाह—

इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम्। क्रतुर्भवत्युक्थ्यः ॥५॥

इन्द्रः सहस्रऽदाव्नाम् वरुणः शंस्यानाम् क्रतुः भवति उक्थ्यः ॥

इन्द्रः सहस्रदाव्नाम् सहस्रं बह्वर्थकम्, विविधस्य बहोः ज्ञानबलादेः दातॄणां **क्रतुः** दानेच्छाबलभूतः दानकारकः कर्तेति यावत्। **वरुणः शंस्यानाम्** स्तुत्यानां **उक्थ्यः** सर्वोत्कृष्टत्वेन स्तुत्यः। उक्थ्यः— उक्थं शस्त्रं तत्र स्तुत्यत्वेन भवः, भवे छन्दसीति यत् ॥

इति प्रथमस्य प्रथमे द्वात्रिंशो वर्गः

षष्ठीमृचमाह—

तयोरिदवसा वयं सनेम नि च धीमहि। स्यादुत प्ररेचनम् ॥६॥

तयोः इत् अवसा वयम् सनेम नि च धीमहि स्यात् उत प्रऽरेचनम् ॥

तयोः सर्वदातृक्रतुभूतस्य कर्तुरिन्द्रस्य सर्वोत्कृष्टत्वेन शंसनीयस्य वरुणस्य च उभयोः **अवसा** अस्मासु वर्धनेन **वयम्** दिव्यधनकामाः **सनेम** सम्भजेम, लब्धव्यं लभेमहि, लब्धं च **निधीमहि च** उपभुक्तावशिष्टं अमितत्वात् निधिवन्नि-दध्मः उपभोगाय यावदपेक्षितं तावतोऽप्यधिकं वर्तते तद्धनं, तस्मात् तन्निक्षेपवद्रक्ष्यते।

अपि च यावदस्माभिर्निधातुं शक्यं, तदपि अतिरिच्य वर्तते तदित्याह– **उत** अपि च **प्ररेचनम्** प्रकर्षेण अतिरिक्तं **स्यात्** । तयोरिन्द्रावरुणयोरस्मासु वर्धनेन यद्दिव्यं धनं लभ्यते तदपरिमितमित्यर्थः । इदं 'विभु प्रभु' इति माधुच्छन्दसी मन्त्रदृष्टिः स्मर्तव्या । इहापि 'चित्राय राधसे' उत्तरत्राह ॥

सप्तमीमृचमाह–

इन्द्रावरुण वामहं हुवे चित्राय राधसे । अस्मान्त्सु जिग्युषस्कृतम् ॥७॥

इन्द्रावरुणा वाम् अहम् हुवे चित्राय राधसे अस्मान् सु जिग्युषः कृतम् ॥

हे **इन्द्रावरुणा** हे इन्द्रावरुणौ (संहितायां ह्रस्वश्छान्दसः) **वाम्** युवामुभौ **हुवे** आह्वयामि । किमर्थम्? **चित्राय** विविधाय **राधसे** धनाय । इदं च विचित्रं दिव्यं धनं बोध्यम् । **अस्मान्** दिव्याय कर्मणे प्रवृत्तान् देवोपासकान् **सुजिग्युषः** सुष्ठु जयसम्पन्नान् **कृतम्** कुरुतम् । जिग्युषः– जि जये इति धातोः लिड्भावे क्वसुन् । कृतम्– करोतेः लोण्मध्यमद्विवचनम्, लड्भावात् तमादेशः छान्दसः ॥

अष्टमीमृचमाह—

इन्द्रावरुण नू नु वां सिषासन्तीषु धीष्वा । अस्मभ्यं शर्म यच्छतम् ॥८॥

इन्द्रावरुणा नु नु वाम् सिसासन्तीषु धीषु आ अस्मभ्यम् शर्म यच्छतम् ॥

इन्द्रावरुणा सांहितिकः ह्रस्वः, **धीषु** अस्मदीयासु **वाम्** युवां, **सिषासन्तीषु** सनितुं सम्भक्तुं इच्छन्तीषु सतीषु (षण धातोः इच्छायां सन्, ततः शतरि ङीप्), **अस्मभ्यम् शर्म** सुखं **आयच्छतम्** सर्वतः दत्तम् । **नु** क्षिप्रम् द्विरावृत्तिरतिशयार्था । संहितायां पूर्वस्य दीर्घश्छान्दसः ॥

नवमीमृचमाह—

प्र वामश्नोतु सुष्टुतिरिन्द्रावरुण यां हुवे । यामृधाथे सधस्तुतिम् ॥९॥

प्र वाम् अश्नोतु सुऽस्तुतिः इन्द्रावरुण याम् हुवे याम् ऋधाथे इति सधऽस्तुतिम् ॥

हे इन्द्रावरुणा इन्द्रावरुणौ, सुष्टुतिः मदीया शोभनेयं स्तुतिः वाम् युवां प्र-अश्नोतु प्राप्नोतु याम् सुष्टुतिं प्रति, यस्या अङ्गीकरणायेत्यर्थः, हुवे आह्वयामि युवाम् । याम् सधस्तुतिम् सहस्तुतिसम्पन्नां अन्तर्यजनक्रियां ऋधाथे युवां वर्धयेथे । सधस्तुतिम् । हकारस्य धकारव्यत्ययः, पूर्वपदप्रकृतिस्वरः, बहुव्रीहिः । तस्मात्, यस्यां इन्द्रावरुणसाहित्ययुक्ता स्तुतिर्वर्तते सा अन्तर्यजनक्रिया इति व्याख्यातम्, सर्वथा अन्यपदार्थप्रधानः समासो भवति । सा च ऋक् सध-स्तुतिरिति सायणस्याभिमतम् । ऋधाथे- ऋधु वृद्धौ, व्यत्ययेन लुग्विकरणम् । अन्त-र्णीतणिजर्थत्वं च । तर्हि अर्धर्चस्येदं तात्पर्यं भवति । यां 'सधस्तुतिं' ऋचं अन्त-र्यजनक्रियां वा युवां वर्धयेथे, सा युवां प्रकर्षेण व्याप्नोत्विति ॥

इति प्रथमस्य प्रथमे त्रयस्त्रिंशो वर्गः

चतुर्थोऽनुवाकः समाप्तः

पञ्चमानुवाके षट् सूक्तानि । तत्राद्यं सोमानमित्यादिकं नवर्चं सूक्तम् । ऋषि-च्छन्दसी पूर्ववत् । ब्रह्मणस्पत्याद्या देवता मन्त्रार्थप्रतिपादने तत्र तत्र स्पष्टाः स्युः ॥

तत्र प्रथमामृचमाह-

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥१॥

सोमानं स्वरणं कृणुहि ब्रह्मणः पते कक्षीवन्तम् यः औशिजः ॥

ब्रह्मणस्पतिर्नाम मन्त्राधिदेवता भवति । उत्तरत्र 'उत्तिष्ठ' इति ब्राह्मणस्पत्यसूक्त-व्याख्यायां तदीयं तत्त्वं प्रपञ्चयिष्यामः । हे ब्रह्मणस्पते एतन्नामकदेव सोमानम् सोतारं मां (षुञ् अभिषवे, सुनोतेर्मनिन्) अभिषवस्य कर्तारमित्यर्थः स्वरणम् स्वृ-शब्दोपतापयोः) प्रकाशनवन्तं कृणुहि कुरु । कक्षीवन्तम् ऋषिमिव इति अध्या-हर्तव्यः । यः कक्षीवान् ऋषिः औशिजः उशिजः पुत्रः प्रसिद्ध आसीत् । इदं च पूर्वेषां व्याख्यानम् । इव-शब्दाध्याहारो नावश्यकः तं विनाऽपि तात्पर्यसिद्धेः । ऐति-

हासिकः कक्षीवान् ऋषिः बहुत्र ऋक्संहितायां प्रसिद्ध उपन्यस्तो भवति । अन्तरर्थपरे व्याख्याने उशिजः कक्षीवतश्च अवयवार्थानुगमेन तात्पर्यं बोध्यम् । इमामृचं विवृण्वन् यास्कः 'कक्षीवान् कक्ष्यावान् औशिजः उशिजः पुत्रः । उशिग्वष्टेः कान्तिकर्मणः । अपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्' इत्याह । तर्हि उशिक् कान्तिमत् तेजो वा भवति, तस्य अपत्यं तैजसः कक्षीवान् रहस्यवान् परदैवतरहस्यसम्पन्न इति वाच्यम्, कक्षशब्दस्य गहनार्थे गोप्यार्थे वा प्रसिद्धेः । इदं चावधेयम्– अत्र इत्शब्दाध्याहार-वर्जं आचार्यदुर्गव्याख्या भवति । 'अपि चैवमन्यथा स्यात्– योऽहं सोमानं सोता कक्षीवान् औशिजः, तमेवंगुणविशिष्टं मां प्रकाशनवन्तं कुरु हे ब्रह्मणस्पते' इति । योऽ इमौशिजः कान्तिजन्मा तैजसः, तं सोमानं सोतारं कक्षीवन्तं परमरहस्यविज्ञं मां स्वरणं प्रकाशनवन्तं देवेषु प्रख्यातं कृणुहि कुरु, ब्रह्मणस्पते– इत्युपपन्नतरम् ॥

द्वितीयामृचमाह–

यो रेवान् यो अमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥२॥

यः रेवान् यः अमीवऽहा वसुऽवित् पुष्टिऽवर्धनः सः नः सिषक्तु यः तुरः ॥

यः ब्रह्मणस्पतिः रेवान् धनवान् यः च अमीवहा हिंसितॄणां हन्ता, अमीवा व्याख्यातः (१-१२-७) वसुवित् वसुनः द्रव्यस्य लम्भयिता (अन्तर्भावितण्यर्थः) पुष्टिवर्धनः पुष्टेः वर्धयिता च भवति, यः तुरः वेगवान् च (तुर त्वरणे) सः नः अस्मान् सिषक्तु समवैतु (षच समवाये श्लुविकरणम्) अस्माभिः सदा संयुक्तो भवतु । मन्त्रवाचामधिष्ठातुर्ब्रह्मणस्पतेः धनवत्त्वादिगुणवैशिष्ट्याभिवर्णनात् सर्वार्थसिद्धिर्मन्त्रैरिष्ट-प्राप्तिरनिष्टपरिहारश्च भवन्तीति आर्षसम्प्रदायविदां मतं सामान्यतः सूचितं बोध्यम् । विशेषतस्तु ब्रह्मणस्पतेः प्रसादाद् गुप्तस्य सर्वस्यार्थस्याविष्कारः, अप्राप्तस्य प्राप्तिः, प्राप्तस्य वर्धनेन रक्षणं, रहस्यस्य प्रकाशः इत्यादयो वाचो महिम्ना सिद्ध्यन्तीति बोध्यम् । अत एव पूर्वस्यामृचि 'कक्षीवन्तं (मां) स्वरणं कृणुहि' इति प्रार्थितम् । अस्यां ऋचि मन्त्रवाक्पतेर्देवस्य अन्तर्याजिनोपासकेन नित्यसंयोगः प्रार्थितः । तथा 'मा नः शंसः' इत्युत्तरस्यां 'तादृशो मन्त्रपतेर्महिमा, येन कदाचिदनन्तर्याजिनं यजनविघातिनामयज्वनां

रजोगुणविशिष्टानां मानुषाणां वा बलिष्ठाऽपि वाणी न प्रभवेत् स्प्रष्टुम्' इत्याह ॥

तृतीयामृचमाह—

मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥३॥

मा नः शंसः अररुषः धूर्तिः प्रणक् मर्त्यस्य रक्ष नः ब्रह्मणः पते ॥

हे ब्रह्मणस्पते भगवन्, अररुषः अप्रयच्छतः, देवेभ्यो यो न ददाति तस्यायज्वनः देवधिक्कारमाचरतः शंसः शंसनं, 'आशंसा विनाशाद्यभिलाष' इति स्कन्दस्वामी । तदाविष्कारकं वचनं नः अस्मान् मा प्रणक् मा सम्पृणक्तु । तथा मर्त्यस्य मरणशीलस्य मनुष्यस्य धूर्तिः हिंसा 'मा प्रणक्' इति सम्बन्धः । नः अस्मान् रक्ष पाहि । अररुषः– रातिर्दानार्थो धातुः छान्दसः, तस्य लिङ्वद्भावे क्वसुन्, 'ररिवान्' न ररिवान्, तस्य अदातुरित्यर्थः । प्रणक्– पृची सम्पर्के, श्नम्विकरणम्, लङस्तिप्, अन्यत् सर्वं छान्दसम् । धूर्तिः– धुर्वी हिंसायाम्, क्तिच्प्रत्ययः ।

ऋचोऽस्याः प्रकारान्तरेण अन्वयं प्राहुः– अररुषो मर्त्यस्य धूर्तिः शंसः नः मा प्रणक् इति । अत्र धूर्तिः हिंसकः, शंसः वाग्विशेष इति सायणीयम् ॥

चतुर्थीमृचमाह—

स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः ।
सोमो हिनोति मर्त्यम् ॥४॥

सः घ वीरः न रिष्यति यम् इन्द्रः ब्रह्मणः पतिः सोमः हिनोति मर्त्यम् ॥

सः घ स एव पुमान् अन्तर्याजी वीरः वीर्योपेतः भवन् न रिष्यति न विनश्यति (रिष धातुर्हिंसार्थकः, अत्र कर्मणि तिप् छान्दसम्, न हिंस्यत इत्यर्थः) यम् मर्त्यम् मनुष्यं ब्रह्मणस्पतिः देवः हिनोति त्वरयति (गतौ वृद्धौ च पठितो धातुः, तथाऽपि नायं गतिसामान्यमभिधत्ते) यं इन्द्रः हिनोति, तथा यं सोमः हिनोतीति सम्बन्धः । वैदिके यजनशब्दवाच्ये चिरन्तने योगे अनुदिनप्रवृद्धिः नित्य-

मूर्ध्वगमनं च ऋतज्योतिःशब्दवाच्य-परदैवतसम्पल्लब्धिं यावत् अवश्यं भवतः । तादृशी यात्रा अनलसस्य वीरस्य आर्यस्य नित्योद्यमस्य पुरुषस्यैव सिध्यति । तत्रापि देवानां साहाय्यमपेक्ष्यते । तस्माद् देवराडिन्द्रः तस्य वाग्वीर्यमूलभूतो ब्रह्मणस्पतिः सम्मदबल-भूतः सोमश्च उपासकं वीरं तारयन्तः प्रतिपादिताः ॥

पञ्चमीमृचमाह-

त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यम् । दक्षिणा पात्वंहसः ॥५॥

त्वम् तम् ब्रह्मणः पते सोमः इन्द्रः च मर्त्यम् दक्षिणा पातु अंहसः ॥

प्रागुक्तास्तिस्रो देवता अत्रोक्ताः । दक्षिणा नविका । सा च देवी साध्वसाधु-सत्यासत्यविवेचनशीला सहजावबोधरूपिणी शक्तिः । ऋतज्योतिषः प्रादुर्भावात् प्रागु-द्द्योतिन्या उषसः विभूतिभूतेति सूक्तान्तरचर्चया देवतान्तरसाहचर्यात् प्रकरणवशाच्च निर्णेतुं शक्यम् । दक्षपदार्थविचारे प्रागस्मदुक्तार्थाद् दक्ष-धातोर्निष्पन्नः दक्षिणा-शब्दः । 'द्रुदक्षिभ्यां इनन्' ॥

तम् मर्त्यम् उपासकं हे ब्रह्मणस्पते त्वम् अंहसः पापात् पाहि इति पुरुषव्यत्ययेन योजनीयम् । तथा सोमः पातु रक्षतु, इन्द्रश्च पातु दक्षिणा च पातु । अंहः पाप्मा, निर्ऋतिरित्यनर्थान्तरम् । अस्य दुरितस्य स्वरूपं अनृतम्, नित्य-कल्याणपरिपन्थि भद्रपदार्थविचारे प्रतिपादितम् ॥

इति प्रथमस्य प्रथमे चतुस्त्रिंशो वर्गः

षष्ठीमृचमाह-

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥६॥

सदसः पतिम् अद्भुतम् प्रियम् इन्द्रस्य काम्यम् सनिम् मेधाम् अयासिषम् ॥

इमाश्चतस्र ऋचो नराशंस इत्यन्ताः सदसस्पतिदेवताकाः । सदसस्पतिरग्निरेव भवति, तन्मूर्तिविशेषो वा । अत्र 'अद्भुतम्' इति लिङ्गम् । प्रागुक्तम् (पृ. ८०-८१) । अन्ते 'नराशंस' इति, स चाग्निरिति यास्कः । विचारितं चेदमाप्रीसूक्तप्रसक्तौ

(पृ. १८७-१८९)। **सदसस्पतिम्** एतन्नामकं देवं **अयासिषम्** प्रापम् (या प्रापणे, लुङ्) कीदृशम्? **अद्भुतम्** महान्तम्, महन्नामैतत्, आश्चर्यकरमित्यदोषः। **इन्द्रस्य प्रियम्** प्रीतिहेतुं **काम्यम्** कामयितुं योग्यं **सनिम्** दातारं (षणु दाने) दानमेव वा, लाभस्वरूपमित्यर्थः, **मेधाम्** मेधाभूतं धारणात्मकप्रज्ञास्वरूपमित्यर्थः। मेधां लब्धुं उक्तगुणविशिष्टं देवं अयासिषमिति सायणीयम् ॥

सप्तमीमृचमाह–

यस्मा॑दृ॒ते न सिध्य॑ति य॒ज्ञो वि॑प॒श्चित॑श्च॒न ।
स धी॒नां योग॑मिन्वति ॥७॥

यस्मा॑त् ऋ॒ते न सिध्य॑ति य॒ज्ञः वि॒पः॒ऽचित॑ः च॒न सः धी॒नाम् योग॑म् इ॒न्व॒ति ॥

यस्माद् **ऋते** येन सदसस्पतिना विना **विपश्चितश्चन** मेधाविनोऽपि प्रज्ञोज्ज्वलस्यापीत्यर्थः **यज्ञः न सिध्यति** ऋषिः प्रज्ञाचक्षुरपि सदसस्पतेरग्नेरेव यजनतन्त्रं शिक्षते, तस्मात् तेन विना न यज्ञसिद्धिरित्युक्तम्। **सः** देवः **धीनाम्** बुद्धीनां, दिव्याध्वनि गच्छतः पुरुषस्य सम्भाविनीनां विसंवादिनीनां बुद्धीनामित्यर्थः, **योगम्** सम्बन्धम् परस्परसंवादरूपम् **इन्वति** प्राप्नोति तदर्थं यातीत्यर्थः (इवि- व्याप्तौ, इदितः नुम्, शब्विकरणम्) ॥

अष्टमीमृचमाह–

आदृ॑ध्नोति ह॒विष्कृ॑तिं॒ प्राञ्चं॑ कृणोत्यध्व॒रम् । होत्रा॑ दे॒वेषु॑ गच्छति ॥८॥

आत् ऋ॒ध्नो॒ति॒ ह॒विः॒ऽकृ॑तिम् प्राञ्च॑म् कृ॒णो॒ति॒ अ॒ध्व॒रम् होत्रा॑ दे॒वेषु॑ ग॒च्छ॒ति॒ ॥

आत् अनन्तरम्, सदसस्पतिना निरुह्यमानस्य 'धीनां योग'स्य सिद्धेः परं इत्यर्थः। सः देवः **हविष्कृतिं** हविषः कृतिः सम्पादनं यस्य तं अन्तर्यागपरं (पूर्वपदप्रकृतिस्वरो बहुव्रीहिः) **ऋध्नोति** वर्धयति (अन्तर्भावितण्यर्थः) **अध्वरं**

(स्वरूपं प्रागुक्तम्) यज्ञम् **प्राश्वम्** प्रकर्षेण गच्छन्तं प्रकृष्टगतिकमित्यर्थः (प्रपूर्वकस्य अश्नतेर्गत्यर्थस्य रूपम्) **कृणोति** करोति । **होत्रा** (वाङ्नाम) आह्वात्री वाक् **देवेषु** मध्ये गच्छति तान् प्राप्नोतीत्यर्थः ॥

नवमीमृचमाह–

नराशंसं सुधृष्टममपश्यं सप्रथस्तमम् । दिवो न सद्ममखसम् ॥९॥

नराशंसम् सुऽधृष्टमम् अपश्यम् सप्रथःऽतमम् दिवः न सद्मऽमखसम् ॥

नराशंसम् सदसस्पतिमूर्तिं अग्निं **अपश्यम्** दृष्टवानस्मि- इति स्वीयं देवतासाक्षात्कारं ब्रूते । अग्निरेवायमिति स्कन्दस्वामीया पङ्क्तिरियं भवति 'आशु यज्ञसाधनहविष्कृतिसमर्थनाद्यग्निकर्मदर्शनात् तद्देवत्याश्वतस्रश्चर्चः' इति । कीदृशमपश्यम्? **सुधृष्टमम्** शोभनं धृष्णोतीति सुधृक् अतिशयेन सुधृक् तम् अत्यधिकधार्ष्ट्ययुक्तं इत्यर्थः । **सप्रथस्तमम्** प्रख्याततमम् (सह प्रथसा वर्तत इति सप्रथः, सर्वधातुभ्यः असुन् अतिशयेन तम्) । **दिवः** द्युलोकस्य (सम्बन्धिनम्) **सद्ममखसं न** गृहयज्ञकारिणम् इव स्थितम् (मखो यज्ञः तत्करोति मखयति यज्ञकारी मखः, सद्मनि गृहे मखः, मखसो मखपर्यायः) स्वर्लोकगृहयाजी इव स्थितो नराशंसः, तमपश्यम् । 'सद्ममखसं प्राप्ततेजस्कं, हकारस्य खकारव्यत्ययः' इत्यभिप्रैति सायणः । 'अपठितमपि मखो महन्नाम, रेजते अग्ने पृथिवी मखेभ्य' इत्युदाहृतं स्कन्दस्वामीये । देवानां समागमस्थानं यज्ञगृहं सद उच्यते । तच्च विशालं बहुभूमिकं ऋषेरन्तर्याजिनः अन्तरं स्थानं भवति । तस्य पतिरग्निः स्वयं यज्ञभारं वहन् स्वर्लोकगृहस्थो यज्ञकारीव व्यभासत इति ऋषिदृष्टिः ॥

इति प्रथमस्य प्रथमे पञ्चत्रिंशो वर्गः

पञ्चमेऽनुवाके द्वितीयं अग्निमारुतं प्रति त्यमिति नवर्चं सूक्तम् । ऋषिश्छन्दसी पूर्ववत् ॥

तत्र प्रथमामृचमाह–

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे । मरुद्भिरग्न आ गहि ॥१॥

प्रति त्यम् चारुम् अध्वरम् गोऽपीथाय प्र हूयसे मरुत्ऽभिः अग्ने आ गहि ॥

हे अग्ने त्वं तं मयाऽनुष्ठीयमानमिमं चारुं स्पृहणीयं अङ्गवैकल्यरहितं अध्वरं यज्ञम् प्रति उद्दिश्येत्यर्थः गोपीथाय गौः सोमरसः तस्य पीथसे पानाय प्रहूयसे प्रकर्षेणाहूतोऽसि । अतः मरुद्भिः सह आगहि आगच्छ । त्यच्छब्दः सर्वनामतच्छब्दपर्यायः । बहिर्यागस्येव अन्तर्यागस्यापि अङ्गानां परस्परसम्बन्धः सुसङ्गतः स्यात् । तेन चारुः सुन्दरः स्यादध्वरः । गोशब्देन विकृतिर्गव्यं पयो भवति । सर्वस्यापि हविषः अन्नपदवाच्यभोज्यत्वसाम्यात् प्रधानभोज्यतया सोमस्य प्रसिद्धेश्च गौः सोमरस इति पूर्वैर्व्याख्यातम् । मरुतोऽधिकृत्य प्राक् किञ्चिदुक्तम् । पुरस्ताच्च प्रसक्तौ वक्ष्यते । मरुतश्चण्डवेगाः प्राणमयधामानः ऐन्द्रज्योतिर्बलदीपितानां धीवृत्तीनां दिव्यगतिविधायिनः प्रवातप्रायप्रेरणाः देवविशेषाः । अत एव धीप्रकाशद्योतकस्य गव्यस्य ग्रहणाय 'गोपीथाय' तैः सह अग्नेरागमनं प्रार्थ्यत इत्यलं विस्तरेण ॥

द्वितीयामृचमाह–

नहि देवो न मर्त्यो महस्तव क्रतुं परः । मरुद्भिरग्न आ गहि ॥२॥

नहि देवः न मर्त्यः महः तव क्रतुम् परः मरुत्ऽभिः अग्ने आ गहि ॥

हे अग्ने, महः महतः, (तलोपश्छान्दसः) तव क्रतुं प्रज्ञां अध्यवसायात्मकं क्रियाबलं वा उल्लङ्घ्य परः अन्यः देवः न हि न भवति खलु । तथा मर्त्यः न भवति । महतस्तव क्रतुमत्येतुं देवो वा मर्त्यो वा न प्रभुरित्यर्थः । मरुद्भिरित्यादि पूर्ववत् ॥

तृतीयामृचमाह–

ये महो रजसो विदुर्विश्वे देवासो अद्रुहः । मरुद्भिरग्न आ गहि ॥३॥

ये महः रजसः विदुः विश्वे देवासः अद्रुहः मरुत्ऽभिः अग्ने आ गहि ॥

हे अग्ने, ये अद्रुहः अद्रोग्धारः, स्तोतारमाश्रितं ये न वञ्चयन्ति ते विश्वे देवासः सर्वे देवाः सप्तविधमरुद्गणाः महः महतः (तलोपः) रजसः लोकस्य (द्वितीयार्थे षष्ठी)

महदन्तरिक्षं, रजश्शब्दो लोकवचनः अन्तरिक्षे प्रसिद्धः विदुः जानन्ति । मध्यमस्थानाः मध्यमं लोकं सर्वे विदन्ति । तैः मरुद्भिरित्यादि पूर्ववत् ॥

चतुर्थीमृचमाह—

य उग्रा अर्कमानृचुरनाधृष्टास ओजसा । मरुद्भिरग्न आ गहि ॥४॥

ये उग्राः अर्कम् आनृचुः अनाधृष्टासः ओजसा मरुत्ऽभिः अग्ने आ गहि ॥

ये मरुतः उग्राः शूराः ओजसा बलेन परकीयेन अनाधृष्टासः अप्रधर्षिताः अनभिभूता इत्यर्थः, अर्कं अर्चनं ऋगात्मकं स्तोत्रं आनृचुः अर्चन्ति (ऋच गति-पूजनयोः इत्यस्य रूपम्, गीतं गायन्तीतिवत्, लडर्थे लिट्) । अर्कम् उदकमिति सायणः, इन्द्रमिति स्कन्दस्वामी । उभयत्र श्रुत्युदाहरणेन समर्थितम् । स्तोत्रं वीर्यवत्तरं विधातुं सर्वसम्पद्वर्षिणमिन्द्रं प्रापयितुं अपच्छन्दलक्षितदिव्यशक्तिवाहिनीः प्रेरयितुं वा प्रभवन्ति शूरा इन्द्रभ्रातरो मरुतः । तैः मरुद्भिरित्यादि पूर्ववत् ॥

पञ्चमीमृचमाह—

ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः । मरुद्भिरग्न आ गहि ॥५॥

ये शुभ्राः घोरऽवर्पसः सुऽक्षत्रासः रिशादसः मरुत्ऽभिः अग्ने आ गहि ॥

ये शुभ्राः शोभनाः घोरवर्पसः भीषणरूपाः (वर्पः रूपनाम) सुक्षत्रासः सुबलाः रिशादसः हिंसितॄणां अत्तारः तैः मरुद्भिः पूर्ववत् । मरुतां घोररूपादिमत्त्वेऽपि शोभनफलकर्मत्वद्योतनाय शुभ्रत्वविशेषणं प्रयुक्तं लक्षणीयम् ॥

इति प्रथमस्य प्रथमे षट्त्रिंशो वर्गः

षष्ठीमृचमाह—

ये नाकस्याधि रोचने दिवि देवास आसते । मरुद्भिरग्न आ गहि ॥६॥

ये नाकस्य अधि रोचने दिवि देवासः आसते । मरुत्ऽभिः अग्ने आ गहि ॥

अपरार्धत्रिलोक्यां तृतीयं स्थानं नाक उच्यते । न अकं असुखं यस्मिन् स नाक इति नञ्समास इति कृत्वा विग्रहमाचक्षते । तस्य त्रिलोक्यामवस्थितस्य स्वर्गाख्यस्य नाकस्य अधि उपरि रोचने दीप्ते दिवि द्युलोकस्यैकदेशे स्थाने 'सप्तमे वायुस्थाने' इति स्कन्दस्वामी (सप्त मारुतस्कन्धाः प्रोक्ताः) ये देवासः आसते तैः मरुद्भिः प्राग्वत् । मध्यमस्थानाः स्वभावतः प्राणमयप्रभावा अपि इन्द्रसम्बन्धित्वात् तदावास-द्युलोकावधि ऐन्द्रेण विभवेन व्याप्रियन्ते । अत एवेमे 'स्वतवसः कवयः सूर्यत्वचः' इत्यन्यत्र मन्त्रवर्णेषु वर्णिताः ॥

सप्तमीमृचमाह—

य ईङ्खयन्ति पर्वतान् तिरस्समुद्रमर्णवम् । मरुद्भिरग्न आ गहि ॥७॥

ये ईङ्खयन्ति पर्वतान् तिरः समुद्रम् अर्णवम् मरुत्ऽभिः अग्ने आ गहि ॥

ये देवाः मरुतः पर्वतान् अचलान् ईङ्खयन्ति चालयन्ति अर्णवं उदकवन्तम् समुद्रं तिरः तिरस्कुर्वन्ति, अपारस्य समुद्रस्य तरणमेव तिरस्करणम् । तैः मरुद्भिरित्यादि पूर्ववत् ।

अत्र अचलानां पर्वतानां चालनं, दुस्तरस्य अपां राशेः समुद्रस्य तरणं च मरुतां प्रचण्डबलत्वमावेदयत आपाततः । निस्तरङ्गस्य समुद्रस्य तरङ्गाद्युत्पत्तये चालनं तिरस्कार इति व्याख्यातारः । अत्र गम्योऽर्थोऽस्माकं सङ्केतार्थस्मरणेन ग्राह्यो भवति । प्राण-पराक्रमविसारिताः दिव्यधीवृत्तिशक्तिभूताः मरुतः । ते स्वान्तर्निहित-ज्ञानबलादिसत्त्वं पर्वतशब्दसङ्केतितं तमोघनं जडं शरीरं जडीभूतं स्थूलज्ञानं वा चालयन्ति । तेन ज्ञानबलादेर्विकासो भवति । सर्वशक्तिसम्पन्नस्य अनन्तसत्त्वस्य समुद्रशब्दलक्षितस्य अखण्डवस्तुनो दुस्तरस्य निश्चलस्य चालनेन तरङ्गभूतानां तदंशानां प्रादुर्भावः सम्पाद्यते । तथादृशचण्डविक्रमैर्मरुद्भिः सह अग्नेरागमनं प्रार्थ्यते । ईङ्खयन्ति— उख-णख इत्यादौ ईखिर्गत्यर्थः ॥

अष्टमीमृचमाह—

आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा । मरुद्भिरग्न आ गहि ॥८॥

आ ये तन्वन्ति रश्मिऽभिः तिरः समुद्रम् ओजसा मरुत्ऽभिः अग्ने आ गहि ॥

ये देवाः रश्मिभिः प्रज्ञाविसारिभिः सौरैः किरणैः आतन्वन्ति व्याप्नुवन्ति (तनु विस्तारे) अनन्तं अन्तरिक्षं पूर्वोक्तलक्षणं समुद्रं वा, ओजसा स्वेन बलेन समुद्रम् [उक्तम्] तिरः तिरस्कुर्वन्ति, तरणमेव तिरस्कारः, इह आतानो वा व्याप्त्यर्थः । तैः, शिष्टं प्राग्वत् ॥

नवमीमृचमाह–

अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु । मरुद्भिरग्न आ गहि ॥९॥

अभि त्वा पूर्वऽपीतये सृजामि सोम्यम् मधु मरुत्ऽभिः अग्ने आ गहि ॥

हे अग्ने, त्वा अभि त्वामभिलक्ष्य पूर्वपीतये पूर्वपानाय सोम्यं सोममयं [सोममर्हति यत्] मधु मधुरं रसं सृजामि उत्सृजामि । शिष्टं प्राग्वत् ॥

इति प्रथमस्य प्रथमे सप्तत्रिंशो वर्गः

प्रथमाष्टके प्रथमोऽध्यायः सम्पूर्णः

अथ प्रथमाष्टके द्वितीयोऽध्याय आरभ्यते । प्रथममण्डलस्य पञ्चमेऽनुवाके तृतीयं अयं देवायेति अष्टर्चं आर्भवं सूक्तम् । ऋषिच्छन्दसी पूर्ववत् ॥

तत्र प्रथमामृचमाह–

अयं देवाय जन्मने स्तोमो विप्रेभिरासया । अकारि रत्नधातमः ॥१॥

अयं देवाय जन्मने स्तोमः विप्रेभिः आसया अकारि रत्नऽधातमः ॥

ऋभवो मनुष्याः सन्तस्तपसा देवत्वं प्राप्तास्त इह सूक्ते देवताः । आङ्गिरसस्य सुधन्वनः पुत्रा एत इत्याहुः । सूर्यरश्मय एत इत्येके । उभयथाऽप्युपपद्यत इति वयम् । सत्यं परं ज्योतिः सूर्यशब्दवाच्यं भवति वेदे । तस्यांशवः प्रज्ञानविभवा इह अन्नमयं क्षेत्रं स्थूलं जडमवतीर्णा जडीभूतचैतन्ये स्थूलशरीरेऽवस्थितं मनुष्यमुद्धरन्ति । एवं सूर्यरश्मय इमे भवन्ति । त एव ऋभवः परिपाकमहिम्ना मनुष्यस्य प्रभावविशेषात्मानः

सम्पद्यन्ते । तादृशप्रभावविशेषसम्पादितेन दिव्यभावेन दिव्यजन्मना अमृतो भवति मर्त्यः । कथं पुनरिमे सुधन्वपुत्रा उच्यन्ते? धन्व निरुदकं क्षेत्रं, जडं केवलमसमर्थं लक्षयति । यथा पर्वतो गवां गोपनस्थानं, अपां वा आवरकं तमश्च सङ्केतयति, तथा नीरसं लक्ष्यमाणं धन्व च परिणामविभवेन अवतरतां दिव्यरश्मीनां स्वीकरणेन ऊर्ध्व-सारादानेन च शोभनत्वं सम्पाद्य सुधन्वभावेन आर्भवं वैभवं विकासयतीति बोध्यम् ॥ एवं उभयथाऽप्युपपत्तिः । सर्वथा स्वकर्मणा ज्ञानेन च देवत्वं प्राप्ता इमे मनुष्याणां देव-त्वसम्पादने साहाय्यमाचरन्ति । तत्र यानि कर्माणि तैः क्रियन्ते, तानि देवकार्याण्येव भवन्ति । सङ्केतभाषयैव आर्भवाणि कर्माणि कीर्तितानि भवन्ति । ऋक्संहितायां ऋभुसूक्तानि दशाधिकानि सन्ति । सर्वत्र सैव भाषा, तान्येव कर्माणि, समानमेव फलं च तेषाम् । साङ्केतिकं गूढार्थमन्तरेण प्रहेलिकाप्रायाणामेषां सूक्तानां ऋजुविवरणं न सिध्यतीत्यापाततोऽवलोकनादेव स्फुटं लक्ष्येतेति न संशयः । पुरस्तात्प्रदर्शयिष्यामः ॥

ऋभुः विभ्वा वाज इति त्रय इमे प्रोक्ताः । एकवचनेन तत्सङ्घोऽभिधीयते । अथ च तेषां साहचर्यादन्यतमवचनेन ज्येष्ठभूतऋभुशब्देन सर्वेऽप्यभिधीयन्ते । त्रयाणां एकैकस्यापि स्वरूपवैशिष्ट्यं नाम्नैव कीर्तितं भवेत् । ऋभुः ज्येष्ठः धिया कर्मणा च अमृ-तत्वस्यानुरूपाणि रूपाणि तक्ष्णोति । तद्व्याप्तिमातनोति विभ्वा । तत्र दिव्यतेजस्सत्त्व-समृद्धिमादधाति वाजः । मनुष्याय अमृतत्वशिल्पिन इमे तक्षाण उच्यन्ते ॥

अयं स्तोमः स्तोत्रविशेषः विप्रेभिः विपश्चिद्भिः आसया आस्येन मुखेन तल्लक्षितेन मुख्यप्राणेन अकारि कृतः । कीदृशः? रत्नधातमः अतिशयेन रत्नानां धारकः । किमर्थम्? देवाय ऋभुसङ्घरूपाय, कीदृशे? जन्मने जायमानाय जाताय वा । आसया— आस्यशब्दात्तृतीयैकवचनम्, प्रकृतियकारस्यलोपः याजादेशश्च । जन्मने— 'मनिरयं कर्तरि सामर्थ्याच्च भूते काले द्रष्टव्यः' इति स्कन्दस्वामी । जाय-मानवाची इति सायणीयम् । ऋतज्योतिषः प्रभावादृभवो देवताः सञ्जाताः । तस्यैव प्रकाशं शक्तिं च प्राप्तैर्विपश्चिद्भिर्मनुष्यैर्दिव्याय जन्मने लप्स्यमानाय आर्भवकर्मसाध्याय स्तोमोऽयं कृतः । स च वाचि देवताहृदयप्रवेशक्षमायां मुख्यप्राणेन आहितः । तेन वीर्यवान् भवति स्तोमः । प्रहर्षातिशयानां रत्नपदवाच्यानां रत्नानां मनुष्यस्यान्तरात्मनि अवस्थापनं अस्य स्तोमस्य प्रयोजनम् । अयं सूक्तस्य प्रथमर्चो भावः । अथ ऋभूणां यज्ञभागसम्पत्तिं तदीयानि कर्माणि चाख्यातुमारभते ॥

द्वितीयामृचमाह—

य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी । शमीभिर्यज्ञमाशत ॥२॥

ये इन्द्राय वचःऽयुजा ततक्षुः मनसा हरी इति शमीभिः यज्ञम् आशत ॥

ये ऋभवः इन्द्राय इन्द्रार्थम् वचोयुजा वचोयुजौ (वचसा युज्ञाते) ऋभूणां वाग्बलेन सुयोजितौ हरी इन्द्राश्वौ मनसा साधनेन ततक्षुः तष्टवन्तः, सम्पादयामासुरित्यर्थः । ते ऋभवः शमीभिः (कर्मनाम) वक्ष्यमाणैः एकचमसचतुष्करणादिभिः यज्ञं आशत (अशू व्याप्तौ, लङ् छान्दसम्) प्राप्तवन्तो भोगायेत्यर्थः । ऋभवो मनुष्याः स्वकर्मणा देवत्वं प्राप्ता यज्ञभागस्वामिनोऽभवन् । सर्वकर्मशिखरभूतं यज्ञफलं तु मनुष्यस्योत्कर्षकानां दिव्यप्रभावविशेषाणां सम्पत्तिरित्यवगन्तव्यम् । तथा सम्पन्ना ऋभवः अन्यान् परिपक्वानधिकारिणो मनुष्यानुत्कर्षयितुं देवकार्याणि कुर्वन्तः देवराजस्येन्द्रस्य साहाय्यमाचरन्ति । तत्र तेषां कर्मसु मुख्यमिदं भवति, यदिन्द्रस्य हर्योः दैव्यमनोवाहभूतप्राणयोः व्यवस्थितरूपनिष्पादनं मनुष्ये । तत्र कर्मणि तेषां साधनं सत्यसङ्कल्पं मनो भवति, येन निष्पादितौ अश्वौ यद्वाचैव सम्यग्योजितौ शुद्धस्य दिव्यस्य मनसो विलासाय कल्पन्ते । अथ कर्मान्तरमुक्तं परस्यामृचि ॥

तृतीयामृचमाह—

तक्षन्नासत्याभ्यां परिज्मानं सुखं रथम् । तक्षन्धेनुं सबर्दुघाम् ॥३॥

तक्षन् नासत्याभ्याम् परिऽज्मानम् सुऽखम् रथम् तक्षन् धेनुम् सबःऽदुघाम् ॥

ते ऋभवः नासत्याभ्यां अश्विभ्यां अश्विनोरर्थाय सुखं सुखकरं रथं शीघ्रगतिसाधनं तक्षन् अतक्षन् (छन्दसि अडभावः) । कीदृशं रथं? परिज्मानं परितो गन्तारं (परि-पूर्वकस्य अजेर्गत्यर्थस्य रूपम्) । किं च, ते सबर्दुघां अमृतस्य दोग्ध्रीं धेनुं तक्षन् अतक्षन् । सबरिति अमृतस्याख्या इति स्कन्दस्वामी, क्षीरमिति सायणः ॥

आश्विनरथतक्षणं अमृतदुघायाः धेनोर्निष्पादनं च ऋभूणां कर्मणी प्रोक्ते । देवभिषजोरश्विनोर्व्यापारः प्रागुक्तः । लोकान्तरेषु अवस्थान्तरेषु च सर्वत्र या मानुषी योगयात्रा वर्तते तस्या अध्यक्षौ देवावश्विनौ । अन्नमयस्य पुरुषस्य आयुरारोग्य-यौवन-बलपूर्णतादीनि तावनुगृह्णीतः, प्राणमयस्य क्रियाभोगसामर्थ्यं, मनोमयस्य सन्तोषभूयसीं ज्योतिषः शक्तिं चेति बोध्यम् । सर्वथा मनुष्यं सर्वात्मना शुद्धानन्दबलभरितं विधत्तः ॥ अन्यच्च कर्म तेषामिदं भवति, धेन्वास्तक्षणं प्राह । किमुक्तं भवति? गौरियं आदिमा प्रभा अदितिर्भवति । ऋभवः एनां आवृण्वत् चर्म अपोद्धार्य संस्कृतवन्तः इत्यन्यत्र उक्तम् । 'निश्चर्मणो गामरिणीत धीतिभिः' (४-३६-४) । एषा गौः विश्वरूपेति चोक्तम् 'ये धेनुं विश्वजुवं विश्वरूपाम्' (४-३३-८) । विश्वस्य प्रेरयित्री विश्वरूपा च अदितिरेव माता अखण्डप्रज्ञास्वरूपिणी भवति । तस्या एव पुत्रो जीव आत्मा मनुष्यस्य । मातुः विप्रयुक्तः प्रज्ञायाम् । तत्र आवरणं चर्म हेतुर्भवति । तच्च तमोभूतं प्रकृतिकार्यमेव लक्षणीयम् । तदपाये अखण्डप्रज्ञाया अदितेरमृतसुवो धेनोः स्वीयां वृत्तिं रूपीभवन्तीं मानुषे पुरुषे निष्पादयन्त्येत ऋभव इति सङ्क्षेपः ॥

चतुर्थीमृचमाह—

युवा॑ना पि॒तरा॒ पुन॑ः स॒त्यम॑न्त्रा ऋजू॒यव॑ः । ऋ॒भवो॑ वि॒ष्ट्य॑क्रत ॥४॥

युवा॑ना । पि॒तरा॑ । पुन॒रिति॑ । स॒त्यऽम॑न्त्राः । ऋ॒जु॒ऽयव॑ः । ऋ॒भव॑ः । वि॒ष्टी । अ॒क्र॒त ॥

ऋभवः प्रकृता एते देवाः **पितरा** द्यौः पिता पृथिवी माता इति प्रसिद्धौ मातापितरौ वृद्धौ, **पुनः युवाना** युवानौ तरुणौ **अक्रत** अकुर्वत (करोतेर्लुङ् आत्मनेपदम्, झस्य अदादेशः, यणादेशः, च्लेर्लुक्-छान्दसम्) । केनोपायेन? **विष्टी** विष्ट्या व्याप्त्या (तृतीयैकवचनान्तमिदम्, तथा स्कन्दस्वामी । विष्लृ व्याप्तौ इत्यस्य रूपम् । विष्टयो व्याप्तियुक्ता इति सा.) । कीदृशा ऋभवः? **सत्यमन्त्राः** सत्याः मन्त्राः येषां त इति प्राहुः, सत्यवचना इति स्कन्दस्वामी । अवितथमन्त्रसामर्थ्योपेता इति सा. । सत्यं मन्त्रेषु मनस्कारेषु येषां त इत्युपपन्नतरम् । पुनः कीदृशाः? **ऋजूयवः** ऋजुत्वमात्मन इच्छन्तः, ऋजुशब्दोऽत्र भावप्रधानः । ऋजूभवन्ति ऋजुत्वकामा एते, तस्माद् एतेषां मननेषु मनस्कारेषु मन्त्रेषु वा सत्यमेवावतिष्ठते न त्वसत्यम् ॥

अस्यामृचि मुख्यमन्यदार्भवं कर्म कथितम्। तच्च वृद्धयोः पित्रोः प्रायो जीर्णयो-स्तारुण्यापादनम्। अन्नमयाख्य-जडजगत्प्रज्ञाविशेषभूमिः पृथिवी माता। शुद्धसत्त्व-मनःप्रधानप्रज्ञाविशेषभूमिः द्यौः पिता। बहोः कालात् सिद्धयोर्वृद्धयोर्जगत्पित्रोरुभयोः जीर्णतामपोह्य नवतां बलवतीमापादयन्ति ऋभवः। तत्र तेषां ऋजुपथवर्तिनां सत्य-मन्त्राणां दिव्यमार्जवं सत्यवैभवानि तेजोबलादीनि समर्थानि साधनानि भवन्तीत्युक्तं भवति॥

पञ्चमीमृचमाह—

सं वो मदासो अग्मतेन्द्रेण च मरुत्वता। आदित्येभिश्च राजभिः॥५॥

सम् वः मदासः अग्मत इन्द्रेण च मरुत्वता आदित्येभिः च राजभिः॥

हे ऋभवः, वः युष्माकं सम्बन्धिनः **मदासः** मदाः (माद्यन्ते एभिरिति मदाः, असुन् छन्दसि) सोमाः **मरुत्वता** मरुत्समेतेन **इन्द्रेण च राजभिः आदित्येभिः च** अदितिपुत्रैः वरुणादिभिश्च **समग्मत** सङ्गच्छन्ते (सम्-पूर्वकस्य गमेर्लुङ्, आत्मनेपदम्, च्लेर्लुक्, छान्दसम्)। प्रकारान्तरेणैवं वा स्यात्। 'मदासः' वः युष्मान् 'समग्मत' सम्यक् प्राप्नुवन्ति मरुत्वता इन्द्रेण सह, 'राजभिः' दीप्यमानैः 'आदित्येभिः' च सह। इमे च ऋभवः अमृतसारमानन्दभरितं सोमं सम्पाद्य मानुषे यज्ञे समाहरन्ति। तैः सह मरुतः (प्राणबलपूर्णा मतिवृत्तयः) इन्द्रः (शुद्धसत्त्वं दिव्यं चेतः) वरुणादयश्च राजानः (दिव्यपारिशुद्ध्यादीनि वैभवानि) समुपस्थिताः सङ्गता भवन्तीति भावः॥

इति प्रथमस्य द्वितीये प्रथमो वर्गः

अथास्मिन् सूक्ते षष्ठीमृचमाह—

उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम्। अकर्त चतुरः पुनः॥६॥

उत त्यम् चमसम् नवम् त्वष्टुः देवस्य निःकृतम् अकर्त चतुरः पुनरिति॥

उत अपि च **त्वष्टुः** त्वष्टृनामकस्य विश्वतक्षणव्यापाराधिकृतस्य **देवस्य नवं** नूतनं **निष्कृतं** तेन निष्पादितमित्यर्थः। **त्यं** तं **चमसं** सोमरसवाच्य-अमृतानन्द-धारणक्षमं पानपात्रं एकं **पुनः** पुनरपि **चतुरः** चतुर्धा विभक्तान् **अकर्त** कृतवन्तः,

ऋभव इति कर्तृपदमध्याहार्यम् । नवम्– नूयते स्तूयते कर्मणि अप् । अकर्त– अकृषत कृञो लुङि तादेशः छन्दसि, तथा च्लेर्लोपः ॥

यज्ञे देवाश्चतुर्व्यूहात्मके चमसे पानपात्रे सौम्यममृतरसं पिबन्ति । आदौ विश्व-रूपनिर्मात्रा त्वष्ट्रा मनुष्याय एक एव चमसो दत्तः, स तेनैव नवीकृतः परिनिष्ठितः । स चान्नमयो देहः जागरितस्थानप्रज्ञावस्थासमाश्रयो भवति । यत्र सर्वानुभूतिसारः सोमशब्दवाच्यो रसो देवानां पानाय समर्प्यते । ज्ञानप्रकाशविभवा ऋभवस्तमेकं अन्न-मयदेहं चमसं चतुर्व्यूहं कुर्वन्ति । तथाकरणस्य सामग्री अन्नमयभुवोऽपि सूक्ष्मतराभ्यः ऊर्ध्वतनभूमिभ्यः समुपादीयते । एवमत्र प्रथमं पात्रं अन्नमयं शरीरम् । तस्मिन्नेव चतुर्धा क्रियमाणे अन्यानि त्रीणि निष्पादितानि भवन्ति । प्राणमयं मनोमयं त्रयाणां अपि मूलं कारणात्मकं शरीरं चेति बोध्यम् ॥

सप्तमीमृचमाह–

ते नो॒ रत्ना॑नि धत्तन॒ त्रिरा साप्ता॑नि सुन्व॒ते । एक॑मेकं सुश॒स्तिभिः ॥७॥

ते न॒ः रत्ना॑नि ध॒त्त॒न॒ त्रिः आ साप्ता॑नि सु॒न्व॒ते एक॑म्ऽएकम् सु॒श॒स्तिभिः ॥

ते पूर्वोक्तदिव्यकर्माणो यूयं हे ऋभवः नः अस्माकं सम्बन्धिने सुन्वते यज-मानाय रत्नानि रमणीयानि रतीरित्यर्थः, धत्तन धत्त, धारयत [तनादेशश्छान्दसः] । कानि रत्नानि? त्रिः आ त्रिवारं आवृत्तानि साप्तानि सप्तवर्गीयाणि, सप्तसङ्ख्या-निष्पन्नवर्गरूपाणि (सप्तानां वर्गः साप्तं, सप्तनोऽञ् छन्दसि । अत्र वर्गेण वर्गि लक्ष्यते न चेदेकवचनमेव स्यात्) । तानि रत्नानि एकमेकं प्रत्येकं सुशस्तिभिः शोभन-शंसनैः, साधुनिष्कर्षणैरित्यर्थः 'धत्तन' इति सम्बन्धः ॥

मनुष्याय चतुर्व्यूहात्मकसुखमयशरीरसम्पादनेन ऋभवस्तं सत्यचिन्मयधामाधि-वासक्षमं व्यधुः । तेन तस्मिन् सिद्धे सम्पन्ने, भूरादिसप्ततत्त्वात्मक-विश्वसत्तागतं आनन्दं तस्य शरीरे प्राणे मनसि च त्रिष्वपि प्रत्येकं निष्कर्षेण प्रतिष्ठापयितुं प्रभव इति हेतोः 'एकमेकं त्रिः साप्तानि रत्नानि धत्तन' इत्युक्तम् ॥

अष्टमीमृचमाह–

अधा॑रयन्त॒ वह्न॒योऽभ॑जन्त सुकृ॒त्यया॑* । भा॒गं दे॒वेषु॑ य॒ज्ञिय॑म् ॥८॥

अधा॑रयन्त वह्न॑यः अभ॑जन्त सु॒ऽकृ॒त्यया॑ भा॒गम् दे॒वेषु॑ य॒ज्ञिय॑म् ॥

वह्नयः वोढारः, मनुष्यस्य अमृतत्वादिसम्पादनाय यज्ञनिर्वाहिन ऋभवः, **सुकृत्यया** शोभनं कृत्यं एकचमसचतुष्टयकरणादिकं यस्यां क्रियायां तया करणभूतया, **देवेषु** देवानां (षष्ठ्यर्थे सप्तमी) **यज्ञियं** यज्ञार्हं **भागं** प्रत्येकं देवानां यथाविधि भजनीयं अंशं **अधारयन्त** धारितवन्तः **अभजन्त** विभक्तवन्तश्च ॥

मानुष्यां सिद्धायां प्रज्ञायां सदानन्दप्रवाहान् धारयितुमृभवः प्रभवन्ति । तस्मात् यज्ञेनाविष्कृतानां देवानां एकैकस्मै युक्तमानन्दभरितं भागं विभज्य दातुं स्वकर्मसम्पत्त्या समर्था भवन्ति । तादृशं यथाभागं विभजनं साधुकर्मणे पूर्णफलाय यज्ञायात्यन्तमपेक्षितमिति ग्राह्यम् ॥

इति प्रथमस्य द्वितीये द्वितीयो वर्गः

पञ्चमेऽनुवाके चतुर्थं 'इहेन्द्राग्नी' इत्यादिकं षडृचं सूक्तम् । ऋषिश्छन्दसी पूर्ववत् । इन्द्राग्नी देवते ॥

तत्र प्रथमामृचमाह—

इ॒हेन्द्रा॒ग्नी उप॑ ह्वये त॒योरित्स्तोम॑मुश्मसि । ता सोमं॑ सोम॒पात॑मा ॥१॥

इ॒ह इ॒न्द्रा॒ग्नी इति॑ उप॑ ह्व॒ये त॒योः॑ इत् स्तोम॑म् उ॒श्म॒सि॒ ता सोम॑म् सो॒म॒ऽपात॑मा ॥

इह अस्मिन् प्रवर्तमाने यजने **इन्द्राग्नी** इन्द्रं अग्निं च **उपह्वये** आह्वयामि । **तयोरित्** इन्द्राग्न्योस्तयोरेव **स्तोमं** स्तोत्रं **उश्मसि** उश्मः, कामयामहे (वश कान्तौ, लटो मस्, इदन्तो मसिः इति इकारोपजनः) **ता** तौ **सोमपातमा** अति-

---

* सूक्तेऽस्मिन् प्रतिपादितानि आर्भवाणि कर्माणि अन्यत्रापि कौत्स-दैर्घतमस-वासिष्ठ-वैश्वामित्र-वामदेव्येषु सूक्तेषु गीतानि भवन्ति । ऋभुकार्यविवरणं च क्वचिद्विशेषतः कृतम् । जिज्ञासूनां पर्यालोचनार्हाणि आर्भवस्वरूपज्ञानकर्मसम्पत्तिप्रतिपादकानि सूक्तान्येतानि भवन्ति— मं०. १, सू०. ११०-१११; १६१; ३. ६०; ४. ३३-३७.

अयेन सोमानां पातारौ देवौ **सोमं** अभिषुतं पिबेतामित्यध्याहार्यम् । द्युस्थान इन्द्रः पृथिवीस्थानोऽग्निः, यजमाने द्यावापृथिव्योर्जगत्पित्रोः साङ्गत्यं अनेन देवताद्वन्द्वेन सोमतर्पितेन साधितं स्यात् ॥

द्वितीयामृचमाह–

ता यज्ञेषु प्रशंसतेन्द्राग्नी शुंभता नरः । ता गायत्रेषु गायत ॥२॥

ता यज्ञेषु प्र शंसत इन्द्राग्नी इति शुंभत नरः ता गायत्रेषु गायत ॥

हे **नरः** पुरुषाः, **ता** तौ **इन्द्राग्नी** उभौ देवौ **यज्ञेषु** यजनेषु **प्रशंसत** प्रकर्षेण स्तुत, **शुम्भत** शोभितौ कुरुत (शुम्भतिः शोभार्थः, संहितायां तकारस्य दीर्घः छान्दसः)। **ता** तौ देवौ **गायत्रेषु** गायत्रीच्छन्दस्कमन्त्रेषु गीयमानेषु **गायत** गानेन स्तुत ॥

तृतीयामृचमाह—

ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे । सोमपा सोमपीतये ॥३॥

ता मित्रस्य प्रऽशस्तये इन्द्राग्नी इति ता हवामहे सोमऽपा सोमऽपीतये ॥

ता तौ **इन्द्राग्नी** उभौ च देवौ, सङ्गतौ द्वन्द्वभूतौ **हवामहे** आह्वयामः । किमर्थम्? **मित्रस्य** यजने बह्वङ्गे वैषम्यनिवारणपूर्वक-सामरस्यसंविधायकस्य मित्रात्मनः सुहृदो देवस्यादित्यस्य **प्रशस्तये** प्रकृष्टख्यातये । अपि च **ता** तौ **सोमपा** सोमपौ देवौ इन्द्राग्नी **सोमपीतये** सोमपानाय हवामह इति सम्बन्धः । सन्तृप्तयोः इन्द्राग्न्योः सङ्गत्या साङ्गत्यसौहार्दादिसम्पादकस्य मित्रस्य प्रख्यातिः स्यात् ॥

चतुर्थीमृचमाह—

उग्रा सन्ता हवामह उपेदं सवनं सुतम् । इन्द्राग्नी एह गच्छताम् ॥४॥

उग्रा सन्ता हवामहे उप इदम् सवनम् सुतम् इन्द्राग्नी इति आ इह गच्छताम् ॥

सुतं सुतसोमम् (पीताः गावः, पीतोदकाः, भुक्ताः ब्राह्मणा भुक्तान्नाः इतिवत्

सुतः सोमो यस्मिन् तत्) इदं सवनं यजनं उप उपगन्तुं उग्रा उग्रौ शूरौ सन्ता सन्तौ यज्ञद्विषां वधे विक्रान्तौ, तौ देवौ हवामहे आह्वयामः । इन्द्राग्नी तौ इह अस्मिन् अस्मदीये यजने यजनमुद्दिश्य, आगच्छताम् आगतौ भवताम् ॥

पञ्चमीमृचमाह–

ता म॒हान्ता॒ सद॒स्पती॒ इन्द्रा॑ग्नी॒ रक्ष॑ उब्जतम् । अप्र॑जाः सन्त्व॒त्रिण॑ः ॥५॥

ता म॒हान्ता॑ सद॒स्पती॒ इति॑ इन्द्रा॑ग्नी॒ इति॑ रक्ष॑ः उ॒ब्ज॒त॒म् अप्र॑जाः स॒न्तु अ॒त्रिण॑ः ॥

तौ प्रकृतौ महान्ता महान्तौ सदस्पती सदसस्पती सदसो यज्ञगृहस्य सर्वान्तरङ्गबहिरङ्गसम्पन्नस्य यजमानशरीरस्य पती पालकौ इन्द्राग्नी इन्द्रोऽग्निश्च युवाम् रक्षः जात्येकवचनं रक्षांसीत्यर्थः उब्जतं हतम् (उब्जतिर्वधकर्मा) । अत्रिणः भक्ष-यितारोऽस्माकम् (अद भक्षणे) राक्षसा इत्यर्थः अप्रजाः असन्तानाः सन्तु निर्वीर्या भवन्त्वित्यर्थः । सदस्पती– समासे प्रातिपदिकमकारस्य रुत्वाभावश्छान्दसः ॥

षष्ठीमृचमाह—

तेन॑ स॒त्येन॒ जागृ॒तमधि॑ प्रचे॒तुने॑ प॒दे । इन्द्रा॑ग्नी॒ शर्म॑ यच्छतम् ॥६॥

तेन॑ स॒त्येन॑ जा॒गृ॒त॒म् अधि॑ प्र॒ऽचे॒तुने॑ प॒दे इन्द्रा॑ग्नी॒ इति॑ शर्म॑ य॒च्छ॒त॒म् ॥

हे इन्द्राग्नी! तेन तच्छब्दवाच्येन सत्येन नित्यसिद्धेन धर्मेण, यस्यानु-रोधेन वयं यजामहे देवान्, युवामुपास्महे वेत्यर्थः, जागृतम् जागरितौ भवतम्, अस्म-द्विषये निर्निमेषौ भवेतम् । क्व? अधि उपरि प्रचेतुने प्रकर्षेण चेतयते पदे स्थाने 'परमस्यां परावति' 'त्रिपादस्यामृतं दिवि' 'विष्णोर्यत्परमं पदम्' इत्यादिमन्त्रवर्णैर्महितं तत्पदमेव 'प्रचेतुनं पदम्' । (चिती संज्ञाने, ण्यन्तः, औणादिकः उन-प्रत्ययः) । तौ युवां शर्म शरणं दिव्यं गृहमित्यर्थः, यच्छतं दत्तम् नः इति शेषः ॥

ज्वलितक्रतुभूतोऽग्निविभवः, भास्वरचेतोभूत इन्द्रविभवः । उभाभ्यां सङ्गताभ्यां जागरूकाभ्यां लब्धव्यं तत्पदं नः शरणं सिद्धमिति निश्चयोऽत्र प्रत्यपादि ॥

इति प्रथमस्य द्वितीये तृतीयो वर्गः

पञ्चमेऽनुवाके पञ्चमं प्रातर्युजेत्यादिकं एकविंशत्यृचं सूक्तम् । तस्य ऋषिच्छन्दसी पूर्ववत् । देवताविशेषस्तु तत्र तत्र ऋचां व्याख्याने स्पष्टो भविष्यति ॥

तत्र प्रथमामृचमाह–

प्रा॒त॒र्युजा॒ वि बो॑धया॒श्विना॒वेह ग॑च्छताम् । अ॒स्य सोम॑स्य पी॒तये॑ ॥१॥

प्रा॒तः॒ऽयुजा॑ वि बो॒ध॒य॒ अ॒श्विनौ॑ आ इ॒ह ग॒च्छ॒ता॒म् अ॒स्य सोम॑स्य पी॒तये॑ ॥

सूक्तेऽस्मिन्नाद्याश्चतस्र आश्विन्यः । प्रातर्युजा प्रातर्युजौ प्रातः यजनस्य प्रारम्भे (प्रातःसवने इति ब्राह्मपक्षे) संयुक्तौ (प्रातर्युञ्जाते इति प्रातर्युजौ) अश्विनौ देवौ विबोधय प्रबुद्धौ कुरु । आत्मन एव प्रैषणमिदम् । तथैवाह स्कन्दस्वामी च 'आत्मन एवायमन्तरात्मनः प्रैषणादग्नेर्वा होतृत्वात्' इति । तौ प्रबोधितौ इह यजनं प्रति आगच्छताम् । किमर्थम्? अस्य अभिषुतस्य सोमस्य पीतये पानाय । अश्विनौ प्रागुक्तौ परिचितावस्माकम् ॥

द्वितीयामृचमाह–

या सु॒रथा॑ र॒थीत॑मो॒भा दे॒वा दि॑वि॒स्पृशा॑ । अ॒श्विना॒ ता ह॑वामहे ॥२॥

या सु॒ऽरथा॑ र॒थिऽत॑मा उ॒भा दे॒वा दि॒वि॒ऽस्पृशा॑ अ॒श्विना॑ ता ह॒वा॒म॒हे ॥

या यौ उभा उभौ देवा देवौ अश्विना अश्विनौ सुरथा सुरथौ, शोभनो रथो ययोस्तौ रथितमा रथितमौ अतिशयेन रथिनौ दिविस्पृशा दिविस्पृशौ (तत्पुरुषे कृति बहुलम् इत्यलुक्) दिवि स्पृशतः, द्युवासिनावित्यर्थः । ता तौ हवामहे आह्वयामः । येत्यादिषु द्विवचनस्य आकारः छन्दसि ॥

तृतीयामृचमाह–

या वां॒ कशा॒ मधु॑म॒त्यश्वि॑ना सू॒नृता॑वती । तया॑ य॒ज्ञं मि॑मिक्षतम् ॥३॥

या वा॒म् कशा॑ मधु॑मती अश्वि॑ना सू॒नृता॑ऽवती तया॑ य॒ज्ञम् मि॒मि॒क्ष॒त॒म् ॥

हे अश्विना अश्विनौ, वां युवयोः मधुमती माधुर्यवती सूनृतावती शोभनसत्यसम्पन्ना च कशा (वाङ्नाम) या वाग्वर्तते, तया कशया अश्वचोदनसमर्थया यज्ञं इमम् प्रकृतम् मिमिक्षतम् सिक्तं कुरुतम् (सेचनार्थस्य मिहेः सन्)। दिवो दुहितुरुषसः अश्विनोर्जायात्वं, सा चोषोदेवी सूनृता ऋतावरी विभावरीत्यादिस्वरूपगुणबोधकैः शब्दैरभिवर्णितेति चात्र स्मार्यम्। कशा वागिति सायणीया वापक्षव्याख्या च अनुगृह्णाति। माधुर्य-शोभनसत्यत्व-गुणविशिष्टया अत एव रसभूयिष्ठया वाचा यज्ञमिमं (सिक्तं) रसार्द्रं कुरुतम्– इति मन्त्रार्थः। अश्वो यया तोद्यते सा कशा अश्वताडनी प्रसिद्धा लोके। अत्र वाचोऽपि तत्सामर्थ्यं वर्तते, अत एव कशा वागिति पठितम्। अत्र चिन्तकानां तारतम्यपरीक्षायै कर्मठव्याख्यानसारांशो लक्षणीयो भवति। कशा अश्वताडनी 'मधुमती' उदकवती किल। कथम्? अश्वस्य शीघ्रगत्या यत् स्वेदोदकं स्रवति तेन क्लिन्ना! कथं अश्वताडनी सा सूनृतावतीति चेदाहुः। तीव्रेण कशाताडनेन यो ध्वनिर्निष्पद्यते, ताडनवेलायां अश्वारूढेन यश्च आक्रोशः क्रियते, तदुभयं यजमानस्य प्रियम्। कुतः? शीघ्रगमनहेतुत्वात्तयोः ताडनध्वनेराक्रोशस्य च॥

चतुर्थीमृचमाह—

नहि वामस्ति दूरके यत्रा रथेन गच्छथः। अश्विना सोमिनो गृहम्॥४॥

नहि वाम् अस्ति दूरके यत्र रथेन गच्छथः अश्विना सोमिनः गृहम्॥

हे अश्विना अश्विनौ, यत्र यस्मिन् यज्ञे यज्ञगृहं प्रति रथेन शीघ्रगमनेन यानेन वां युवां गच्छथः, तत् सोमिनः गृहं सोमवतो यजमानस्य यज्ञगृहम् दूरके दूरे नहि अस्ति न वर्तते खलु। शीघ्रगत्या क्षणमपि न किञ्चिद्दूरे वर्तते। अपि च सोमिनो गृहं प्राणमयशरीराद्याधारभूतं अन्नमयं शरीरं कथं दूरे वर्तताम्?

अथ चतस्रः सवितृदेवताकाः, तत्र प्रथमां सूक्तस्य पञ्चमीमृचमाह—

हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम्॥५॥

हिरण्यऽपाणिम् ऊतये सवितारम् उप ह्वये सः चेत्ता देवता पदम्॥

हिरण्यपाणिं हिरण्मयहस्तम् सवितारं प्रसवितारं सूर्यं ऊतये ह्वये

उपह्वये आह्वयामि । सः चेत्ता ज्ञाता भवति, चेतयिता वा अन्तर्भावितण्यर्थः । सः देवता सर्वदेवमयः पुरुषः, सर्ववेदप्रतिपादिता देवता भवति । सः पदम् प्राप्तव्यं स्थानं भवति । सविता हिरण्मयः पुरुषः, स एव ज्ञाता, स एव देवता, स एव प्राप्तव्यं पदमिति च प्रतिपादितम् । पाणिपादहस्तकरादयो रश्मिवाचका बोध्याः । तस्य सवितुरुत्तमस्य पुरुषस्य सर्वदेवदेवस्य सर्वथा हिरण्मयत्वं साक्षात्कारक्षमं इत्यार्षं दर्शनं चिरन्तनः सिद्धान्तश्च ॥

इति प्रथमस्य द्वितीये चतुर्थो वर्गः

अथास्मिन् सूक्ते षष्ठीमृचमाह–

अपां नपा॑त॒मव॑से सवि॒तार॒मुप॑ स्तुहि । तस्य॑ व्र॒तान्यु॑श्मसि ॥६॥

अ॒पाम् नपा॑तम् अव॑से स॒वि॒तार॑म् उप॑ स्तु॒हि॒ तस्य॑ व्र॒तानि॑ उ॒श्म॒सि॒ ॥

'आपो वा इदमग्र आसन्' इत्यादौ विश्वसृष्टेः प्रागवस्था द्रुतगतिसम्पन्न-विश्व-मूलसामग्रीति विवक्षा ग्राह्या । वस्तुतो जन्मरहितस्य सवितुः अपां अपत्यत्वं विश्व-सृष्ट्यपेक्षया प्रोक्तम् । मनुष्ये यजमाने अप्छब्दसङ्केतितानां सर्जनसामग्रीभूततेजो-बलादीनां अपत्यं यथा अग्निर्भवति, तथा सविता च अनन्तरापत्यं वा जायते । 'नपात्' अपत्यनाम, पौत्रेऽपि वर्तते । एवं ब्रह्माण्डे पिण्डाण्डे च अपां नपात् सविता प्रोक्तः । सूर्यस्य जन्म प्रातः समुद्रादुदयः, तस्मादपां नपात् सविता इति स्थूला दृष्टिः ॥

अपां नपातं सवितारं देवं अवसे स्ववर्धनाय उपस्तुहि उपेत्य स्तुत्या भजस्व । अन्तरात्मनः प्रैषः । तस्य सवितुः व्रतानि कर्माणि (नित्यसिद्धानि) उश्मसि उश्मः कामयामहे ॥

सप्तमीमृचमाह–

वि॒भ॒क्तारं॑ हवामहे॒ वसो॑श्चि॒त्रस्य॒ राध॑सः । स॒वि॒तारं॑ नृ॒चक्ष॑सम् ॥७॥

वि॒ऽभ॒क्तार॑म् ह॒वा॒म॒हे॒ वसोः॑ चि॒त्रस्य॑ राध॑सः स॒वि॒तार॑म् नृ॒ऽचक्ष॑सम् ॥

चित्रस्य बहुविधस्य राधसः सर्वसिद्धिनिधानस्य (राध साध संसिद्धौ) वसोः

धनस्य (स्वर्लोकवासहेतुभूतद्रव्यस्य) विभक्तारं विभज्य दातारं सवितारं स्रष्टारं देव- देवं हवामहे आह्वयामः । कीदृशम्? नृचक्षसं नराणां द्रष्टारं, नॄन् चष्टे इति नृचक्षाः तम्, चक्षेर्बहुलमिति असुन् । यद्यपि वसु राध इति उभयमपि धनवाचि, तथाऽपि विशेषोऽत्रधेयः । 'चित्रं राधः' 'विभु प्रभु' इत्यत्र प्रागुक्तम् ॥

अष्टमीमृचमाह—

सखाय आ नि षीदत सविता स्तोम्यो नु नः । दाता राधांसि शुम्भति ॥८॥

सखायः आ नि सीदत सविता स्तोम्यः नु नः दाता राधांसि शुम्भति ॥

हे सखायः, समानेऽन्तर्यजने प्रवृत्तान् सुहृदः प्रति सम्बोधनम् । आ अर्वाक् निषीदत उपविशत, स्तुत्यं देवं उपासीना भवत । सविता देवः नः अस्माकं नु क्षिप्रम् स्तोम्यः स्तोममर्हति, स्तुत्यः । सः दाता दिव्यवासहेतुभूतस्य 'वसोः' सर्वसिद्धिकरस्य 'राधसः' च प्रदाता राधांसि उक्तस्वरूपाणि धनानि शुम्भति दीपयति, प्रकाशयति, लभ्यत्वेन नः प्रदर्शयतीति यावत् । शुम्भतिर्दीप्तौ शोभायां च अन्तर्भावितण्यर्थः । शुम्भति ददातीति प्राहुरेके व्याख्यातारः ॥

नवमीमृचमाह—

अग्ने पत्नीरिहावह देवानामुशतीरुप । त्वष्टारं सोमपीतये ॥९॥

अग्ने पत्नीः इह आ वह देवानाम् उशतीः उप त्वष्टारम् सोमऽपीतये ॥

आग्नेय्यौ द्वे ऋचौ भवतः । हे अग्ने, देवानाम् इन्द्रादीनां पत्नीः इन्द्राण्याद्याः इह अस्मिन् यजने उप समीपे आवह । कीदृशीः? उशतीः कामयमानाः यजमानस्य यजनमिति शेषः (वश कान्तौ शतरि ङीप्) । तथा त्वष्टारम् देवशिल्पिनं उपावह इति सम्बन्धः । किमर्थम्? सोमपीतये सोमपानाय । स्त्रीदेवता अधिकृत्य प्रागुक्तम् । पत्युर्देवस्य कारयितुः कर्मणः कर्त्री पत्नी निर्वाहिनी ॥

दशमीमृचमाह—

आ ग्ना अग्न इहावसे होत्रां यविष्ठ भारतीम् । वरूत्रीं धिषणां वह ॥१०॥

आ ग्नाः अग्ने इह अवसे होत्राम् यविष्ठ भारतीम् वरूत्रीम् धिषणाम् वह ॥

हे अग्ने, अवसे वृद्धये अस्मदभिवर्धनाय ग्नाः देवपत्नीः इह यज्ञेऽस्मिन् आवह । हे यविष्ठ युवतम, आवहनसमर्थ, होत्रां वाचं, आह्वात्रीं शक्तिं आवह । तथा भारतीं भरतस्यादित्यस्य भां, ऋतस्य बृहतो ज्योतिषः बृहत्त्वभास्वरत्वसम्पन्नां सत्यप्रभां आवह । वरूत्रीं वरयित्रीं सर्वमावृत्य लसन्तीं धिषणां प्रज्ञामयीं भारतीं आवहेति सम्बन्धः । अत्र भारतीमधिकृत्य आप्रीसूक्ते अन्यत्र च प्राक्प्रपञ्चितम् । सा बृहज्ज्योतिषः ऋतभा, दृष्टिश्रुत्योः इळा-सरस्वत्योः प्रतिष्ठा भवति । अत्र 'होत्रा वरूत्री धिषणा' इति तस्याः प्रभावस्वरूपबोधिनीनां शक्तीनां भारतीसामानाधिकरण्यं प्रतिपादितम् । समुच्चयवाचकस्याश्रवणं एवं अन्वयग्रहणस्य प्रोद्बलकं उपपादकं च भवति । सायणस्तु होत्रा होमनिष्पादिका अग्निपत्नी, भारती आदित्यपत्नी, वरूत्री धिषणा सरस्वती चेति मन्यते ॥

इति प्रथमस्य द्वितीये पञ्चमो वर्गः

अथास्मिन् सूक्ते एकादशीमृचमाह—

अभि नो देवीरवसा महः शर्मणा नृपत्नीः । अच्छिन्नपत्राः सचन्ताम् ॥११॥

अभि नः देवीः अवसा महः शर्मणा नृऽपत्नीः अच्छिन्नऽपत्राः सचन्ताम् ॥

देवीः देव्यः अस्यां प्रतिपाद्यमाना देवपत्न्यः ग्ना इत्यर्थः, नः अस्मान् अवसा वर्धनेन महः महता (मह पूजायां, क्विप्, तृतीयैकवचनस्य ङसादेशः) शर्मणा सुखेन च अभिसचन्तां आभिमुख्येन सेवन्ताम् । कीदृश्यः? नृपत्नीः नराणां देवानां पत्न्यः शक्तयः । अच्छिन्नपत्राः अच्छिन्नानि पत्राणि यासां ताः, विहायसा गमनसाधनानां पत्राणां आसां पक्षाणां छेदो नास्ति । अश्रान्तवाहना इति स्कं. । 'अवः' महत् शर्म च नोऽनुगृह्णन्त्विति भावः ॥

द्वादशीमृचमाह—

इहेन्द्राणीमुप ह्वये वरुणानीं स्वस्तये । अग्नायीं सोमपीतये ॥१२॥

इह इन्द्राणीम् उप ह्वये वरुणानीम् स्वस्तये अग्नायीम् सोमऽपीतये ॥

इह अस्मिन् यज्ञे स्वस्तये क्षेमाय इन्द्राणीं इन्द्रपत्नीं वरुणानीं वरुणपत्नीं अग्नायीं अग्निपत्नीं उपह्वये आह्वयामि । किमर्थम्? सोमपीतये सोमपानाय । आसां सोमपानेन स्वस्ति भवत्येव यजमानस्य, ततः स्वस्तय इत्युक्तम् ॥

त्रयोदशीमृचमाह—

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतान्नो भरीमभिः ॥१३॥

मही द्यौः पृथिवी च नः इमम् यज्ञम् मिमिक्षताम् पिपृताम् नः भरिऽमभिः ॥

अस्या उत्तरस्याश्च द्यावापृथिव्यौ देवते । मही महती (अत्-शब्दलोपश्छान्दसः, महच्छब्दात् ङीप्) द्यौः द्युलोकदेवता पृथिवी च भूदेवी च नः अस्माकं इमं यज्ञं मिमिक्षतां सेक्तुमिच्छतामित्यर्थः, (मिहेः सेचनार्थस्य सनि रूपम्) भरीमभिः भरणैः पोषणैः (बिभर्तेः इमन्) नः अस्मान् पिपृताम् पूरयताम् (पृ धातोः पूरणार्थस्य लोटि रूपम्, अभ्यासस्याकारस्य इकारः छान्दसः) । उभे द्यौः पृथिवी च स्व-सारभूतेन रसेनास्मान् सुखार्द्रान् रसभरितान् कुरुताम्, स्वीयैर्भरणसामर्थ्यैः पूरयतां च ॥

चतुर्दशीमृचमाह—

तयोरिद्घृतवत्पयो विप्रा रिहन्ति धीतिभिः । गन्धर्वस्य ध्रुवे पदे ॥१४॥

तयोः इत् घृतऽवत् पयः विप्राः रिहन्ति धीतिऽभिः गन्धर्वस्य ध्रुवे पदे ॥

तयोरित् द्यावा-पृथिव्योरेव घृतवत् दीप्तिमत् पयः सारभूतं रसमित्यर्थः, विप्राः विपश्चितः धीतिभिः धारणसमर्थप्रज्ञावृत्तिभिः रिहन्ति लिहन्ति, आस्वादयन्ति (लकारस्य रेफः छान्दसः) । स्थूला जडस्थाना भौमा चित् पृथिवीशब्द-सङ्केतिता भवति । सूक्ष्मतरा चेतःस्थाना दिव्या चित् द्यौरिति सङ्केतिता । उभयोः सारांशभूतो रसः अमृतमयः भास्वरो भवति 'घृतवत् पयः' । तं आस्वादयन्ति विप्राः स्वाभिर्विशिष्टप्रज्ञाभिः । तर्हि क्व तं रसं 'रिहन्ति?' गन्धर्वस्य ध्रुवे स्थिरे पदे

स्थाने । गन्धर्वस्य स्थानं अन्तरिक्षमिति वदन्, आकाशे वर्तते द्यौः पृथिवी च तयोरेव सम्बन्धि घृतसदृशं जलं विप्रा लिहन्तीति व्याचष्टे सायणः । यास्क एवं मन्यते 'सुषुम्नः सूर्यरश्मिः गौरुच्यते' तां धारयते यः सोमः स गन्धर्वः, आह्लादमयत्वात् स चन्द्रमा इति क्वचित् कीर्त्यते । 'अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे' (१-८४-१५) इति पुरस्ताद्वक्ष्यते । तस्मान्नेह विस्तर इष्यते । इदं त्विह बोध्यम्, यत्र ऋतरश्मिर्दीप्तः स्थिरो लसति तस्मिन् सौम्ये पदे 'विष्णोः पदे परमे मध्व उत्सः' इत्यत्र च मन्त्रवर्णोऽवधेयः (१-१५४-५) 'विप्राः घृतवत् पयो रिहन्ति' भासमानं अमृतं रसमास्वादयन्ति ॥

पञ्चदशीमृचमाह—

स्योना पृ॑थिवि भवानृक्ष॒रा नि॒वेश॑नी । यच्छा॑ नः॒ शर्म॑ स॒प्रथः॑ ॥१५॥

स्यो॒ना पृ॒थि॒वि॒ भ॒व॒ अ॒नृ॒क्ष॒रा नि॒ऽवेश॑नी यच्छ॑ नः॒ शर्म॑ स॒ऽप्रथः॑ ॥

अस्याः पृथिवी देवता । हे **पृथिवि**, त्वं **स्योना** सुखा (स्योनं सुखनाम) **अनृक्षरा** कण्टकशून्या (ऋक्षरः कण्टकः) **निवेशनी** निवेशस्थानभूता, अस्माकं निवेशनयोग्या वा भव । शत्रुशून्यसुखवासभूर्भवेत्युक्तम् । **नः** अस्मभ्यं **सप्रथः** विस्तारभूतं (प्रथ प्रख्याने, असुन्) **शर्म** शरणं **यच्छ** देहि ॥

इति प्रथमस्य द्वितीये षष्ठो वर्गः

अथ षड्वैष्णव्यः । सूक्तेऽस्मिन् षोडशीमृचमाह—

अतो॑ दे॒वा अ॑वन्तु नो॒ यतो॒ विष्णु॑र्वि॒चक्र॒मे । पृ॒थि॒व्याः स॒प्त धाम॑भिः ॥१६॥

अतः॑ दे॒वाः अ॒व॒न्तु॒ नः॒ यतः॑ विष्णुः॑ वि॒ऽच॒क्र॒मे पृ॒थि॒व्याः स॒प्त धाम॑ऽभिः ॥

सर्वोत्तम आदित्यो विष्णुः परमेश्वरः प्रस्तुतः । **अतः** (एतच्छब्दात्तसिल्) एतस्मात्, तस्मादित्यर्थे ग्राह्यम्, यत्तदोर्नित्यसम्बन्धात् यत इत्युत्तरत्र श्रवणाच्च । **देवाः** इन्द्रादयः **नः** अस्मान् **अवन्तु** वर्धयन्तु । **यतः** यस्मात् **विष्णुः** (व्यापनार्थाद्विषेर्नुक्) व्यापको देवः **पृथिव्याः** (सम्बन्धे षष्ठी) पृथिवीसम्बन्धिभिः **सप्त** सप्तभिः (विभक्तिव्यत्ययः) **धामभिः** स्थानैः द्वारा **विचक्रमे** विशेषेण पद-

विन्यासं कृतवान्, विक्रान्तवानित्यर्थः । यस्मात्तेजोनिधेः (स्थानात्) विष्णुः पार्थिवानि सप्त धामानि वितत्य क्रान्तवान् तदेव स्थानं तदेकमूलानां देवानामपि । व्यापारभेदात्पृथग्व्यक्तास्ते स्वानुग्राह्यां अभिवृद्धिं नः प्रयच्छन्त्विति प्रार्थना* ॥

सप्तदशीमृचमाह—

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूळ्हमस्य पांसुरे ॥१७॥

इदम् विष्णुः वि चक्रमे त्रेधा नि दधे पदम् सम्ऽऊळ्हम् अस्य पांसुरे ॥

इदं सर्वमिदं विश्वं **विष्णुः** व्यापकः परमो देवः **विचक्रमे** विक्रान्तवान् । विक्रमणप्रकारमाह । **त्रेधा** त्रिविधं पृथिव्यां अन्तरिक्षे द्युलोके च **पदं निदधे** पादविन्यासं कृतवान् । तेन किं वृत्तम्? **अस्य** विष्णोः **पांसुरे** पदधूलिमति प्रदेशे (मत्वर्थीयः रः) **समूळ्हं** समूढं सम्यक् इदं प्रतिष्ठापितं इदं सर्वमित्यर्थः (संपूर्वकाद् वहेः क्तः, संप्रसारणम्) । त्रेधा– त्रिशब्दाद् एधाच् प्रत्ययः ॥

अष्टादशीमृचमाह—

त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥१८॥

त्रीणि पदा वि चक्रमे विष्णुः गोपाः अदाभ्यः अतः धर्माणि धारयन् ॥

गोपाः गोपायिता रक्षकः सर्वस्य जगतः **अदाभ्यः** न दम्भयितुं वशयितुं वा शक्यः अनभिगम्यप्रभावः **विष्णुः त्रीणि पदा** पदानि **विचक्रमे** विशेषेण क्रान्त-

---

*सप्ततत्त्वात्मिका विश्वसत्तेति प्रागुक्तम् । यथा पृथिव्यादिभूतपञ्चकव्यवहारे पृथिव्यां इतरभूतान्तर्भावेऽपि अंशभूयस्त्वेन प्राधान्यात् पृथिवीति व्यवहारः, एवं पृथिव्यां पृथिवीतरतत्त्वप्रधानानां भुवर्लोकादिसत्यलोकान्तानां ऊर्ध्वधाम्नां वर्तनं बोध्यम् । इदमत्रावधेयम् । विष्णोर्विक्रमणस्य यन्मूलं स्थानं तदेव देवानामपीति अस्यामृचि स्पष्टं लक्ष्यते । पार्थिवैः सप्तभिर्धामभिर्विष्णोः विक्रमः स्पष्टोऽजायत । अनेन ऋषेरन्तर्यामिनः सप्तस्वपि धामसु चिरकक्ष्यासु जयवान् वैष्णवो विक्रमः पदमलभतेत्युक्तं भवति ।

अथ षण्णामासां वैष्णवीनां ऋचां विषयसङ्ग्रहं अत्रैवाचक्ष्महे । पुराणकथाभिरासां किमपि व्याख्यानं पूर्वेषां अभिमतम् । तदरसम्, आवरणमेवार्थस्य न तु विवरणमिति नेह तद् विचार्यते । आसां आद्यायां विष्णुविक्रममूलस्थानं देवानामपीत्युक्तम् । द्वितीयस्यां विष्णोर्विक्रम एव विश्वोद्भवकारणमिति वक्ष्यते । तृतीयचतुर्थ्योः विष्णुविक्रमाद्विश्वस्मिन् धर्माः ध्रियन्ते गुप्तानि धर्म्याणि व्रतानि स्पष्टानि भवन्तीति, अन्त्ययोः त्रैलोक्यविक्रमणेऽपि विष्णोः परमं पदं तच्छब्दवाच्यं सूरिदृग्गोचरं इति च प्रतिपादयिष्यते ॥

वान् । कुतः? अतः अस्मात् पृथिवीस्थानात् । किं कुर्वन्? धर्माणि धर्मान्, विश्वस्मिन् जगति धारयितव्यानि कर्माणि धारयन् सन् विचक्रम इति सम्बन्धः । इह त्रैलोक्यस्य आश्रयः पृथिवीस्थानम्, तदस्माद्विक्रम्य त्रैलोक्ये धारयितव्यान् शाश्वतान् धर्मान् पालयति ॥

एकोनविंशीमृचमाह–

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥१९॥

विष्णोः कर्माणि पश्यत यतः व्रतानि पस्पशे इन्द्रस्य युज्यः सखा ॥

सखीन् उपासकान् प्रति सम्बोधनम् । **विष्णोः कर्माणि** विक्रमसाधितानि **पश्यत** यैः कर्मभिः त्रिलोकक्रमणरूपैः (सः विष्णुः) **व्रतानि** त्रैलोक्यधारणार्थानि नियतविधानानि कर्माणि **पस्पशे** स्पृष्टवान् स्पष्टीकृतवानित्यर्थः (स्पश स्पर्शने, लिट्) । नित्या गूढा धर्मा लोकक्रियार्थाः, विष्णोर्विक्रमकर्मणा स्पृष्टाः स्पष्टीकृता इत्यर्थः । सः **इन्द्रस्य** त्रैलोक्यसम्राजः कार्यधुरन्धरस्य **युज्यः** योग्यः युक्तः (युजेः क्यप्, कित्वाद्गुणाभावः) **सखा** समानख्यानः ॥

विंशीमृचमाह–

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥२०॥

तत् विष्णोः परमम् पदम् सदा पश्यन्ति सूरयः दिविऽइव चक्षुः आऽततम् ॥

सूरयः विद्वांसः **विष्णोः तत्** तच्छब्दवाच्यं **परमं** उत्तमं **पदं** स्थानं **सदा** कालानवच्छेदेन नित्यमित्यर्थः, **पश्यन्ति** । दृष्टान्तमाह । **दिवीव** आकाशे यथा **आततं** समन्ततः व्याप्तं **चक्षुः** नेत्रम् । ऊर्ध्वमाकाशे सर्वतो व्याप्तं विश्वदर्शनसमर्थं चक्षुरिव स्थितं ध्रुवं विष्णोः तत् परमं पदं सदा सूरयः पश्यन्ति । अत्र भूमिकायां इदं (पृ. ९७-९८) प्रसक्तं द्रष्टव्यम् ॥

एकविंशीमृचमाह—

तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥२१॥

तद् विप्रासः विपन्यवः जागृऽवांसः सम् इन्धते विष्णोः यत् परमम् पदम् ॥

विप्रासः विप्राः विपश्चितः विपन्यवः विशेषेण स्तोतारः सन्तः (स्तुत्यर्थः पनिः, यु-प्रत्यय औणादिकः) जागृवांसः (जागृ निद्राक्षये, लिटः क्वसुः) निर्णिद्राः नित्योन्मेषशालिनो भूत्वा यत् पूर्वोक्तं विष्णोः परमं उत्तमं पदं धाम भवति, तत् प्रसिद्धं समिन्धते सम्यग्ज्वलयन्ति । नित्यज्वलितस्य परमपदस्य साक्षात्कारिषु विप्रेषु अविच्छिन्नजागरणेषु अनवरतं आविष्कारणमेव पुनर्ज्वलनं भवति, अत एव सन्दीपयन्ति 'समिन्धते' इत्युक्तम् । ईदृशाः विस्पष्टपरमार्था ऋचः औपनिषदर्षीणां क्वचिदाधारभूताः 'तदुक्तमृषिणा' 'तदृचाऽभ्युक्तम्' इत्यादिवाक्यानां बीजायन्ते ॥

इति प्रथमस्य द्वितीये सप्तमो वर्गः

पञ्चमेऽनुवाके षष्ठं 'तीव्रा' इति चतुर्विंशत्यृचं सूक्तम् । मेधातिथिरेव ऋषिः । देवताः वाय्वाद्यास्तत्र तत्र व्याख्यायां स्पष्टाः स्युः । अत्र एकविंशतिसङ्ख्याका ऋचः गायत्रीच्छन्दस्काः, शिष्टानां छन्दोभेदो व्याख्यायां द्रष्टव्यः ॥

तामेतां सूक्तस्य प्रथमामृचमाह—

तीव्राः सोमास आ गह्याशीर्वन्तः सुता इमे । वायो तान्प्रस्थितान्पिब ॥१॥

तीव्राः सोमासः आ गहि आशीःऽवन्तः सुताः इमे वायो इति तान् प्रऽस्थितान् पिब ॥

वायुर्देवता । हे वायो जगत्प्राण, यजमानस्य शरीरेऽत्र विशेषतः प्राणभूत ! तीव्राः निशिताः, अविरतशीघ्रक्षरणशालिन इत्यर्थः (तिज निशाने, रक्, दीर्घत्वं, जस्य वः) इमे सोमासः सोमाः सुताः अभिषुताः । ते आशीर्वन्तः दध्याशिरः व्याख्यातम् (१-५-५) । आगहि आगच्छ तान् स्वीकर्तुम् । प्रस्थितान् क्षरणाय प्रवृत्तान् । सर्वं यजमानस्य अन्तरङ्ग-बहिरङ्गात्मकं शरीरं व्याप्य पूरयितुं प्रवर्तन्ते

सोमाः। **तान् पिब**। वायुना सोमरसादानेनैव शरीरं धृतसम्मदभरं उत्तरदेवताकार्य-विलसितस्य पात्रं भवेत् ॥

द्वितीयामृचमाह–

उभा देवा दिविस्पृशेन्द्रवायू हवामहे। अस्य सोमस्य पीतये ॥२॥

उभा देवा दिविऽस्पृशा इन्द्रवायू इति हवामहे अस्य सोमस्य पीतये ॥

दिविस्पृशा दिविस्पृशौ (द्युभ्यां ङिः, सप्तम्या अलुक्) द्युलोकवर्तिनौ **उभा** उभौ **देवा** देवौ **इन्द्रवायू** इन्द्रं मनोधिदैवतं वायुं प्राणाधिदैवतं च **हवामहे** आह्वयामः। किमर्थम्? **अस्य सोमस्य पीतये** स्पष्टम्। यद्यपि वायुर्मध्यमस्थानः इन्द्रसाहचर्यात् द्युस्थानः स्तूयते। प्रथमं वायुः इदानीं इन्द्रो वायुश्च सोमपानायाहूतौ। अथ मित्रावरुणौ च प्रस्तुतौ भवतः। अस्य सर्वस्य गूढं तात्पर्यं प्राक् प्रपञ्चितं मधुच्छन्दसः प्रथमानुवाकीयद्वितीयसूक्ते। तथा तृतीयानुवाके मरुत्वन्तमधिकृत्यापि यदुक्तं तदप्यत्रावधेयम् व्याख्यायमानेषु मन्त्रेषु ॥

तृतीयामृचमाह–

इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये। सहस्राक्षा धियस्पती ॥३॥

इन्द्रवायू इति मनःऽजुवा विप्राः हवन्ते ऊतये सहस्रऽअक्षा धियः पती इति ॥

मनोजुवा मनोजुवौ मनोवद्गतिमन्तौ (जुवतिर्गतिकर्मा) **इन्द्रवायू** उभौ देवौ **विप्राः** विपश्चितः **ऊतये** वृद्धये **हवन्ते** आह्वयन्ति। कथंभूतौ? **सहस्राक्षा** सहस्रं अक्षीणि ययोस्तौ, बहुदर्शिनः सहस्राक्षस्येन्द्रस्य साहचर्यात् वायोरपि सहस्राक्षत्वम्। **धियः** धारणात्मिकायाः प्रज्ञायाः **पती** पालकौ, अत्रापि इन्द्रसाहचर्यं हेतुः ॥

चतुर्थीमृचमाह–

मित्रं वयं हवामहे वरुणं सोमपीतये। जज्ञाना पूतदक्षसा ॥४॥

मित्रम् वयम् हवामहे वरुणम् सोमऽपीतये जज्ञाना पूतऽदक्षसा ॥

वयं यजमानाः **सोमपीतये** सोमपानार्थं **मित्रं वरुणम्** उभौ च **हवामहे** आह्वयामः । कीदृशौ? **जज्ञाना** जायमानौ यजमाने जन्म लभमानौ । **पूतदक्षसा** पवित्रधीकौशलौ (शब्दद्वयं च प्राग्व्याख्यातम्) ॥

पञ्चमीमृचमाह–

ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती । ता मित्रावरुणा हुवे ॥५॥

ऋतेन यौ ऋतऽवृधौ ऋतस्य ज्योतिषः पती इति ता मित्रावरुणा हुवे ॥

यौ ऋतेन सत्येन [स्वात्मीयेन] **ऋतवृधौ** यजमाने सत्यस्य वर्धयितारौ, **ऋतस्य** सत्यस्य **ज्योतिषः** [बृहच्छन्दप्रतिपादितस्य उत्तमस्य] **पती** पालकौ भवतः, **ता** तौ **मित्रावरुणा** मित्रावरुणौ **हुवे** आह्वयामि । मित्रावरुणविचारः प्राकृतः ॥

इति प्रथमस्य द्वितीयेऽष्टमो वर्गः

सूक्ते षष्ठीमृचमाह–

वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतां नः सुराधसः ॥६॥

वरुणः प्रऽअविता भुवत् मित्रः विश्वाभिः ऊतिऽभिः करताम् नः सुऽराधसः ॥

वरुणः देवः अस्माकं **प्राविता** प्रकर्षेण वर्धयिता **भुवत्** भवतु लेट्छान्दसः, **मित्रः** देवश्च **विश्वाभिः** सर्वाभिः **ऊतिभिः** अभिवृद्धिभिः प्राविता भवतु । उभौ च **नः** अस्मान् **सुराधसः** शोभनं राधो धनं येषां तान् **करताम्** कुरुताम् ॥

सप्तमीमृचमाह–

मरुत्वन्तं हवामह इन्द्रमा सोमपीतये । सजूर्गणेन तृम्पतु ॥७॥

मरुत्वन्तम् हवामहे इन्द्रम् आ सोमऽपीतये सऽजूः गणेन तृम्पतु ॥

अथ तृचस्य मरुत्वानिन्द्रो देवता । **मरुत्वन्तं** मरुद्गणविशिष्टं [मरुतोऽस्य सन्तीति मतुपो वत्वम्] **इन्द्रं सोमपीतये** सोमपानाय **आ हवामहे** आह्वयामः । स **इन्द्रः गणेन** मरुद्गणेन **सह सजूः** समानप्रीतियुक्तः **तृम्पतु** तृप्तो भवतु [तृप तृम्प तृप्तौ, लोट्] । सजूः– जुषी प्रीत्यर्थे, सम्पदादिलक्षणः क्विप्, समानस्य समावः, बहुव्रीहिः । पूर्वपदप्रकृतिस्वरो बाधितः उत्तरपदान्तोदात्तेन । इन्द्रस्य समरुद्गणस्य माधुच्छन्दसे सूक्ते प्रसक्तिः स्मार्या ॥

अष्टमीमृचमाह–

इन्द्र॑ज्येष्ठा॒ मरु॑द्गणा॒ देवा॑सः॒ पूष॑रातयः । विश्वे॒ मम॑ श्रुता॒ हव॑म् ॥८॥

इन्द्र॑ऽज्येष्ठाः मरु॑त्ऽगणाः देवा॑सः पूष॑ऽरातयः विश्वे॑ मम॑ श्रु॒त हव॑म् ॥

इन्द्रज्येष्ठाः इन्द्रो ज्येष्ठो मुख्यो येषां ते **मरुद्गणाः** गणरूपा मरुत्समूहाः **पूषरातयः** पूषा पोषको देवः पूषाख्यः रातिः दाता येषां ते [पूष्णो देवस्य प्रभावात् यजमानस्य पोषे सति मरुद्गणप्रादुर्भावो भवति, तस्मात् स दाता 'रातिः' उक्तः] **विश्वे** सर्वेऽपि हे **देवासः** देवाः **मम हवं** आह्वानं **श्रुत** शृणुत [छान्दसः संहितायां दीर्घः, लोट्, मध्यमपुरुषबहुवचनम्, शप् व्यत्ययेन, अन्यच्च छान्दसम्] ॥

नवमीमृचमाह–

ह॒त वृ॒त्रं सु॑दानव॒ इन्द्रे॑ण॒ सह॑सा यु॒जा । मा नो॑ दु॒ःशंस॑ ईशत ॥९॥

ह॒त वृ॒त्रं सु॒ऽदा॒न॒वः॒ इन्द्रे॑ण सह॑सा यु॒जा मा नः॒ दुः॒ऽशंसः॑ ईश॒त ॥

हे **सुदानवः** शोभनदानाः (दानुर्भानुरित्यौणादिको नुः) मरुद्गणाः, **सहसा** सहस्वता बलवता (अन्तर्णीतमत्वर्थः) **युजा** युक्तेन (युजिर्योगे, क्विन्) **इन्द्रेण सह वृत्रं** एतन्नामकमसुरं **हत** नाशयत (हन्तेः लोट्, मध्यमपुरुषबहुवचनम्) **दुःशंसः** दुराशंसः, दुष्टाभिप्रायः कोऽपि **नः** अस्मान् प्रति **मा ईशत** मा भूत् प्रभुः । 'ईश ऐश्वर्ये, छन्दसि लुङ्लङ्लिटः, न माङ्योग इति अडभावः' ॥

दशमीमृचमाह–

विश्वान्देवान् हवामहे मरुतः सोमपीतये । उग्रा हि पृश्निमातरः ॥१०॥

विश्वान् देवान् हवामहे मरुतः सोमऽपीतये उग्राः हि पृश्निऽमातरः ॥

अथ मारुतस्तृचः । **मरुतः** मरुदाख्यान् **विश्वान् देवान्** इमान् गणान् **सोमपीतये** सोमपानाय **हवामहे** आह्वयामः । ते च मरुतः **उग्राः** प्रचण्डबलाः **पृश्निमातरः** पृश्निः चित्रवर्णा गौः येषां ते, पृश्नेः पुत्रा इत्यर्थः, **हि** प्रसिद्ध्यर्थे, मरुतः ऐन्द्रतेजोबलदीपिता धीवृत्तिविभवा अपि प्राधान्येन प्राणशक्त्युद्भवा नाडीबल-समर्थनप्रभावाः, ततो धीक्षेत्रं प्राप्ता इति बोध्यम्, प्रागुपन्यस्तम् । तेषां माता चित्रवर्णा गौः पृश्निशब्दवाच्येति चेदयं सङ्केतार्थः स्पष्टो भवति । प्राणशक्त्याविर्भावविलास-क्षेत्रभूता अन्तर्हितधीवृत्तिरश्मिप्रसूः अदितिवदखण्डाकारान्तरिक्षस्थाना विविधाविष्कार-कलासम्पन्ना सत्त्वमयी शक्तिर्माता मरुतां चित्रवर्णा गौः पृश्निरुच्यते ॥

इति प्रथमस्य द्वितीये नवमो वर्गः

एकादशीमृचमाह–

जयतामिव तन्यतुर्मरुतामेति धृष्णुया । यच्छुभं याथना नरः ॥११॥

जयताम्ऽइव तन्यतुः मरुताम् एति धृष्णुया यत् शुभम् याथन नरः ॥

हे **नरः** नेतारो मरुतः, **यत्** यदा **शुभं** शोभनं दीप्तं वा पदं प्रति **याथन** यूयं प्राप्नुथ [थनादेशः, यातेः लट्, मध्यमपुरुषबहुवचनस्य रूपम्] तदा **मरुतां** युष्माकं तन्यतुः विस्तारी शब्दः, तनु विस्तारे, यतुच् प्रत्ययः, **जयतामिव** जयिनां शूराणामिव **धृष्णुया** धृष्टः सन् **एति** गच्छति । धृष्णुया ञि धृषा प्रागल्भ्ये, क्नुप्रत्ययः, प्रथमैकवचनान्तः, याच् आदेशः । शुभं प्रति मरुतां यात्रा वीरजयघोषवती ॥

द्वादशीमृचमाह–

हस्काराद्विद्युतस्पर्यतो जाता अवन्तु नः । मरुतो मृळयन्तु नः ॥१२॥

हस्कारात् विऽद्युतः परि अतः जाताः अवन्तु नः मरुतः मृळयन्तु नः ॥

हस्कारात् हसनकारात् दीप्तिकृत इत्यर्थः, हसनमत्र प्रकाशो दीप्तिर्वा भवति (हसतेः सम्पदादिलक्षणः क्विप्, तस्मात् करोतेः कर्मण्यण्) **विद्युतः** विशेषेण द्योतमानात् **अतः** एतस्मात् मध्यमस्थानात् अन्तरिक्षात् **परि** सर्वतः **जाताः** प्रादुर्भूताः **मरुतः** देवाः **नः** अस्मान् **अवन्तु** वर्धयन्तु, ते **नः** अस्मान् **मृळयन्तु** मृडयन्तु सुखयन्तु ॥

त्रयोदशीमृचमाह—

आ पूषञ्चित्रबर्हिषमाघृणे धरुणं दिवः । आजा नष्टं यथा पशुम् ॥१३॥

आ पूषन् चित्रऽबर्हिषम् आघृणे धरुणम् दिवः आ अज नष्टम् यथा पशुम् ॥

अथ पौष्णस्तृचः । पूषाख्यो देव आदित्यानामेकः । सम्पूषन्निति घौरस्य कण्वस्य पौष्णे सूक्ते अस्य व्यापारो विस्पष्टं वक्ष्यत इति नात्र विस्तरः । हे **पूषन्**, **आघृणे** सर्वतो दीप्तिमन्, (घृणिः किरणः प्रसिद्धः, दीप्त्यर्थत्वाद् दीप्तिर्वा) **चित्रबर्हिषं** चित्रं बहुशोभोपलक्षणनानावर्णं बर्हिः आसनं यस्य तं, **दिवः** द्युलोकस्य अत एव तद्वासिनां देवानां **धरुणं** धारयितारं सोमं, अमृतरसः, सोमः देवानां आहारत्वाद् धारकः, **आ आ अज** आप्नुहि आगमय वा, अन्तर्णीतण्यर्थः । उपसर्गाभ्यासात् आख्यातस्याभ्यासः, अज इति गत्यर्थो धातुः । तत्र दृष्टान्तमाह । **यथा नष्टं पशुं** यथा अदर्शनं गतं अजादिकं पशुं अन्वीक्ष्य लब्ध्वा आहरति पशुपालः तथा गूढं सोमं अन्वीक्ष्य आहर पूषन्निति भावः । अनेन सोमाहरणसामर्थ्यं पूष्णः प्रोक्तम् । उत्तरत्र च सोमं रहसि निहितं अधिगम्य साधयतीति वक्ष्यति ॥

चतुर्दशीमृचमाह—

पूषा राजानमाघृणिरपगूळ्हं गुहा हितम् । अविन्दच्चित्रबर्हिषम् ॥१४॥

पूषा राजानम् आघृणिः अपऽगूळ्हम् गुहा हितम् अविन्दत् चित्रऽबर्हिषम् ॥

आघृणिः दीप्तिमान्, व्याख्यातम् । पूषा देवः अपगूळ्हं अत्यन्तगूढं, (गुहू संवरणे, कर्मणि क्तः) गुहा गुहायां रहसि दुष्प्रवेशे स्थाने हितं निहितं आवरकैरसुरैः राजानं सोमं अविन्दत् लब्धवान् । कीदृशम्? चित्रबर्हिषम् व्याख्यातम् ॥

पञ्चदशीमृचमाह–

उतो स मह्यमिन्दुभिः षड्युक्ताँ अनुसेषिधत् । गोभिर्यवं न चर्कृषत् ॥१५॥

उतो इति स: मह्यम् इन्दुऽभिः षट् युक्तान् अनुऽसेसिधत् गोभिः यवम् न चर्कृषत् ॥

उतो अपि च (उत उ इति उत-शब्दस्य उञा सहैकादेशः), सः पूषा मह्यम् यजमानाय इन्दुभिः (उन्दी क्लेदने, गतम्) सोमैः युक्तान् समवेतान् षट् षट्-सङ्ख्याकान् पृथिव्यादिषु सप्तसु धामसु पृथिवीं वर्जयित्वा इतरेषां ऊर्ध्वमवस्थितानां षण्णां विभवान् इह पृथिव्यां मयि यजमाने अनुसेषिधत् अनुक्रमेण साधयन् [अनु-पूर्वकः गत्यर्थः षिध धातुः, यङ् लुक्, नेदमाख्यातम् शतृ-प्रत्ययः, नुमागमप्रतिषेधः] वर्तेत इति शेषः । तत्र दृष्टान्तः । न उपमार्थः, यथा कर्षकः गोभिः बलीवर्दैः यवं यवमुद्दिश्य (यवशब्दः धान्यस्योपलक्षणम्) चर्कृषत् कृषति पुनः पुनः, कृषिं करोति, तद्वत् । चर्कृषत्– कृष विलेखने, यङ् लुकि, लेट्, लडर्थः । अयं पूष्णो विभवः, येन स तामसैर्देवारिभिरपहृत्य रहसि निहितं देवानामन्नभूतममृतं सोममाहृत्य यजमानं पुष्णन् ऊर्ध्वलोकविभवान् सोमरसभरितान् पदे पदे पुनः पुनः सम्पाद्य तं सर्वथा सोमसम्पन्नं विधत्ते ॥

इति प्रथमस्य द्वितीये दशमो वर्गः

अथास्मिन् सूक्ते षोडशीमृचमाह–

अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम् । पृञ्चतीर्मधुना पयः ॥१६॥

अम्बयः यन्ति अध्वऽभिः जामयः अध्वरिऽयताम् पृञ्चतीः मधुना पयः ॥

इतः प्रभृति आपो देवताः आ सूक्तसमाप्तेः, त्रयोविंश्यां पयस्वानग्न इत्यर्धर्चं अन्त्यां च ऋचं वर्जयित्वा । अध्वरीयताम् अध्वरं यज्ञं आत्मन इच्छतां अस्माकं

अम्बयः मातरः मातृस्थानीया आपः (अम्बिशब्दोऽम्बापर्यायः) **अध्वभिः** नियतैः मार्गैः **यन्ति** गच्छन्ति । तथा **जामयः** भगिनीस्थानीयाश्च आपः यन्तीति सम्बन्धः । किं कुर्वन्त्यः? **मधुना** मधुरेण आनन्दमयेन रसेन **पयः** गव्यं दुग्धं तल्लक्षितं ज्ञानरश्मि-समूहं **पृञ्चतीः** सम्पर्चयन्त्यः (विभक्तिव्यत्ययः, पृची सम्पर्के, शतरि ङीप्) यजमानं प्रति नियतैर्यजनमार्गैरपूछन्दसङ्केतिता जननीस्थानीया आनन्दमय्यः सगर्भ्य-स्थानीयाः शक्तिवाहिन्यश्च सम्मदरसेन चेतः पूरयन्त्यः आगच्छन्तीति भावः ॥

सप्तदशीमृचमाह–

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह । ता नो हिन्वन्त्वध्वरम् ॥१७॥

अमूः याः उप सूर्ये याभिः वा सूर्यः सह ताः नः हिन्वन्तु अध्वरम् ॥

याः अमूः आपः **सूर्ये** सर्वप्रेरके सवितरि ज्योतिर्मये **उप** समीपेन अव-स्थिताः । **याभिः वा** याभिरद्भिश्च (चार्थे वा) **सह** सहितः **सूर्यः** वर्तते । **ताः** आपः **नः** अस्माकं **अध्वरं** यज्ञं **हिन्वन्तु** वर्धयन्तु (हि गतौ वृद्धौ च) । हिन्वन्तु प्रीणयन्त्विति सायणः । 'स्वर्वतीरपः' इत्यत्र प्रागुक्तमवधेयम् ॥

अष्टादशीमृचमाह—

अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः । सिन्धुभ्यः कर्त्वं हविः ॥१८॥

अपः देवीः उप ह्वये यत्र गावः पिबन्ति नः सिन्धुऽभ्यः कर्त्वम् हविः ॥

अपः अस्माभिः प्रतिपादितलक्षणाः शक्तीः सत्त्वमयीः **देवीः** देवताः **उपह्वये** आह्वयामि । **यत्र** यास्वप्सु **नः गावः** अस्मदीयाः ज्ञानरश्मयः **पिबन्ति** रसमाददते, तेन सत्त्वसम्पन्ना वर्धन्ते च ['ता उपह्वये' इति सम्बन्धः] । **सिन्धुभ्यः** स्यन्दन-शीलाभ्यः ताभ्यः सत्त्वमुपादाय **हविः** हवनं अर्पणद्रव्यं **कर्त्वं** कर्तव्यं अस्माभिरिति शेषः । कर्त्वम्– करोतेः त्वन् कृत्यार्थे ॥

एकोनविंशीमृचमाह–

अप्स्व१न्तरमृतमप्सु भेषजमपामुत प्रशस्तये । देवा भवत वाजिनः ॥१९॥

अप्ऽसु अन्तः अमृतम् अप्ऽसु भेषजम् अपाम् उत प्रऽशस्तये देवाः भवत वाजिनः ॥

प्रथमपादस्य द्वादशाक्षरेण आद्यश्चेत् पुरउष्णिगिति छन्दोविदः । ऋचोऽस्याः पुरउष्णिक् छन्दः । अप्सु पूर्वोक्तस्वरूपासु अन्तः सारांशभूते मध्ये भागे अमृतं मरणरहितं नित्यं सत्त्वं वर्तते । अप्सु तथा भेषजं सर्वरोगनिवारणोपायभूतं सत्त्वं द्रव्यं वर्तते । उत अपि च अपां तथाभूतानां दिव्यविभवानां प्रशस्तये प्रशंसार्थे हे देवाः यूयं वाजिनः वाजवन्तः समृद्धिमन्तः भवत । अमृतगर्भाणां सर्वार्तिशमनीनां अपां सेवनाय देवैः समृद्धैः पूर्णैः सर्वैर्भाव्यं, आगन्तव्यम् । तथा प्रशंसाभाजनं आपः, यथा समृद्धैर्देवैः सेवितास्ताः तेषां सन्तृप्तिं जनयेयुः । सेवमानेषु देवेषु पूर्णतायां लोपश्चेत्, अपां महिमा कृत्स्नशो न विदितः स्यादित्याशयः । तस्मात् 'वाजिनो भवत अपां प्रशस्तये' इत्युक्तम् । अत्र सङ्केतभूता एवापो ग्राह्याः । भौतिकस्य जलस्यापि एतादृशा गुणा वर्तन्ते, त एवालङ्कारिकभाषया वेदे गीता इति भैषज्यवेदिनामेके प्राहुः । तथैवास्तु मा वा । वयमत्र तटस्थाः । प्रधानार्थस्तु अस्माभिः उक्तप्रकारक इति बोध्यम् ॥

विंशीमृचमाह—

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निं च विश्वशम्भुवमापश्च विश्वभेषजीः ॥२०॥

अप्ऽसु मे सोमः अब्रवीत् अन्तः विश्वानि भेषजा अग्निम् च विश्वऽशम्भुवम् आपः च विश्वऽभेषजीः ॥

अनुष्टुप्छन्दस्का । ऋषिरन्तर्याजी ब्रवीति— अप्सु उक्तलक्षणासु अन्तः मध्ये विश्वानि सर्वाणि भेषजा भेषजानि सर्वारिष्टनिवारणानीत्यर्थः, सन्तीति मे मह्यं सोमः रसमयो देवः अब्रवीत् उपदिष्टवान् । तथा अग्निं च देवं च विश्वशम्भुवं विश्वेषां भूतानां सुखस्य भावयितारं, अब्रवीदिति सम्बन्धः (विधेयविशेषणम्) । आपश्च उक्ताः शक्तयः विश्वभेषजीः सर्वस्यापि स्वयं भेषजभूताः । विश्वशम्भुवम्—

भवतेरन्तर्भावितण्यर्थः, ततः क्विप् । विश्वभेषजीः– विश्वानि भेषजानि औषधानि यासु ताः । केवलादिभ्यो नवभ्यः नित्यं ङीप् । द्वितीयाविभक्तिव्यत्ययः । 'आपश्च विश्वभेषज्यः' इति पृथग्वाक्यम् ॥

इति प्रथमस्य द्वितीये एकादशो वर्गः

एकविंशीमृचमाह—

आपः पृणीत भेषजं वरूथं तन्वे३ मम । ज्योक्च सूर्यं दृशे ॥२१॥

आपः पृणीत भेषजम् वरूथम् तन्वे मम ज्योक् च सूर्यम् दृशे ॥

हे आपः देव्यः, मम तन्वे शरीरार्थे वरूथं परिधिभूतं परितः कवचवद् भूत्वा रक्षकमित्यर्थः भेषजं सर्वारिष्टनिवारकं पृणीत पूरयत । अपि च ज्योक् चिरं सूर्यं परं ज्योतिः दृशे च द्रष्टुं च भेषजं पृणीतेति सम्बन्धः । नेह लौकिकं भेषजं शरीररक्षार्थमपि विवक्षितम् । भैषज्ये औषधसेवायाः प्राधान्यात्, उपचारमात्रं प्रार्थना । अथ च चिरं सूर्यदर्शनाय बलप्रदं भेषजं, न लौकिकं भवति । दिव्यवैभवं आप्यं भेषजमन्तर्याजिनो लभ्यमत्रोक्तमिति स्पष्टम् ॥

द्वाविंशीमृचमाह—

इदमापः प्र वहत यत्किं च दुरितं मयि ।
यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥२२॥

इदम् आपः प्र वहत यत् किम् च दुःऽइतम् मयि यत् वा अहम् अभिऽदुद्रोह यत् वा शेपे उत अनृतम् ॥

अनुष्टुप् छन्दः । हे आपः देव्यः, मयि यत् किं च दुरितं यत् किमपि पापं (ममाविदितमेव स्थितं, मया कृतं वा अज्ञानात्) वर्तते । वा अथवा यत् अहं अभिदुद्रोह सर्वतो द्रोहं कृतवान् जिघांसितवान् वा अहमिति यत् । यत् वा शेपे अथवा शप्तवान् आक्रुष्टवान् वेति यत्, उत अनृतं अथवा असत्यमुक्तवान्वा इति यत्, इदं तदिदं सर्वं प्रवहत प्रकर्षेण नयत, क्षालयत युष्माकं प्रवाहेण सर्वविधं दुरितमस्मदीयमिति यजमानस्यैषः प्रार्थना ॥

त्रयोविंशीमृचमाह—

आपो॑ अ॒द्यान्व॑चारिषं॒ रसे॑न॒ सम॑गस्महि　　।
पय॑स्वानग्न॒ आ ग॑हि॒ तं मा॒ सं सृ॑ज॒ वर्च॑सा ॥२३॥

आप॑ः अ॒द्य अनु॑ अ॒चा॒रि॒ष॒म् रसे॑न सम् अ॒ग॒स्म॒हि॒ पय॑स्वान् अ॒ग्ने॒ आ ग॒हि॒ तम् मा॒ सम् सृ॒ज॒ वर्च॑सा ॥

अनुष्टुप् छन्दः । आप एव देवता अर्धर्चस्य पूर्वस्य, उत्तरस्य त्वग्निः । आपः अपः (द्वितीयाविभक्तिव्यत्ययः) अद्य इदानीं अन्वचारिषं अनुसृत्य अविच्छेदेन वा प्राप्तवानस्मि (चरतिर्गत्यर्थः) 'यदपां माहात्म्यं तत् प्रकाशितमित्यर्थः' इति स्कन्दस्वामी । 'यां यां देवतां निराह तस्यां तस्यां ताद्भाव्यमनुभवतीति स्मरणात् ताद्भाव्यप्रतिपत्तेः' इत्युदाहृतवान् व्याख्याता । साध्वेतत् । एवं प्रतिपत्तेः किं फलम्? आह । रसेन आप्येन सारेण समगस्महि समगंस्महि सङ्गताः स्मः (सम्पूर्वको गमिः, आत्मनेपदं, लुङ्, च्लेर्लुगभावादिः अनुनासिकलोपश्छान्दसः)। अथ हे अग्ने पयस्वान् गोसमृद्धः प्राज्ञरश्मिभूयिष्ठः त्वं आगहि आगच्छ, आगत्य च तं मा तादृशं मां वर्चसा तेजसा संसृज संयोजय । आप्यसारतादात्म्यानुभविनो मम त्वत्कर्तृकतेजस्संसर्जनसम्पत्तयेऽधिकारो भवति, भगवन्नग्ने!

चतुर्विंशीमृचमाह—

सं माग्ने॒ वर्च॑सा सृज॒ सं प्र॒जया॒ समायु॑षा　　।
वि॒द्युर्मे॑ अस्य दे॒वा इन्द्रो॑ वि॒द्यात्स॒ह ऋषि॑भिः ॥२४॥

सम् मा॒ अ॒ग्ने॒ वर्च॑सा सृ॒ज॒ सम् प्र॒ऽजया॑ सम् आयु॑षा वि॒द्युः मे॒ अ॒स्य॒ दे॒वाः इन्द्रः॑ वि॒द्यात् स॒ह ऋषि॑भिः ॥

हे अग्ने मा मां वर्चसा तेजसा संसृज संयोजय, प्रजया सन्तत्या संसृज, आयुषा जीवितेन संसृज । वर्चः दिव्यं तेजः, प्रजा अन्तर्यागविद्यासन्ततिः, आयुः देवार्थजीवितं चेति ग्राह्यम् । अस्य मे मम यजमानस्य दशां ईप्सितां अनुग्राह्यां

प्रार्थितां सम्पदं वा **देवाः** सामान्येन सर्वे **विद्युः** जानीयुः । अस्मदपेक्षितस्य ज्ञातारो भवन्तु देवाः । ज्ञातारः अनुग्रहीतार एव भवन्तीत्याशयः । देवा इति सामान्येनोक्त्वा **'इन्द्रो विद्यात् सह ऋषिभिः'** इत्युक्तम् । इदं च वैशिष्ट्यप्रतिपादनार्थम् । ऋषयस्तु मानुष्यस्योद्धारायेन्द्रस्य सहकारिणो मनुष्या एव देवभावं प्राप्ताः मानुष्याभिमानिनो देवर्षयो वा । ब्राह्मणा आगताः, वसिष्ठोऽप्यागत इतिवत् ॥

इति प्रथमस्य द्वितीये द्वादशो वर्गः

इति प्रथमे मण्डले पञ्चमोऽनुवाकः

अथ षष्ठेऽनुवाके सप्त सूक्तानि शुनःशेपस्य आजीगर्तेः । तत्राद्यं कस्येत्यादिकं पञ्चदशर्चम् । आद्ययोर्द्वयोः त्रिष्टुप्छन्दः । अभि त्वेत्यादेः सवितुस्तृचस्य गायत्री । शिष्टानां त्रिष्टुबेव । आद्याया अनिरुक्तत्वात् प्रजापतिरेव देवतेत्याहुः । द्वितीया आग्नेयी, ततस्तृचः सावित्रः । शिष्टा वारुण्यः ॥

अथास्मिन् सूक्ते प्रथमामृचमाह—

कस्य॑ नू॒नं क॑त॒मस्या॒मृता॑नां॒ मना॑महे॒ चारु॑ दे॒वस्य॒ नाम॑ ।
को नो॑ म॒ह्या अदि॑तये॒ पुन॑र्दात् पि॒तरं॑ च दृ॒शेयं॑ मा॒तरं॑ च ॥१॥

कस्य॑ नू॒नं क॒तमस्य॑ अ॒मृता॑नाम् मना॑महे चारु॑ दे॒वस्य॑ नाम॑ कः न॒ः म॒ह्यै अदि॑तये पुन॑ः दा॒त् पि॒तर॑म् च॒ दृ॒शेय॑म् मा॒तर॑म् च॒ ॥

अमृतानाम् देवानां मध्ये **कतमस्य** किंविधस्य (किंशब्दात् बहूनां जातिपरिप्रश्ने डतमच्) **कस्य देवस्य चारु** शोभनं **नाम** नमनसाधनं अभिधानं मन्त्रात्मकं स्तोत्रं वा **मनामहे** उच्चारयामः (मन्यतिरर्चतिकर्मा, मनने, ज्ञाने, ध्याने वा । अत्र शप् छान्दसः । सामर्थ्यादुच्चारणमुक्तम्) **नूनम्** विचिकित्सायाम् । **कः** को देवः **नः** अस्मान् **मह्यै** महत्यै **अदितये** अखण्डात्मने विश्वप्रसूत्यै देवानामपि मात्रे **पुनः** पुनरपि **दात्** दद्यात् (छन्दसि लिङो लुङ्, अडभावः) येन **पितरं च मातरं च दृशेयं** पश्येयम् । द्यौः पिता, पृथिवी माता ॥

ऋषिः शुनःशेपः पाशबद्धमात्मानमवबुद्ध्य विमोचनाय कं देवमाह्वयामि नाम्ना, यो मामदितये पुनर्दातुं प्रभवेत्, येन दानेन माता-पितरौ च पश्येयम् इति ब्रवीति । अखण्डात्मभुवो विश्वप्रसूतेर्जातोऽहं तस्मात् तस्यै पुनर्दानं न्याय्यं इति गम्यते पुनरिति श्रवणात् । शुद्धसत्त्वचेतःप्रधाना चितिः पितृस्थानीया द्यौः, जडजगद्व्यापृतजागरितस्थाना चितिः मातृस्थानीया पृथिवी । अनयोरुभयोः सहदर्शनं सहजसम्बन्धित्वं ज्ञानं वा सिद्ध्येत् अखण्डस्वरूपाया अदितेर्विश्वमातुः पुनर्लाभात् ॥

द्वितीयामृचमाह—

अ॒ग्नेर्व॒यं प्र॑थ॒मस्या॒मृता॑नां॒ मना॑महे॒ चारु॑ दे॒वस्य॒ नाम॑ ।

स नो॑ म॒ह्या अदि॑तये॒ पुन॑र्दात् पि॒तरं॑ च दृ॒शेयं॑ मा॒तरं॑ च ॥२॥

अ॒ग्नेः व॒यम् प्र॒थ॒मस्य॑ अ॒मृता॑नाम् मना॑महे चारु॑ दे॒वस्य॑ नाम॑

सः नः म॒ह्यै अदि॑तये पुन॑ः दा॒त् पि॒तर॑म् च दृ॒शेय॑म् मा॒तर॑म् च ॥

अमृतानां प्रथमस्य अग्नेरित्यादि योजनीयम् । अन्यत् प्राग्वत् । अग्निरेव प्रथमोऽस्मासु जायते । ततोऽन्येषां देवानां प्रादुर्भावः । गुरूपदेशादादेशाद्वा प्रजापतेर्वाऽनुग्रहात् अग्निरुपगम्य इति ज्ञानं लब्धवानृषिः स्वेप्सितसिद्धये ॥

तृतीयामृचमाह—

अ॒भि त्वा॑ देव सवित॒रीशा॑नं॒ वार्या॑णाम् । सदा॑वन् भा॒गमी॑महे ॥३॥

अ॒भि त्वा॒ दे॒व॒ स॒वि॒तः॒ ईशा॑नम् वार्या॑णाम् सदा॑ अ॒व॒न् भा॒ग॒म् ई॒म॒हे॒ ॥

अथाग्नेः प्रसादात् सवितारं स्तोतव्यं तृचेनोपतिष्ठते । हे सदा अवन् सर्वदा रक्षितः (अवतेः शतृ) सवितः देव, वार्याणां वरणीयानां वराणां ईशानं ईश्वरं त्वा त्वां प्रति भागं अंशं अस्मदुचितं अस्मद्योग्यं वा दिव्यमंशमित्यर्थः, अभि ईमहे सर्वतः याचामहे ॥

'देवभक्तं दधानाः' 'व्यशेम देवहितं यदायुः' इत्येवंजातीयका दिव्यभागप्रार्थना चिरन्तनी वैदिकीति बोध्यम् । स च भागः न केवलं आयुरारोग्यैश्वर्यादिरूपः । यद्यप्यायुरादीनि दातुं प्रभवत्येव, तथाऽपि स दिव्यो भागो वस्तुतः देवहस्तगतः भवति ।

तस्मिन् अनधिकारिभिरपक्वैर्वा प्रेप्सिते, स निन्दायाः निरोधस्य वा आस्पदं भवति, अन्यथा स स्तुत्यः काम्यः, न कुतोऽपि तं द्वेषः स्प्रष्टुं प्रभवति इत्युत्तरयर्चा विवृदं भवति ॥

चतुर्थीमृचमाह—

यश्चिद्धि त इत्था भगः शशमानः पुरा निदः । अद्वेषो हस्तयोर्दधे ॥४॥

यः चित् हि ते इत्था भगः शशमानः पुरा निदः अद्वेषः हस्तयोः दधे ॥

चित् हि शब्दौ पादपूरणौ । हे सवितः, **यः भगः** भजनीयः भागः, **अद्वेषः** अविद्यमानो द्वेषो यस्मिन् सः, तथाभूतः **निदः** निन्दायाः **पुरा** पूर्वं (उत ब्रुवन्तु नो निद इत्यत्र व्याख्यातम्) **इत्था** विसंवादवर्जितं (सत्यनामैतत्) **शशमानः** शस्यमानः, स्तूयमानः (कर्मणि कर्तृप्रत्ययः) **ते** तव **हस्तयोः** करयोः **दधे** निहितः, तं 'भागमीमहे' इति पूर्वयर्चा सम्बन्धः, यच्छब्दश्रुतेस्तच्छब्दाध्याहारः । प्रागेव भागो वर्णितः । अयं भावः— अयुक्तैरपरिपक्वैरर्थ्यमानो लभ्यमानो वा स दिव्यो भागः असूयुभिः अन्यशुभद्वेषिभिः मानुषैरमानुषैर्वा दूषयितुं शक्यः, तथाविधाया निन्दायाः प्राक् 'निदः पुरा' तादृशीं निन्दाभुवमतीत्य वर्तमानः अत एव द्वेषातीतः विसंवादवर्जं स्तूयमानः सवितुर्हस्तयोर्निहितः । तं भागं प्रार्थयामहे इति ॥

पञ्चमीमृचमाह—

भगभक्तस्य ते वयमुदशेम तवावसा । मूर्धानं राय आरभे ॥५॥

भगऽभक्तस्य ते वयम् उत् अशेम तव अवसा मूर्धानम् रायः आऽरभे ॥

हे सवितः **ते** त्वदीयाः **वयं** ऋषयः, मादृशा वेति शुनःशेपस्यर्षेरुक्तिः । **तव** त्वत्कर्तृकेन **अवसा** अस्मदीयसंवर्धनेन **उदशेम** ऊर्ध्वं प्राप्नुयाम [अशू व्याप्तौ, व्यत्ययेन शप्] त्वया संवर्धिताः सन्तः ऊर्ध्वं गच्छेम । किमर्थम्? **भगभक्तस्य** भगेन देवेन भगात्मनाऽवस्थितेन त्वया सवित्रा भक्तस्य सेवितस्य **रायः** धनस्य [इदं सावित्रं धनं दिव्यं अवधेयम्] **मूर्धानं** उत्तमं पदं उत्कर्षमित्यर्थः, **आरभे** आरब्धुं उपभोक्तुम् [तुमुनर्थे केन्प्रत्ययः] ॥

इति प्रथमस्य द्वितीये त्रयोदशो वर्गः

अथास्मिन् सूक्ते षष्ठीमृचमाह—

नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः ।
नेमा आपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभ्वम् ॥६॥

नहि ते क्षत्रम् न सहः न मन्युम् वयः चन अमी इति पतयन्तः आपुः
न इमाः आपः अनिऽमिषम् चरन्तीः न ये वातस्य प्रऽमिनन्ति अभ्वम् ॥

इतः परं वारुण्यः आ सूक्तसमाप्तेः । सवितुः सर्वप्रेरकस्य प्रसादाद् वरुणं स्तौति । अनभिगम्यं वरुणस्य बलात्मकं महत्त्वं वर्णयति । हे देव वरुण! **अमी** इतो जगति दृश्यमानाः **पतयन्तः** आकाशे उत्पतन्तः (चुरादिरदन्तः, शतृ) **वयश्चन** पक्षिणोऽपि **ते** तव **क्षत्रं** पराक्रमबलं **नहि आपुः** नैवोपगच्छन्ति । तथा **सहः** सहनबलं न आपुः, **मन्युं** क्रोधवेगं वा न आपुः । **अनिमिषं** सन्ततं **चरन्तीः** गच्छन्त्यः प्रवहन्त्यः **इमाः आपः** नद्यः न आपुरिति सम्बन्धः । **ये** ये च **वातस्य** सदागतेर्वायोः वेगविशेषाः प्रचण्डा भवन्ति, तेऽपि तव **अभ्वं** बलप्रचुरं महत्त्वं (अभ्वं महन्नाम) न **प्रमिनन्ति** न प्रबाधन्ते (मीञ् हिंसायाम्, श्नाविकरणी धातुः) । वेगेन बलेन वा ये प्रथिता लोके तानतिशेते तव प्रबलो महिमा ॥

सप्तमीमृचमाह—

अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ।
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः ॥७॥

अबुध्ने राजा वरुणः वनस्य ऊर्ध्वम् स्तूपम् ददते पूतऽदक्षः नीचीनाः स्थुः
उपरि बुध्नः एषाम् अस्मे इति अन्तः निऽहिताः केतवः स्युरिति स्युः ॥

अबुध्ने अविद्यमानः बुध्नः मूलं यस्य तस्मिन् निरालम्बने आकाशे **राजा** राजमानः प्रभुः **पूतदक्षः** पवित्रधीकौशलबलः **वरुणः** देवः **वनस्य** वननीयस्य सम्भजनीयस्य जीवनतेजसः **स्तूपं** सङ्घातं **ऊर्ध्वं** उपरिदेशे **ददते** धारयते । तथा ऊर्ध्वं स्थितस्य वनस्तूपस्यांशवः **नीचीनाः** अधोमुखाः **स्थुः** तिष्ठन्ति । **एषां**

अंशूनां बुध्नः मूलं, आश्रयः उपरि वर्तते । तस्मादेते केतवः प्रज्ञानरश्मयः ऊर्ध्वमूलाः अधोमुखाः अस्मानभिप्रसरन्तः अस्मे अस्मासु अन्तः अन्तरे निहिताः प्रतिष्ठापिताः स्युः भवन्तीत्यर्थः, भूयासुरित्याशास्ते वा मन्त्रदृक् । ददते– जुहोत्यादिः– छन्दसि भौवादिकः । नीचीनाः– निपूर्वादञ्चतेः क्विन्, ईनादेशः । स्युः– लुङ् अडागमाभावः छन्दसि, लडर्थे । अस्मे– सप्तम्याः शे आदेशः । वनशब्दः धात्वर्थानुसारेण रूढ्या च, वननीये सुखे, वृक्षजलतेजःप्रभृतिषु वर्तमानः प्रकरणानुसारेण व्याख्येयः । स्तूपः सङ्घात इति असंदिग्धम् । सामर्थ्यात् तेजसः सङ्घातो ग्राह्यः । स चोर्ध्वमूलः सर्वं वृत्वा स्वयमूर्ध्वं स्थितेन वरुणेन ऋतज्योतिरात्मना आदित्येन धार्यते । एवंलक्षणो 'वनस्तूपः' चिन्मयो भवति, यस्मात् प्रज्ञामयाः 'केतवः' प्रसरन्ति । तानि जीवनार्थानि तेजांसि, अत एव अधोमुखानि पृथिवीं पार्थिवानस्मांश्चानुलक्ष्यायान्ति । अतश्च अन्तरस्मासु धीयन्ते ॥

अष्टमीमृचमाह—

उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥८॥

उरुम् हि राजा वरुणः चकार सूर्याय पन्थाम् अनुऽएतवे ऊम् इति
अपदे पादा प्रतिऽधातवे अकः उत अपऽवक्ता हृदयऽविधः चित् ॥

यद्यप्येक एव ऋतज्योतिरात्मा सौरः पुरुषो भगवानादित्य इति प्रसिद्धः, तथाऽपि तस्य गुणविशेषाविष्कारकविभवबहुलः सूर्यमित्रवरुणभगादिमूर्तिभेदः कार्यभेदायत्तो ग्राह्यः । एवं वरुणः सूर्यायाध्वानं करोतीत्यादावुपपत्तिर्लक्ष्या । हि प्रसिद्धौ । राजा प्रभुः वरुणः सर्वं वृत्वा स्थितो देवः सूर्याय सर्वप्रेरकाय सवित्रे अन्वेतवै उ अनुक्रमेण गन्तुमेव उरुं विततं पन्थां पन्थानम् (छान्दसम्) चकार करोति (लटो लिट्) । अपदे पदरहिते, दुष्प्रवेशे स्थाने इत्यर्थः पादा पादौ प्रतिधातवे निधातुं अकः करोति मार्गमिति शेषः । (अन्वेतवै, प्रतिधातवे, इत्यत्र तुमुनर्थे तवै तवेन् प्रत्ययौ । अकः– छन्दसि लडर्थे लङ्, अन्यत्सर्वं छान्दसम्) उत अपि च हृदय-

विधश्चित् हृदयं विध्यतीति हृदयवित् तस्यापि अपवक्ता अपवदिता स वरुणः । इदमुक्तं भवति । मनुष्यस्यान्तरात्मनिवासस्थानं हृदयम्, तदपि येन पाप्मना तेजः-प्रतिबन्धकेन तमोबलेन शत्रुणा विद्धं भवति, तस्यापि चिन्मयसूर्यरश्मिप्रसारनिरोधकस्य तेजःशत्रोर्निराकरणं करोति परमपावनः पूतदक्षत्वादिविशिष्टो वरुणः । न केवलं विश्व-प्रेरकस्य सूर्यस्य तामसे मानुपदेशे प्रवेशाय यथाक्रमं गतिं साधयति बृहतो मार्गस्य करणेनेति सङ्क्षेपः ॥

नवमीमृचमाह—

शतं ते राजन् भिषजः सहस्रमुर्वी गंभीरा सुमतिष्टे अस्तु ।
बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥९॥

शतम् ते राजन् भिषजः सहस्रम् उर्वी गभीरा सुऽमतिः ते अस्तु
बाधस्व दूरे निःऽऋतिम् पराचैः कृतम् चित् एनः प्र मुमुग्धि अस्मत् ॥

हे **राजन्** स्वामिन् वरुण भगवन्, **ते** तव **भिषजः** वैद्याः (तैः आर्तानामार्तिनिवारणोपाया वरुणदेववशंवदा लक्षिताः) **शतं** बहवो भवन्ति, **सहस्रं** सन्ति, अत्यन्तं बहव इत्यर्थः । तस्मादस्मद्विषये **ते** तव **सुमतिः** शोभना अनुग्रहबुद्धिः **उर्वी** विस्तीर्णा **गभीरा** गम्भीरा च **अस्तु** भवतु । **निर्ऋतिं** पापदेवतां मृत्यु-देवतां वा **पराचैः** परागमनैः पराङ्मुखां कृत्वेत्यर्थः, **दूरे बाधस्व** दूरीकृत्य अपनय । **कृतं** अस्माभिः कृतं **एनःचित्** पापमपि **अस्मत्** अस्मत्तः **प्रमुमुग्धि** प्रकर्षेण मुक्तं कुरु । मुमुग्धि— मुच्लृ मोक्षणे, बहुलं छन्दसीति श्लुः, हेर्धिः, छान्दसमन्यच्च । निर्ऋतिः समष्टिगता जगद्व्यापारवर्तिनी मृत्युदेवता सर्वपापमूलभूता, एनस्तु बुद्धिपूर्वकं अविदितं वा कृतं सत्यधर्मविरुद्धं कायिकं मानसिकं वाचिकं वा कर्म । उभयापनोदनं वरुणानुग्रहसाध्यम् । स हि सर्वथा पारिशुद्ध्यं विधातुं प्रभुः ॥

दशमीमृचमाह—

अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुहचिद्दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति ॥१०॥

अमी इति ये ऋक्षाः निऽहितासः उच्चा नक्तम् ददृश्रे कुह चित् दिवा ईयुः अदब्धानि वरुणस्य व्रतानि विऽचाकशत् चन्द्रमाः नक्तम् एति ॥

यद्यप्यध्यात्मं देवानां कर्माण्येव ऋषेः प्राधान्येन लक्ष्याणि भवन्ति, तथाऽपि जगद्व्यापारे देवानामधिकारोऽविचार्यः, यमन्तरेण ब्रह्माण्डस्थितेरसम्भवः स्यादिति मन्त्रद्रष्टामाशयः। अस्यामृचि सत्यधर्माध्यक्षो भगवान् वरुणः न केवलं नः पावनत्व-विधाता, किं तु ऋतानुरोधेन विश्वधारकाणि कर्माणि निर्वहतीति स्तौति स्तुत्यं देवमृषिः। **ये अमी** प्रत्यक्षं दृश्यमानाः **ऋक्षाः** नक्षत्राणि **उच्चा निहितासः** उच्चैः निहिताः ऊर्ध्वं स्थापिताः **नक्तं** रात्रौ **ददृश्रे** दृश्यन्ते (दृशेर्लिटि रे आदेशः, कर्मणि, लडर्थे), ते **कुहचित्** कुत्र वा **दिवा** दिनवेलायां **ईयुः** गच्छन्ति (लटो लिट्) **वरुणस्य व्रतानि** कर्माणि **अदब्धानि** अबाधितानि अप्रतिहतान्यव्यभिचारीणीत्यर्थः। अत एव **चन्द्रमाः** चन्द्रः **विचाकाशत्** विशेषेण प्रकाशमानः सन् **नक्तं** रात्रौ **एति** गच्छति प्रयातीत्यर्थः। वरुणस्याध्यक्ष्यात् विश्वस्मिन् जगति दिने सूर्यप्रकाशे नक्षत्राणामदर्शनं, रात्रौ चन्द्रस्य प्रकाशः, उच्चा स्थितिर्नक्षत्राणामित्यादि सम्भवति। अतो नियतिकृतनियमाः सर्वेऽपि वरुणमूर्तेरादित्यस्य ऋतज्योतिषो विलासाः ॥

इति प्रथमस्य द्वितीये चतुर्दशो वर्गः

एकादशीमृचमाह—

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ॥११॥

तत् त्वा यामि ब्रह्मणा वन्दमानः तत् आ शास्ते यजमानः हविःऽभिः अहेळमानः वरुण इह बोधि उरुऽशंस मा नः आयुः प्र मोषीः ॥

हे **उरुशंस** बृहत्स्तोत्र, (उरुः विस्तृतिवाचकः, शंसः स्तोत्रवाची) **वरुण, त्वा** त्वाम् **ब्रह्मणा** मन्त्रेण **वन्दमानः** स्तुवन् **तत्** तच्छब्दवाच्यं परं **यामि** याचे, (यामि याच्ञाकर्मा-स्कन्दस्वामी)। **तत्** तदेव परं पदं **यजमानः** अन्तर्याजी **हविर्भिः** हव्यैरर्पणीयद्रव्यैः, **आशास्ते** प्रार्थयते। **इह** अस्मदीये कर्मणि **अहेळमानः** त्वमस्मासु

अनादरमकुर्वन् [हेड़ अनादरे] आदरं कुर्वन्नित्यर्थः **बोधि** बुध्यस्व अस्मदर्थनामिति शेषः [बुध अवगमने, लोटः सेर्हिः, अन्यदपि छान्दसम्] **नः** अस्माकं **आयुः** जीवितकालपरिमाणं **मा प्रमोषीः** प्रमुषितं मा कृथाः, युक्तस्य आयुषः ह्रासो मा भूदित्यर्थः [मुष स्तेये, लोडर्थे लुङ्] । इदमवधेयम् । प्राणापहार एव आयुषः प्रमोषः पावनं देवार्थं आयुः न मुषितं, किं तु सुरक्षितं पूर्णमेव भवति । अत्र 'तत्' आयुरिति व्याख्यातारः पूर्वे । 'तदिन्नक्तं' इत्यादि वक्ष्यते । तदपेक्षया परं पदमिति उपपन्नतरम् ॥

द्वादशीमृचमाह—

तदिन्नक्तं तद्दिवा मह्यमाहुस्तद्यं केतो हृद आ विचष्टे ।
शुनःशेपो यमह्वद्गृभीतः सो अस्मान् राजा वरुणो मुमोक्तु ॥१२॥

तद् इत् नक्तम् तत् दिवा मह्यम् आहुः तत् अयम् केतः हृदः आ वि चष्टे शुनःशेपः यम् अह्वत् गृभीतः सः अस्मान् राजा वरुणः मुमोक्तु ॥

तदित् तदेव **नक्तम्** रात्रिः **तत् दिवा** दिनमपि भवति, अहोरात्रं सन्ततं तदेव भवतीत्यर्थः । अथवा सन्ततं तदेव **मह्यं आहुः** ऋषयः कथयन्ति, आचार्यो म उपदिष्टवान् । न केवलमन्यैः कथितेन तृप्तोऽस्मि, ममापि साक्षाद् ज्ञानं तद्विषयकं वर्तत इत्याह । **हृदः** हृदयान्निष्पन्नः **अयं** प्रत्यक्षसिद्धस्य इदमा निर्देशः **केतः** प्रज्ञानविशेषः **तत्** तदेव **आविचष्टे** सर्वतो विशेषेण प्रकाशयति । **गृभीतः** गृहीतः बद्धः बन्धनस्थ इति यावत् **शुनःशेपः** आत्मन एव परोक्षरूपेण प्रथमपुरुषेणाभिधानम् **यं अह्वत्** आहूतवान् [ह्वेञो लुङि, च्लेरङादेशः, आकारलोपश्च] **सः** [संहितायां प्रकृत्यान्तःपादमिति प्रकृतिभावः] **राजा वरुणः अस्मान् मुमोक्तु** बन्धात् मुक्तान् करोतु । (बहुलं छन्दसीति विकरणस्य श्लुः) ॥

त्रयोदशीमृचमाह—

शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ।
अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान् ॥१३॥

शुनःशेपः हि अह्वत् गृभीतः त्रिषु आदित्यम् द्रुऽपदेषु बद्धः अव एनम् राजा वरुणः ससृज्यात् विद्वान् अदब्धः वि मुमोक्तु पाशान् ॥

गृभीतः गृहीतः (बन्धनार्थं) **त्रिषु** त्रिसङ्ख्याकेषु त्रिवृत्कृतेषु **द्रुपदेषु** द्रोः वृक्षस्य पदेषु स्थानेषु **बद्धः शुनःशेपः** ऋषिः **आदित्यं** वरुणं **अह्वत्** आहूतवान्, **हि** यस्मादेवं तस्मात् **विद्वान्** विमोचनोपायज्ञः **राजा** स्वामी **अदब्धः** अप्रतिहतशक्तिश्च **वरुणः एनं** शुनःशेपं **अवससृज्यात्** अवसृष्टं विमुक्तं करोतु (सृज विसर्गे, प्रार्थनायां लिङ्, श्लुः, विकरणव्यत्ययः) विसर्जनप्रकारमाह, **पाशान्** बन्धनरज्जुविशेषान् **विमुमोक्तु** विच्छिद्य मुञ्चतु, पाशेषु विच्छिद्य मुक्तेषु पुरुषस्य बद्धस्य विमोक्षणं सम्पद्यते । द्रुपदेषु- द्रुः पृथिवीरुहः तेन पार्थिवः सर्वोऽपि सजीवः पिण्डो लक्ष्यते । स चान्नशब्दवाच्यः, तत्र परिणामवशाद्बहूनि सूक्ष्मसाराणि क्रियासाधनानि ज्ञानोपकरणानि च निष्पद्यन्ते । तेषां तत्त्वानुसारेण त्रिधा चतुर्धा पञ्चधा वा विभागः क्रियते । प्रायशस्त्रिवृत्करणं प्रत्यक्षानुभवमूलके व्यवहारे सिद्धम् । तत्र अन्नप्राणमनःसंज्ञकं वेद्यम् । इमान्येव त्रीणि द्रुपदानि भवन्ति । एषु त्रिषु शरीरे प्राणे मनसि च स्थानेषु स्वरूपभूतः सुखमयरश्मिः गृहीतः बद्धश्च । ततो मुक्तिं याचते वरुणदेवमृषिः । यद्यपि शुनःशेप इति ऋषेर्नाम भवति, तथाऽपि तस्य अर्थो बोध्यः । शुन इति सुखनाम, शेपो रश्मिः । ईदृशं ऋषिनाम सार्थकं अन्यत्र व्याख्यातमवधेयम् ॥

चतुर्दशीमृचमाह—

अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि ॥१४॥

अव ते हेळः वरुण नमोभिः अव यज्ञेभिः ईमहे हविःऽभिः क्षयन् अस्मभ्यम् असुर प्रचेत इति प्रऽचेतः राजन् एनांसि शिश्रथः कृतानि ॥

हे **वरुण** भगवन् **ते** तव **हेळः** अनादरं अस्मान् प्रति उपेक्षामित्यर्थः (हेडृ अनादरे, तस्मादसुन्) क्रोधमिति योग्यार्थं मन्यते सायणः । **नमोभिः** नमस्कारैः **अवेमहे** अवनयामः (ईङ् गतौ विकरणस्य लुक्) । **यज्ञेभिः** यज्ञैः **हविर्भिः** हव्यैः

सोमाभिषवैरन्यैर्हव्यैश्च अवनयामः । क्षयन् अस्मासु निवसन् (क्षि-निवासे, शतृ) हे प्रचेतः प्रकृष्टज्ञान, असुर बलवन् (असवः प्राणाः, मत्वर्थो रः) अस्मभ्यं अस्मदर्थं एनांसि पापानि शिश्रथः श्लथय, शिथिलीकुरु, कानि? कृतानि अस्माभिः चरितानि । शिश्रथः- श्रथ दौर्बल्ये, चुरादिरदन्तः, छान्दसो लुङ्, द्विर्भावः ॥

पञ्चदशीमृचमाह—

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥१५॥

उत् उत्ऽतमम् वरुण पाशम् अस्मत् अव अधमम् वि मध्यमम् श्रथय
अथ वयम् आदित्य व्रते तव अनागसः अदितये स्याम ॥

हे वरुण, उत्तमं उत्कृष्टं, ऊर्ध्वस्थानगतं पाशं बन्धनं अस्मत् अस्मत्तः उत् श्रथाय उत्कृष्य श्लथय । अधमं नीचैः बन्धनं अवश्रथाय अवकृष्य शिथिलीकुरु । तथा मध्यमं मध्यमस्थानगतं बन्धनं च विश्रथाय वियुज्य शिथिलय । अथ अनन्तरं हे आदित्य अदितिपुत्र वयं शुनःशेपाः मनुष्यतां गताः सुखमयज्ञानरश्मयः तव व्रते त्वदीये दिव्ये कर्मणि अनागसः अनपराधाः निष्पापाः सन्तः अदितये अखण्डात्मक्षेत्रभूतायाः देवानां मातुरर्थाय स्याम भवेम ॥

इदं च पाशबन्धविमोचनं उपनिषदुपदिष्ट-सर्वग्रन्थि-विप्रमोक्षेणोद्घाटितरहस्यं स्यात् । ग्रन्थयश्च अविद्याग्रन्थयः स्थूलादिशरीरत्रयवृत्तय इति साधनपराणां वेदान्तिनां अभिमतम् । पाशबन्धत्रयं तान्त्रिकयोगप्रसिद्धब्रह्मविष्णुरुद्रनामाङ्कित-ग्रन्थिबन्धत्रयेण संवदतीत्यसंशयम् । अत्र वस्तुतस्तु मनःप्राणशरीरात्मके त्रिके ऋतस्य ज्योतिषः प्रवेश-प्रतिबन्धकं प्रसारनिरोधकं च भवति बन्धनत्रितयमिदमवगन्तव्यम् । अस्य विप्रमोक्षो वरुणदेवानुग्रहसाध्यो भवति ॥*

इति प्रथमस्य द्वितीये पञ्चदशो वर्गः

---

* अस्य सूक्तस्य तात्त्विकोऽर्थः स्पष्टः व्याख्यानतोऽप्यवगन्तव्यः । ऋषेर्नाम्नः अवयवार्थस्य आध्यात्मिकरहस्यार्थद्योतकत्वं बोध्यम् । तथा कण्व-कक्षीवद्-गोतमादीनि नामानि मन्त्रद्रष्टॄणाम् आध्यात्मिकसम्पत्ति-दशात्रयादिबोधकानि भवन्ति । एवं शुनःशेप ऋषिरपि सुखमयज्ञानरश्मिस्वरूप इत्यवयवार्थविशिष्टं नाम

अथ षष्ठेऽनुवाके शुनःशेपस्य यच्चिदित्येकविंशर्चं द्वितीयं सूक्तं गायत्रीच्छन्दस्कं वारुणम् ॥

तत्र प्रथमामृचमाह—

यच्चि॒द्धि ते॒ विशो॑ यथा॒ प्र दे॑व वरुण व्र॒तम् । मि॒नी॒मसि॒ द्यवि॑द्यवि ॥१॥

यत् । चि॒त् । हि । ते॒ । विशः॑ । य॒था॒ । प्र । दे॒व॒ । व॒रु॒ण॒ । व्र॒तम् । मि॒नी॒मसि॑ । द्यवि॑ऽद्यवि ॥

बिभर्ति शुनःशब्दः सुखवाची, शेपो रश्मिः । तेनेदं सूक्तार्थरहस्यं भवति । अदितिरखण्डसत्त्वमयी चितिः भवति । तस्याः सर्वं जगत् जातम्, जाताश्च जगदधीश्वराः देवाः । तत्सुखरश्मिरेव मानुषोऽपि जीवः । स पाञ्चभौतिकं पिण्डं प्रविष्टस्तत्र त्रिषु प्रधानेषु स्थानेषु अन्नप्राणमनोमयाधारेषु गृहीतो बद्धस्तत्रैव जीवन् बहुदैवताप्रसादपूर्वकं वरुणानुग्रहाद्बन्धविमोक्षं लभते । 'तदयं केतो हृद आ विचष्टे' इति मन्त्रपादः सर्वं सूक्तार्थं विभासयेद्विचारधौतचित्तानाम् । सर्वाश्च ऋचः अध्यात्मपरतां बोधयन्तीत्यसंशयम् ॥

अत्र पूर्वे व्याख्यातारः शौनःशेपमाख्यानमुदाहृत्य शुनःशेपमारणकथोपन्यासेन गम्भीरं सूक्तार्थमावृण्वन्ति । इतरस्थलेष्वपि मन्त्रार्थविवरणाय प्रवृत्तानि मन्त्रस्योपयोगं व्याचक्षाणानि वा ब्राह्मणानि आच्छादनान्येव संवृत्तानि । ऐतरेयब्राह्मणमेव शुनःशेपकथां प्रथममाचष्टे (ऐ. ब्रा. ३३. अ) । तामेवोपचितां पुराणग्रन्थाः कथयन्ति । व्याख्यातारः ब्राह्मणस्थस्य आख्यानस्य वेदसूक्तं बीजम्, पुराणकथानां ब्राह्मणं मूलमिति च न मन्यन्ते । अत्र ब्राह्मणवचनाधारेण सूक्तार्थं निश्चिन्वन्ति । अन्यत्र पुराणकथाभिश्च मन्त्रार्थं ब्रुवते । यथा वा वामनावतारपुराणकथया 'इदं विष्णुर्विचक्रमे' इत्यस्य विवृतिमाचक्षते, न तु वामनावतारकथामूलं अयं मन्त्र इति, तथा बहूनि सूक्तानि पुराणकथायाथार्थ्यसमर्थनायैवोदाहृत्य व्याख्यातानि । आस्तामेतत् । अन्यस्तु प्रश्नो भवति । अस्य सूक्तस्य तात्त्विकोऽर्थः उक्तप्रकार एव भवतु । ब्राह्मणोक्तादाख्यानादिदमभ्युपगम्यं, यत् नरवधाचार आसीत्पुरा यज्ञेष्वार्याणामिति चेन्नेति ब्रूमः । कथम्? ब्राह्मणवाक्यमेव प्रमाणम् । आख्याने शुनःशेपस्येदं वाक्यं भवति– 'अथ ह शुनःशेप ईक्षांचक्रे अमानुषमिव मा विशसिष्यन्ति हन्ताहं देवता उपधावामि' इति । अत्र सायणभाष्यव्याख्या नरपशुवधनिषेधश्रुतिपूर्विका अवधातव्या । 'अन्यत्र पर्यग्निकृतं पुरुषं आरण्यांश्च उत्सृजति अहिंसाया इति श्रुतेः पर्यग्निकरणादूर्ध्वं मनुष्यं परित्यजन्ति । एते तु माममानुषमिव मनुष्यव्यतिरिक्तं अजादिपशुमिव विशसिष्यन्ति मारयिष्यन्ति' पर्यग्निकरणं नाम दर्भरूपेण उल्मुकेन त्रिः प्रदक्षिणीकरणम् । तत्परं पुरुष उत्सृज्यते । नासीन्नरपशुवध इत्यसंशयम् ॥

तर्हि किमाधारोऽयमाचारः किमर्थः पुरुषमेधः? अध्वर्युशाखात्मको वेद एवाधारः । तैत्तिरीयसंहितायां पुरुषमेधस्य पृथङ्मन्त्रभागो नास्ति, तैत्तिरीयब्राह्मणं तु वर्तते (अष्टकं ३, प्र. ४) । शुक्लयजुर्वेदे तु सन्ति मन्त्राः । तत्र द्वावध्यायौ पुरुषमेधसम्बद्धौ (अ. ३०-३१) । पुरुषमेधस्य प्रयोजनं तत्त्वं च वेदवाक्येभ्य एव स्पष्टमवगते भवतः । भाष्यकृतो महीधरस्य पङ्क्तीः प्रकृतोपयोगिनीरुदाहरामः– 'ब्राह्मण-राजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति । सर्वभूतान्यतिक्रम्य स्थानं अतिष्ठा' इति । तत्र द्वयोः आद्येऽध्याये 'देव सवितः प्रसुव' (वा. सं. ९-१) इति यजुर्मन्त्रं, तिस्रः ऋचः, 'तत्सवितुर्वरेण्यं' इति प्रसिद्धां सावित्रीं, 'विश्वानि देव सवितः' (ऋ०– मं. ५, सू. ८२, ऋ. ७.) 'विभक्तारं हवामहे' (ऋ०– १. २२. ५.) इत्येताः पठित्वा पुरुषमेधकाः पशवः आऽध्यायपरिसमाप्तेः आम्नाताः । एते च, अष्टचत्वारिंशत्सङ्ख्याकाः पुरुषाः ब्राह्मणाद्याः

हे देव, वरुण, विशो यथा मनुष्या इव, जनसामान्यमिव यच्चित् यदपि किञ्चित् ते तव व्रतम् कर्म ऋतपथप्रवृत्तं दिव्यधर्मानुरुद्धं त्वदीयं कर्मेत्यर्थः, द्यविद्यवि अहरहः प्रमिनीमसि प्रमादेन हिंस्मः, उल्लङ्घनमेव हिंसा, उल्लङ्घितं भवत्यस्माभिः (मीञ् हिंसायां, आ मसो मसिः छन्दसि) तदपि क्षन्तव्यमिति शेषः। सा च विवक्षा उत्तरयर्चा स्पष्टा भवति ॥

द्वितीयामृचमाह—

मा नो॑ व॒धाय॑ ह॒त्नवे॑ जिहीळा॒नस्य॑ रीरधः। मा हृ॑णा॒नस्य॑ म॒न्यवे॑ ॥२॥

मा नः॒ व॒धाय॑ ह॒त्नवे॑ जि॒ही॒ळा॒नस्य॑ री॒र॒धः॒ मा हृ॒णा॒नस्य॑ म॒न्यवे॑ ॥

जिहीळानस्य अनादरं कुर्वतः (कृतवत इति सायणीयम्) हत्नवे हन्तुः षष्ठ्यर्थे चतुर्थी, तव कर्तरि षष्ठी, वधाय हिंसायै नः अस्मान् मा रीरधः न साधय। हृणानस्य क्रुध्यतस्तव मन्यवे कोपाय 'न मा रीरधः' इति सम्बन्धः। पूर्वोक्तरीत्या यैः दैव्यव्रतोल्लङ्घनं क्रियते तेष्वनादरं कुरुते वरुणः। स वारुणोऽनादरः तेषां विनष्टये भवति। तादृशानादरस्य विषयभूतान् मा नः कार्षीरिति याचते। सोऽ

जन्मना जीविकया अन्यथा वा जातिविभागास्पदभूताः यथाविधि यूपेषु नियुक्ताः भवन्ति। अथ किं कुर्याद् यजमानः? महीधर आह— 'सर्वेषां नियोगानन्तरं तान्नियुक्तान् पुरुषान् 'सहस्रशीर्षा पुरुषः' (प्रसिद्धं पुरुषसूक्तम्) इति षोडशर्चेनानुवाकेन दक्षिणत उपविष्टः होतृवदभिष्टौति......तत आलम्भनक्रमेण यथादैवतं प्रोक्षणादि। ब्राह्मणादीनां पर्यग्निकरणानन्तरं 'इदं ब्रह्मणे, इदं क्षत्राय' इत्येवं सर्वेषां यथास्वस्वदेवतोद्देशेन त्यागः। ततः सर्वान् ब्राह्मणादीन् यूपेभ्यो विमुच्योत्सृजति'। अयमाशयः। नानावर्गीयपुरुषात्मना अवस्थितः पुरुष एकोऽवयवी, तस्य अवयवभूतेभ्यः दैवतेभ्य एवेमे सर्वे विविधाः पुरुषा इति ज्ञानेन कर्मणा च अवधार्य, 'पुरुषमेधानन्तरं अरण्यं गत्वा संन्यसेत्' इत्याहुः ॥

अत्र द्वितीयोऽध्यायः पुरुषसूक्तात्मको भवति। स एव प्रधानः पुरुषमेधमन्त्रः, येन पुरुषः स्तूयते। अत्र उव्वटभाष्यं अवश्यं निरीक्षणीयम्। ''परमात्मविज्ञानानन्दादिगुणात्मनि प्रभूतः पुरुषमेधो यज्ञः प्रजापतिः लोककालाग्न्यादिवपुः पुरुषोत्पत्ति-स्थिति-संहृतीनां हेतुः स्वर्गापवर्गैश्वर्यमोक्षदो ज्ञानकर्मसमुच्चयकारणं शरीरं 'यज्ञो वा अस्यात्मा भवति' इति श्रुतेः। सहस्रशीर्षा पुरुषः इत्यनुवाकेन षोडशर्चेनानुष्टुभेन त्रिष्टुबन्त्येन 'ब्रह्मणे ब्राह्मणं' इत्यादि-अवयवभूत-पुरुषद्वारेण अवयवी पुरुषः स्तूयते'' इति। नासीत्कदाऽपि वैदिकेषु यज्ञेषु नरपशुवध इति वक्तव्यमवश्यमभवत्। पुरुषमेधे नियोज्यानां नानाजातीयानां नानावर्गीयाणां च नामानि तेषां दैवतानि च यजुर्वेदे द्रष्टव्यानि। विस्तरो मा भूदिति विरम्यते। सैषा पामरकथा, यद्वेदेषु देवार्थं मनुष्यहत्या विहितेति। दिव्यचक्षुषोऽध्यात्मसम्पन्ना ऋषयः पूर्वे, स्थूलदृशो बहिर्यागपरा वाऽस्माकमार्याः पुरा देवार्थं नरवधशूरा आसन्नित्यतथ्यप्रतापानुकीर्तनं मा भूदित्येष विषयः संक्षिप्तः ॥

नादरः क्रोधे पर्यवसन्नो भवति । तस्मात् क्रुध्यतस्तव क्रोधस्य पात्रं मा भूमेति प्रार्थयते । जिहीळानस्य— हेड़ अनादरे, लिटः कानच्, द्विर्भावः, एकारस्य ईकारादिश्छान्दसः । हत्नवे— कृ-हनिभ्यां क्त्नुः, कृत्नुमित्यत्र गतम् । रीरधः— राध साध संसिद्धौ, लुङ्, माङ्योगात् अडभावः । हृणानस्य— हृणिः क्रोधकर्मा, शानच् ॥

तृतीयामृचमाह—

वि मृ॑ळी॒काय॑ ते॒ मनो॑ र॒थीरश्वं॒ न सन्दि॑तम् । गी॒र्भिर्व॑रुण सीमहि ॥३॥

वि मृ॒ळी॒काय॑ ते॒ मन॑ः र॒थीः अश्व॑म् न सम्ऽदि॑तम् गी॒ःऽभिः व॒रु॒ण॒ सी॒म॒हि॒ ॥

हे **वरुण, मृळीकाय** सुखनाय अपराधक्षमात्मकसुखहेतव इत्यर्थः, मृड-धातोः ईकक् । **ते** तव **मनः** मानसं **गीर्भिः** स्तुतिभिरस्मदीयाभिः **विसीमहि** विशेषेण बध्नीमः, षिञ् बन्धने, ईकारश्छान्दसः, आत्मनेपदव्यत्ययश्च । तत्र दृष्टान्तं आह— **रथीः** रथस्वामी, मत्वर्थीयः ईकारः । **संदितं** सन्नद्धं **अश्वं न** तुरगमिव । (सम्पूर्वकः दो अवखण्डने, उपसर्गवशात् सम्यग्बन्धनार्थो धातुः) । यथा सारथिः सन्नद्धमश्वं रथे युक्तं करोति, तथा वयं स्तुतिभिः तव चित्तं बध्नीमः इति भावः । भक्तिपाशबद्धो भगवान् प्रसीदतीत्याशयश्चिरन्तनोऽत्र लक्षणीयः ॥

चतुर्थीमृचमाह—

परा॒ हि मे॒ विम॑न्यवः॒ पत॑न्ति॒ वस्य॑इष्टये । वयो॒ न व॑स॒तीरुप॑ ॥४॥

परा॑ हि मे॒ वि॒ऽम॑न्यवः पत॑न्ति वस्यः॑ऽइष्टये वय॑ः न व॒स॒तीः उप॑ ॥

हे वरुणेति सम्बोधनं मन्यन्ते पूर्वे, आत्मगतं वेदमुक्तं स्यात् । **मे** मम **वि-मन्यवः** विविधानि मननानि, सर्वाश्च मतिवृत्तय इत्यर्थः, **परा पतन्ति** अतिदूरमूर्ध्वं प्रसरन्ति **हि** पादपूरणः । किमर्थम्? **वस्यइष्टये** वसुनो धनस्य प्राप्तये (वसुमतः प्राप्तये वसुशब्दाद्विन्मतुपो लुकि टि-लोपे ईयसुनो यकारलोपश्छान्दसः) धनं च दिव्यं उत्तमं बोध्यम् । तत्र दृष्टान्तमाह— **वयः** पक्षिणः **वसतीः उप न** स्वावासस्थानानि

प्रति यथा पतन्ति तथा मम मतिवृत्तयः दूरमुत्पतन्ति दिव्यवसुभूतं वारुणं धाम प्राप्तुमिति भावः। मन्यवः पक्षिण इवोत्पतन्तीति न केवलमलङ्कारार्थेयमुपमा। धीवृत्तीनां खेचरत्वं योगचक्षुर्गम्यमित्यत्र योगिनोऽधुनातनाश्च साक्षिणो भवन्ति ॥

पञ्चमीमृचमाह—

कदा क्षत्रश्रियं नरमा वरुणं करामहे। मृळीकायोरुचक्षसम् ॥५॥

कदा क्षत्रऽश्रियम् नरम् आ वरुणम् करामहे मृळीकाय उरुऽचक्षसम् ॥

मृळीकाय अपराधक्षमासम्पादनेन सुखाय कदा कस्यां वेलायां क्षत्रश्रियं क्षत्रं बलं श्रयति क्षत्रश्रीः तं नरं नेतारं देवं उरुचक्षसं विततं यथा तथा द्रष्टारं वरुणं आ करामहे अस्मदभिमुखं करिष्यामः? करोतेः व्यत्ययेन शप् ॥

इति प्रथमस्य द्वितीये षोडशो वर्गः

षष्ठीमृचमाह—

तदित्समानमाशाते वेनन्ता न प्र युच्छतः। धृतव्रताय दाशुषे ॥६॥

तत् इत् समानम् आशाते इति वेनन्ता न प्र युच्छतः धृतऽव्रताय दाशुषे ॥

धृतव्रताय धृतं धिया देहेन प्राणेन च धारितं व्रतं दैव्यं कर्म येन तस्मै, दाशुषे स्वीयं देवेभ्यो यथाभागं दत्तवते यजमानाय तस्य प्राप्तव्यलाभायेत्यर्थः, वेनन्ता वेनन्तौ कामयमानौ (वेनतिः कान्तिकर्मा) मित्रावरुणौ तत् इत् तच्छब्दवाच्यं ऋतं ज्योतिरेव समानं साधारणम् तुल्यं वा आशाते व्याप्नुतः (अशू व्याप्तौ, लिट्, छान्दसः प्रयोगः)। न प्रयुच्छतः न माद्यतः प्रमादं न कुरुतः (युच्छ प्रमादे)। उक्तलक्षणं यजमानं धृतव्रतं न कदाऽप्युपेक्षेते, प्रत्युत तदर्थं तत्पदलब्धिं कामयेते, तच्च व्याप्नुत इत्युक्तं भवति। तच्छब्दवाच्यमुत्तमं सत्यं ज्योतिः तत्र तत्र क्वचित् स्पष्टं क्वचिदस्पष्टं वा संहितायामस्यां द्रष्टव्यम्। अन्यत्रेदं भूमिकायां मन्त्रोदाहरणपूर्वकं विचारितमस्माभिः ॥*

---

*मित्रावरुणयोः साहचर्यप्रसिद्धेः 'वेनन्ता' इति प्रयोगः सुबोधः। मेधातिथेर्मन्त्रेष्वपि क्वचित्कण्ठतो ओकावपि एकतरस्य श्रवणेन उभौ गृहीतौ। अत्रैके नव्याः प्राहुः। अप्रकृतस्य मित्रस्यास्यामृचि प्रतिपादनात्

सप्तमीमृचमाह—

वेदा यो वीनां पदमन्तरिक्षेण पतताम् । वेद नावः समुद्रियः ॥७॥

वेद यः वीनाम् पदम् अन्तरिक्षेण पतताम् वेद नावः समुद्रियः ॥

अन्तरिक्षेण आकाशमार्गेण **पतताम्** गच्छताम् **वीनाम्** पक्षिणाम् **पदम्** स्थानं **यः** वरुणः **वेद** जानाति, **समुद्रियः** समुद्रेऽवस्थितः यो वरुणः **नावः** प्लवस्य पदं **वेद** जानाति, स निषसादेति पुरस्तात् सम्बन्धः, अथवा 'स बन्धवान् मोचयत्वस्मानिति शेषः' इति पूर्वव्याख्या वा भवतु । यद्यदस्माकमविदितं दुर्बोधं वा भवति तत्सर्वं वरुणस्य सुविदितमिति विवक्षा । तर्हि वीनां पदं नीडं विदितमेव सामान्यजनस्यापि, तथा नावो गन्तव्यं स्थानं नाविकस्य चेति स्थिते, कथं दुर्विदं ईदृशं पदं वरुणो वेदेत्याह? मतिवृत्तयः प्राक् पक्षिभिरुपमिताः स्मार्याः । विषयानुपादानेन विषयिणः कथनमिह ज्ञेयम् । विभिः मतयो लक्षिताः । सर्वासां वृत्तीनां गन्तव्यं परमं पदं दुर्विदं नः, वरुणस्य तु विदितम् । एवं नावा जीवयात्रा लक्ष्यते । अपरिमिताखण्डसत्त्वः समुद्रः, तत्रस्थो भगवान् वरुणः सर्वं जानाति ॥

अष्टमीमृचमाह—

वेद मासो धृतव्रतो द्वादश प्रजावतः । वेदा य उपजायते ॥८॥

वेद मासः धृतऽव्रतः द्वादश प्रजाऽवतः वेद यः उपऽजायते ॥

यश्च देवः **धृतव्रतः** स्वकर्मणो भर्ता स्वीयकर्मसु ध्रुव इत्यर्थः, **प्रजावतः** उत्पत्तिमतः, जनी प्रादुर्भावे, प्रपूर्वकः, **द्वादश** द्वौ च दश चेति द्वन्द्वसमासः, **मासः** मासान् , मासशब्दस्य मासादेशः, **वेद** जानाति । यश्च **यः** मासः **उपजायते** अधिको जायते तमपि **वेद** जानाति । वाक्यशेषः पूर्ववत् । अधिमासः रविमासात् अधिको मासश्चान्द्र एकः, 'यस्त्रयोदशोऽधिकमास उपजायते संवत्सरसमीपे' इति

पूर्वोत्तरयोः पञ्चमषष्ठयोर्मध्ये सम्बन्धविच्छेदकः प्रक्षिप्तोऽयं मन्त्र इति । तच्छब्दार्थेऽस्माभिः प्रदर्शिते परिगृहीते न स्यात् कोऽप्यसम्बन्धः । पूर्वे व्याख्यातारस्तु तच्छब्दस्य हविरित्यर्थमाहुः । एवं हि सिध्यति सम्बन्धविघातः । वरुणस्य महिमा वर्ण्यते सूक्तेऽस्मिन् पुरस्तादपीति ज्ञेयम् ॥

ज्ञापणीयम् । अत्र सौरमानापेक्षया चान्द्रस्याधिमासस्य प्रसक्तिर्दैवज्ञसमालोचनास्पदं भवति । अत्रापि न केवलं कालज्ञानं वरुणस्योक्तम्, तत्तु मानुषस्यापि दैवविदो भवति । किं तर्हि विवक्षितम्? कालनियमानुसारेण बहिरन्तर्वा अध्यण्डमधिपिण्डं च सर्वो व्यवहारः सम्पद्यते, तादृशकालगतिरहस्यं सर्वनियामकस्य धृतव्रतस्य वरुणस्येति मन्त्रसारांशः ।

नवमीमृचमाह—

वेद॒ वात॑स्य वर्त॒निमु॒रोॠ॒ष्वस्य॑ बृह॒तः । वेदा॒ ये अ॒ध्यास॑ते ॥९॥

वेद॑ वात॑स्य व॒र्त॒निम् उ॒रोः ॠ॒ष्वस्य॑ बृ॒ह॒तः वेद॑ ये अ॒धि॒ऽआस॑ते ॥

उरोः विस्तृतस्य ऋष्वस्य उत्कृष्टस्य बृहतः महतः, प्रभावतः प्रमाणतोऽपि विपुलस्येत्यर्थः, वातस्य वायोः जगत्प्राणस्य वर्तनिम् मार्गं यो वेद जानाति, ये देवाः अधि उपरि आसते आसीना भवन्ति, तानपि यो वरुणो वेद जानाति, वाक्यशेषः पूर्ववत् । ऋष्वस्य दर्शनीयस्येति सायणः, महत इति स्कन्दस्वामी । ऋष्वऽवीरः, ऋष्वऽओजाः इत्यादौ महत्त्वार्थ उपपन्नतरो लक्ष्यते । तस्माद् ऋष्व उत्कृष्ट इति व्याख्यातम् ॥

दशमीमृचमाह—

नि ष॑साद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या॒३॑स्वा । साम्रा॑ज्याय सु॒क्रतु॑ः ॥१०॥

नि स॒सा॒द॒ धृ॒तऽव्र॑तः वरु॑णः प॒स्त्या॑सु आ साम्ऽरा॑ज्याय सु॒ऽक्रतु॑ः ॥

धृतव्रतः दैव्यस्य कर्मणो धर्ता वरुणः देवः पस्त्यासु दैवीषु वासभूमिषु (पस्त्यमिति गृहनाम, प्रजास्विति सा०) आ सर्वतः व्याप्य निषसाद निषण्णो भवति । किमर्थम्? साम्राज्याय सम्राजो भावः तस्मै सम्राट्त्वनिर्वाहायेत्यर्थः । कीदृशः? सुक्रतुः सुकर्मा सुप्रज्ञो वा, विश्वसाम्राज्यनिर्वाहाय साधु प्राज्ञं दृढमिच्छाबलमपेक्षितम् । तदिदं विशेषणम् ॥

इति प्रथमस्य द्वितीये अष्टादशो वर्गः

अथैकादशीमृचमाह—

अतो॒ विश्वा॒न्यद्भु॑ता चिकि॒त्वाँ अ॒भि प॑श्यति । कृता॑नि॒ या च॒ कर्त्वा॑ ॥११॥

अतः॑ विश्वा॑नि अद्भु॑ता चि॒कि॒त्वान् अ॒भि प॒श्य॒ति॒ कृ॒ता॑नि॑ या च॒ कर्त्वा॑ ॥

अतः यत्र ऊर्ध्वं 'पस्त्यासु' निषण्णः साम्राज्याय, तत इत्यर्थः । **चिकित्वान्** ज्ञानवान् वरुणः कर्ता अध्याहार्यः । **विश्वानि** सर्वाणि **अद्भुतानि** आश्चर्याणि **अभि पश्यति** सर्वतोऽवलोकयति । **यानि कृतानि** भूतानि अद्भुतानि **या च** यानि च **कर्त्वा** कर्तव्यानि भावीनि अद्भुतानि तानि सर्वाण्यभिपश्यति । कर्त्वा– करोतेः कृत्यार्थे त्वन् । चिकित्वान्– कित ज्ञाने, लिटः क्वसुन् । सायणस्त्वेवं मन्यते– 'अतः' वरुणात् 'चिकित्वान्' प्रज्ञावान् अद्भुतान्यभिपश्यतीति । अत्र चिकित्वान् कोऽपि प्राज्ञः किल ॥

द्वादशीमृचमाह–

स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑रादि॒त्यः सु॒पथा॑ करत् । प्र ण॒ आयूं॑षि तारिषत् ॥१२॥

सः न॒ः वि॒श्वाहा॑ सु॒ऽक्रतु॑ः आ॒दि॒त्यः सु॒ऽपथा॑ क॒र॒त् प्र न॒ः आयूं॑षि ता॒रि॒ष॒त् ॥

सः प्रस्तुतः **सुक्रतुः** शोभनकर्मा **आदित्यः** अदितिपुत्रः वरुणः **विश्वाहा** सर्वेष्वहःस्वित्यस्मिन्नर्थे निपातः, सर्वदा **नः** अस्मान् **सुपथा** शोभनेन मार्गेण सहितान् **करत्** करोतु, करोतेर्लेट्, सहितानित्यध्याहारः सायणीये । 'नः विश्वाहा सुपथा करत्' अस्माकं सर्वाण्यहानि सुपथानि शोभनमार्गनीतानि करोतु, न केवलं साकल्येन सर्वदा, अपि तु एकैकं दिनं सुनीतं करोत्वित्यर्थ उपपद्यते । **नः** अस्माकं **आयूंषि प्रतारिषत्** वर्धयतु, आयुष्मन्तः स्याम वरुणप्रसादात् । प्रपूर्वकस्तरतिर्वर्धनार्थः ॥

त्रयोदशीमृचमाह—

बिभ्र॑द्द्रा॒पिं हि॑र॒ण्ययं॒ वरु॑णो वस्त नि॒र्णिज॑म् । परि॒ स्पशो॒ नि षे॑दिरे ॥१३॥

बिभ्र॑त् द्रा॒पिम् हि॒र॒ण्यय॑म् वरु॑णः व॒स्त॒ नि॒ःऽनिज॑म् परि॑ स्पश॑ः नि से॒दि॒रे॒ ॥

हिरण्ययं हिरण्मयं (मयटो मलोपो निपातितः छन्दसि) **द्रापिं** कवचं **बिभ्रत्** धारयमाणः **वरुणः** आदित्यः **निर्णिजं** स्वच्छं स्वरूपं **वस्त** आच्छादयति (वस आच्छादने, लङ्, अडभावः लडर्थे) । **स्पशः** हिरण्यकवचस्पर्शिनः रश्मयः

ज्ञापकाः **परि** परितो हिरण्यकवचभूतं वरुणं, **निषेदिरे** निषण्णाः (स्पश स्पर्शने, क्विप्) सम्यग्विविच्य दर्शनं स्पष्टीकरणं च धात्वर्थः । अत एव गूढदर्शिनश्चाराः स्पशा इति व्यवहारो लोके । वरुणस्य राज्ञश्चारास्तं परितो निषण्णाः मनुष्याणामपराधान् राज्ञे कथयन्ति दण्डायेति स्थूला कथा । वस्तुतस्तु, हिरण्मयपात्राच्छादितं सत्यं ज्ञापयितुं निषण्णाः प्रणिधय इव ज्ञापका रश्मयो दिव्या विभूतयो वा । अवधातव्यमिह हिरण्मयेनेति ईशावास्यश्रुतिवचनम् ॥

चतुर्दशीमृचमाह—

न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम् । न देवमभिमातयः ॥१४॥

न यम् दिप्सन्ति दिप्सवः न द्रुह्वाणः जनानाम् न देवम् अभिऽमातयः

दिप्सवः जिघांसवः असुराः (दम्भेर्हननार्थाद्वञ्चनार्थाद् दमनार्थाद्वा सन्नन्ताद् उप्रत्ययः) **यं देवं न दिप्सन्ति** न जिघांसन्ति आसुरभुवोऽतीत्य वरुणस्य वर्तनात् तं हिंसितुं वञ्चयितुं वा न प्रभवन्ति देववैरिणोऽसुराः । अत एव तादृशेच्छावैफल्य-ज्ञानाद् उत्कृष्टस्य वरुणस्य दुर्गमत्वज्ञानाद्वा नेच्छन्ति हन्तुम् । न केवलं एत एव, **जनानां** मनुष्याणां **द्रुह्वाणः** द्रोग्धारोऽपि (द्रुह जिघांसायाम्, क्वनिप्) मनुष्य-द्रोहिणो राक्षसाः भूतविशेषा वा **न यं देवं** दिप्सन्ति, **अभिमातयः** पाप्मानः अपि 'पाप्मा वा अभिमातिः' इति श्रुतिषु प्रसिद्धिः । तं वरुणं न स्पृशन्ति ॥

पञ्चदशीमृचमाह—

उत यो मानुषेष्वा यशश्चक्रे असाम्या । अस्माकमुदरेष्वा ॥१५॥

उत यः मानुषेषु आ यशः चक्रे असामि आ अस्माकम् उदरेषु आ ॥

उत अपि च **यः** वरुणः **मानुषेषु** सर्वस्मिन् मानुष्यके **यशः** प्रतिष्ठां माहात्म्यं गौरवं वा **आ** सर्वतः **चक्रे** कृतवान्, स तथा कुर्वन् **आ** सर्वतः **असामि** अन्यूनं सम्पूर्णं चक्रे । अपि च न केवलं सामान्यतः मनुष्यजातौ प्रतिष्ठां कृतवान्,

किं तु अस्माकं विशेषतो ऋषीणां उदरेषु शरीरेषु, शरीरैकदेशेन शरीरं लक्ष्यते, आ 'चक्रे' इति सम्बन्धः । यो वरुणो मनुष्यजातिप्रतिष्ठां कृतवान्, स भगवान् ऋषीणां देहेष्वपि 'यशः' प्रतिष्ठां माहात्म्यं वा चक्रे इति अर्थोत्कर्षमावहति मन्त्रः । अस्यापकर्षाय भवति कर्मठव्याख्या मन्त्रस्य-उदरपदश्रवणाधारा । यशः अन्नं उदरपूरणाय वरुणेनानुगृहीतं सायणाभिमतम् । तर्हि, गम्भीरार्थानां ऋचां मध्ये नीचा मन्त्रद्रष्टुः उदरम्भरितासन्तृप्तिप्रख्यापना वैरस्याय कल्पते । ऋषीणामेतेषां नासील्लज्जा तज्ज्ञानं वेत्ति विमर्शवीक्षितैः क्षिप्तश्चेदधिक्षेपो, कथं सोऽन्याय्यः स्यात्? कर्मपरव्याख्यानस्यापि नावश्यकमीदृशं जघन्यं तात्पर्यग्रहणमिति स्थालीपुलाकन्यायेनेदं दर्शितम् ॥

इति प्रथमस्य द्वितीये अष्टादशो वर्गः

अथ षोडशीमृचमाह–

परा मे यन्ति धीतयो गावो न गव्यूतीरनु । इच्छन्तीरुरुचक्षसम् ॥१६॥

परा मे यन्ति धीतयः गावः न गव्यूतीः अनु इच्छन्तीः उरुऽचक्षसम् ॥

उरुचक्षसम् विशालचक्षुषं, विश्वस्य द्रष्टारमित्यर्थः, वरुणं **इच्छन्तीः** प्राप्तुं कामयमानाः **मे** मम **धीतयः** धीवृत्तयः **परा यन्ति** अविदूरं गच्छन्ति, 'परा हि मे विमन्यवः' इति मन्त्रेऽप्येवमेवोक्तं अवधेयम् । अत्र दृष्टान्तः । **गावो न** यथा गावः **गव्यूतीः अनु** गोष्ठानि अनुलक्ष्य गच्छन्ति तद्वत् । गव्यूतीः– गावोऽत्र यूयन्त इति गव्यूतयस्ताः । छन्दसि अवादेशः । 'उस्रा इव स्वसराणि' (मं. १, सू. ३, ऋ. ८.) इत्यत्र व्याख्या समालोच्या ॥

सप्तदशीमृचमाह–

सं नु वोचावहै पुनर्यतो मे मध्वाभृतम् । होतेव क्षदसे प्रियम् ॥१७॥

सम् नु वोचावहै पुनः यतः मे मधु आऽभृतम् । होताऽइव क्षदसे प्रियम् ॥

यतः यस्मात् **मे** मया विभक्तिव्यत्ययः **मधु** सोमात्मकं **आभृतं** आहृतम् सम्पादितमित्यर्थः, त्वं च **प्रियं** तन्मधु **होतेव** यजमानार्थं होमकर्तेव **क्षदसे**

अभ्यासि यथाभागम् (क्षदतिः शकलीकरणार्थः, विभजने वर्तते, अत एव यथाभाग-स्वीकरणं विवक्षितमित्याचक्ष्महे)। तस्मात् नु क्षिप्रं पुनः संवोचावहै परस्पर-संवादसम्पन्नौ वार्तां करवावहै । अहं मधु आहृतवान्, त्वं च तृप्तः स्वीकृतवान्, इतः परं उभयोरावयोरन्तरङ्गव्यवहारश्चलत्विति शुनःशेपस्यर्षेर्वरुणदेवताविषयकविस्रम्भवाक्यं इदम्। वोचावहै– लोडर्थे छन्दसि लुङ्, स्थानिवद्भावात् ऐत्वम्। अन्यत्सर्वं छान्दसम् ॥

अष्टादशीमृचमाह—

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि । एता जुषत मे गिरः ॥१८॥

दर्शम् नु विश्वऽदर्शतम् दर्शम् रथम् अधि क्षमि एताः जुषत मे गिरः ॥

विश्वदर्शतं विश्वं दर्शतं दर्शनीयं यस्य तं वरुणं (दृशेरतच् प्रत्ययः) दर्शं नु दृष्टवानहं खलु (दृशेर्लुङ् अडभावः) अधि उपरि क्षमि क्षमायां (आतोऽभावः छान्दसः) भूम्यामुपरि अन्तरिक्षे रथं वरुणस्य यानं दर्शं दृष्टवानस्मि । एताः मे गिरः मदीयाः स्तुतीः जुषत सेवितवान् प्रीत्या स्वीकृतवांश्च स वरुणः (जुषतेः लङ् अडभावः) । भूमावेव मम सरथस्य वरुणस्याकाशे दर्शनं, तेन मदीयगिरां सेवनं च सम्पन्नं, इति भावः ॥

एकोनविंशीमृचमाह–

इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युरा चके ॥१९॥

इमम् मे वरुण श्रुधि हवम् अद्य च मृळय त्वाम् अवस्युः आ चके ॥

हे वरुण मे मम इमं हवं आह्वानं श्रुधि शृणु [सांहितिको दीर्घ ईकारः विकरणलोपः छान्दसः]। किं च, अद्य च अधुना अस्मिन् दिने वा मृळय मृडय सुखय । अवस्युः रक्षणेच्छुः (अवस्-शब्दात् क्यच् छन्दसि उप्रत्ययः) त्वाम् देवं आ आभिमुख्येन त्वामुद्दिश्येत्यर्थः चके आक्रन्दितवानस्मि 'कै गै शब्दे', लिटि छान्दसं रूपम् ॥

विंशीमृचमाह–

त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि । स यामनि प्रति श्रुधि ॥२०॥

त्वम् विश्वस्य मेधिर दिवः च ग्मः च राजसि सः यामनि प्रति श्रुधि ॥

हे **मेधिर,** मेधाविन् वरुण, **त्वं विश्वस्य** सर्वस्य जगतः **दिवश्च** द्युलोकस्य च **ग्मश्च** भूलोकस्य च अर्थे (ग्मा पृथिवीनाम, आतो लोपः छन्दसि) **राजसि** दीप्यसे, सर्वस्यापि राजा भवसीत्यर्थः । **सः** तादृशस्त्वं **यामनि** प्रयाणे त्वदीये **प्रतिश्रुधि** प्रतिश्रवणं कुरु, मदीयाह्वानस्य प्रत्युत्तरं देहि, सर्वतो यासि त्वं राजा विश्वस्य । यामनि–या प्रापणे, अस्मात् आतो मनिन् ॥

एकविंशीमृचमाह–

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत । अवाधमानि जीवसे ॥२१॥

उत् उत्ऽतमम् मुमुग्धि नः वि पाशम् मध्यमम् चृत अव अधमानि जीवसे ॥

ऋचोऽस्यास्तात्पर्यं 'उदुत्तमं वरुण पाशम्' इति मन्त्रस्य (१-२४-१५) व्याख्यायां द्रष्टव्यम् । हे वरुण, **नः** अस्माकं उत्तमं ऊर्ध्वगतं द्युलोकवैभवप्रवेशप्रतिबन्धकं शिरोग्रन्थिरूपं **पाशं उन्मुमुग्धि** उत्कृष्य मोचय (मुच्लृ मोक्षणे विकरणस्य श्लुः, छान्दसः) । **मध्यमं** मध्यमलोकीयविशुद्धमहाप्राणशक्तिप्रसारनिरोधकमध्यग्रन्थिरूपं पाशं **विचृत** विश्लिष्य नाशय (चृती हिंसाग्रन्थनयोः तुदादिः) । **अधमानि** अधोगतानि पार्थिवबन्धनानि ऊर्ध्ववैभवव्यापारप्रतिरोधकमूलग्रन्थिरूपान् पाशानित्यर्थः तान् **अवचृत** अवकृष्य नाशय । किमर्थम्? **जीवसे** जीवनाय अस्मदीयाय दिव्याय इत्यर्थः । जीवसे– तुमर्थे असे प्रत्ययः छन्दसि ॥

इति प्रथमस्य द्वितीये एकोनविंशो वर्गः

अथ षष्ठेऽनुवाके तृतीयं दशर्चं आग्नेयं गायत्रं सूक्तम् । ऋषिः पूर्ववत् ॥

तत्र प्रथमामृचमाह–

वसिष्वा हि मियेध्य वस्त्राण्यूर्जां पते । सेमं नो अध्वरं यज ॥१॥

वसिष्व हि मियेध्य वस्त्राणि ऊर्जाम् पते सः इमम् नः अध्वरम् यज ॥

मियेध्य मेध्य, मेधस्य यज्ञस्य अर्ह (मे इति स्थाने मिये इति छान्दसः इयादेशः) **ऊर्जां पते** बलानां पालक, ऊर्ज बलप्राणनयोः, भ्रजादिभ्यः धातुभ्यः ताच्छील्ये क्विप्, ऊर्क इति प्रथमैकवचनम्, **वस्त्राणि** परिधानानि **वसिष्व** आच्छादय वस आच्छादने, लोटि इडागमः छान्दसः, तेजांसि हि अग्नेः परिधानानि तस्मात् प्रज्वलितो भवेत्यर्थः । **हि** पादपूरणः । 'सः नः इमं अध्वरं यज' पादोऽयं व्याख्यातः (१-१४-११ ॥

द्वितीयामृचमाह—

नि नो होता वरेण्यः सदा यविष्ठ मन्मभिः । अग्ने दिवित्मता वचः ॥२॥

नि नः होता वरेण्यः सदा यविष्ठ मन्मऽभिः अग्ने दिवित्मता वचः ॥

सदा सर्वदा **यविष्ठ** युवतम, यजमानार्थं साधयितव्ये पटुत्वं, यजमाने लब्धजन्मनोऽनुदिनप्रवर्धनेन पुष्टिं चाग्नेर्द्योतयितुमिदं विशेषणम् । **वरेण्यः** वरणीयः श्रेष्ठः **मन्मभिः** प्राज्ञैर्मननैर्युक्तस्त्वं **अग्ने नः** अस्मदीयो **होता** देवानामाह्वाता भूत्वा, **नि** निषीदेति योग्यक्रियया सम्बध्यते । तथा अग्नेर्निषदनायोत्तेजनमाह, **दिवित्मता** दीप्तिमता, दिविशब्दान्मतुपि तकारोपजनः छान्दसः, **वचः** वचसा, तृतीयैकवचनस्य लुक्, उज्ज्वलितेन अस्मदीयस्तोत्रेण प्रीणितो निषीदेति भावः ॥

तृतीयामृचमाह—

आ हि ष्मा सूनवे पितापिर्यजत्यापये । सखा सख्ये वरेण्यः ॥३॥

आ हि स्म सूनवे पिता आपिः यजति आपये सखा सख्ये वरेण्यः ॥

स्म पादपूरणः, **आ** यजतिक्रियया सम्बध्यते, **हि** प्रसिद्धौ । **सूनवे** पुत्राय **पिता** जनकः **आयजति** यजनं सर्वथा करोति, पुत्रे यजमाने सति, तस्य पिता स्वयमेव यजमान इव वात्सल्याद् यज्ञं निर्वहति । तथा **आपये** बान्धवाय **आपिः**

बन्धुः, सख्ये सुहृदे वरेण्यः वरणीयः सखा च आयजति । एवं ममापि त्वं पितेव आपिरिव सखेव भवसि भगवन्, तस्माद्यजेति प्रार्थना ॥

चतुर्थीमृचमाह–

आ नो॑ ब॒र्ही रि॒शाद॑सो॒ वरु॑णो मि॒त्रो अ॑र्य॒मा । सीद॑न्तु॒ मनु॑षो यथा ॥४॥

आ न॒ः ब॒र्हिः रि॒शाद॑सः वरु॑णः मि॒त्रः अ॒र्य॒मा सीद॑न्तु मनु॑षः य॒था॒ ॥

हे अग्ने, त्वया आहूताः प्रेरिताः देवाः रिशादसः हिंसकान् अदन्तः मित्रः वरुणः अर्यमा च नः अस्मदीयं बर्हिः अन्तर्वेद्यामास्तीर्णं आसनं आसीदन्तु आगत्य निषीदन्तु । क इव? मनुषो यथा मनुष्या इव, प्रत्यक्षीभूताः व्यवहार-योग्या भवन्तु देवा इति भावः । मनुषः मनुष्या इति स्कन्दस्वामी । प्रजापतेरिति सायणः । देवाः प्रजापतेर्यज्ञमागताः किल! मनुः प्रजापतिः तस्य यज्ञं यथा देवा आगताः तथा इममपीति तात्पर्यमाह सायणः ॥

पञ्चमीमृचमाह–

पूर्व्य॑ होतर॒स्य नो॒ मन्द॑स्व स॒ख्यस्य॑ च । इ॒मा उ॒षु श्रु॑धी॒ गिर॑ः ॥५॥

पू॒र्व्य॒ हो॒त॒ः अ॒स्य न॒ः मन्द॑स्व स॒ख्यस्य॑ च॒ इ॒माः ऊ॒म् इति॑ सु श्रु॒धि॒ गिर॑ः ॥

पूर्व्य सर्वेषां नः पूर्वमुत्पन्न, होतः हे अग्ने, नः अस्मदीयस्य अस्य यजनस्य सख्यस्य च त्वत्प्रसादसाधकसखिभावस्य च सिद्धये मन्दस्व मोदस्व । उ अपि च इमाः अस्मदीयाः गिरः स्तुतीः सु सुतरां सावधानमित्यर्थः, श्रुधि शृणु ॥

इति प्रथमस्य द्वितीये विंशो वर्गः

षष्ठीमृचमाह–

यच्चि॒द्धि शश्व॑ता॒ तना॑ दे॒वंदे॑वं॒ यजा॑महे । त्वे इद्धू॑यते ह॒विः ॥६॥

यत् चि॒त् हि शश्व॑ता तना॑ दे॒वम्ऽदे॑वम् यजा॑महे त्वे इति॑ इत् हू॒य॒ते॒ ह॒विः ॥

हे अग्ने, यच्चिद्धि यद्यपि शश्वता शाश्वतेन निरन्तरमित्यर्थः, तना ततेन विस्तृतेन यजनेन देवंदेवं बहुदेववृन्दं, वीप्सायां द्विर्भावः यजामहे, तथाऽपि हविः अस्मदर्पणद्रव्यं त्वे इत् त्वय्येव हूयते । इन्द्रादीनां देवानां यजनं अग्निमुखेन हि सिध्यति । तना– तनु विस्तारे, क्विप् चेति क्विप् तन इति प्रथमैकवचनम् । त्वे– युष्मच्छब्दात् सप्तम्येकवचनस्य शे आदेशः ॥

सप्तमीमृचमाह–

प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः । प्रियाः स्वग्नयो वयम् ॥७॥

प्रियः नः अस्तु विश्पतिः होता मन्द्रः वरेण्यः प्रियाः सुऽअग्नयः वयम् ॥

विश्पतिः विशां प्रजानां पतिः पालकः होता आह्वाता मन्द्रः प्रहृष्टः वरेण्यः वरणीयः अग्निः नः अस्माकं प्रियः अस्तु सर्वदा प्रियो भूयादित्यर्थः । वयं वयमपि तस्य प्रियाः स्वग्नयः शोभनोऽग्निर्येषां ते, शोभनाग्निसम्पन्नाः भूयास्म ॥

अष्टमीमृचमाह—

स्वग्नयो हि वार्यं देवासो दधिरे च नः । स्वग्नयो मनामहे ॥८॥

सुऽअग्नयः हि वार्यम् देवासः दधिरे च नः सुऽअग्नयः मनामहे ॥

स्वग्नयः शोभनाग्निसमेताः सन्तः देवासः च देवाश्च नः अस्मदर्थे वार्यं वरणीयं (दिव्यं भोग्यं रतिरूपं वस्तु) हि यस्मात् दधिरे धृतवन्तः, तस्मात् वयमपि स्वग्नयः शोभनाग्नियुक्ताः मनामहे स्तुमः, मन्यतिरर्चतिकर्मा व्यत्ययेन शप् । अस्मदर्थे वरणीयदिव्यभोग्यबलादेर्धारकाणां अग्नियुक्तानां देवानां अनुग्रहादेव वयमग्नियुक्ताः स्तोतुं ध्यातुं ज्ञातुं वा प्रभवाम इति भावः ॥

नवमीमृचमाह—

अथा न उभयेषाममृत मर्त्यानाम् । मिथः सन्तु प्रशस्तयः ॥९॥

अथ नः उभयेषाम् अमृत मर्त्यानाम् मिथः सन्तु प्रऽशस्तयः ॥

अथ प्रागुक्तप्रकारेण अस्माकं शोभनाग्नियोगपूर्वकध्यानसम्पत्प्राप्तेः परं, हे **अमृत** अमर्त्य अग्ने, **मर्त्यानां नः** अस्माकं **उभयेषां** अमृतस्य तव मर्त्यानां अस्माकं च **मिथः** परस्परं **प्रशस्तयः** प्रशंसाः विस्रम्भेण रहस्यवाचः **सन्तु** भवन्तु । ऋषीणां देवताभिः प्रत्यक्षव्यवहारः साधारणो बोध्यः ॥

दशमीमृचमाह—

विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः । चनो धाः सहसो यहो ॥१०॥

विश्वेभिः अग्ने अग्निऽभिः इमम् यज्ञम् इदम् वचः चनः धाः सहसः यहो इति ॥

सहसः बलस्य **यहो** पुत्र (यहुः अपत्यनामसु पठितम्), **अग्ने** भगवन् **विश्वेभिः** विश्वैः (बहुलं छन्दसि) **अग्निभिः** अन्यैस्त्वद्विशेषभूतैः सहितः स्थाना-भेदात् एकोऽपि बहुधा भवत्यग्निः, **इमं यज्ञं** अस्मदीयं **इदं वचः** अस्मदीयं स्तोत्रं च स्वीकृत्य **चनः** सुखं (चनः अन्नं, भोग्यं च भवति, आनन्दे च धात्वर्थः, चनस्यतम् इत्यत्र व्याख्यातम् १-३-१) **धाः** धेहि (लोडर्थे लुङ् अडभावः) । अस्मदीयं यजनं स्तवनं चाङ्गीकृत्य स्वयं धारयमाणः सुखमस्मासु स्थापय ॥

इति प्रथमस्य द्वितीये एकविंशो वर्गः

षष्ठेऽनुवाके चतुर्थं अश्वं न त्वेति त्रयोदशर्चं सूक्तम् । ऋष्यादयः पूर्ववत् । त्रयोदश्यास्त्रिष्टुप् छन्दः विश्वेदेवा देवताः ॥

तत्र प्रथमामृचमाह—

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः । सम्राजन्तमध्वराणाम् ॥१॥

अश्वम् न त्वा वारऽवन्तम् वन्दध्यै अग्निम् नमःऽभिः सम्ऽराजन्तम् अध्वराणाम् ॥

वारवन्तं वालवन्तम् (कपिलादित्वात् रत्वम्) **अश्वं न** अश्वमिव **त्वा** त्वाम् **अग्निं नमोभिः** नमस्कारैः (सर्वैः करणैर्नमनं प्रपत्तिशब्दवाच्यं नमस्करणं बहुवचन-

चतुर्थीमृचमाह—

इमम् षु त्वमस्माकं सनिं गायत्रं नव्यांसम् । अग्ने देवेषु प्र वोचः ॥४॥
इमम् ऊम् इति सु त्वम् अस्माकम् सनिम् गायत्रम् नव्यांसम्
अग्ने देवेषु प्र वोचः ॥

हे अग्ने भगवन्, इमं अद्य प्रवृत्तं सनिं ऊषु दानं अपि अस्माभिरनुष्ठीयमानं त्यागरूपं यजनमित्यर्थः (ऊषु, संहितायां दीर्घत्वं, सुञ इति षत्वम्) नव्यांसं नवीयांसं, नवतरम् (नवशब्दात् ईयसुन्, ईकारलोपः छान्दसः) गायत्रं गायत्रीच्छन्दोबद्धं स्तुतिरूपं वचनमपि देवेषु देवानां पुरः त्वम् प्र वोचः प्रब्रूहि । वोचः– छन्दसि लोडर्थे प्रार्थनायां लुङ् ॥

पञ्चमीमृचमाह—

आ नो भज परमेष्वा वाजेषु मध्यमेषु । शिक्षा वस्वो अन्तमस्य ॥५॥
आ नः भज परमेषु आ वाजेषु मध्यमेषु शिक्ष वस्वः अन्तमस्य ॥

हे अग्ने, परमेषु ऊर्ध्वं द्युलोकवर्तिषु उत्तमेषु वाजेषु तेजोबलादिसमृद्धिषु नः अस्मान् आ भज सर्वतः प्रापयेति सायणीयम् । भागहरान् कुर्वित्यर्थः, भज भालर्थो लक्षणीयः । तथा मध्यमेषु अन्तरिक्षलोकवर्तिषु, अन्तमस्य अन्ततमस्य अत्यन्तं सन्निकृष्टस्य भूलोकस्य सम्बन्धिषु वाजेषु आ भजेति सम्बन्धः । किं च वस्वः वसूनि त्रिलोकवर्तीनि शिक्ष शिक्षय ज्ञापय नः । शिक्ष विद्योपादाने अन्तर्भावित-ण्यर्थः ॥

इति प्रथमस्य द्वितीये द्वाविंशो वर्गः

षष्ठीमृचमाह—

विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ । सद्यो दाशुषे क्षरसि ॥६॥
विऽभक्ता असि चित्रभानो इति चित्रऽभानो सिन्धोः ऊर्मौ उपाके आ सद्यः दाशुषे क्षरसि ॥

हे **चित्रभानो** विचित्रकिरणसम्पन्न अग्ने, त्वं **विभक्ता असि** विभज्य दाता भवसि। किं च **दाशुषे** दत्तवते **सद्यः** अविलम्बेन **क्षरसि** प्रवहसि स्वयम्। तत्र दृष्टान्तः। आकारः उपमार्थः। यथा **सिन्धोः** नद्याः **उपाके** समीपे **ऊर्मौ** तरङ्गे तदुपलक्षितप्रवाहे सति, कुल्यादिखातानां पूरणाय सिन्धुः स्वयं क्षरति, तथा यजमानमुद्दिश्य यथाभागं पूरणाय त्वं प्रवहसि ॥

सप्तमीमृचमाह–

यमग्ने पृत्सु मर्त्यमवा वाजेषु यञ्जुनाः। स यन्ता शश्वतीरिषः ॥७॥

यम् अग्ने पृत्ऽसु मर्त्यम् अवाः वाजेषु यम् जुनाः सः यन्ता शश्वतीः इषः ॥

हे **अग्ने, यं मर्त्यं पृत्सु** पृतनासु तदुपलक्षिते युद्धे (पृतनाशब्दस्य पृत् आदेशः) **अवाः** अवसि (आव इत्यस्य अकार-आकारविपर्ययः, लेटि अडागमो वा), **यं वाजेषु** समृद्धेषु तेजोबलादिषु सम्पादयितव्येषु **जुनाः** जुनासि, प्रेरयसि (जू इति सौत्रो धातुः, क्र्यादिः, लङः सिप्, अडभावः) **सः शश्वतीः** बहुला अपि **इषः** एषणाः प्रेरणावेगबलानीत्यर्थः, **यन्ता** नियन्तुं प्रभवति। यस्यापन्निवारणे रक्षणं, सम्पत्प्राप्तौ प्रेरणं च अग्निभगवत्प्रसादाद्भवतः, स उभयत्र स्वेषणवशंवदो न भवति, प्रेरणसहस्रवेगनीतो न भवति, किं तु युद्धेषु भगवद्रक्षितः, समृद्धिषु भगवत्प्रेरितः स्ववशो भवतीति भावः ॥

अष्टमीमृचमाह–

नकिरस्य सहन्त्य पर्येता कयस्य चित्। वाजो अस्ति श्रवाय्यः ॥८॥

नकिः अस्य सहन्त्य परिऽएता कयस्य चित् वाजः अस्ति श्रवाय्यः ॥

हे **सहन्त्य** साहयितः शत्रूणामभिभवितः अग्ने, **अस्य** त्वामाश्रितस्य **कयस्य चित्** कस्यापि पुरुषस्य **पर्येता** आक्रमिता **नकिः** न कोऽपि वर्तते। कुतः? अस्य **श्रवाय्यः** श्रवणीयः विश्रुतः **वाजः** सर्वसमृद्धिः **अस्ति**, तस्मात् न कुतोऽप्याक्रमः सम्भवति। कयस्य– यकारोपजनश्छान्दसः ॥

नवमीमृचमाह—

स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता । विप्रेभिरस्तु सनिता ॥९॥

सः वाजम् विश्वऽचर्षणिः अर्वत्ऽभिः अस्तु तरुता विप्रेभिः अस्तु सनिता ॥

विश्वचर्षणिः सर्वस्य द्रष्टा सः अग्निः अर्वद्भिः अश्वैः (प्राणबलवेगसङ्केतः अश्वोऽवधेयः) वाजं समृद्धिं तरुता तारयिता प्रापयिता अस्तु भवतु । विप्रेभिः मेधाविभिः सुप्रकाशप्रज्ञासम्पन्नैः द्वारा सनिता सम्भक्ता अस्तु भवतु । अग्निर्भगवान् यजमानेऽवस्थितः जेतृभिर्दिव्यप्राणबलावेशैस्तेजोबलादिसमृद्धिं जित्वा उज्ज्वलज्ञानैः साधनैः भोक्ता भवतु उक्तलक्षणस्य वाजस्येति सूक्ष्मं तात्पर्यम् ॥

दशमीमृचमाह—

जराबोध तद्विविड्ढि विशेविशे यज्ञियाय । स्तोमं रुद्राय दृशीकम् ॥१०॥

जराऽबोध तत् विविड्ढि विशेऽविशे यज्ञियाय स्तोमम् रुद्राय दृशीकम् ॥

जराबोध जरया स्तुत्या बोधः अन्तःप्रकाशरूपं ज्ञानं यस्य स जराबोधः, अग्निः, तस्य आत्मन एव वा सम्बोधनम् । तत् तत् स्थानं विविड्ढि प्रविश (विश-धातोः लोटो हि, छन्दसि शपः श्लु) तच्छब्दश्रवणात् उत्तरत्र यच्छब्दोऽध्याहार्यः । यत्र विशेविशे सर्वस्य जनस्य क्षेमाय, तादर्थ्ये चतुर्थी, यज्ञियाय यज्ञे भवाय, यज्ञार्हाय वा रुद्राय उग्रबलाय अग्नये दृशीकम् दर्शनीयं (अनि-दृशिभ्यां कीकन्) प्रत्यक्षं स्तोमम् स्तोत्रं करोति यजमान इति शेषः । जराबोधः अग्निरिति गृहीत्वा तदनुसारेण व्याचक्षते, अन्तरात्मनः सम्बोधनमुपपद्यतेतराम् । अत्र तच्छब्दार्थोऽवधेयः । यस्मिन् अन्तः दिव्ये यजनालये यजमानः अपरोक्षं अग्नये स्तोमं करोति न तु परोक्षेण यथा बहिर्मुखः साधारणो जनः करोति, येन च सर्वस्यापि मानुष्यकस्य आग्नेयोऽनुग्रहः क्षेमप्रदः सम्पाद्यते, तत् स्थानं देवयजनालयात्मकं प्रविशेत्युक्तम् ॥

इति प्रथमस्य द्वितीये त्रयोविंशो वर्गः

एकादशीमृचमाह—

स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः । धिये वाजाय हिन्वतु ॥११॥

सः नः महान् अनिऽमानः धूमऽकेतुः पुरुऽचन्द्रः धिये वाजाय हिन्वतु ॥

सः अग्निः नः अस्मान् धिये धारणात्मकोत्कृष्टप्रज्ञायै वाजाय बलसमृद्धये च हिन्वतु प्रेरयतु । कीदृशः? महान् प्रभावाधिकः अनिमानः अविद्यमानः निमानः परिच्छेदः यस्य सः, परिच्छेदवर्जितः धूमकेतुः धूमः केतुः ध्वजो यस्य स इति भौतिकोऽग्निः बाह्यः । धूमः ऊर्जवेगेन सहसा वा यः बाष्पगतिप्रायः कम्पो जायते स केतुः ज्ञानं यस्य सः, उक्तलक्षणेन बलवेगभावस्पन्देन अग्निर्ज्ञायत इत्यर्थः । पुरुश्चन्द्रः बहुदीप्तिः, पुरुश्चासौ चन्द्रश्च, पुरुर्बहुनामा चन्द्रः आह्लादो दीप्तिर्वा, पुरुचन्द्र इत्यत्र मध्ये, 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सुट्, सुटः श्चुत्वेन शकारः ॥

द्वादशीमृचमाह–

स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः । उक्थैरग्निर्बृहद्भानुः ॥१२॥

सः रेवान्ऽइव विश्पतिः दैव्यः केतुः शृणोतु नः उक्थैः अग्निः बृहत्ऽभानुः ॥

सः अग्निः नः अस्मान् विज्ञापकान् शृणोतु आकर्णयतु । क इव? रेवानिव आढ्य इव, धनिकः स्वामी यथा अर्थिनां विज्ञप्तीः श्रुत्वा तदीप्सितं करोति तथेत्यर्थः (रेवान् रयेः छन्दसि सम्प्रसारणं, मतुपो वत्वं च) । कीदृशोऽग्निः? विश्पतिः प्रजानां पालकः दैव्यः केतुः देवसम्बन्धी ज्ञापकः दूतो देवानामित्यर्थः । देवानां अयं दैव्यः, केतुः, कित ज्ञाने इत्यस्य रूपम् । उक्थैः स्तोत्रैरस्मदीयैः बृहद्भानुः प्रौढरश्मिः बृहन्तो भानवो यस्य सः । स्तोत्रैरग्नेर्भानवोऽस्मासु प्रौढा भवन्तीति बोध्यम् ॥

त्रयोदशीमृचमाह–

नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः ।

यजाम देवान्यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः ॥१३॥

नमः महत्ऽभ्यः नमः अर्भकेभ्यः नमः युवऽभ्यः नमः आशिनेभ्यः यजाम देवान् यदि शक्नवाम मा ज्यायसः शंसम् आ वृक्षि देवाः ॥

महद्भ्यः अनुभावाधिकेभ्यः **नमः अर्भकेभ्यः** वयसा बालेभ्यः **नमः । युवभ्यः** तरुणेभ्यः **नमः । आशिनेभ्यः** वयसा व्याप्तेभ्यः वृद्धेभ्यः (अशू व्याप्तौ, औणादिक इनच् प्रत्ययः) **नमः ।** उक्तेभ्यश्चतुर्विधेभ्यो जीवेभ्यो देवेभ्यो वा नमोऽस्तु, सर्वेष्वपि परस्य देवस्य वर्तनात् विश्वदेवनमस्कारोऽनुष्ठितः । **यदि शक्रवाम** वयं शक्ताश्चेत् **देवान्** सर्वान् **यजाम** पूजाम, यज्ञेनाराधयाम । भोः **देवाः! ज्यायसः** सर्वेभ्योऽपि ज्यायसः, ज्येष्ठस्य परस्य देवस्य **आ शंसम्** सर्वतः प्रसृतं शंसनं, स्तोत्रं, **मा वृक्षि** विच्छिन्नं मा कार्षं अहम् । वृक्षि-ए व्रश्चू छेदने, व्यत्ययेनात्मनेपदोत्तमपुरुषैकवचनम्, माङ्योगे अडभावः । अस्यामृचि नमस्करणं, यजनं, शंसनं, इति त्रिधा आराध्यभेदेन आराधनमुक्तम् । महद्भ्य इत्यादौ मनुष्या एव मता इत्युपपन्नम्, देवानां पृथक्स्मरणात्, मनुष्याणां विविधानां अवयवभूतत्वात् अवयविन एकस्य पुरुषस्य । पुरुषमेधप्रस्तावे प्रागुक्तं सर्वमवधेयम् ॥

इति प्रथमस्य द्वितीये चतुर्विंशो वर्गः

षष्ठेऽनुवाके यत्र ग्रावेति नवर्चं पञ्चमं सूक्तम् । ऋषिः पूर्ववत् । आदितः षट् आनुष्टुभः । शिष्टा गायत्र्यः । आदितश्चतसृणां इन्द्रो देवता । अन्यासां ऋग्व्याख्यायां स्पष्टा भवन्ति ॥

तत्र प्रथमामृचमाह–

यत्र॒ ग्रावा॑ पृ॒थुबु॑ध्न ऊ॒र्ध्वो भव॑ति॒ सोत॑वे　　।
　　उ॒लूख॑लसुताना॒मवे॒द्विन्द्र॑ जल्गुलः ॥१॥

यत्र॑ । ग्रावा॑ । पृ॒थुऽबु॑ध्नः । ऊ॒र्ध्वः । भव॑ति । सोत॑वे । उ॒लूख॑लऽसुतानाम् । अव॑ । इत् । ऊँ॒ इति॑ । इ॒न्द्र॒ । ज॒ल्गु॒लः॒ ॥

अस्मिन् सूक्ते ग्रावोलूखलाधिषवणीयादयः शब्दाः यज्ञसाधनाभिधायकाः प्रयुक्ताः कर्मैकपरतासमयस्य अत्यन्तमुपयुक्ताः स्युरापाततः । परीक्ष्यमाणे सूक्तार्थे बाह्यं याज्ञिकं कर्म निमित्तीकृत्य यज्ञोपकरणात्मकसङ्केतैर्गभीराणि वैदिकानि योगरहस्यानि गोपितानि लक्ष्यन्ते । तत्प्रदर्शनात् प्राक् मन्त्रस्थानां पदानां पूर्वव्याख्यानपर्यालोचनपुरस्सरं अर्थान्

आचक्ष्महे– **यत्र** यस्मिन् कर्मणि (बहिर्यागे अन्तर्यागे वा) **सोतवे** सोतुं अभिषवार्थं **ग्रावा** पाषाणः अभिषवार्थः **पृथुबुध्नः** पृथुः पृथुलो विस्तीर्णः बुध्नो मूलं यस्य सः, **ऊर्ध्वः** ऊर्ध्वस्थानगः 'उन्नत' इति पूर्वे, **भवति** वर्तते, तस्मिन् कर्मणि, हे **इन्द्र, उलूखलसुतानाम्** उलूखलेनाभिषुतानां (द्वितीयार्थे षष्ठी) एकदेशं वा रसम् **अव इत् जल्गुलः** अवेत्युपसर्गः अधःपर्यायः, इत् अवधारणार्थः जल्गुलः पिब । 'अवेत्' स्वदीयत्वेन अवगत्यैव पिबेति सायणीयम् । दिव्य ऊर्ध्वस्त्वं, इन्द्र, अधस्तादिहागत्य भौमोलूखलसुतं सोमं पिबेति वयम् । जल्गुलः– गल अदने, यङ् लुक्, लेट् मध्यमैकवचनम्, उपधायाः उत्वं, अन्यच्च छान्दसम् ॥

द्वितीयामृचमाह–

यत्र द्वाविव जघनाऽधिषवण्या कृता ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥२॥

यत्र द्वौऽइव जघना अधिऽसवन्या कृता उलूखलऽसुतानाम् अव इत् ऊम् इति इन्द्र जल्गुलः ॥

यत्र यस्मिन् कर्मणि **अधिषवण्या** अधिषवण्यौ अधिषूयते सोमो ययोस्तौ, अधिषवणफलके (अधिपूर्वकः षुञ् अभिषवे इति धातुः, ल्युट्, भवे यत् छन्दसि) **द्वाविव जघना** द्वौ जघनप्रदेशाविव **कृता** कृतौ (आकारश्छन्दसि) अधिषवणाय नित्यसम्बद्धयोः फलकयोः द्वित्वं वैशाल्यं च द्योतयितुं जघनदृष्टान्तः । शिष्टं उलूखलादि व्याख्यातम् ॥

तृतीयामृचमाह—

यत्र नार्यपच्यवमुपच्यवं च शिक्षते ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥३॥

यत्र नारी अपऽच्यवम् उपऽच्यवम् च शिक्षते उलूखलऽसुतानाम् अव इत् ऊम् इति इन्द्र जल्गुलः ॥

यत्र यस्मिन् यज्ञे **नारी** नरस्य मनुष्ययजमानस्य पुरुषस्य देवस्य वा पत्नी, शक्तिरित्यर्थः **अपच्यवं** निर्गमनं **उपच्यवं च** उपगमनं, आगमनं च **शिक्षते** अधीते, अभ्यासं करोति, अभ्यासेनाधिगच्छतीत्यर्थः । शिष्टं पूर्ववत् । अपच्यवम्– अपपूर्वकस्य, च्युङ् गतौ इत्यस्य रूपम् । शिक्षते– शिक्ष विद्योपादाने, बाह्ये यज्ञे यजमानपत्नी यज्ञशालाया बहिर्गच्छति, पुनः शालां आगच्छति– इदमेवापच्यवोपच्यवाभ्यां विवक्षितमिति सायणः ॥

चतुर्थीमृचमाह–

यत्र॒ मन्था॑ विब॒ध्नते॑ र॒श्मीन्यमि॑त॒वा इ॑व ।
उ॒लूख॑लसुताना॒मवे॑द्विन्द्र जल्गुलः ॥४॥

यत्र॑ मन्था॑म् वि॒ऽब॒ध्नते॑ र॒श्मीन् यमि॑त॒वैऽइ॑व उ॒लूख॑लऽसुतानाम् अव॑ इत् ऊम् इति॑ इ॒न्द्र॒ ज॒ल्गु॒लः॒ ॥

यत्र यस्मिन् कर्मणि **मन्थां** मन्थानम् (मथिन् शब्दः, द्वितीयायां आत्वं छान्दसम्) । 'आशिरमथनहेतुम्' इति सायणीयम् । **विबध्नते** विबध्नन्ति । तत्र दृष्टान्तः **रश्मीन्** प्रग्रहान् **यमितवै इव** नियन्तुमिव (यम उपरमे, तुमर्थे तवै प्रत्ययः) । अश्वनियमनाय प्रग्रहान् यथा दृढं कुर्वन्ति, तथा बन्धनरज्जुभिः मन्थानं विशेषेण बध्नन्ति । बाह्ये कर्मणि दधिमन्थनदण्डो मन्थाः । ग्रावोलूखलादीनामन्तर्यागार्थविचारे मन्थाश्च विचार्यते सूक्तान्ते ॥

पञ्चमीमृचमाह—

यच्चि॒द्धि त्वं गृ॒हेगृ॑ह॒ उलू॑खलक यु॒ज्यसे॑ ।
इ॒ह द्यु॒मत्त॑मं वद॒ जय॑तामिव दु॒न्दु॒भिः ॥५॥

यत् चि॒त् हि त्वम् गृ॒हेऽगृ॑हे उलू॑खलक यु॒ज्यसे॑ इ॒ह द्यु॒मत्ऽत॑मम् व॒द॒ जय॑ताम्ऽइव दु॒न्दु॒भिः ॥

ऐन्द्रश्चतुर्ऋचो गतः । परिभाषानुसारेण उलूखलस्य प्रतिपादनात् उलूखलदेवत्येयमृक् षष्ठी चेत्याहुः । उलूखलादेः स्वरूपमन्तर्यागे पुरस्ताद्विचार्यते । कर्मपरार्था-

विरोधेनैव पदार्थो मन्त्राणामत्र सूक्ते प्रथमं दीयते। हे उलूखलक, यच्चिद्धि यद्यपि त्वं गृहेगृहे प्रतिगृहं युज्यसे युक्तो भवसि, तथाऽपि, इह अस्मिन् कर्मणि द्युमत्तमं अतिशयेन दीप्तं वद उज्ज्वलं घोषं कुर्वित्यर्थः। तत्र दृष्टान्तः। जयतामिव दुन्दुभिः जयवतां वीराणां जयघोषं यथा दुन्दुभिर्वाद्यविशेषः करोति, तथा त्वं दीप्तिमन्तं ध्वनिं कुरु ॥

इति प्रथमस्य द्वितीये पञ्चविंशो वर्गः

षष्ठीमृचमाह—

उत स्म ते वनस्पते वातो वि वात्यग्रमित् ।
अथो इन्द्राय पातवे सुनु सोममुलूखल ॥६॥

उत स्म ते वनस्पते वातः वि वाति अग्रम् इत् अथो इति इन्द्राय पातवे सुनु सोमम् उलूखल ॥

उत अपि च हे वनस्पते, उलूखल, वनस्पतिर्वृक्षः प्रकृतिः उलूखलस्तद्विकारः कार्ये कारणशब्दः। ते तव अग्रमित् पुरत एव वातः वायुः विवाति स्म विशेषेण प्रसरति खलु। 'त्वरोपेतमुसलप्रहारैर्वायुः प्रसरति खलु' इति सायणव्याख्या। अथो अनन्तरं इन्द्राय इन्द्रार्थं पातवे पातुं तदीयपानार्थमित्यर्थः सोमं सुनु अभिषुतं कुरु ॥

सप्तमीमृचमाह—

आयजी वाजसातमा ता ह्युच्चा विजर्भृतः ।
हरी इवान्धांसि बप्सता ॥७॥

आयजी इत्याऽयजी वाजऽसातमा ता हि उच्चा विऽजर्भृतः हरी इवेति हरीऽइव अन्धांसि बप्सता ॥

अस्यामष्टम्यां वा मुसलशब्दो न पठ्यते। अत्र 'आयजी' इति उत्तरत्र 'वनस्पती' इति च द्विवचनश्रुत्या उलूखलमुसले अत्र प्रतिपादिते इति प्राहुः। तात्पर्यं पुरस्ताद् विचार्यते पदार्थमात्रमत्र ब्रूमः। आयजी सर्वतो यज्ञसाधने (यजेः करणे इ प्रत्ययः

औणादिकः) वाजसातमा वाजं बलसमृद्धिं सनुतः दत्तः इति वाजसौ, अतिशयेन वाजसौ वाजसातमौ, ता हि तौ खलु उच्चा उच्चैः विजर्भृतः विजर्हृतः विहारं पुनः पुनः कुरुतः (विपूर्वको हरतिर्धातुः, यङ् लुक्, अभ्यासः, रुगागमः) तत्र दृष्टान्तः अन्धांसि अन्नानि बप्सता भक्षयन्तौ हरी इव इन्द्राश्वाविव । बप्सता– भस भक्षणे, लटः शतृ, जुहोत्यादिभ्यः श्लुः, नाभ्यस्तादिति नुम् प्रतिषेधः । अत्र आयजी इत्यादि पुल्लिङ्गशब्दौ परिगृहीतौ । एवं 'वनस्पती' इत्युत्तरत्र सङ्गच्छते ॥

अष्टमीमृचमाह–

ता नो॑ अ॒द्य व॑नस्पती ऋ॒ष्वावृ॒ष्वेभिः॑ स्तो॒तृभिः॑ । इन्द्रा॑य॒ मधु॑मत्सु॒तम् ॥८॥

ता न॒ः अ॒द्य व॒न॒स्प॒ती इति॑ ऋ॒ष्वौ ऋ॒ष्वेभिः॑ स्तो॒तृभिः॑ इन्द्रा॑य मधु॑ऽमत् सु॒तम् ॥

अद्य इदानीं हे वनस्पती! ऋष्वौ (महन्नाम) उत्कृष्टौ ता तौ युवां ऋष्वेभिः ऋष्वैः महद्भिः स्तोतृभिः अभिषवकर्तृभिः सह इन्द्राय इन्द्रार्थं मधुमत् माधुर्योपेतं नः अस्मदीयं सोमद्रव्यं सुतम् सुनुतम् (षुञ् अभिषवे, विकरणलोपः छान्दसः) । वनस्पती उलूखलमुसले इति व्याख्यातारः । मुसलशब्दस्याश्रवणात् अभिषवणफलकयोः द्वित्वात् वनस्पतिकार्यत्वाच्च, कथं ताभ्यां न भाव्यम्?

नवमीमृचमाह–

उच्छि॒ष्टं च॒म्वो॑र्भर॒ सोमं॑ प॒वित्र॒ आ सृ॑ज । नि धे॑हि॒ गोरधि॑ त्व॒चि ॥९॥

उत् शि॒ष्टम् च॒म्वो॑ः भ॒र सोम॑म् प॒वित्रे॑ आ सृ॒ज नि धे॒हि॒ गोः अधि॑ त्व॒चि ॥

आत्मन एव सम्बोधनं युक्तम्, न च क्षतिः कर्मपरार्थस्य । चम्वोः चमसयोः पात्रयोः, द्विवचननिर्देशात् अभिषवणफलकयोः शिष्टं अभिषवात्परं अवशिष्टं सोमं उद्भर उद्धर, समाहरेत्यर्थः [हृग्रहोर्भः] समाहृत्य पवित्रे शोधनार्थं दशापवित्रे आसृज आनीय प्रक्षिप । आसृज्य च गोः अधि त्वचि गोः चर्मणि आधारे नि धेहि स्थापय ॥

अथ विचारतः सूक्ततात्पर्यमात्रमत्राचक्ष्महे । सारतो विचारश्च* कृतः, अन्यत्र निरीक्षणीयः । इदानीं वक्ष्यमाणप्रकारस्य सूक्तार्थस्योपपत्तिश्च अत्र ग्राह्या । यत्र ग्रावेत्यादिकासु चतसृषु प्रत्यृचं उत्तरोऽर्धर्चः समानः । तस्य तात्पर्यं चैवं भवति । उलूखलबुन्दलक्षितेऽस्मिन् शरीरे अभिषुतानां सोमानां इन्द्रस्वीकारक्षमतां उक्त्वा तत्पानाय इन्द्रः प्रार्थ्यते । कथमभिषुताः सोमा इति का वा साधनसामग्री, का वा क्रियेत्यादि च पूर्वार्धर्चेषु कीर्त्यते । तत्र प्रथमं ऊर्ध्वस्थितेन ग्राव्णा वज्रेणेन्द्रायुधेन, ज्ञानप्रकाशगर्भितक्रियाशक्तिसम्पन्नेन, विविधावरणानां निवारणेन, मानुषमनःप्राणशरीरनिगूढसम्मदसोमरसस्रुतिनिरोधकजडघनद्रव्यांशानां प्रहर्त्रा, स्वीयप्रहारसाधितनिलीनसोमरसाधारभूत-अन्नमयादिघनांशमार्दवसम्पादकेन, अत एव आनन्दरसनिष्यन्दहेतुना सोमाभिषवो निष्पाद्यत इत्यभिप्रायेण यत्र अन्तर्यागे ग्रावा पृथुबुध्न ऊर्ध्वो भवतीत्युक्तं प्रथमस्यामृचि । अथ चान्तर्यजने चलति, अधिषवणफलकद्वयसङ्केतिता अन्या च सामग्री

---

* सूक्तेऽस्मिन् 'पृथुबुध्न ऊर्ध्वो ग्रावा' 'जघनाविव कृता अधिषवण्या' 'नारी उपच्यवापच्यवौ शिक्षते' 'मन्थां विबध्नते' इत्यादीनां, उलूखल-वनस्पति-द्रोणकलशादीनां च गूढार्थो मन्त्रार्थविवरणेऽस्माभिर्दत्तः । स च न स्वकपोलकल्पितः, किं तु अन्येषां एतादृशसूक्तानां संवादपर्यालोचनया तदर्थानुसन्धानेन शाखान्तरीयसोमाभिषवप्रस्तावपरीक्षणेन शतपथादिब्राह्मणवाक्यानां समालोचनेन च पर्यवसन्न इति बोध्यम् । अत्र ब्राह्मणवाक्यानि मन्त्रभागाश्च केचनात्र निदर्शनायोदाह्रियन्ते । तत्र प्रथमं तावदिदमवधेयम् । ब्राह्मणग्रन्थेषु ब्राह्मणोपनिषत्सु च गूढार्थान् मन्त्रान् परोक्षार्थान् प्राहुः । परोक्षं अप्रत्यक्षं रहस्यमित्यर्थः । अत एव परोक्षेणाचक्षते 'परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः' इत्यादौ प्रत्यक्षनामग्रहणं द्विषन्तीति भाष्यकाराः । तथा च 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपम्' (बृ. उ. ४-२) इति शतपथवाक्यस्य व्याख्यातारः । 'इदं तत् शिरः चमसाकारं हि तत् । कथम्? एषः अर्वाग्बिलः मुखस्य बिलरूपत्वात् शिरसो बुध्नाकारत्वात्...... यथा सोमश्चमसे पूर्णः तथा शिरसि विश्वरूपं नानारूपं निहितम्' इत्यादीनि गूढपदार्थविवरणान्युपदिशन्ति ।

अञ्जःसवाख्ये सोमयागे अस्य सूक्तस्य विनियोगः । अञ्जसा ऋजुना मार्गेण इष्टिपशुसाङ्कर्यमन्तरेण सवः सोमाभिषवः यस्मिन् यागे सोऽञ्जःसव इति सायणीयं ऐतरेयब्राह्मणभाष्यम् । रहस्यप्रचुरस्य कर्मणोऽस्य विवरणमवश्यमवधेयम् । तच्चेह ब्राह्मणाधारेण (ऐ. ब्रा. अ. ३३, खं. ५.) सायणीयभाष्यपङ्क्तीरुपयुज्य संक्षिप्यते । बन्धनत्रयान्मुक्तं देवतानुग्रहसम्पन्नं शुनःशेपं ऋत्विज ऊचुः किल 'त्वमेव नः अस्य अह्नः संस्थां अधिगच्छ' इति (अह्नः अभिषेचनीयाख्यस्य संस्थां समाप्तिं अधिगच्छ प्राप्नुहि इत्यर्थः) । शुनःशेपश्च तेषामर्थे अञ्जःसवमेतं सोमयागं ददर्श । अत्र प्रयोगप्रकारः कथ्यते, सोऽन्तर्यागे समन्वयक्षमो ग्राह्यः । प्रथमं 'यच्चिद्धि' इत्यादिभिश्चतसृभिर्ऋग्भिः (५-८) अभिषवं कृतवान् । 'उत् शिष्टं' इति नवम्या अन्त्यया द्रोणकलशमवनिनाय । ततः 'यत्र ग्रावा' इत्याद्याभिश्चतसृभिः सोमं जुहुवाञ्चकार । अत्र त्रयोंऽशाः कर्मणो भवन्ति । सोमस्य अभिषवः, द्रोणकलशे स्थापनम्, होमश्चेति । एते च क्रमशः अन्तर्यागे ग्राह्यत्वाना इति तदनुसारेण सूक्तार्थो विवृतोऽस्माभिः ॥

भवति । ज्ञानक्रियाशक्तिप्रतिनिधिभूतयोः देहे मनःप्राणात्मकद्वन्द्वभूतयोः सङ्गतयोः अवियोज्यतया एककार्यनिष्पत्तिरतयोः यजमानजनसर्वानुभूतिसारनिष्पीडनार्थयोः अभिषवणफलकस्थानीययोः सतोरेव उलूखलभूते शरीरे रसोऽभिषुतो भवतीति जघन्ययोपमया अधिषवणफलकयोः द्यावापृथिव्योरिव द्वन्द्वता, अवियोज्यता सुसङ्गतत्वं च तल्लक्षितयोः प्राणमनसोः प्रतिपादितानि द्वितीयस्याम् । अन्तर्यजने चलति, यजमानस्य नरस्य सर्वसत्त्वगता शक्तिः सूर्यस्य प्रभेव स्वभावसिद्धा अवियोज्या उलूखलायमाने शरीरे रसनिष्पादनाय आरोहणावरोहणरूपगतिद्वयं जागरूकतयाऽन्ववेक्षते । एवमूर्ध्वस्थानादागमनं उपच्यवशब्दप्रतिपादितमवतरणं, शरीरमूलप्रदेशादूर्ध्वगमनं निर्गमनरूपं अपच्यवशब्दवाच्यं गमनं चेत्यनयोरुभयोः स्वायत्तीकरणाय ज्ञानं सम्पादयन्ती सैषा नारीशब्दवाच्या नरशक्तिर्गुप्तविद्यामन्तःशरीरे शिक्षत इति प्रतिपादितं तृतीयस्याम् । यथा बहिर्यागे आशिरमन्थनदण्डं भाण्डदार्ढ्याय विबध्नन्ति, तथा रहोयागेऽस्मिन् मनःप्राणसाङ्गत्यसिद्ध्या ज्ञानक्रियाशक्तिविलासविशेषात् निष्पीड्यमानस्य सम्मदसोम-

---

अथोक्तार्थोपपादकश्रुतिवाक्यप्रदर्शनात् प्राक् स्थूलपक्षीयव्याख्याने लक्ष्यमाणः क्लेशो निरीक्षणीयः । अभिकृत्य अभिषवकर्म इदमस्ति वक्तव्यम् । अभिषवकर्मप्रकार एवं भवति । प्रथमं ग्राव्णा सोमस्य प्रहारः, ततः सोमरसोऽधिषवणफलकयोः निष्पीड्यते, ततश्च दशापवित्रे शोधनाय क्षिप्यते, अनन्तरं द्रोणकलशे स्थापनं निष्पादितस्य सोमस्य । अन्ते होमः, होमश्च अग्नावेवेति न नियमः, अप्स्वपि स्यात् । अयं च क्रमः अन्तर्यागेऽपि युक्तो बोध्यः । उक्तं च तात्पर्यम् । एवं स्थिते, ग्रावा न मुसलो भवति, नापि उलूखले सोमाभिषवः क्रियते, स तु अधिषवणफलकयोरेवेति न कस्यापि संशयः स्यात् । वैदिके कर्मणि धान्यावघातादौ मुसलोलूखलयोरस्त्येव स्थानम् । न वा अभिषवणार्थो ग्रावा मुसलो भवति । अधिषवणफलकार्थे उलूखलशब्दः मुसलार्थे ग्रावेति च व्याख्यातव्यमवश्यमासीत् पूर्वेषां कर्मणि विनियोगाय । एवं सप्तम्यामष्टम्यां च वनस्पतिशब्दस्य द्विवचनप्रयोगात् मुसलोलूखले इति प्राचीनाः कर्मार्थमाचख्युः, अन्यथाऽनुपपत्तेः । नवम्यामृषि चम्वोरिति प्रयुक्तम्, तत्रापि सत्यपि भेदे चमसाधिषवणफलकानां औपचारिकः प्रयोग इति कृत्वा व्याख्यानं अवश्यमभवत् । कुत एवं शब्दप्रयोगो मन्त्रेषु? बाह्यार्थस्य अवकाशदानायैवं शब्दा एवं भवस्थिता इति वाच्यम् । गूढार्थस्यैव प्राधान्यं ऋषीणां मतमिति द्योतयेदिदं सूक्तम् । अत एव ग्रावा-अधिषवण्यादि-श्रौतकर्मप्रसिद्धानि मन्त्रब्राह्मणप्रतिपादितगूढार्थानि 'परोक्षवचनानि' प्रयुक्तानि भवन्ति । अथ च अश्लीलार्थव्यञ्जकोऽपि प्रयोगोऽत्र भवति 'नारी उपच्यवं अपच्यवं च शिक्षते' इति । यद्यपि शिपिविष्टनामार्थविवरणे यास्कोक्तविधया कुत्सितार्थं वर्जयित्वा प्रशंसनीयमर्थं ग्रहीतुं प्रभवामः, तथाऽपि ईदृशप्रयोग एव प्रवह्लिकास्विव अर्थान्तरं गूढं व्यञ्जयेदिति का नाम विचिकित्सा? 'विततौ किरणौ द्वौ तावा पिनष्टि पूरुषः । न वै कुमारि तत्तथा यथा कुमारि मन्यसे' इत्यादौ अर्थान्तरं अन्वेष्यतया स्पष्टं विसृष्टं भवति । न चेदश्लीलार्थप्रतिपादने किं प्रयोजनम्? उपच्यवापच्यवव्याख्याने स्कन्दस्वामीये कुत्सितमेवार्थं ग्राम्यधर्माचरणविषयकमाचष्टे ॥

आलोकमात्रतो यत्र कुत्सितोऽर्थोऽसङ्गतार्थः अन्यस्तादृशार्थः चमत्कृतः 'ऊधः पितुः' 'मातुर्दिधिषुः' 'जारः कनीनाम्' इत्यादिर्वा भवति स परोक्षवचनो मन्त्रः, तत्र सन्देहवर्जं गूढार्थो वर्तते, कोऽपि व्यङ्ग्यो वेति,

रसस्य धारणार्थं देहे स्कन्धप्रायां स्थिरतामाधातुं अभिषवहेतुभिः देवताशक्तिविशेषैः पृष्ठवंशः अमृतमन्थनमन्दरवत् क्रियत इत्यावेदितं चतुर्थ्याम् । एवमृक्चतुष्टये शरीरे सुतस्य शुद्धानन्दरसस्य अभिषवणसहकारिभूतानि साधनानि कर्माणि चोक्त्वा, तत्सारभूतं सोमं स्वीकुरु भगवन्निन्द्रेति प्रार्थितं ऋषिणा ॥

ततश्च ऋग्भिश्चतसृभिः अधिषवणीयकर्म प्रस्तौति । यस्मिन् फलकद्वये सोमो निष्पीड्यते तदधिषवणफलकद्वयम्, वनस्पतिशब्दव्यवहार्यं दारुमयत्वात् । अत्र प्रथमं द्वाभ्यामृग्भ्यां उलूखलशब्दलक्षितं शरीरमेव प्रस्तूयते । अधिषवणफलकद्वयलक्षितयोः प्राणमनसोराधारभूतं हि शरीरम् । तच्च वानस्पत्यमेव भवति, कन्दमूलफलादिपरिणामत्वात्तस्य । यद्यपि 'गृहे गृहे' एकैकस्यापि मनुष्यस्य शरीरं युक्तं भवति, तथाऽपि तच्छरीरं विशिष्टं यत्र सोमः सूयते, तस्माज्जयघोषो भवतु, हे देह, जडोऽपि त्वं सोमसूरसि, उपात्तज्ञानोऽसि चेति पञ्चम्यामृचि गीतम् । तव बलप्रदः कार्यसाधकः प्राणः

स्फुरेदेव मतिमताम् । अस्मिन् सूक्ते ग्रावाधिषवण्यादीनां अस्मत्प्रतिपादितसङ्केतव्यवस्थां अवलम्ब्य मन्त्रार्थोऽनुसन्धेयः । अधिषवणफलकद्वयं चमसपात्रद्वयं प्राणमयमनोमयरूपं इति अस्माभिः सङ्केतो विवृतः । उदाहरिष्यमाणब्राह्मणवाक्यमपि अधिषवणफलकयोः सङ्केतरूपत्वमेवानुगृह्णाति, विशेषस्तु वर्तत एव फलके द्यावापृथिव्याविति । यद्यपि ते अपि चितेः दिव्यकक्ष्यामूर्ध्वां भौमकक्ष्यामधरां च ज्ञापयतः, तथाऽपि बहुभक्तिवादिनां ब्राह्मणानां सङ्केतविवरणपद्धतिर्दुरवगाहा नावश्यकी च भवति । अभिषवणीयेषु मन्त्रेषु तद्विवरणेषु ब्राह्मणेषु 'ग्रावा' वज्रमिति स्पष्टमुच्यते । स च 'ग्रावा' ऐन्द्रः ऊर्ध्वो भवति। यथा ऊर्ध्व इन्द्रः ऊर्ध्वेण 'ग्राव्णा' वज्रेण वृत्रं हन्ति, ग्राव्णा प्रहृतः सोमः स्वरसं विसृजति, एवं सोमरसः अभिषूयते । 'ऊर्जं धत्स्व' इति शुक्लयजुर्मन्त्रार्थं कर्मोपयोगितया विवृण्वत् शतपथवाक्यमिदं भवति (२-९-४) 'ऊर्जं धत्स्वेति' रसं धत्स्वेत्येवैतदाह 'धिषणे वीड्वी सती वीडयेथामूर्जं दधाथाम्' इति इमे एवैतत्फलके......तत्र योऽप्येते फलके भिन्द्यत् इमे ह वै द्यावापृथिवी एतस्माद् वज्रादुद्यतात् संरेजेते......'पाप्मा हतो न सोमः' । अत्र ग्रावा वज्रं, सोमाभिषवाय तेन प्रहारे पाप्मा हतः न सोमः इत्यादि स्पष्टमुक्तम् । सोमाभिषवा मन्त्रा अध्वर्युशाखीया एव रहस्यं उत्कृष्टमर्थं प्रतिपादयन्ति । 'यत्ते सोम दिवि ज्योतिर्यत् पृथिव्यां यत् उरौ अन्तरिक्षे । तेनास्मै यजमानाय उरु राये कृधि अधि दात्रे वोचः ॥' (शु. य. ६-३३) अन्ये चैवंजातीयकाः शतशो भवन्ति । अथ ऋक्संहितायां 'ग्रावा' वज्रं ऊर्ध्वमूलं इन्द्रवैभवं सोमसवहेतुः अन्तर्यागनिष्पादिका दिव्या द्योतमाना वाक्-इत्यादिस्वरूपस्थानप्रभावादिबोधकाः शतशो भवन्ति मन्त्राः । अत्र ऊर्ध्वबुध्न-पृथुबुध्नादिशब्दाः ऊर्ध्वमूल-बृहत्प्रतिष्ठार्था मन्त्रवर्णेषु साधारणाः । इह केचन ऋचः उक्तार्थस्योपपादनाय भवन्ति । 'ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन् वाजे शतक्रतो' (१-३०-६) 'ऊर्ध्व ऊ षु ण ऊतये तिष्ठ देवो न सविता । ऊर्ध्वो वाजस्य सनिता' (१-३६-१३) विश्वमेवोर्ध्वमूलं, अस्मदादीन् ऊर्ध्वप्रतिष्ठान् ऊर्ध्वजीवनान् विधातुं देवः सर्वोऽपि ऊर्ध्वो भवति । इन्द्रोऽग्निः सविता वा ऊर्ध्वं स्थितो न ऊर्ध्वान् करोत्विति शाश्वती भवति वेदेषु प्रार्थना 'ऊर्ध्वो नः पाह्यंहसो नि केतुना... कृधी न ऊर्ध्वं चरथाय जीवसे' (१-३६-१४) । अथ पृथुबुध्नस्थलानि कानिचिद्भवन्ति "गोमानग्ने ......दीर्घो

उत्तेजितो भवति पुरतः, तस्मात् सुनुहि सोमम्, विसृज सर्वानुभूतिसारभूतं त्वयि निलीनं अत्यन्तगाढ-सान्द्रतमतमःप्रदेशेषु निमग्नं देवेभ्यो देयं रसमिति षष्ठ्यामुद्घोषितम्। अथ शारीरयोरत एव वनस्पत्योः प्राणमनसोः उच्चैर्विजृम्भमाणयोः बलसमृद्धयोः भोगशक्तिसम्पन्नयोः इन्द्राश्वतुल्यता प्रस्तुता सप्तम्याम् । महद्भिः स्थानोत्कर्षसम्पन्नैः सोमाभिषवहेतुभिः शक्तिविशेषैर्युक्तौ युवां मधुमत्तमं इन्द्रपरिग्राह्यं सोमं सुनुतं इति वनस्पतिशब्दलक्षितयोः प्राणमनसोः सम्बोधनं अष्टम्याम् । शुद्धे देहे, सिद्धे पात्रे द्रोणकलशशब्दप्रतिपादिते सोमरसो निधीयतामिन्द्रार्थमिति नवम्यामन्त्यायाम् । तत्र च तथा शरीरकलशे अभिषुतरसस्थापनात् पूर्वं यत्कर्तव्यमुक्तं तच्चावधेयम् । 'चम्वोः' चमसपात्रवत् स्थितयोरधिषवणफलकलक्षितयोः प्राणमनसोः योऽवशिष्टः सोमस्तमाहृत्य शरीरादूर्ध्वे पवित्रे स्थाने शोधनाय क्षिप्त्वा चित्प्रकाशरश्मिलक्षिते गोः आवरणरक्षणभूते अन्नमयांशे चर्मणि निक्षिप्य शोधितं साधितं च रसं द्रोणकलशपदवेदनीयेऽन्नमये देहे स्थापयेदित्युक्तम् ॥　　　　इति प्रथमस्य द्वितीये षड्विंशो वर्गः

रयिः पृथुबुध्नः सभावान्'' (४-२-५) । ''प्रति प्र याहीन्द्र मीढुषो नॄन् महः पार्थिवे सदने यतस्व । अध यदेषां पृथुबुध्ना स एताः तीर्थे नार्यः पौंस्यानि तस्थुः'' (१-१६९-६) अत्र विपुलप्रतिष्ठाः ऊर्ध्वाः पुरुषशक्तयः 'नार्यः' उक्ताः । ''सुब्रह्माणं देववन्तं उरुं गभीरं पृथुबुध्नं इन्द्र । श्रुतं ऋषिं उग्रं अभिमातिषाहं अस्मभ्यं चित्रं वृषणं रयिं दाः'' (१०-४७-३) । अथ ग्रावा ऊर्ध्वः अश्मपर्यायः दीप्तिवाग्रूपः ऊर्ध्वया वाचैव सोमः सुतो भवतीत्यादीनां सङ्क्षेपेण मन्त्रांशोल्लेखो भवति 'अवक्षिप दिवो अश्मानमुच्चा' (२-३०-५) 'ग्रावाणेव तदिदर्थं जरेथे' (२-३९-१) 'बर्हिर्वा ······ ग्रावा यत्र वदति कारुः' (१-८३-६) 'आतिष्ठ वृत्रहन् रथं···अर्वाचीनं··· सुते मनो ग्रावा कृणोतु वग्नुना' (१-८४-३) 'तन्नो वातो ···· तद् ग्रावाणः सोमसुतः' (१-८९-४) 'यत्र ग्रावा वदति तत्र गच्छतम्' (१-१३५-७) 'सुकृत् सु पाणिः स्ववान् ऋतावा ······ ऊर्ध्वग्रावाणो अध्वरमतष्ट' (३-५४-१२) 'तव द्युमन्तो अर्चयो ग्रावेवोच्यते' (५-२५-८) 'स्थिरं मनश्चकृषे जात इन्द्रः······अश्मानं चित् शवसा दिद्युतः' (५-३०-४) 'अयं जनाः··· ·· वदन् ग्रावा अव वेदिं भ्रियाते' (५-३१-१२) 'उक्षासमुद्रो मध्ये दिवो निहितः पृश्निरश्मा' (५-४७-३) 'तं त्वा देवेभ्यो ग्रावभिः सुतः' (९-८०-४) 'ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि । दधत् स्तोत्रे सुवीर्यम्' ॥ (९-६७-१९) एवमन्येऽपि मन्त्राः शतश ऊर्ध्वस्य इन्द्रसम्बन्धिनो ग्राव्णः स्वरूपवीर्यप्रतिपादकाः अन्तर्यागार्थपरा यथाकथञ्चित् कर्मार्थे समन्वयक्षमा अपि क्वचिद् असङ्गतार्था दरीदृश्यन्ते । वामदेव्यसूक्तेषु 'गर्भे नु सन्नन्वेषां' इति विस्पष्टपरमार्थरहस्यं सूक्तं कर्मठव्याख्यानेष्वपि अवशतयेवाङ्गीकृतं गो-कलशादिसङ्केतशब्दैर्युक्तमेवावतिष्ठते । तस्यान्त्यामृचमुल्लिख्य विचारोऽयं समाप्यते । 'अध श्वेतं कलशं गोभिरक्तम्' (४-२७-५) विस्तरभिया न व्याख्यायते । इदं त्ववधेयम् । अत्र कलशः द्रोणकलशः । श्वेतः शुभ्रः । शुद्धं शरीरमेव पात्रम् । गोभिः प्रज्ञारश्मिभिः अक्तं सिक्तम्, अन्यदूह्यम् । विस्पष्टबहिर्यागसाधनसामग्रीक्रियादिप्रतिपादकशब्दप्रचुरस्य 'यत्र ग्रावे'तिसूक्तस्य क्लेशेन रहस्यार्थः साध्यत इति मा भूद्भ्रमश्चिन्तकानामिति समासतो वा प्रदर्शितं रहस्यार्थगोपनं, अत्रापि क्वचिदसङ्गतिर्बाह्यार्थस्य प्रदर्शिता चेत्यलम् ॥

अथ षष्ठेऽनुवाके 'यच्चिद्धि सत्य सोमपा' इति सप्तर्चं षष्ठं सूक्तं शुनःशेपस्यार्षम् । पङ्क्तिश्छन्दः इन्द्रो देवता ॥

प्रथमामृचमाह—

यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥१॥

यत् चित् हि सत्य सोमऽपाः अनाशस्ताःऽइव स्मसि आ तु नः इन्द्र शंसय गोषु अश्वेषु शुभ्रिषु सहस्रेषु तुविऽमघ ॥

हे **सोमपाः** सोमस्य पातः, **सत्य** स्वरूपेण सत्य, **यच्चिद्धि** यद्यपि वयं **अनाशस्ता इव** अप्रशस्ता इव, अश्रेष्ठा इव **स्मसि** भवामः, तथाऽपि हे **तुविमघ** बहुधन, (बहोर्विविधत्वं, धनस्य दिव्यत्वं च बोध्यं) **इन्द्र**, त्वं **गोषु** प्रज्ञारश्मिरूपेषु धनेषु निमित्तभूतेषु **अश्वेषु** भोगसमर्थक्रियाशक्तिसम्पन्नप्राणरूपेषु, तथा **शुभ्रिषु** शोभनेषु शिवङ्करेषु **सहस्रेषु** सहस्रविधेषु च योगक्षेमेषु निमित्तभूतेषु, **नः** अस्मान् **आशंसय** आशस्तान् कुरु, प्रशस्तान् विधेहि । अनाशस्ताः— शंसु स्तुतौ, निष्ठेति भावे क्तः । स्मसि— इदन्तो मसिः । तु-ऋचि दीर्घः । शुभ धातोः क्रिन् प्रत्ययः ॥

द्वितीयामृचमाह—

शिप्रिन्वाजानां पते शचीवस्तव दंसना ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥२॥

शिप्रिन् वाजानाम् पते शचीऽवः तव दंसना आ तु नः इन्द्र शंसय गोषु अश्वेषु शुभ्रिषु सहस्रेषु तुविऽमघ ॥

हे **शिप्रिन्** शोभनशिप्रयुक्त, शिप्रशब्दो हनूपर्यायः, शिप्रेण मुखं लक्ष्यते । **शचीवः** शक्तिमन्, शची शक्तिः कर्मनाम, मतुपो वः छन्दसि । **वाजानां पते** समृद्धीनां पालक, **तव दंसना** क्रिया दृष्टिर्वा, सर्वसमर्थेति शेषः । तस्मादस्मान्

आशंसयेत्युत्तरार्धेण सङ्गच्छते । अन्यत् प्राग्वत् । दंसना– दंसि-दंसनदर्शनयोः, स्त्रीलिङ्गनिर्देशात् वाक् इति स्कन्दस्वामी ॥

तृतीयामृचमाह—

नि ष्वा॑पया मिथूदृशा॑ सस्ताम॑बुध्यमाने ।
आ तू न॑ इन्द्र शंसय गोष्वश्वे॑षु शुभ्रिषु॑ सहस्रे॑षु तुवीमघ ॥३॥

नि स्वापय मिथुऽदृशा॑ सस्ताम् अबु॑ध्यमाने इति॑ आ तु नः इन्द्र शंसय गोषु॑ अश्वे॑षु शुभ्रिषु॑ सहस्रे॑षु तुविऽमघ ॥

अस्मिन् 'मिथूदृशा' 'गर्दभं' 'कुण्डृणाच्या' 'कृकदाश्वं' इति परोक्षवचनानि प्रयुक्तान्यवधेयानि । मिथूदृशा मिथुनतया परस्पराश्रयसम्बद्धत्वेन दृश्यमाने द्वन्द्व-भूते अहोरात्रवत् तमःप्रकाशवत् अवतिष्ठमाने इत्यर्थः, निष्वापय नितरां सुप्ते कुरु । ते च अबुध्यमाने बोधशून्ये भूत्वा सस्तां निद्रां गच्छताम् । अन्यत् प्राग्वत् । मिथूदृशा– मिथू इति मिथुनस्य च्छान्दसं रूपम्, दृशेः क्विप्, मिथूदृक् द्विवचनम् । सस्ताम्– षस स्वप्ने लोट्, छान्दसो धातुः । 'उत त्ये देवी सुभगे मिथूदृशोषासानक्ता' (१-११-१) इत्यत्र पर्यायेण परस्परदृशौ दिनं रात्रिश्चेति स्पष्टमाह मन्त्रः । अस्यामृचि अहोरात्र-निद्राजागरणादि-द्वन्द्ववशगो मा भूवं इति विवक्षया द्वन्द्वभूतं सर्वं निर्व्यापारं अवतिष्ठताम् इति प्रार्थयते मन्त्रद्रष्टा ॥

चतुर्थीमृचमाह—

सस॑न्तु त्या अरा॑तयो बोध॑न्तु शूर रा॒तयः॑ ।
आ तू न॑ इन्द्र शंसय गोष्वश्वे॑षु शुभ्रिषु॑ सहस्रे॑षु तुवीमघ ॥४॥

सस॑न्तु त्याः अरा॑तयः बोध॑न्तु शूर रा॒तयः॑ आ तु नः इन्द्र शंसय गोषु॑ अश्वे॑षु शुभ्रिषु॑ सहस्रे॑षु तुविऽमघ ॥

त्याः ताः परोक्षाः अस्माकं न प्रत्यक्षभूता अपि वर्तमाना एव अरातयः अदान-शीलाः अयज्वशक्तयः, यजनविरोधिनो मानुषा अमानुषा वेत्यर्थः, ससन्तु निद्रां प्राप्नुवन्तु, निर्व्यापारतां गच्छन्त्वित्यर्थः । हे शूर शौर्ययुक्त, रातयः दानशीलाः

तद्विपरीता अत एवानुकूलाः बोधन्तु जागरिता भवन्तु, अस्मदानुकूल्याय प्रवृत्ता भवन्तु । अन्यत् पूर्ववत् ॥

पञ्चमीमृचमाह—

समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥५॥

सम् इन्द्र गर्दभम् मृण नुवन्तम् पापया अमुया आ तु नः इन्द्र शंसय गोषु अश्वेषु शुभ्रिषु सहस्रेषु तुवि॒ऽमघ ॥

हे इन्द्र, अमुया अनया श्रूयमाणया पापया अनृतविद्धया बाह्याभ्यन्तर-संवादशून्यया अत एव अपस्वरकठोरया वाचा नुवन्तं त्वां स्तुवन्तं गर्दभं गर्दभवत् अक्षप्रायं स्तोत्रशब्दमात्रभारवाहिनं अवशजडगतिकं व्यर्थविपरीतार्थविरसं वा पामर-सामान्यमनोरूपं संमृण सम्यङ्मारय । आ त्वित्यादि पूर्ववत् । मृण हिंसायाम्, तुदादिः ॥

षष्ठीमृचमाह—

पतति कुण्डृणाच्या दूरं वातो वनादधि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥६॥

पतति कुण्डृणाच्या दूरम् वातः वनात् अधि आ तु नः इन्द्र शंसय गोषु अश्वेषु शुभ्रिषु सहस्रेषु तुविमघ ॥

वातः अस्मत्प्रतिकूलः वायुः कुण्डृणाच्या गरगोलिकया, वनचरीविशेषः कुण्डृणाची, तया सह वनात् अधि वनादधिकं ऊर्ध्वं वा दूरं पतति पततु । अन्यत् व्याख्यातम् । कुण्डृणाच्या कुटिलगत्या इति सायणः । कुडि दाहे, अतो ल्युट् कुण्डनम्, डकारात् परस्य अकारस्य ऋकारश्छान्दसः, एवं कुण्डृणं तदञ्चतीति कुण्डृणाचीति सायणः । ऋचस्तात्पर्यमेवंविधं भवति । कुण्डृणाचीति परोक्षवचनं पूर्वर्चि गर्दभवत् । इयं च वनचरी कृकलासजातिः । गृहे अस्याः दर्शनं अनिष्टमाहुः ।

अनिष्टापादनदुष्टशक्तिविशेषोपलक्षणमिदं कुण्डृणाचीपदम् । अस्मत्प्रतिकूलः सर्वोऽपि वातः स्वावासमरण्यप्रदेशं गच्छतु कुण्डृणाच्या वनचर्या सहेति भावः । अन्यत् पूर्ववत् ॥

सप्तमीमृचमाह–

सर्वं॑ परिक्रो॒शं ज॑हि ज॒म्भया॑ कृकदा॒श्व॑म् ।
आ तू न॑ इन्द्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तुवीमघ ॥७॥

सर्व॑म् प॒रि॒ऽक्रो॒शम् ज॒हि॒ ज॒म्भय॑ कृ॒क॒दा॒श्व॑म् आ तु नः॒ इ॒न्द्र॒ श॒ंस॒य॒ गोषु॑ अश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तु॒वि॒ऽम॒घ॒ ॥

सर्वं सर्वविधं परिक्रोशं सर्वतः आक्रोशकर्तारं दुष्टशक्तिविशेषं (क्रुश आह्वाने, परितः क्रोशयतीति परिक्रोशः, पचाद्यच्) जहि मारय (हन्तेः लोट्, जहि आदेशः) कृकदाश्वं कृको हिंसा तां दाशति ददाति यथाभागं मानुषेभ्यो विशेषतः देवयाजिभ्य इति शेषः, भूतविशेषं ईदृशं जम्भय नाशय । अन्यत् प्राग्वत् । कृकशब्दः, कृञ हिंसायाम्, कन्-प्रत्ययः । जम्भय– जभि नाशने, चुरादिः ॥

इति प्रथमस्य द्वितीये सप्तविंशो वर्गः

षष्ठेऽनुवाके आ व इन्द्रमिति द्वाविंशत्यृचं सप्तमं सूक्तम् शुनःशेपस्यार्षं गायत्रम् । अस्माकमित्येषा एकादशी पादनिचृद्गायत्री । शश्वदिन्द्र इति षोडशी त्रिष्टुप् । आदितः षोडश ऐन्द्र्यः, ततस्तिस्र आश्विन्यः, अन्त्यास्तिस्र उषोदेवताकाः ॥

तत्र प्रथमामृचमाह–

आ व॒ इन्द्रं॒ क्रिविं॑ यथा वा॒जय॑न्तः श॒तक्र॑तुम् । मंहि॑ष्ठं सिञ्च॒ इन्दु॑भिः ॥१॥

आ व॒: इन्द्र॑म् क्रिवि॑म् य॒था॒ वा॒ज॒ऽय॑न्तः श॒तऽक्र॑तुम् मंहि॑ष्ठम् सि॒ञ्चे॒ इन्दु॑ऽभिः ॥

भो देवाः! वः युष्माकं युष्मदीयमित्यर्थः अथवा वचनव्यत्ययः, इन्द्रं वाजयन्तः वाजमिच्छन्तः समृद्धिकामा वयं इन्दुभिः सोमैः आ सिञ्चे आ सिञ्चामः आसिक्तं कुर्मः तर्पयाम इति यावत् (वचनव्यत्ययः) । कीदृशम्? शतक्रतुं

बहुकर्माणम्, पुनः कीदृशम्? मंहिष्ठं प्रभूततमम् (महि वृद्धौ, तृजन्तात् मंहितुः इष्ठन् छन्दसि)। अत्र दृष्टान्तः। क्रिविं यथा क्रिविः कूपनाम, यथा लोके कूपं महत्या कुल्यया आहार्योदकं तेन पूरयन्ति, तथा सोमैर्वयं इन्द्रं पूरयित्वा समृद्धिमन्तो भवामः। 'भवेम' इति लिङर्थः उचितः॥

द्वितीयामृचमाह—

शतं वा यः शुचीनां सहस्रं वा समाशिराम्। एदु निम्नं न रीयते ॥२॥

शतम् वा यः शुचीनाम् सहस्रम् वा सम्ऽआशिराम् आ इत् ऊम् इति निम्नम् न रीयते॥

यः इन्द्रः शुचीनां शुद्धानां सोमानां शतं वा शतं बह्वर्थकम्, समाशिरां समीचीनेन आशिराख्येन मिश्रणद्रव्येण युक्तानां सोमानां सहस्रं वा अत्यधिकं समूहं वेत्यर्थः, एदु आगत्यैव निम्नं न निम्नप्रदेशं आप इव रीयते अनायासेन प्राप्नोति, तमिन्द्रमिति पूर्वयर्चा सम्बन्धो योग्यः। दध्याशिरः सोमाः रहस्यार्थपराः प्रागुक्ताः अमितमपि सोमं स्वीकर्तुं प्रभुरिन्द्रः आपः निम्नस्थलमिव अनायासेनागच्छतीति भावः। रीङ् स्रवणे दिवादिः। प्रयोगे सर्वत्र मन्त्रेषु अनायासगत्यर्थतया ग्राह्यः, तथा सायणीयमपि, न केवलं प्राप्त्यर्थो धातुः॥

तृतीयामृचमाह—

सं यन्मदाय शुष्मिण एना ह्यस्योदरे। समुद्रो न व्यचो दधे ॥३॥

सम् यत् मदाय शुष्मिणे एना हि अस्य उदरे समुद्रः न व्यचः दधे॥

यत् पूर्वोक्तं शतं शुचीनां सहस्रं वा समाशिरां सोमानां, शुष्मिणे बलवते, इन्द्रस्य मदाय संहर्षाय सं सङ्गतं भवति, एना हि अनेनैव सोमानां भूम्ना अस्य इन्द्रस्य उदरे कुक्षौ व्यचः व्याप्तिः (व्याप्त्यर्थाद्व्यचेरसुन्) दधे धृता भवति। तत्र दृष्टान्तः। समुद्रो न समुद्र इव, यथा समुद्रोऽपां राशिः, उदकेन व्याप्तिमान्, इयत्तापरिच्छेदवर्जं अपां आधारो भवति, तथा सोमानामिन्द्रकुक्षिरिति भावः। प्रथम-

द्वितीयऋगर्थेन सङ्गच्छत इदम्, इन्द्रोदरं अतिमानसोमाधारपात्रमिति कथनम् । 'यः कुक्षिः सोमपातमः समुद्र इव पिन्वते' इत्यत्रापि एवंजातीयको भावोऽवधेयः ॥

चतुर्थीमृचमाह—

अयमु ते समतसि कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे ॥४॥

अयम् ऊँम् इति ते सम् अतसि कपोतःऽइव गर्भऽधिम् वचः तत् चित् नः ओहसे ॥

अयं उ अयं च अस्माभिरर्प्यमाणः सोमः **ते** तुभ्यं त्वदर्थमित्यर्थः । यं च सोमं त्वं **सं अतसि** सम्यक् सातत्येन गच्छसि । तत्र दृष्टान्तः । **कपोत इव** पक्षिविशेषः पारावतो यथा **गर्भधिम्** गर्भधारिणीं कपोतिकां गच्छति, तथा त्वं सोमं प्राप्नोषि । **तत् चित्** तस्मादपि **नः** अस्माकं **वचः** वचनं स्तोत्रं **ओहसे** प्राप्नोषि सामोदं शृणोषीत्यर्थः, गतौ याचने च वर्तते अर्दत्यर्थ उहिर् धातुः । गर्भधिः– गर्भोऽस्यां धीयते । इन्द्रः सोमं कामयमानः भोजं भोजं पुनः कपोत इव कपोतीं गतोऽपि परावृत्य रिरंसुर्भवतीति दृष्टान्ते कपोतस्य वैशिष्ट्यमवधेयम् । यद्यपि सामान्यतः तिर्यञ्चः गर्भिणीषु न रमन्ते, तथाऽपि पारावतः अनुदिनप्रवर्धमानः प्रियां गर्भिणीं अपि कामयते रत्यर्थम् । अत एव हरिराह– 'पारावतः खरशिलाकणमात्रभोजी । कामी भवत्यनुदिनं वद कोऽत्र हेतुः' इति । अन्यच्च प्राचीनं पद्यं भवति । 'कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः । पारावतः परावृत्य रिरंसुश्चुम्बति प्रियाम्' ॥ इन्द्रस्य तथाविधसोमकामत्वप्रतिपादनेन इन्द्रभागवते सोमयाजिनि रहोयागैकनिष्ठे पुरुषे तस्य रत्यतिशयः स्पष्टो भवति ॥

पञ्चमीमृचमाह—

स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते । विभूतिरस्तु सूनृता ॥५॥

स्तोत्रम् राधानाम् पते गिर्वाहः वीर यस्य ते विऽभूतिः अस्तु सूनृता ॥

राधानां धनानां, विविधानां दिव्यानामिति बोध्यम्, **पते** पालक, **गिर्वाहः** गीर्भिः सदाविष्कारकस्तोत्रवाग्भिः उह्यमान, (वहतेः असुन्) **वीर** विक्रमशालिन् **ते**

तव (कर्मणि षष्ठी) स्तोत्रं तद्विषयकमित्यर्थः यस्य यत्कर्तृकं भवति, तस्य सूनृता शोभना सत्या च वाक् विभूतिः ऐश्वर्यं अस्तु भवतु । शुभसत्या वाक् महदैश्वर्यं भवति चेत्, स्तोत्रं सार्थकं भवति वाक्सिद्धेः । सूनृता प्रियसत्या वाक् लोके प्रसिद्धा, वेदे तु अस्मदुक्तार्था ॥

इति प्रथमस्य द्वितीये अष्टाविंशो वर्गः

षष्ठीमृचमाह–

ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो । समन्येषु ब्रवावहै ॥६॥

ऊर्ध्वः तिष्ठ नः ऊतये अस्मिन् वाजे शतक्रतो इति शतऽक्रतो सम् अन्येषु ब्रवावहै ॥

हे शतक्रतो शतकर्मन्, अस्मिन् प्रवर्तमाने वाजे प्राप्तव्ये समृद्धिविषये नः अस्माकं ऊतये अभिवृद्ध्यर्थं ऊर्ध्वः तिष्ठ उच्चैः स्थितो भव, तेनास्माकमुद्गमनं ऊर्ध्वस्थितिः सिद्ध्येत् । ततः परं अन्येषु विचारयितव्येषु विषयेषु सं सङ्गतौ भूत्वा ब्रवावहै आवां त्वं च अहं च, सम्भाषावहै । ईदृशोऽन्तरङ्गव्यवहारो देवताभिः सह ऋषीणां साधारणो लक्ष्यते ॥

सप्तमीमृचमाह–

योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥७॥

योगेऽयोगे तवःऽतरम् वाजेऽवाजे हवामहे सखायः इन्द्रम् ऊतये ॥

योगेयोगे तत्र तत्र इच्छालाभे विषये वाजेवाजे तत्र तत्र समृद्धौ निमित्तभूतायां च सखायः सखिभूता वयं इन्द्रं देवं ऊतये अस्मदभिवृद्धये हवामहे आह्वयामः । कथंभूतमिन्द्रम्? तवस्तरं अतिशयेन बलिनम् । तवसः शब्दात् मत्वर्थीयो विनिः, छान्दसो लोपः ॥

अष्टमीमृचमाह–

आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः । वाजेभिरुप नो हवम् ॥८॥

आ घ गमत् यदि श्रवत् सहस्रिणीभिः ऊतिऽभिः वाजेभिः उप नः हवम् ॥

घ पादपूरणः संहितायां दीर्घः । स इन्द्रः यदि श्रवत् शृणुयाद्यदि, कम्? नः हवं अस्मदीयं हवं आह्वानं इत्यर्थः । उप आ गमत् अस्मत्समीपं अवश्यं आगच्छेत् (श्रवत्, गमत्, द्वयं च लिङर्थे लेट्) कथमागच्छेत्? सहस्रिणीभिः ऊतिभिः बह्वीभिः वृद्धिभिः तत्सम्पादिकाभिरित्यर्थः, तथा वाजेभिः समृद्धिभिश्च युक्तः आगच्छेत् । इत्थंभूतलक्षणे तृतीया ॥

नवमीमृचमाह—

अनु॑ प्र॒त्नस्यौक॑सो हुवे तुविप्र॒तिं नर॑म् । यं ते॒ पूर्वं॑ पि॒ता हु॒वे ॥९॥

अनु॑ प्र॒त्नस्य॑ ओक॑सः हुवे तु॒वि॒ऽप्र॒तिम् नर॑म् यम् ते॒ पूर्व॑म् पि॒ता हु॒वे ॥

प्रत्नस्य पुरातनस्य ओकसः स्थानस्य सकाशात् तुविप्रतिं तुवीनां बहूनां यन्तर्यागप्रवृत्तानां प्रतिं प्रतिगन्तारम्, तान् अनुग्रहीतुं आगन्तारमित्यर्थः, नरं पुरुषं बलिनं इन्द्रं अनु हुवे अनुक्रमेण आह्वयामि । यं ते त्वां (विभक्तिव्यत्ययः) पिता अस्मत्पिता पूर्वं हुवे जुहुवे, आहूतवान् । पितेति पूर्वपुरुषाणामृषीणामुपलक्षणम् । हुवे— ह्वेञ् धातुः, द्विर्वचनाभावः छन्दसि बहुलम् । तुविप्रतिम्— प्रतिः प्रतिनिधि-प्रतिदानयोरितिवत्, सत्त्ववचनतया प्रयुक्तः, भीमसेनो भीम इव । ते— त्वामिति विभक्ति-व्यत्ययेन इन्द्रमिति व्याख्यातम्, उत्तरत्र इन्द्रसम्बोधनश्रवणात् सङ्गच्छते चैतत् । अथवा आत्मानमेव ऋषिः 'तव पिता यं आहूतवान्' इत्याह ॥

दशमीमृचमाह—

तं त्वा॑ व॒यं वि॑श्ववा॒रा शा॑स्महे पुरुहूत । सखे॑ वसो जरि॒तृभ्यः॑ ॥१०॥

तम् त्वा॒ व॒यम् वि॒श्व॒ऽवा॒र॒ आ शा॒स्म॒हे॒ पु॒रु॒ऽहू॒त॒ सखे॑ व॒सो॒ इति॑ ज॒रि॒तृऽभ्यः॑ ॥

विश्ववार विश्वैः वरणीय, पुरुहूत पुरुभिः बहुभिः आहूत, सखे समान-ख्यान, अस्मत्सहाय, वसो धनभृत तं पूर्वोक्तगुणविशिष्टं त्वां इन्द्रं वयं तव सखायः जरितृभ्यः स्तोतृभ्यः, तेषामनुग्रहार्थमित्यर्थः आशास्महे प्रार्थयामहे ॥

इति प्रथमस्य द्वितीये एकोनत्रिंशो वर्गः

एकादशीमृचमाह—

अस्माकं शिप्रिणीनां सोमपाः सोमपाव्नाम् । सखे वज्रिन्त्सखीनाम् ॥११॥

अस्माकम् शिप्रिणीनाम् सोमऽपाः सोमऽपाव्नाम् सखे वज्रिन् सखीनाम् ॥

हे सोमपाः सोमस्य पातः अस्माकं सम्बन्धे षष्ठी, अस्मत्सम्बन्धिनां, शिप्रिणीनां शोभनहनुयुक्तानां मुखोपलक्षणं, पानकर्मणि प्रियदर्शनसद्योतनार्थकमिदम्, 'शिप्राभ्यां शिप्रिणीनाम्' (१०-१०१-५) इति सुशिप्रार्थे शिप्रिणीशब्दः प्रयुक्तः । सोमपाव्नां सोमस्य पातॄणां सखीनां सखिवत्प्रियाणां देवानां सखे प्रिय, वज्रिन् वज्रयुक्त, त्वामाश्रयामः, स्तुमः, तवानुग्रहं प्रार्थयामहे, इति वा वाक्यशेषः । अस्माकं सखीनां गवां समूहः त्वत्प्रसादादस्त्विति वाक्यशेषः सायणव्याख्यानुसारतः ॥

द्वादशीमृचमाह—

तथा तदस्तु सोमपाः सखे वज्रिन्तथा कृणु । यथा त उश्मसीष्टये ॥१२॥

तथा तत् अस्तु सोमऽपाः सखे वज्रिन् तथा कृणु यथा ते उश्मसि इष्टये ॥

हे सोमपाः सोमस्य पातः, सखे सखिवत्प्रिय, वज्रिन् वज्रयुक्त, यथा येन प्रकारेण ते तव इष्टये यजनार्थं, यजतेः क्तिन् उश्मसि उश्मः वयं कामयामहे, वश कान्तौ, इदन्तात् मसिः । तथा तेन प्रकारेण तत् अस्तु तद्यजनं भवतु, तथा कृणु तथा कुरु ॥

त्रयोदशीमृचमाह—

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥१३॥

रेवतीः नः सधऽमादे इन्द्रे सन्तु तुविऽवाजाः क्षुमन्तः याभिः मदेम ॥

तुविजाताः बहुबलसमृद्धयः रेवतीः धनवत्यः (रयिः दिव्यं धनं भवति, रयिशब्दात् सम्प्रसारणे मतुप्, प्रथमार्थे द्वितीया) सन्तु भवन्तु । कास्ता 'रेवतीः'? विशेष्यं ऋचि नोक्तम् । स्तुतय इति स्कन्दस्वामी, गाव इति सायणः, गावः स्युः,

न ताः पशवः, किंतु प्रज्ञारश्मिधनप्रसवित्र्यः, बहुबलसमृद्धिसम्पन्नाः दिव्याः शक्तयः सम्पदो वा भवितुमर्हन्ति । तादृश्यः सम्पदः **सधमादे** अस्माभिः सह हृष्यति **इन्द्रे नः** अस्माकं सन्त्विति योजना (सह मादयतीति सधमादः, चुरादिः, सधमाधस्थयोः सहादेशः छन्दसि) । अस्माभिः सह संहर्षवति इन्द्रे भगवति अस्माकं सम्पदः शक्तयो दिव्या उक्तलक्षणा गावो वा भवन्तु । **याभिः** उक्ताभिः वयं **क्षुमन्तः** सम्भारवन्तः **मदेम** हृष्येम । क्षुशब्दः अन्नवाची प्रायशः सायणीये, क्वचित् शब्दः स्तुतिः कीर्तिश्च भवति, एकत्र लक्षणया 'क्षुमति धनाढ्ये' इति व्याख्यातम् । एवं हि सम्भारो राशिः निधानं वा प्रायः सर्वत्र सङ्गच्छते ॥

चतुर्दशीमृचमाह—

आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः । ऋणोरक्षं न चक्र्योः ॥१४॥

आ घ त्वाऽवान् त्मना आप्तः स्तोतृभ्यः धृष्णो इति इयानः ऋणोः अक्षम् न चक्र्योः ॥

हे **धृष्णो** प्रगल्भ, बलसाहसिन्, त्वमेव **त्वावान्** त्वत्सदृशः (छन्दसि वतुप्) **त्मना** आत्मना स्वयमेव (छन्दसि आकारलोपः) **आप्तः** प्रत्ययितः विश्वसनीयः भूत्वा **इयानः** याच्यमानः सन् **स्तोतृभ्यः** स्तोतॄणामनुग्रहार्थं अभीष्टं बलं **आ ऋणोः** आहृत्य प्रक्षिप्तवानसि । तत्र दृष्टान्तः । **चक्र्योः** रथचक्रयोः **अक्षं न** अक्षमिव । यथा चक्रयोरक्षप्रक्षेपेण दृढबन्धो जायते गमनाय रथः, तथा त्वमेव आप्तः अन्यस्त्वत्सदृशः भूत्वा स्तोतृभ्यो बलं अनुगृह्णासि । तादृशममानुषं बलमन्तरा स्तोतॄणां केवलं स्वबलेन गतिरेव न विद्यते । तादृशस्य अक्षप्रक्षेपोपमितस्य स्तोतृषु बलनिधानस्य त्वमेव त्वद्विध एव स्वामी । यमनुगृह्णासि त्वं, तं त्वत्सदृशं करोषि इति अन्यत्रापि गीतो मन्त्रोऽवधेयः । 'कदु द्युम्नमिन्द्र त्वावतो नॄन् कया धिया करसे' (१०-२९-४) । तस्मादिन्द्रसदृशः कृतः स्तोता इन्द्रेणैव बलवान् भवति, न तु स्वात्मना । इदं च ऋचः तात्पर्यं उत्तरयर्चा सङ्गच्छते । उभयोर्ऋचोस्तात्पर्यविचारो नैव कृतः पूर्वव्याख्यासु, कृतश्चेद्भावः शुष्कः शोचनीयश्च लक्ष्यते, 'त्वावान् अन्यो देवताविशेषः' 'ऋणोः पुरुषव्यत्ययः' इति च पूर्वव्याख्या नाङ्गीकृताऽस्माभिः । इयानः— याच्ञाकर्मणः

इमहे इत्यस्य रूपम्, इङ् गतौ तस्य लिटः कानच् । ऋणोः— तनादिर्धातुः, लुङि अडभावः, लडर्थे वा लङ् स्यात् । चक्रयोः— चक्रशब्दस्य अकारान्तस्य इकारश्छान्दसः ॥

पञ्चदशीमृचमाह—

आ यद्दुवः शतक्रतवा कामं जरितॄणाम् । ऋणोरक्षन्न शचीभिः ॥१५॥

आ यत् दुवः शतक्रतो इति शतक्रतो आ कामम् जरितॄणाम् ऋणोः अक्षम् न शचीभिः ॥

शतक्रतो शतकर्मन् इन्द्र, जरितॄणां स्तोतॄणां यत् दुवः यत् परिश्रमात्मकं कर्म भवति, तत् आ तेषां कामं अभिलषितं आ ऋणोः त्वमेव प्रक्षिपसि । आ इति उपसर्गाभ्यासात् 'ऋणोः' इति क्रियया द्विः सम्बन्धयितव्यः । द्विःप्रयोग आदरार्थः । स्तोतॄणां यः परिश्रमः यश्च कामः प्राप्तव्यमुद्दिश्य भवतः, तदुभयमपि सिद्धये साधनं भवति । तदपि इन्द्रेणैव स्तोतृषु प्रक्षिप्तम् । दिव्यत्वप्राप्तिरूपलक्ष्यसिद्धेः साधनभूतः तत्कामः तत्सदृशपरिश्रमश्च इन्द्रानुग्रहेणैव भवतः, तस्येश्वरत्वात् कारयितृत्वाच्च । तत्र दृष्टान्तः । शचीभिः शक्तिभिः तत्क्रियाभिरित्यर्थः अक्षं न अक्षं यथा रथचक्रयोः प्रक्षिपन्ति तद्वत् । अत्रापि पूर्ववद्दृष्टान्तस्य प्रयोजनं ध्येयम् । यथा रथचक्रगतिरक्षं विना न सिद्ध्यति, स्तोतृगतिरपि परिश्रमाभिलषितवर्जं न भवति । अत्र इन्द्रमेव 'आ ऋणोः' इति सम्बोध्य आह, न तु पूर्वस्यामृचि सायणव्याख्यानुसारतः इन्द्रसदृशं अन्यं देवताविशेषम् । अनयोर्ऋचोः सम्बन्धोऽवधेयः ॥

इति प्रथमस्य द्वितीये त्रिंशो वर्गः

षोडशीमृचमाह—

शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि ।
स नो हिरण्यरथं दंसनावान्त्स नः सनिता सनये स नोऽदात् ॥१६॥

शश्वत् इन्द्रः पोप्रुथत्ऽभिः जिगाय नानदत्ऽभिः शाश्वसत्ऽभिः धनानि सः नः हिरण्यऽरथम् दंसनाऽवान् सः नः सनिता सनये सः नः अदात् ॥

शश्वत् सदा इन्द्रः देवराट् धनानि अस्माभिः प्राप्तव्यानि दिव्यानि ज्योतिर्बलादीनि धनानि जिगाय जितवान् अस्मदर्थमिति शेषः । कैः साधनैः? भोगसामर्थ्यक्रियाशक्तिकरणभूतैः जगज्जीवप्राणसङ्केतभूतैरश्वैः । यद्यपि अश्वैरिति शब्दतो नोक्तम्, तथाऽपि द्योतितं त्रिभिर्विशेषणैः । तान्याह । पोप्रुथद्भिः पुनः पुनः समर्थीभवद्भिः (प्रोथृ पर्याप्तौ, पर्याप्तिश्च समर्थीभावः, यङ् लुकि शतृ प्रत्ययः) नानदद्भिः सन्तृप्तिप्रकाशकं शब्दं पुनः पुनः कुर्वद्भिः 'हेषद्भिः' (णद धातुः यङ् लुक् पूर्ववत्) शाश्वसद्भिः पुनः पुनः प्रश्वसद्भिः कार्यसाधकपरिश्रमोत्तरकालीनैः प्रश्वासयुक्तैरित्यर्थः । सः एवं अश्वैर्जितवानिन्द्रः दंसनावान् क्रियावान् (दंसः कर्म, दंस एव दंसना) सनिता दाता सन् नः अस्मभ्यं सनये लाभाय हिरण्यरथं हिरण्मयं ज्योतिर्मयं रथं अदात् दत्तवान् । ज्योतिर्मयेन यानेन दैवदत्तेन हि दिव्यं धाम गच्छन्ति देवकामा ऋषयः ॥

अथाश्विनस्तृचः, तत्र प्रथमां सूक्ते सप्तदशीमाह—

आश्विनावश्वावत्येषा यातं शवीरया । गोमद्दस्रा हिरण्यवत् ॥१७॥

आ अश्विनौ अश्वऽवत्या इषा यातम् शवीरया गोऽमत् दस्रा हिरण्यऽवत् ॥

हे दस्रा कर्मनिष्पादकौ (गतम्) अश्विनौ, अश्वावत्या अश्ववत्या प्राणसङ्केतोऽश्वः स्मार्यः (आकारश्छान्दसः) शवीरया स्फुरद्बलया इषा एषणया वेगवत्प्रेरणयेत्यर्थः, आयातं आगच्छतम् । गोमत् प्रज्ञानरश्मिसमृद्धं हिरण्यवत् तेजःसम्पन्नं च अस्तु युवयोरागमनमिति शेषः ॥

तृचे द्वितीयां सूक्ते अष्टादशीमृचमाह—

समानयोजनो हि वां रथो दस्रावमर्त्यः । समुद्रे अश्विनेयते ॥१८॥

समानऽयोजनः हि वाम् रथः दस्रौ अमर्त्यः समुद्रे अश्विना ईयते ॥

हे दस्रौ, अश्विनौ, वां युवयोः समानयोजनः समानं योजनं अश्वयोजनं यस्य स रथः उभयोर्युवयोरेकरथारूढत्वात् सकृद्युक्तः अमर्त्यः विनाशरहितः

अमृतधर्मा भवति । हि यस्मादेवं अविनाशी तस्मात् समुद्रे अन्तरिक्षलक्षिते अखण्डे परिच्छेदशून्ये आकाशे ईयते गच्छति ॥

तृचे तृतीयां सूक्ते एकोनविंशीमृचमाह-

न्यं१॒घ्न्यस्य॑ मू॒र्धनि॑ च॒क्रं रथ॑स्य येमथुः । परि॒ द्याम॒न्यदी॑यते ॥१९॥

नि अ॒घ्न्यस्य॑ मू॒र्धनि॑ च॒क्रम् रथ॑स्य ये॒म॒थुः॒ परि॑ द्याम् अ॒न्यत् ई॒य॒ते ॥

हे अश्विनौ, अघ्न्यस्य पर्वतस्य मूर्धनि उच्चभागे रथस्य एकं चक्रं नि-येमथुः नियमितवन्तौ । अन्यत् चक्रं द्यां द्युलोकं परि परितः ईयते गच्छति । अघ्न्यः- गौरित्येके, प्रजापतिरादित्य इति स्कन्दस्वामी । अहन्तव्यः, पर्वतः, दृढत्वात् इति सायणः । अत्र पर्वत एव ग्राह्यः, तात्पर्योपपत्तेः । अश्विनोः रथस्य एकं चक्रं पृथिव्या उच्चैः प्रदेशे, अन्यत् दिवि । रथश्च नियतो गतिविशेषः सङ्केतशब्दो ग्राह्यः । तस्य एकं चक्रं पर्वतस्य मूर्धनि नियमितम्, अन्यद् दिवं परितो गच्छति, दिवं प्रति गच्छति वा (परि कर्मप्रवचनीयः 'प्रति' इत्यर्थे ग्राह्य इति स्कन्दस्वामी) । इदमत्र रहस्यं बोध्यम् । अन्नमयप्रज्ञाभुवः उन्नते पदे, मानुषस्य परिपक्के चेतःशिखरे आश्विनमेकं चक्रं नियमितम्, तादृशस्य पर्वतस्य मूर्धनि हि प्रज्ञानोदयरश्मेः प्रथमं स्वागतं भवति । तत्र ह्याश्विनं ज्योतिर्मयं रथं आस्थाय मधुमत्तमयोरश्विनोर्योषा दिवो दुहिता उषोदेवी दिवमारोहति, यत्र अन्यद्रथचक्रं दिव्यं स्थानं गच्छति । अश्विनोर्व्यापारमधिकृत्य अन्यत्र प्रोक्तमवधेयम् (पृ. ११४-११५) । दिवि पृथिव्यां अश्विनोः सञ्चारः 'पर्वतस्य मूर्धनि' इत्यन्यत्र मन्त्रवर्णः स्पष्टो भवति 'यानि स्थानानि अश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु । नि पर्वतस्य मूर्धनि सदन्त' (७-७०-३) । अश्विनोः रथः ज्योतिर्मयः, 'आ यातं अश्विना रथेन सूर्यत्वचा' (८-८-२) 'हिरण्यवन्धुरं हिरण्याभीशुं दिविस्पृशम्' (८-५-२८) ऋत-सम्बन्धद्योतकमेव हिरण्य-सूर्य-ज्योतिरादिकमवधेयम् । रथो ह वां ऋतजा अद्रिजूतः' (३-५८-८) । अश्विभ्यां सह तं रथमास्थितामुषसमधिकृत्यापि 'ता घा ता भद्रा उषसः पुरासुः अभिष्टिद्युम्ना ऋतजातसत्याः' (४-५१-७) इति बहुवचनेनोक्तम् ॥

अथ उषसस्तृचः, तत्र तृचे प्रथमां सूक्ते विंशीमाह-

कस्त॑ उषः कधप्रिये भु॒जे मर्तो॑ अमर्त्ये । कं न॑क्षसे विभावरि ॥२०॥

कः ते उषः कधऽप्रिये भुजे मर्तः अमर्त्ये कम् नक्षसे विभाऽवारि ॥

हे कधप्रिये स्तुतिप्रिये, (कथ वाक्यप्रबन्धे, थकारस्य धकारः छान्दसः तथा आकारस्य ह्रस्वः) उषः उषःशब्दाभिधेये, ऋतस्य उत्तमज्योतिषः सूर्यस्य प्रादुर्भावात् प्राक् तं आगामिनं ज्ञापयन्ती या दिवो दुहिता दैव्या भा प्रसीदति सैवोषोदेवी भवति, तां सम्बोधयति । हे अमर्त्ये मरणवर्जिते, नित्यसत्यत्वात्, कः मर्तः को मनुष्यः ते भुजे तव भोगाय त्वां भोक्तुं (भुजेः सम्पदादिलक्षणः क्विप्, 'भुक्' तस्मै) प्रभवतीति शेषः । हे विभावारि विशिष्टभासम्पन्ने, (विपूर्वाद् भातेर्वनिप् मत्वर्थीयः, नकारस्य रेफादेशः) कं कीदृशं मनुष्यं नक्षसे त्वं प्राप्नोषि (नक्षतिर्गत्यर्थः)? उक्तलक्षणायाः उषसः प्रसादाय कीदृगधिकारी भवतीति पृच्छति । ईदृशेन प्रश्नेन 'मां अधिकारिणं कुरु देवि' इति प्रार्थना ध्वन्यते । ऋषयः पूर्वे हार्दैः स्तोत्रैर्देवताप्रसादं लेभिरे । नेह साधारण उषःकाल एवं स्तुतः । स सर्वस्यापि प्राणिजातस्य प्रत्यक्षो भवति प्रत्यहम् । तत्र मनुष्यस्य विशिष्टा योग्यता नावश्यकी, चक्षुष्मत्त्वमलम् । यदि प्रभातसमये मनुष्याणां लोकव्यवहारप्रवृत्तिरेव उषसो भोग इत्यभिप्रेतः स्यात्, तदा अविकलशरीरेन्द्रियादिकरणः सर्वोऽपि प्राणिलोकः उषसो भोगाय प्रभवेत्, प्रभवत्येव । प्रत्यूषसमयमभिलक्ष्य उन्मत्तजनमन्तरा न कोऽपि स्वस्थवृत्तः पुरुषः 'हे देवि, विभावरि, कस्त्वामुपभोक्तुं क्षमः' इति पृच्छेत् । न वा भ्रान्तो मन्त्रद्रष्टा, प्राकृतो वा जनः ॥

तृचे द्वितीयां सूक्ते एकविंशीमाह—

व॒यं हि ते॑ अम॑न्म॒ह्यान्ता॒दा प॑रा॒कात् । अश्वे॒ न चि॑त्रे अरुषि ॥२१॥

व॒यम् हि ते॒ अम॑न्महि आ अन्ता॑त् आ प॒रा॒कात् अश्वे॑ न चि॒त्रे॒ अ॒रु॒षि॒ ॥

हे अरुषि आरोचमाने चित्रे विचित्रे विविधवर्णयुक्ते अश्वे न वडवा इव अवस्थिते (उपभोग-द्रुतगतिकत्वादिद्योतनार्थेयमुपमा) हे उषः, वयं स्तोतारो मनुष्याः ते त्वां विभक्तिव्यत्ययः, आ पराकात् परस्ताद् दूरस्थानादारभ्य आ अन्तात् समीपपर्यन्तं, अथवा दूरे वा समीपे वा अमन्महि ध्यायामः । अस्माकं मतिमास्थिताऽसि त्वं दूरादेव न केवलं समीप एव (मन ज्ञाने, श्यनो लुक्, छन्दसि बहुलम्)

हि अवधारणे । तृतीयपादे नञ् उपमार्थीयः । 'न अमन्महि' इति प्रथमचरणे संयोजितं सायणीये । न बोद्धुं समर्था इति निषेधार्थको नञ् इति व्याख्यातम् । अयुक्त एवंविधोऽन्वयः ॥

तृचे तृतीयां सूक्ते द्वाविंशीमाह–

त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः । अस्मे रयिं नि धारय ॥२२॥

त्वम् त्येभिः आ गहि वाजेभिः दुहितः दिवः अस्मे इति रयिम् नि धारय ॥

दिवः द्युलोकस्य, सर्वस्यास्य पितुरूर्ध्वधाम्न इत्यर्थः । दुहितः पुत्रि, हे उषः, त्येभिः तैः दिव्यैः वाजेभिः वाजैः दिव्याभिः संमृद्धिभिः सहेत्यर्थः । त्वं आ गहि आगच्छ । अस्मे (अस्मासु सप्तम्याः शे आदेशः) रयिं धनं दिव्यां सम्पदं, नि धारय नितरां स्थापय, प्रतिष्ठापयेत्यर्थः ॥

इति प्रथमस्य द्वितीये एकत्रिंशो वर्गः

इति प्रथमे मण्डले षष्ठोऽनुवाकः

सप्तमेऽनुवाके पञ्च सूक्तानि । तत्र त्वमग्ने प्रथम इति प्रथमं सूक्तं अष्टादशर्चं आग्नेयम् । हिरण्यस्तूप आङ्गिरस ऋषिः । अष्टमीषोडश्यष्टादश्यस्त्रिष्टुभः, शिष्टा जगत्यः ॥

त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥१॥

त्वम् अग्ने प्रथमः अङ्गिराः ऋषिः देवः देवानाम् अभवः शिवः सखा तव व्रते कवयः विद्मनाऽअपसः अजायन्त मरुतः भ्राजत्ऽऋष्टयः ॥

हे अग्ने, त्वं प्रथमः आद्यः अङ्गिराः अङ्गिरोनामकः अङ्गिरसां सर्वेषां मूलभूतः ऋषिः द्रष्टा, देवः स्वयं देवः देवानां सर्वेषां देवानां शिवः शोभनः सखा सखिभूतः अभवः भवसि, लडर्थे लङ् । तव व्रते त्वदीये कर्मणि, त्वत्कर्तृककर्मणा हेतुभूतेन मरुतः मरुत्संज्ञका देवाः अजायन्त जाताः, जायन्ते वा । कीदृशाः? कवयः द्रष्टारः विद्मनापसः विद्मनानि वेदनवन्ति अपांसि कर्माणि

येषां ते ज्ञानवत्कर्माणो मरुत इति सायणानुसारतः । विद्मना ज्ञानेन अपांसि येषां त इति युक्तम् (विद ज्ञाने, अस्मात् मक्प्रत्ययः, विद्मना इति तृतीया, अलुक्) । **भ्राज-दृष्टयः** भ्राजमानाः दीप्ताः ऋष्टयः येषां ते दीप्तायुधा इत्यर्थः, भ्राजत् इति व्यत्ययेन शतृ । अग्निरङ्गिरसामाद्यः, तस्य व्यापारमहिम्ना उक्तलक्षणा मरुतोऽजायन्त इत्युक्तम् । अङ्गिरोविचारः अन्यत्र सविस्तरं क्रियते । तेन विशदं स्यादाङ्गिरसं तत्त्वम् ॥

द्वितीयामृचमाह–

त्वम॑ग्ने प्रथ॒मो अङ्गि॑रस्तमः क॒विर्दे॒वाना॒ं परि॑ भूषसि व्र॒तम् ।
वि॒भुर्विश्व॑स्मै॒ भुव॑नाय॒ मेधि॑रो द्विमा॒ता श॒युः क॑ति॒धा चि॑दा॒यवे॑ ॥२॥

त्वम् अ॒ग्ने॒ प्र॒थ॒मः अङ्गि॑रःऽतमः क॒विः दे॒वाना॑म् परि॑ भू॒ष॒सि॒ व्र॒तम्
वि॒ऽभुः विश्व॑स्मै भुव॑नाय मेधि॑रः द्वि॒ऽमा॒ता श॒युः क॒ति॒धा चि॒त् आ॒यवे॑ ॥

हे **अग्ने, त्वं प्रथमः** आद्यः **अङ्गिरस्तमः** अतिशयेन अङ्गिराः अङ्गिरःश्रेष्ठ इत्यर्थः । अङ्गिरःशब्दस्य सत्त्ववचनत्वेन रूढावपि तमप्-प्रत्ययपरस्य तस्य गुणवचनतया प्रयोगो यौगिकत्वं ज्ञापयतीति बोध्यम् । **कविः** अतीन्द्रियार्थदर्शी सन् **देवानां** इत-रेषां **व्रतं** कर्म **परि भूषसि** परितोऽलङ्करोषि । किं च त्वं **विश्वस्मै** सर्वस्मै **भुव-नाय** लोकाय अनुग्रहार्थं **विभुः** विशिष्टो विविधो वा भवसि (विपूर्वकात् भवतेर्डु-प्रत्ययः) । **मेधिरः** मेधावान् **द्विमाता** द्वयोर्लोकयोर्माता निर्माता, यजमाने दिव्यां भौमां च विततां द्विरूपां चितिशब्दवाच्यां प्रज्ञां आधत्तेऽग्निरित्यर्थः । द्यावा-पृथिव्यौ मातरौ यस्यासौ इति विग्रहे, उभयोश्चित्योः सङ्गतयोर्जायतेऽग्निः । उभयोः अरण्योरिति याज्ञिकाः । तादृशस्त्वं **आयवे** मनुष्यार्थं **कतिधा चित्** कतिभिः विधाभिर्वा **शयुः** शयानः, मनुष्येषु वससि? यावन्तो मनुष्यास्तावन्तस्तव प्रकारास्तेषु वर्तन्त इत्यर्थः । शयुः– शीङ् स्वप्ने, अस्मात् उ-प्रत्ययः । आयवे– एतेः उण्-प्रत्ययः ॥

तृतीयामृचमाह–

त्वम॑ग्ने प्रथ॒मो मा॑त॒रिश्व॑न आ॒विर्भ॑व सुक्र॒तूया वि॒वस्व॑ते ।
अरे॑जेतां॒ रोद॑सी होतृ॒वूर्ये॒ऽस॑घ्नोर्भा॒रमय॑जो म॒हो व॑सो ॥३॥

त्वम् अग्ने प्रथमः मातरिश्वने आविः भव सुक्रतुऽया विवस्वते अरेजेताम् रोदसी इति होतृऽवूर्ये असघ्नोः भारम् अयजः महः वसो इति ॥

हे अग्ने, त्वं मातरिश्वने वायवे प्रथमः मुख्यः, यजमाने मातरिश्वनो वैभवविलासात् प्राक् कविक्रतोरग्नेः प्राकट्यमवश्यम्, तस्मान्मातरिश्वने प्रथमोऽग्निः । विवस्वते परिचर्यां कुर्वते (एवं सायणीयम्) यजमानाय तदनुग्रहार्थं सुक्रतुया शोभनकर्मेच्छया युक्तः सन् आविर्भव प्रकाशो भव । अथवा सुक्रतूया शोभनकर्मेच्छया 'विवस्वते' प्रकाशमानाय आविर्भवेति उपपन्नम् । होतृवूर्ये होत्रा वरणीये कर्मणि, होतृभूतेन अग्निना वरणीयो यज्ञः तस्मिन् प्रवर्तमाने सति, रोदसी द्यौश्च पृथिवी च, ताभ्यां लक्षिता ऊर्ध्वा दिव्या चितिः अधस्तात् पृथ्वीगता चितिः उभे च अरेजेतां अकम्पेताम्, अग्नेर्यज्ञहोतृत्ववरणे तयोः स्तब्धयोर्निद्रितयोरिव स्थितयोः यजमाने विलसितारम्भावद्योतनार्थकं कम्पनं बोध्यम् । तादृश्यहिमा होतुरग्नेः । भारं यज्ञस्य निर्वाहकार्यभारं असघ्नोः सोढवानसि । हे वसो विश्वस्य लोकस्य वसुभूत, महः महतो देवान् अयजः त्वं इष्टवानसि । मातरिश्वने– माता मानहेतुराकाशः अन्तरिक्षं तत्र श्वसिति, श्वन्नुक्षन्नित्यादौ मातरिश्वन्-शब्दः कन्-प्रत्ययान्तो निपातितः । सुक्रतुया– सुक्रतुमात्मन इच्छति, ततो भावे अकारप्रत्ययः, टाप्, डादेशः । विवस्वते– विवासतिः प्रकाशने परिचरणकर्मा वा । होतृवूर्ये– होत्रा व्रियत इति, उत्वं छन्दसि । असघ्नोः– षघ हिंसायां, अत्र सहनार्थः । महः– महत इति अत्-लोपः छान्दसः ॥

चतुर्थीमृचमाह–

त्वम॑ग्ने॒ मन॑वे॒ द्याम॑वाशयः पुरू॒रव॑से सु॒कृते॑ सु॒कृत्त॑रः ।
श्वा॒त्रेण॒ यत्पि॒त्रोर्मुच्य॑से॒ पर्या त्वा॒ पूर्व॑मनय॒न्नाप॑रं॒ पुनः॑ ॥४॥

त्वम् अग्ने मनवे द्याम् अवाशयः पुरूरवसे सुऽकृते सुकृत्ऽतरः श्वात्रेण यत् पित्रोः मुच्यसे परि आ त्वा पूर्वम् अनयन् आ अपरम् पुनरिति ॥

हे अग्ने, त्वं मनवे मनोः मन्तुः मननसामर्थ्यं प्राप्तवतः पुरुषस्य अनुग्रहाय इत्यर्थः, द्याम् द्युलोकं दिव्यं धामेत्यर्थः, अवाशयः शब्दितवानसि प्रकटितवान्, साध्यं प्राप्तव्यं चोर्ध्वं दिव्यं स्थानमिति प्रकाशितवानसीत्यर्थः। तथा सुकृते शोभनकर्मकारिणे पुरूरवसे पुरु बहु रौति शब्दायत इति पुरूरवास्तस्मै उर्वशीमाधिगन्तुं बह्वाक्रन्दनकारिणे यजमानात्मने पुरुषाय सुकृत्तरः अतिशयेन शोभनकर्मकारी भूत्वा त्वं द्यां अवाशय इति सम्बन्धः। यत् यदा पित्रोः अरणिलक्षितयोः द्यावापृथिव्योः चिद्विशेषभूतयोरूर्ध्वाधःस्थानयोः शक्त्योः श्वात्रेण क्षिप्रमंथनेन पारि मुच्यसे परितो मुक्तो भवसि, शक्तिमथनाज्जायसे, तदा तथोत्पन्नं त्वां पूर्वं पुरस्तात् आनयन् आनीयाग्रतः अस्थापयन्। पुनः ततः परं अपरं पश्चात् आ आनयन्, प्रथमं पुरोहितं आहवनीयं विधाय ततः प्रत्यक्स्थितं अन्तरधीश्वरं गृहपतिं अकुर्वन्नित्यर्थः। अवाशयः- वाशृ शब्दे। पुरूरवसे- पूर्वपदस्य दीर्घो निपात्यते, रु शब्दे इत्यस्मादौणादिकोऽसुन्। सुकृते- सुकर्म-पापादिषु कृञ इति क्विप्, ततस्तुक् ॥

पञ्चमीमृचमाह-

त्वम॑ग्ने वृ॒ष॒भः पु॑ष्टि॒वर्ध॑न॒ उद्य॑तस्रुचे भवसि श्र॒वाय्य॑ः ।
य आहु॑तिं॒ परि॒ वेदा॒ वष॑ट्कृति॒मेका॑युरग्रे॒ विश॑ आ॒विवा॑ससि ॥५॥

त्वम् अ॒ग्ने वृ॒ष॒भः पु॒ष्टि॒ऽवर्ध॑नः उद्य॑तऽस्रुचे भ॒व॒सि॒ श्र॒वाय्य॑ः यः आऽहु॑तिं परि॑ वेद॑ वष॑ट्ऽकृतिम् एक॑ऽआयुः अग्रे॑ विश॑ः आ॒ऽविवा॑ससि ॥

हे अग्ने, त्वं वृषभः वर्षिता अभीष्टानाम्, पुष्टिवर्धनः पुष्टेः यजमानपोषस्य वर्धनो वर्धयिता उद्यतस्रुचे उद्यता उद्धृता स्रुक् घृतस्राविणी पात्री येन तस्मै धीगतदीप्तिसर्वोपकरणसम्पन्नाय यजमानाय तदनुग्रहायेत्यर्थः, श्रवाय्यः श्रवणीयः मन्त्रात्मकैराह्वानैरिति शेषः भवसि। यः यो यजमानः आहुतिं प्रधानाह्वानार्थां होमक्रियां परि परितः सर्वतः वेद जानाति, कीदृशीमाहुतिम्? वषट्कृतिं वषट् इति कृतिः करणं यस्यां तां, देवेभ्यः सम्प्रदाने वषट्कारस्य वैशिष्ट्यं श्रौतकर्मसु प्रसिद्धम्,

तदनुरोधेन अन्तर्यजनेऽपि होतुः आह्वानात्परं देवेभ्यः सम्प्रदाने प्रवर्तमाने वीर्यवान् दार्ढ्यप्रदो वषट्कारशब्दो बोध्यः । य ईदृशीं वषट्कारयुक्तामाहुतिं निर्वर्तयितुं सर्वथा जानाति तं प्रथमं भगवानग्निः प्रकाशवन्तं करोति, अनन्तरं तेन द्वारा इतरानपीत्याह । अत्र यच्छब्दश्रवणात् 'तम्' इति तच्छब्दाध्याहारः । एकायुः एकः अद्वितीयः आयुः जीवनभूतः पुरुषः सर्वेषां मनुष्याणां समष्टिभूत एको मनुष्यस्त्वं हे अग्ने, **अग्ने** प्रथमं तं **आविवाससि** प्रकाशयसि, ततः **विशः** अन्यान् मनुष्यान् आविवाससीति योजना । अत्र तृतीयपादस्थो यच्छब्दः अग्निपरतया ग्रहीतुं शक्यः । तर्हि अयमर्थः । योऽग्निः वषट्कारयुक्तामाहुतिं 'परि वेद' परितो मनुष्येभ्यो लभते, स त्वमग्ने एकायुः इत्यादि पूर्ववत् । एकायुः– द्वितीयर्चि 'कतिधा चिदायवे' इति पठितमिहावधार्यम् । बहुधा जीवन्नग्निरेकायुरुक्तः । एकायुर्मुख्यान्न इति सायणीयम् । अविच्छिन्नायुरमृत इति वेङ्कटमाधवः । वायुरेव आयुः वकारलोपश्छान्दस इति सायणीयो विकल्पः । गत्यर्थात् इण्-धातोः गुणे उण्-प्रत्ययः । आयुशब्दः प्राणिसामान्ये विशेषतो मनुष्ये प्रसिद्धो वेदे, आयुशब्दस्तु क्लीबलिङ्गः जीविते रूढः, एतेर्गत्यर्थादेव निष्पन्नः । आविवासति– प्रकाशार्थे प्रयुक्तः प्रायशो वेदे । परिचरतिकर्मेति पठितः क्वचिदुपपद्येत ॥

इति प्रथमस्य द्वितीये द्वात्रिंशो वर्गः

षष्ठीमृचमाह–

त्वम॑ग्ने वृ॒जिनव॑र्तनिं॒ नरं॒ सक्म॑न्पिपर्षि वि॒दथे॑ विचर्षणे ।
यः शूर॑साता॒ परि॑तक्म्ये॒ धने॑ द॒भ्रेभि॑श्चि॒त्सम॑ृता॒ हंसि॒ भूय॑सः ॥६॥

त्वम् अ॒ग्ने॒ वृ॒जिनऽव॑र्तनिम् नर॑म् सक्म॑न् पि॒प॒र्षि॒ वि॒दथे॑ वि॒ऽच॒र्ष॒णे॒
यः शूर॑ऽसाता परि॑ऽतक्म्ये धने॑ द॒भ्रेभि॑ः चि॒त् सम्॒ऽऋ॑ता हंसि॑ भूय॑सः ॥

हे **विचर्षणे** विशिष्टद्रष्टः, सर्वद्रष्टः! **अग्ने, त्वं वृजिनवर्तनिं** वृजिना वर्जनीया कुटिला वर्तनिः पद्या यस्य तं कुटिलमार्गचरं (वृजेः किच्चेति इनच्, वृतेश्चेति अनिः) **नरं** पुरुषं **सक्मन्** सक्मनि सचनीये समवेतुं योग्ये (षच समवाये, मनिन् प्रत्ययः) **विदथे** ज्ञानगम्ये स्थाने 'विदथा वेदितव्यानि स्थानानि' इति सायणोऽन्यत्र [१-५१-२] (कर्मणि, यज्ञ इति कर्मठाः । अन्तर्यागोऽपि वेदनात्मको विदथ

उच्यते । विदेर्ज्ञानार्थाद् अथ-प्रत्ययः) । **पिपर्षि** पूरयसि पालयसि वा, त्वद्भक्तं कुटिलपदादपवर्त्य विदथशब्दवाच्यं वेदितव्यं दिव्यं स्थानं सदः नीत्वा पालयसि तं पूर्णकामं करोषीत्यर्थः । **यः** त्वं **शूरसाता** शूरसातौ शूराणां सातिः सम्भजनं यत्र तत्र शूरपुरुषैः सेव्ये, **परितक्म्ये** सर्वतः गन्तव्ये परितः प्रयासेन चरित्वा प्राप्तव्ये (तकतिर्गतिकर्मा) **धने** निमित्ते, शौर्योपेतैः परिश्रमलभ्ये दिव्ये धने लब्धव्यतया निमित्तभूते सति 'चर्मणि द्वीपिनं हन्ति' इतिवत् **दभ्रेभिश्चित्** अल्पैरपि बलेन सङ्ख्यया वा न्यूनैरपि त्वद्भक्तैः **समृता** समृतौ सङ्गतौ, सङ्ख्याबलाधिकैः सह अल्पानां बलपरीक्षायां प्राप्तायामित्यर्थः (समृतिः सम्पूर्वक ऋतिर्गतिः) । **भूयसः** सङ्ख्या-बलाधिकान् **हंसि** मारयसि, तावाननुग्रहस्तव भक्तेषु यावता स्वल्पबलैरपि त्वद्भक्तै-र्लब्धव्ये दिव्यधने तद्विघातिभिः सह युद्ध्वा जेतव्ये, भूयांसोऽपि त्वद्भक्तवैरिणः पराभूता भवन्ति ॥

सप्तमीमृचमाह—

त्वं तम॑ग्ने अमृत॒त्व उ॑त्त॒मे मर्तं॑ दधासि॒ श्रव॑से दि॒वेदि॑वे ।
यस्ता॑तृषा॒ण उ॒भया॑य॒ जन्म॑ने॒ मय॑ः कृ॒णोषि॒ प्रय॒ आ च॑ सू॒रये॑ ॥७॥

त्वम् तम् अ॒ग्ने अ॒मृ॒त॒ऽत्वे उ॒त्ऽत॒मे मर्त॑म् द॒धा॒सि॒ श्रव॑से दि॒वेऽदि॑वे यः त॒तृ॒षा॒णः उ॒भया॑य जन्म॑ने मय॑ः कृ॒णोषि॑ प्रय॑ः आ च॒ सू॒रये॑ ॥

हे **अग्ने, त्वं तं** तथाविधं त्वद्भक्तं **मर्तं** मनुष्यं **उत्तमे** उत्कृष्टे **अमृतत्वे** अमृतधर्मे **दधासि** धारयसि मरणशीलं नरं मरणरहिते उत्तमे पदे स्थापयसीत्यर्थः । किमर्थम्? **दिवेदिवे** प्रत्यहं **श्रवसे** श्रुतिसम्पत्तये दिव्यावेशश्रवणायेत्यर्थः । अन्नार्थे इति कर्मठाः । प्रतिदिनं पुरुषस्य अन्नलाभाय उत्तमे अमृतत्वे स्थानमवश्यं किल! 'श्रवसे' कीर्तये ख्यापनायेति चेत् कर्मपरार्थस्य न स्यात् क्षतिः । **यः** यजमानः **उभयाय** द्विविधाय **जन्मने** मानुषं दैव्यमिति द्विविधमपि जन्म एकत्र इहैव प्राप्तुं **ततृषाणः** अतिशयेन तृष्णायुक्तो भवति (त्रि तृषा पिपासायां लिटः कानच्) तस्मै **सूरये** प्राज्ञाय

मयः सुखं प्रयः च प्रियं च (प्रयोभिरित्यत्र गतम्- १-२-४) आकृणोषि सर्वतः करोषि । सत्येव मानुषे जन्मनि साध्याय दिव्याय जन्मने तृष्णा विवक्षिता, अत एव 'उभयाय जन्मने' इत्यत्र मनुष्यस्य निर्याणात्परं दिव्यं जन्मेह न काङ्क्षितम् । 'द्विपदां चतुष्पदां च लाभाय' इति कर्मठाः ॥

अष्टमीमृचमाह-

त्वं नो॑ अग्ने स॒नये॒ धना॑नां य॒शसं॑ का॒रुं कृ॑णुहि॒ स्तवा॑नः ।
ऋ॒ध्याम॒ कर्मा॒पसा॒ नवे॑न दे॒वैर्द्या॑वापृथिवी॒ प्राव॑तं नः ॥८॥

त्वम् न॒ः अ॒ग्ने स॒नये॑ धना॑नाम् य॒शस॑म् का॒रुम् कृ॒णु॒हि॒ स्तवा॑नः ऋ॒ध्याम॑ कर्म॑ अ॒पसा॑ नवे॑न दे॒वैः द्या॒वा॒पृ॒थि॒वी॒ इति॑ प्र अ॒व॒त॒म् न॒ः ॥

हे अग्ने, त्वं नः अस्मान् मामित्यर्थे वचनव्यत्ययः, अथवा सम्बन्धे षष्ठी अस्माकं अन्तरात्मानं (स्कन्दस्वामीयम्) यशसं यशोयुक्तं कारुं कर्तारं स्तोत्राणां, स्तोतारमित्यर्थः कृणुहि कुरु । मां अस्मदीयमन्तरात्मानं वा वैभवोपेतं स्तोतारं कुरु इत्यर्थः । किमर्थम्? धनानां सनये दिव्यधनलाभाय । कीदृशस्त्वम्? स्तवानः स्तूयमानः (स्तौतेरानच्-प्रत्ययः) । ऋध्याम ऋद्धिं प्राप्नुयाम त्वत्प्रसादात् । नवेन नूतनेन अकृतपूर्वेण अपसा कर्मणा नः कर्म इदमस्मदीयं यजनं देवैः अन्यैर्देवैः सह हे द्यावा-पृथिवी उभे देवते प्रावतं प्रकर्षेण वर्धयेथाम् ॥

नवमीमृचमाह-

त्वं नो॑ अग्ने पि॒त्रोरु॒पस्थ॒ आ दे॒वो दे॒वेष्व॑नवद्य॒ जागृ॑विः ।
त॒नू॒कृद्बो॑धि॒ प्रम॑तिश्च का॒रवे॒ त्वं क॑ल्याण॒ वसु॒ विश्व॒मोपि॑षे ॥९॥

त्वम् न॒ः अ॒ग्ने॒ पि॒त्रोः उ॒पऽस्थे॑ आ दे॒वः दे॒वेषु॑ अ॒न॒व॒द्य॒ जागृ॑विः त॒नू॒ऽकृत् बो॒धि॒ प्रऽम॑तिः च॒ का॒रवे॑ त्वम् क॒ल्या॒ण॒ वसु॑ विश्व॑म् आ उ॒पि॒षे॒ ॥

अनवद्य निर्दोष हे अग्ने, देवेषु सर्वेषु मध्ये जागृविः जागरणशीलः

देवः (जागृ निद्राक्षये, किन्) **त्वं पित्रोः** द्यावापृथिव्योः, द्युस्थानचितेः पृथिवी-स्थानचितेः उभयोश्च **उपस्थे** समीपे (उपपूर्वकात् तिष्ठतेः कः) **आ** आसीनः वर्तमानः **सन्** **नः** अस्माकं **तनूकृत्** नवशरीरकारी भूत्वा, अत्र नवं दिव्यजन्मयोग्यं शरीरं यजमानस्य विधातुं प्रभुरग्निरिति बोध्यम् । **बोधि** बुध्यस्व, अनुग्रह एव बोधः । **कारवे** स्तोत्र-कृते **प्रमतिश्च** प्रकृष्टज्ञानश्च भव । हे **कल्याण** भद्रस्वरूप, त्वं **विश्वं** सर्वं **वसु** धनं **ओविषे** आवपसि यजमाने (डु वप् बीजसन्ताने, छान्दसो लिट् लडर्थे) ॥

दशमीमृचमाह–

त्वम॑ग्ने प्रम॑तिस्त्वं पि॒तासि॑ न॒स्त्वं व॑य॒स्कृत्तव॑ जा॒मयो॑ व॒यम् ।
सं त्वा॒ राय॑ः श॒तिन॒ः सं स॑ह॒स्रिण॑ः सु॒वीरं॑ यन्ति व्रत॒पाम॑दाभ्य ॥१०॥

त्वम् अ॒ग्ने प्रऽम॑तिः त्वम् पि॒ता अ॒सि न॒ः त्वम् व॒यः॒ऽकृत् तव॑ जा॒मय॑ः व॒यम्
सम् त्वा॒ राय॑ः श॒तिन॑ः सम् स॒ह॒स्रिण॑ः सु॒ऽवीर॑म् य॒न्ति॒ व्र॒त॒ऽपाम् अ॒दा॒भ्य॒ ॥

हे **अग्ने, त्वं प्रमतिः** प्रकृष्टज्ञानोऽसि, **नः** अस्माकं **पिता** पालकोऽसि, **वयस्कृत्** वयः बलं शारीरं मानसं च करोतीति वयस्कृत् सोऽसि (वेति, लुग्विकरणो गतिव्याप्त्यादिबह्वर्थो धातुः, वयः आयुष्यपि वर्तते, अत्र आयुष्यप्रद इति सायणीयम्, पाकद्वारेण अन्नानां कर्ता इति स्कन्दस्वामी) । **वयं** उपासकाः **तव जामयः** बन्धवः । हे **अदाभ्य** न केनापि दम्भयितुं शक्य, अप्रतिहतबल, **त्वा** त्वां **शतिनः रायः** शतसङ्ख्याकानि धनानि **संयन्ति** सम्यक् प्राप्नुवन्ति, तथा **सहस्रिणः** रायः सं-यन्तीति सम्बन्धः । कीदृशं त्वाम्? **सुवीरं** शोभना वीरा यस्य तं शुभवीर्यसम्पन्नं इत्यर्थः । किंच **व्रतपां** व्रतं दिव्यं कर्म पाति रक्षतीति व्रतपाः तम् ॥

इति प्रथमस्य द्वितीये त्रयस्त्रिंशो वर्गः

एकादशीमृचमाह–

त्वाम॑ग्ने प्रथ॒मम॒ायुम॒ायवे॑ दे॒वा अ॑कृण्व॒न्नहु॑षस्य वि॒श्पति॑म् ।
इळा॑मकृण्व॒न् मनु॑षस्य॒ शास॑नीं पि॒तुर्यत्पु॒त्रो मम॑कस्य॒ जाय॑ते ॥११॥

त्वाम् अग्ने प्रथमम् आयुम् आयवे देवाः अकृण्वन् नहुषस्य विश्पतिम्
इळाम् अकृण्वन् मनुषस्य शासनीम् पितुः यत् पुत्रः ममकस्य जायते ॥

हे **अग्ने, देवाः आयवे** मनुष्यस्य अर्थाय तादर्थ्ये चतुर्थी, **नहुषस्य** मनुष्यस्य **विश्पतिं** राजानं **प्रथमं** प्रधानं आद्यं वा **आयुं** मनुष्यं जीवभूतं **अकृण्वन्** अकुर्वन् । **यत्** यदा **ममकस्य** मामकस्य **पितुः** पालकस्य द्युस्थानपुरुषस्य **पुत्रः** तदंशः **जायते** मनुष्ये प्रादुर्भवति, तदा त्वामग्निमेव **मनुषस्य** मनुष्यस्य **शासनीं** उपदेष्ट्रीं **इळां** पश्यन्तीं वाचं **अकृण्वन्** अकुर्वन्, कुर्वन्तीति लडर्थो युक्तः । आयुम्– गत्यर्थात् एतेः, गतम् । नहुषस्य– णह बन्धने, उषच् । मनुषस्य– ज्ञानार्थात् मनेः उषच् । शासनीम्– शिष्यतेऽनयेति शासनी करणे ल्युट् । ममकस्य– अस्मच्छब्दस्य ममकादेशः, संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः ॥

अस्मिन् मन्त्रे आयु-नहुष-मनुषशब्दाः मनुष्यपर्यायाः साकूतास्तात्पर्यावगतये कल्पन्ते । यद्यपि पुराणकथाप्रसिद्धानि ययाति-नहुषादीनि सूक्तेऽस्मिन् श्रूयन्ते, यद्यपि ऐतिहासिकपुरुषव्यक्तयो निर्दिष्टा इति स्थूलदृशां ग्रहणं शक्यम्, यद्यपि च पुराणकथोदाहरणेन ईदृशानि सूक्तानि कथञ्चित् पूर्वैर्व्याख्यातानि पुराणकथापारमार्थिकत्वनिरूपणानीव संवृत्तानि, तथाऽपि नहुष-मनुषादेः पर्यायशब्दस्य यौगिकार्थमवधाय मन्त्रार्थविचारे कृते तात्पर्यं सुगमं भवति । देवाः जगद्व्यापारयुक्ताः सर्वेश्वरविभवभूताः अग्निं प्राणबलसम्पन्नस्य नरस्य तदर्थं वा प्राणबलभूतं प्रथमं जीवं विदधते 'आयवे प्रथमं आयुम्' षष्ठ्यर्थे चतुर्थी चेत् 'प्राणस्य प्राणः' इतिवत् जीवस्य जीवः, आयोरायुः । ततस्ते परस्परस्नेहबन्धोपेतस्य मनुष्यस्य राजानं कुर्वन्ति 'नहुषस्य विश्पतिम्' । यदा अग्नेर्मनुष्यस्य च स्नेहबन्धः सिद्ध्यति, तदा स एव नेता प्रभुर्भवति । अत्र नहुषशब्दार्थविवरणे सायणीयमुपयुक्तं द्रष्टव्यम् (१-१२२-८) । यदा मनुष्ये दिव्यस्य पितुः अंशजः पुत्रः अग्निः लब्धजन्मा भवति, तदा तमग्निमेव 'मनुषः' मतिमतो मनुष्यस्य 'इळां' पश्यन्तीं वाचं कुर्वन्ति । उदितज्ञानस्य पुंसः अग्निरेव इळा भवति । आप्रीसूक्ते इळा-सरस्वत्योर्विवेचनाय इळायास्तत्र दृष्टिप्राबल्यमुक्तम् । इळा वाक् प्रसिद्धा वेदे, सा पश्यन्ती वागिति बोध्यम् । 'ममकस्य पितुः' अत्र दिव्यः पिता सर्वस्य जगतः पितैव मदीयः पितेति ऋषिणा व्यवहारे स्वसम्बन्धो भक्त्यतिशयश्च बोध्यौ ॥

द्वादशीमृचमाह–

त्वं नो॑ अग्ने तव॑ देव पा॒युभि॑र्म॒घोनो॑ रक्ष त॒न्व॑श्च वन्द्य ।
त्रा॒ता तो॒कस्य॒ तन॑ये॒ गवा॑म॒स्यनि॑मेषं॒ रक्ष॑माण॒स्तव॑ व्र॒ते ॥१२॥

त्वम् नः॒ अ॒ग्ने॒ तव॑ दे॒व॒ पा॒युऽभिः॑ म॒घोनः॑ र॒क्ष॒ त॒न्वः॑ च॒ व॒न्द्य॒
त्रा॒ता तो॒कस्य॑ तन॑ये गवा॑म् अ॒सि॒ अनि॑ऽमेषम् रक्ष॑माणः तव॑ व्र॒ते ॥

हे वन्द्य स्तुत्य, अग्ने देव, मघोनः मघवतः, मघं धननाम तद्वतः नः अस्मान् तव पायुभिः पालनैः रक्ष, तन्वश्च तनूश्च शरीराणि च अस्मत्सम्बन्धीनि रक्ष (तन्वः, शसो जसादेशः)। तव व्रते नित्ये कर्मणि, कर्तव्ये त्वदीये देवकार्ये स्थितस्त्वं अनिमेषं निमेषवर्जं विच्छेदमन्तरा रक्षमाणः रक्षितव्यं सर्वं शत्रुभ्यो रक्षन् गवां गोपदवाच्य-चिद्रश्मिधनानां तोकस्य सन्तानस्य तनये तनयस्य (षष्ठ्यर्थे सप्तमी) तत्प्रभवस्य सन्ततिविशेषस्य च त्राता असि रक्षको भवसि, न केवलं दिव्य-धनरक्षा, शरीररक्षा वा प्रार्थ्यते, आग्नेये व्रते चिद्रश्मिभूत-गोधनसन्ततिश्च रक्षिता भवतीति अग्निदेवप्रभावोऽपि वर्णितः ॥

त्रयोदशीमृचमाह–

त्वम॑ग्ने॒ यज्य॑वे पा॒युरन्त॑रोऽनिष॒ङ्गाय॑ चतुर॒क्ष इ॑ध्यसे ।
यो रा॒तह॑व्योऽवृ॒काय॒ धाय॑से की॒रेश्चि॒न्मन्त्रं॒ मन॑सा व॒नोषि॒ तम् ॥१३॥

त्वम् अ॒ग्ने॒ यज्य॑वे पा॒युः अन्त॑रः अ॒नि॒ष॒ङ्गाय॑ च॒तुः॒ऽअ॒क्षः इ॒ध्य॒से॒
यः रा॒तऽह॑व्यः अ॒वृ॒काय॑ धाय॑से की॒रेः चि॒त् मन्त्र॑म् मन॑सा व॒नोषि॑ तम् ॥

हे अग्ने, त्वं यज्यवे यजमानस्य अर्थाय तादर्थ्ये चतुर्थी, यजतेर्युप्रत्ययः, पायुः पालयिता (कृ वा पा जि–इत्यादिना उण्) अन्तरः अन्ततरः, सन्निकृष्टः पालको यजमानस्येत्यर्थः। अनिषङ्गाय न विद्यते निषङ्ग नितान्तं सङ्गो यस्य तस्मै यजमानस्यार्थाय त्वं चतुरक्षः चत्वारि अक्षीणि यस्य सः, त्रिलोक्यां तुरीये धामनि च अग्नेर्दृष्टिर्यजमानार्थं वर्तते, तथाभूतः इध्यसे दीप्यसे, चतसृषु दिक्षु अग्नेर्ज्वाला-

वेदितव्यानि प्रकर्षेण अनुशास्सीत्यर्थः ॥

पञ्चदशीमृचमाह–

त्वम॑ग्ने प्रय॑तदक्षिणं॒ नरं॒ वर्मे॑व स्यू॒तं परि॑ पासि वि॒श्वतः॑ ।
स्वा॒दु॒क्ष॒द्मा यो व॑स॒तौ स्यो॑न॒कृज्जी॑वया॒जं यज॑ते॒ सोप॒मा दि॒वः ॥१५॥

त्वम् अ॒ग्ने॒ प्रय॑तऽदक्षिणम् नर॑म् वर्म॑ऽइव स्यू॒तं परि॑ पा॒सि॒ वि॒श्वतः॑ स्वा॒दु॒ऽक्ष॒द्मा॑ यः व॒स॒तौ स्यो॒न॒ऽकृ॒त् जी॒व॒ऽया॒जम् यज॑ते सः उ॒प॒ऽमा दि॒वः ॥

हे **अग्ने, त्वम्**, **प्रयतदक्षिणं** प्रयता प्रबद्धा (यमु बन्धने) दक्षिणा युक्तायुक्तविवेकपूर्विका दानक्रिया येन तम् । पात्रमुद्दिश्य द्रव्यत्यागो दानं भवति, तच्च पात्रं देवताप्रतिनिधिभूतं बोध्यम्, अत एव दानं पावनं देवताप्रीणनं भवतीति कीर्त्यते । अथ तथाभूतं **विश्वतः** सर्वतः **परि पासि** परिरक्षसि । तत्र दृष्टान्तः । **वर्मेव स्यूतं** स्यूतं निश्छिद्रतया निष्पादितं (षिवु बन्धने) वर्मेव कवचमिव, यथा कवचं रक्षति मानुषं देहं तथा त्वं विश्वतः तं नरं परिपासि । **यः** यजमानः **स्वादुक्षद्मा** स्वाद्वन्नः अतिथिं स्वाद्वन्नेन प्रीणयतीत्यर्थः, अग्निरतिथिः प्रसिद्धो वेदे । **वसतौ** स्ववासगृहे (अन्तर्यागे स्वगृहं शरीरं भवति) **स्योनकृत्** सुखकारी अतिथीनामिति शेषः । 'स्योनशीरतिथिर्न प्रीणानः' इत्यन्यत्रापि मन्त्रवर्णोऽवधेयः (१. ७३. १.) । यश्च **जीवयाजं यजते** जीवस्य जीवतः याजं यजनं (कुत्वाभावश्छान्दसः) यावज्जीवं अनुतिष्ठति, यद्वा जीवाः प्राणिनः इज्यन्ते पूज्यन्तेऽत्रेति जीवयाजः तं अनुतिष्ठति, **सः** यजमानः **दिवः** द्युलोकस्य **उपमा** समीपवर्ती भवति, इहैव स्वर्गान्तिकस्थो भवति । उपम इत्यन्तिकनाम । सोपमा संहितायां सोर्लोपः पादपूरणाय । उपमा उपमानं, दिवो दृष्टान्त इति एकेषां व्याख्या । जीवयाजमित्यत्र जीवैः पशुभिः यजनमिति बाह्यपक्षीयाः ॥

इति प्रथमस्य द्वितीये चतुस्त्रिंशो वर्गः

षोडशीमृचमाह–

इ॒माम॑ग्ने श॒रणिं॑ मीमृषो न इ॒मम॒ध्वान॒ं यमगा॑म दू॒रात् ।
आ॒पिः पि॒ता प्रम॑तिः सो॒म्याना॒ं भृमि॑रस्यृषि॒कृन्मर्त्या॑नाम् ॥१६॥

इमाम् अग्ने शरणिम् मीमृषः नः इमम् अध्वानम् यम् अगाम दूरात्
आपिः पिता प्रऽमतिः सोम्यानाम् भृमिः असि ऋषिऽकृत् मर्त्यानाम् ॥

हे **अग्ने, नः** अस्मदीयां **इमां** वक्ष्यमाणस्वरूपां **शरणिं** हिंसां (शृणोतेः हिंसार्थादौणादिकः अनि-प्रत्ययः) **मीमृषः** क्षमस्व (मृषस्तितिक्षायां स्वार्थिको णिच्, लोडर्थे लुङ्) हिंसा च अग्निदेवविषये कृतोऽपराधः, भगवन्तमग्निं अलक्षयित्वा अपथं गत्वा तस्माद्दूरतो गमनमेव सोऽपराधो व्रतलोपरूपः । तदाह । **दूरात्** दूरदेशं **यं इमं अध्वानं** मार्गं **अगाम** गतवन्तो वयम्, सः त्वद्दूरवर्तित्वात् अस्मदपराधविषयः त्वयि नः सर्वथा हितकरे मित्रे सति, विशेषतोऽपचार एवेति उत्तरार्धेन स्पष्टं भवति । त्वं **आपिः** आपयिता बन्धुः इष्टप्राप्तिकृदित्यर्थः । **पिता** पालकः पितृस्थानीयः **प्रमतिः** प्रकृष्टज्ञानयुक्तः **सोम्यानां** सोमार्हाणां देवानां सोमपायिनां **भृमिः** भ्रामकः, चालक इत्यर्थः, यजने देवान् आहूय सन्निधापयति ह्यग्निः, तस्माच्चालकः **असि । मर्त्यानां** मनुष्याणां **ऋषिकृत्** दर्शनकृत् असि । सोम्यानां अमर्त्यानां मर्त्यानां च उपकारी अग्निः । सोम्यानां अनुष्ठातॄणां मर्त्यानां आप्यादिगुणयुक्तोऽग्निरिति सायणीयम् । भृमिः– भ्रमु अनवस्थाने, भ्रमेः सम्प्रसारणं चेति इन्-प्रत्ययः ॥

सप्तदशीमृचमाह–

मनुष्वदग्ने अङ्गिरस्वदङ्गिरो ययातिवत्सदने पूर्ववच्छुचे ।
अच्छ याह्या वहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियम् ॥१७॥

मनुष्वत् अग्ने अंगिरस्वत् अंगिरः ययातिऽवत् सदने पूर्वऽवत् शुचे
अच्छ याहि आ वह दैव्यम् जनम् आ सादय बर्हिषि यक्षि च प्रियम् ॥

हे **शुचे** दीप्त! **अङ्गिरः** एतन्नामक देव! **अग्ने! सदने** अस्मदीये यजनगृहे (बहिरन्तश्च योजनीयम्) **अच्छ** अभिमुखं, अभेरर्थे अछेति निपातः । **याहि** गच्छ । तत्र दृष्टान्तः । **मनुष्वत्** मनोरिव, मनुरिव वा (तस्य तत्रेति षष्ठ्यर्थे, तेन तुल्यं क्रिया चेदिति प्रथमार्थे वा वतिः) अयमर्थः । मनोः ऋषेः यज्ञसदनं यथा त्वं गच्छसि

तथेहापि गच्छ, यथा वा मन्तॄणां मनुष्याणामाद्यो देवः मनुर्यज्ञसदनं गच्छति तथा गच्छेति भावः। एवं **अङ्गिरस्वत्** अङ्गिरसऋषेरिव, अङ्गिरादेव इव वा, **ययातिवत्** ऋषेर्ययातेरिव, ययातिर्देवभावं प्राप्तो देव इव वा, **पूर्ववत्** पूर्वे इव, पूर्वेषां इव वा, 'याहि' इति सम्बन्धः। अथ यजनसदनं गत्वा **दैव्यं** देवेषु भवं **जनं** लोकं **आवह** आनय, सर्वदेववृन्दं आनयेत्यर्थः। **प्रियं** इष्टं तं **बर्हिषि** आस्तीर्णे आसने **आसादय** उपवेशय, **यक्षि च** यज च, लोटि शपो लुक्, अन्यच्च छान्दसम्। अत्रेदमवधेयम्। मनुः, अङ्गिराः, ययातिः इति त्रयोऽपि मन्त्रद्रष्टारः। राजा नाहुष इति प्रसिद्धोऽपि ययातिः 'सुतासो मधुमत्तमाः' इति तृचस्य द्रष्टेत्यनुक्रमणिका (ऋक्सं. ९-१०१-४-६)। एवं दृष्टान्तभूतानां त्रयाणामृषीणां यजने प्रसन्नो भवत्यग्निरिति षष्ठ्यर्थे वतिः। अथ त्रयोऽपि देवाः देवभूता वा। मनुर्मन्ता देव आद्यो मनुजानाम्, अङ्गिरा अङ्गनशीलोऽग्निर्वैभवशाली देवः, ययातिश्च देवभूतः, (यस्य यातिः गतिः सर्वत्र वायोरिव रथगतिरिति तत्त्वबोधिनीकारः, 'यती प्रयत्ने' इति धातोर्वेति नव्यानामेके, सर्वथा गतिवेगवान् उद्यमी दैवतविभव इति वयम्) एवं त्रयोऽपि यजने प्रसन्ना इति प्रथमार्थे वतिः॥

अष्टादशीमृचमाह-

एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा।
उत प्र णेष्यभि वस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या॥१८॥

एतेन अग्ने ब्रह्मणा ववृधस्व शक्ती वा यत् ते चकृम विदा वा उत प्र नेषि अभि वस्यः अस्मान् सम् नः सृज सुऽमत्या वाजऽवत्या॥

हे **अग्ने**, **एतेन** अस्मदीयेन **ब्रह्मणा** स्तुतिलक्षणेन मन्त्रेण **ववृधस्व** वर्धस्व (वृधु वृद्धौ, बहुलं छन्दसीति शपः श्लुः, अभ्यासस्य संहितायां दीर्घः) **शक्ती वा** शक्त्या वा (सुपां सुलुक् इति तृतीयायाः पूर्वसवर्णदीर्घत्वम्) **विदा वा** ज्ञानेन वा **यत् ते** तव स्तोत्रं **चकृम** वयं कृतवन्तः, एतेन ब्रह्मणेति पूर्वत्रान्वयः। यथाशक्ति यथाज्ञानं यत् स्तोत्रं अकार्ष्म तेन वर्धस्वेत्युक्तम्। स्तूयमाना देवताः स्तोतरि वर्धन्ते। **उत** अपि च **अस्मान्** त्वामाश्रितान् स्तोतॄन् **अभि** अभिलक्ष्य **वस्यः** वसीयः वसु-

भद्रतरं श्रेयः प्रणेषि प्रणयसि, प्रकर्षेण प्रापयसीत्यर्थः (णीञ् प्रापणे, नेषि शपो लुक्) । नः अस्मान् वाजवत्या समृद्धिमत्या सुमत्या शोभनबुद्ध्या संसृज सम्बन्धय ॥

इति प्रथमस्य द्वितीये पञ्चत्रिंशो वर्गः

सप्तमेऽनुवाके 'इन्द्रस्य नु वीर्याणि' इति पञ्चदशर्चं द्वितीयं सूक्तम् । आङ्गिरसो हिरण्यस्तूप ऋषिः, त्रिष्टुप् छन्दः, इन्द्रो देवता ॥

तत्र प्रथमामृचमाह—

इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥१॥

इन्द्रस्य नु वीर्याणि प्र वोचम् यानि चकार प्रथमानि वज्री
अहन् अहिम् अनु अपः ततर्द प्र वक्षणाः अभिनत् पर्वतानाम् ॥

इदं एतायामेति सूक्तं उभयं च ऐन्द्रं हिरण्यस्तूपस्य । अत्र वृत्रवधवृत्तान्तः परत्र वृत्रनवग्वादयः प्रस्तुताः । उभयोः समासतस्तात्पर्यं सूक्तद्वयान्ते प्रतिपादयिष्यते । प्रसक्तिवशाद् वृत्रवधेतिहासरहस्यं अङ्गिरस्तत्त्वं च समालोचयिष्यामः । तस्मात् स्थूलार्थाविरोधेनेह पदार्थमात्रमाचक्ष्महे मन्त्राणाम् । ऋषिराह पराक्रमानिन्द्रस्य— इन्द्रस्य देवराजस्य वीर्याणि वीरकर्माणि प्रवोचं नु प्रब्रवीमि तावत् (नु क्षिप्रनामेति व्याख्यातारः, वोचम् अडभावः, लुङ् लडर्थे) यानि वीरकर्माणि प्रथमानि प्रधानानि न केनापि कृतपूर्वाणि वा वज्री वज्रवान् इन्द्रः चकार कृतवान् । त्रीणि तानि कर्माण्याह । अहिं मेघं (सर्पे वृत्रेऽपि अहिः, हन्तेः आङि इण्, आङो ह्रस्वः) अहन् हतवान् । अनु पश्चात् अपः ततर्द अपो हिंसितवान्, भूमौ अपां पातनमेव हिंसा (तर्दतिर्हिंसार्थः) पर्वतानां सम्बन्धिनीः तदुद्भवा वक्षणाः प्रवहणशीलाः नदीः (वक्षणा वहतेः, नदीनाम) प्राभिनत् प्रभिन्नवान् ॥

द्वितीयामृचमाह—

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष

वाश्राइव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः ॥२॥

अहन् अहिम् पर्वते शिश्रियाणम् त्वष्टा अस्मै वज्रम् स्वर्यम् ततक्ष
वाश्राःऽइव धेनवः स्यन्दमानाः अञ्जः समुद्रम् अव जग्मुः आपः ॥

पर्वते शिश्रियाणं आश्रितं, पर्वते निलीयमानमित्यर्थः (श्रिञ् धातोः लिटः कानच्) अहिं मेघं अहन् हतवान् । केन साधनेन? अस्मै इन्द्राय त्वष्टा तक्षा देवशिल्पी स्वर्यं स्वःसम्बन्धिनं स्वर्लोकीयमित्यर्थः, सुष्ठु अर्यं प्रेरणीयं इति सायणः । वज्रं आयुधं ततक्ष तनूकृतवान् । तेन तनूकृष्टेन स्वर्येण वज्रेण हतवान् अहिम् । मेघे तथा भिन्ने स्यन्दमानाः स्रवन्त्यः आपः समुद्रं अपां राशिं अञ्जः ऋजुना मार्गेण क्रियाविशेषणमिदम्, अवजग्मुः प्राप्ताः । तत्र दृष्टान्तः । वाश्रा इव यथा हम्भारवोपेताः धेनवः वत्सान् प्राप्नुवन्ति तथेति ॥

तृतीयामृचमाह–

वृषायमाणो वृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥३॥

वृषऽयमाणः अवृणीत सोमम् त्रिऽकद्रुकेषु अपिबत् सुतस्य आ
सायकम् मघऽवा अदत्त वज्रम् अहन् एनम् प्रथमऽजाम् अहीनाम् ॥

वृषायमाणः वृष इव वर्षितेवाचरन्निन्द्रः [पदपाठे वृष इति ह्रस्व-अकारः छान्दसः] सोमं अवृणीत वृतवान् । त्रिकद्रुकेषु अभिप्लवत्र्यहं त्रिकद्रुका इति आचक्षते याज्ञिकाः । ज्योतिर्गौरायुरिति एतन्नामका यागास्त्रिकद्रुका उच्यन्ते । तर्हि अन्तर्यागपरेऽर्थे सूपपादम् । ज्योतिरादित्रिके सुतस्य सोमस्य अंशं अपिबत् पीतवान् । अथ मघवा सोमपानेन धनवान् सायकं अन्तकरं शत्रूणां [षो अन्तकर्मणि ण्वुल्] वज्रं आदत्त गृहीतवान् । तेन अहीनां मेघानां प्रथमजां प्रथमं जायत इति प्रथमजाः [जनादिभ्यो विट्, विड्वनोरिति आत्वम्] तं एनम् अहन् हतवान् । अथवा 'एनम्' तृतीयार्थे विभक्तिव्यत्ययः, एतेन वज्रेणेत्यर्थः ॥

चतुर्थीमृचमाह-

यदिन्द्राहन् प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः ।
आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ॥४॥

यत् इन्द्र अहन् प्रथमऽजाम् अहीनाम् आत् मायिनाम् अमिनाः प्र उत मायाः आत् सूर्यम् जनयन् द्याम् उषसम् तादीत्ना शत्रुम् न किल विवित्से ॥

हे इन्द्र, यत् यदा अहीनां मेघानां प्रथमजां प्रथमजातं मेघं अहन् हतवानसि [लङ्, मध्यमपुरुषैकवचनम्], आत् ततः परं मायिनां मायाविनां मायाः उत कपटप्रज्ञा अपि प्रामिनाः प्रणाशितवानसि [मीञ् हिंसायाम्, मीनातेः निगमे ह्रस्वत्वम्] आत् तदनन्तरं सूर्यं उषसं द्यां द्युस्थानं च जनयन् आवरक-मेघप्रहाणेन प्रकाशयन् वर्तसे तादीत्ना तदानीं [तदानीमित्यस्य पृषोदरादित्वाद्वर्ण-व्यत्ययः] शत्रुं वैरिणं न विवित्से किल न लब्धवानसि खलु। किल- निपातस्य चेति दीर्घत्वम्। विवित्से- विद्लृ लाभे, लिट् ॥

पञ्चमीमृचमाह-

अहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन ।
स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः ॥५॥

अहन् वृत्रम् वृत्रऽतरम् विऽअंसम् इन्द्रः वज्रेण महता वधेन स्कन्धांसिऽइव कुलिशेन विऽवृक्णा अहिः शयते उपऽपृक् पृथिव्याः ॥

इन्द्रः वृत्रतरं अतिशयेन वृत्रं आवरकं लोकस्य, वृत्रं आवरकं असुरं मेघरूपं वज्रेण आयुधेन महता बलीयसा वधेन प्रहारेण [हनश्च वधः इति भावे अप्] व्यंसं विगतांसं यथा बाहुच्छेदो भवति तथा अहन् हतवान्। तथा छेदे दृष्टान्तः। कुलिशेन कुठारेण विवृक्णा विशेषेण छिन्नानि स्कन्धांसि इव वृक्षस्कन्धाः यथा

भूमौ पतिता भवन्ति तथा सति, अहिः वृत्रः पृथिव्याः भूमेः उपपृक् सामीप्येन सम्पृक्तः शयते शेते । विवृक्णा- ओ व्रश्चू छेदने, निष्ठानत्वम् । शयते- शेः परस्य शपः लुगभावः ॥

इति प्रथमस्य द्वितीये षट्त्रिंशो वर्गः

अथ सूक्ते षष्ठीमृचमाह-

अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ॥६॥

अयोद्धाऽइव दुःऽमदः आ हि जुह्वे महाऽवीरम् तुविऽबाधम् ऋजीषम् न अतारीत् अस्य सम्ऽऋतिम् वधानाम् सम् रुजानाः पिपिषे इन्द्रऽशत्रुः ॥

अयोद्धा इव न विद्यते योद्धा यस्य स इव दुर्मदः दुष्टहर्षः दर्पात् महावीरं महान्तं वीरं तुविबाधं तुवीन् प्रभूतान् शत्रून् बाधमानं ऋजीषं अपार्जकं शत्रूणां इन्द्रं आ जुह्वे हि आहूतवान् खलु । अस्य इन्द्रस्य वधानां प्रहाराणां समृतिं सङ्गमं नातारीत् तरितुं नाशक्नोत् स दुर्मदः । सः इन्द्रशत्रुः इन्द्रः शत्रुः यस्य स वृत्रः रुजानाः नदीः सम्पिपिषे सम्पिष्टवान् । सर्वान् लोकानावृण्वतो वृत्रदेहस्य पातेन तत्रत्यं पाषाणादिकं चूर्णीभूतं इति सायणः । 'रुजानाः किल ग्रीवा उच्यन्ते । आत्मीया ग्रीवा सम्पिष्टवान् । प्रहारैर्वध्यमानश्चूर्णीकृत इत्यर्थः' इति स्कन्दस्वामी । ऋजीषम्- 'अर्ज ऋज चेति ईषन् । यत् सोमस्य पूयमानस्य अतिरिच्यते तद् ऋजीषम्, तद्वान्' इति सायणः । रुजानाः- रुज भङ्गे, व्यत्ययेन शानच् । पिपिषे- पिष्लृ सञ्चूर्णने, व्यत्ययेन लिट् ॥

सप्तमीमृचमाह-

अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन् पुरुत्रा वृत्रो अशयद्व्यस्तः ॥७॥

अपात् अहस्तः अपृतन्यत् इन्द्रम् आ अस्य वज्रम् अधि सानौ जघान
वृष्णः वध्रिः प्रतिऽमानम् बुभूषन् पुरुऽत्रा वृत्रः अशयत् विऽअस्तः ॥

अपात् पादरहितः (बहुव्रीहौ पादशब्दस्यान्त्यलोपः छान्दसः) **अहस्तः** हस्तरहितः, एवं सर्वथा छिन्नाङ्गः वृत्रः **इन्द्रं** उद्दिश्य **अपृतन्यत्** पृतनामैच्छत्, युद्धं न त्यक्तवान् । **अस्य** वृत्रस्य **सानौ** उच्छ्रितप्रदेशे **अधि** उपरि **वज्रं** इन्द्रः **आजघान** आभिमुख्येन प्रक्षिप्तवान् । अशक्तस्य युद्धेच्छोर्वृत्रस्य दृष्टान्तमाह । **वध्रिः** छिन्नमुष्कः पुंस्त्वहीन इत्यर्थः **वृष्णः** (वृषु सेचने) सेचनसमर्थस्य पुंस्त्वशालिन इत्यर्थः **प्रतिमानम्** प्रतिरूपं **बुभूषन्** भवितुमिच्छन्, पुंसः सादृश्यं जिगमिषुर्नपुंसक इव इत्यर्थः । स **वृत्रः पुरुत्रा** बहुषु अङ्गेषु (सप्तम्यर्थे त्रा-प्रत्ययः) **व्यस्तः** विशेषतः क्षिप्तः विकीर्णाङ्ग इत्यर्थः, **अशयत्** अशेत, भूमौ अपतत् (शीङ् स्वप्ने, व्यत्ययेन परस्मैपदम्, छन्दसि शपो लुगभावः) ॥

अष्टमीमृचमाह—

नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः ।
याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतःशीर्बभूव ॥८॥

नदम् न भिन्नम् अमुया शयानम् मनः रुहाणाः अति यन्ति आपः
याः चित् वृत्रः महिना परिऽअतिष्ठत् तासाम् अहिः पत्सुतःऽशीः बभूव ॥

अमुया इत्थंभूतलक्षणया **शयानं** पतितं वृत्रं **आपः अतियन्ति** अतिक्रम्य गच्छन्ति । 'अमुया अमुष्यां भूमौ' इति सायणः । अत्र दृष्टान्तः । **भिन्नं नदं न** बहुधा भिन्नकूलं सिन्धुमिव, यथा वृष्टौ नदीकूलभेदनेन प्रवहन्त्यापस्तथा मृतं वृत्रमतिक्रामन्तीत्यर्थः । कीदृश्य आपः? **मनो रुहाणाः** मनुष्याणां चित्तं आरोहन्त्यः (रुह-धातोः व्यत्ययेन शानच्, अन्यच्च छान्दसम्) । एवं अपामधः शयाने मृते वृत्रे, आपः मन आरोहन्तीत्युक्तम् । उत्तरत्र गूढार्थविचारे तात्पर्यं निरीक्षणीयम् । अथ यासामपावरकोऽत एव बन्धकोभूद्वृत्रः तासामेव पादेषु पतितोऽवस्थित इत्याह ।

वृत्रः महिना स्वमहिम्ना याः चित् या अप एव पर्यतिष्ठत् परिवृत्य स्थितवान् अहिः वृत्रः तासां अपां पत्सुतःशीः पादस्य अधस्तात् शयानः बभूव (पाद-शब्दस्य पद् आदेशः सु इति उपजनश्छान्दसः, सप्तम्यर्थे तसिल्, ततः शेत इति क्विप्) ॥

नवमीमृचमाह—

नीचावयाअभवद्वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार　　।
उत्तरा सूरधरः पुत्रआसीद्दानुः शये सहवत्सा न धेनुः　॥९॥

नीचाऽवयाः अभवत् वृत्रऽपुत्रा इन्द्रः अस्याः अव वधः जभार उत्ऽतरा सूः अधरः पुत्रः आसीत् दानुः शये सहऽवत्सा न धेनुः ॥

वृत्रपुत्रा वृत्रः पुत्रो यस्याः सा वृत्रमाता नीचावयाः नीचौ वयसौ यस्याः सा, वयाः शाखानाम, शाखास्थानीयत्वात् भुजयोः प्रलम्बबाहुः अभवत् पुत्रे हन्यमाने तद्वधपरिहाराय तस्योपरि बाहू प्रसार्य स्थितेत्यर्थः । इन्द्रः तथां अवस्थिताया अपि अस्याः वृत्रमातुः अव अधः, वृत्रस्योपरि वधः वधसाधनं वज्रं (असुनि हन्तेर्वधादेशः) जभार प्रहृतवान् (हृ-ग्रहोः भत्वम्) । तदानीं सूः माता (सूत इति सूः क्विप्) दानुः उत्तरा उपरि स्थिता पुत्रः वृत्रः अधरः अधोभागस्थित आसीत् । सा च सहवत्सा वत्ससहिता धेनुर्न गौरिव शये शयनं कृतवती । केयं पुराणकथा? तत्त्वमन्वेष्टव्यम् ॥

दशमीमृचमाह—

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम्　।
वृत्रस्य निण्यं विचरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ॥१०॥

अतिष्ठन्तीनाम् अनिऽवेशनानाम् काष्ठानाम् मध्ये निऽहितम् शरीरम् वृत्रस्य निण्यम् वि चरन्ति आपः दीर्घम् तमः आ अशयत् इन्द्रऽशत्रुः ॥

अतिष्ठन्तीनां अनवस्थितानाम् चलानामित्यर्थः **अनिवेशनानां** निविशन्ति अस्मिन् इति निवेशनं स्थानं तद्रहितानां उपवेशनरहितानां प्रवहन्तीनां **काष्ठानां** **अपां** [काष्ठाः क्रान्त्वा स्थिताः, पृषोदरादिः] **मध्ये निहितं** स्थापितं **शरीरम्** । कस्य? **वृत्रस्य** । कीदृशं तत्? **निण्यं** अन्तर्हितं गुप्तमदृश्यमिति यावत्, तादृशं अपां अन्तर्निमग्नं शरीरं (कर्म) **आपः विचरन्ति** विशेषेण आक्रम्य प्रवहन्ति । एवं जलमध्ये वृत्रशरीरे प्रक्षिप्ते सति **इन्द्रशत्रुः** वृत्रः **दीर्घं तमः** दीर्घनिद्रात्मकं निधनं प्राप्य, तद्यथा भवति तथा **आशयत्** सर्वतः पतितवान् ॥

इति प्रथमस्य द्वितीये सप्तत्रिंशो वर्गः

एकादशीमृचमाह—

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥११॥

दासऽपत्नीः अहिऽगोपाः अतिष्ठन् निऽरुद्धाः आपः पणिनाऽइव गावः
अपाम् बिलम् अपिऽहितम् यत् आसीत् वृत्रम् जघन्वान् अप तत् ववार ॥

दासपत्नीः दासः पतिः यासां ताः (दसु उपक्षये) दासयतीति दासो वृत्रो विश्वस्य क्षपयिता यासामपां स्वामी ता आपः, **अहिगोपाः** अहिः वृत्रः गोपाः रक्षकः यासां ताः **आपः** (गुपू रक्षणे गोपनं अत्र निरोधनं भवति) **निरुद्धाः अतिष्ठन्** बन्धनस्थाः आसन् । का इव? **पणिनेव** एतन्नामकेनासुरेण गवां अपहर्त्रा निरुद्धा **गावः** यथा स्थितास्तथा । **यत् अपां बिलं** गोपनस्थानद्वारं प्रवहणद्वारं वा **अपिहितं आसीत्** निरुद्धमभवत् । **वृत्रं जघन्वान्** हतवान् [हन्तेः लिट्, क्वसुन्] इन्द्रः **तत्** तद्बिलं **अपववार** अपावृतवान्, अपां प्रवाहाय द्वारमुद्घाटितवान् ॥

द्वादशीमृचमाह—

अश्व्यो वारो अभवस्तदिन्द्र सृके यत्त्वा प्रत्यहन्देव एकः ।

अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून् ॥१२॥

अश्व्यः वारः अभवः तत् इन्द्र सृके यत् त्वा प्रतिऽअहन् देवः एकः ।
अजयः गाः अजयः शूर सोमम् अव असृजः सर्तवे सप्त सिन्धून् ॥

हे इन्द्र, यत् यदा त्वा त्वाम् सृके वज्रायुधे [सृकः वज्रनाम, सृ-धातोः कक्प्रत्ययः] प्रत्यहन् प्रतिकूलं प्रहृतवान् वृत्रः, तत् तदा त्वं अश्व्यः अश्वे भवः अश्वावयवभूतः वारः वालः [लवविकल्पः] मक्षिकादीनां निवारयिता अश्ववाल इव वृत्रस्य निराकर्ता अभवः । अथ एकः अद्वितीयः देवः त्वं गाः अजयः निरुद्धाः गाः पुनर्लब्धवान् त्वं, हे शूर शौर्ययुक्त, सोमं सोमं च अजयः, सप्त सिन्धून् सप्तसङ्ख्याकाः नदीः, स्यन्दमाना अपः सर्तवे सर्तुं प्रवाहरूपेण गन्तुं अवासृजः अवसृष्टवान् विमोचितवानित्यर्थः । अस्यामृचि 'देव एकः' देदीप्यमानः सर्वायुधकुशलः अद्वितीयः वृत्र इत्येके । अत्र वृत्रहत्या, गोलाभः, सोमप्राप्तिः, सप्तसिन्धुविमोचनम्, इत्येतेषां कः सम्बन्धः, ईदृश आख्यानस्य का वा विवक्षा? उत्तरत्र पश्यामः ॥

त्रयोदशीमृचमाह—

नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च ।
इन्द्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये ॥१३॥

न अस्मै विऽद्युत् न तन्यतुः सिसेध न याम् मिहम् अकिरत् ह्रादुनिम् च ।
इन्द्रः च यत् युयुधाते इति अहिः च उत अपरीभ्यः मघऽवा वि जिग्ये ॥

अस्मै इन्द्राय, इन्द्रमुद्दिश्य वृत्रेण प्रयुक्ता विद्युत् न सिषेध इन्द्रं न प्राप (षिधु गत्याम्, लिट्) तथा तन्यतुः गर्जनं (तनोतेर्यतुच्) न प्राप । यां मिहं वृष्टिं (मिह सेचने, मेहति सिञ्चतीति मिट्, क्विप्) अकिरत् विक्षिप्तवान् यां ह्रादुनिं च ह्रादकारयुक्तां अशनिं च प्रयुक्तवान् साऽपि न सिषेध, इन्द्रं न प्राप्नोत् । यत् यदा इन्द्रश्च अहिश्च उभावपि युयुधाते युद्धं चक्रतुः, तदा विद्युदादयः

इन्द्रं न सिषेध इति पूर्वत्र सम्बन्धः । उत अपि च मघवा इन्द्रः अपरीभ्यः अपराभ्यः वृत्रकृतमायाभ्यः सकाशात् (अपरीशब्दः अन्यवचनः) विजिग्ये विशेषेण जितवान् ॥

चतुर्दशीमृचमाह—

अहे॑र्या॒तारं॒ कम॑पश्य इन्द्र हृ॒दि यत्ते॑ ज॒घ्नुषो॒ भीरग॑च्छत् ।
नव॑ च॒ यन्न॑व॒तिं च॒ स्रव॑न्तीः श्ये॒नो न भी॒तो अत॑रो॒ रजां॑सि ॥१४॥

अहेः॑ या॒तार॑म् कम् अ॒प॒श्य॒ः इ॒न्द्र॒ हृ॒दि यत् ते॒ ज॒घ्नुषः॑ भीः अग॑च्छत् नव॑ च॒ यत् न॒व॒तिम् च॒ स्रव॑न्तीः श्ये॒नः न भी॒तः अत॑रः रजां॑सि ॥

वृत्रं हतवत इन्द्रस्य किं मृतो वृत्र उत नेति शङ्काऽभवत् तस्मात् परावतः अत्यन्त-दूरदेशात् नदीरतरत्, लोकांश्चातरत् वृत्रहत्याविनिश्चयाय । इन्द्रमन्तरा को वा वृत्रस्य हन्ता भवेत्? इममर्थं प्राह । मयैव हन्तव्यः, अन्येन केनापि घातितो मा भूद्वृत्र इति वेगेन शङ्कया नदीस्तीर्त्वाऽगच्छत् जिघांसुरिन्द्रः इति एके व्याख्यातारः । वृत्रहत्यया पापं कृतवानस्मीति भीतिरिन्द्रस्य जातेत्यन्याख्यानानि उदाहरन्त्येके । नायमर्थः सम्मतोऽस्माकम् । हे इन्द्र, जघ्नुषः वृत्रं हतवतः (हन्तेः लिट्, क्वसुन्, जिघांसोः अन्त-र्भावितसनर्थ इति स्कन्दस्वामी) ते तव हृदि मनसि यत् यदि भीः किं हतवान् असि वा इति शङ्कारूपा अगच्छत् प्राप्नुयात्, तर्हि अहेः वृत्रस्य यातारं अभि-गन्तारं हन्तारमिति यावत्, कं अपश्यः कमन्यं दृष्टवानसि, न कोऽपि वर्तते । यत् यस्मात् कारणात् नव च नवतिं च एकोनशतसङ्ख्याकाः स्रवन्तीः नदीः रजांसि लोकांश्च अतरः तीर्णवानसि, अन्येन हतो मा भूदिति, किं हतो मृत एव वा न वेति, भीतः शङ्कितः अतर इति सम्बन्धः । क इव? श्येनो न दूरगमनशाली बलवान् पक्षीव (श्येनः श्येङ् गतौ, इनन्)

पञ्चदशीमृचमाह—

इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥१५॥

इन्द्रः यातः अवऽसितस्य राजा शमस्य च शृङ्गिणः वज्रऽबाहुः सः इत् ऊम् इति राजा क्षयति चर्षणीनाम् अरान् न नेमिः परि ता बभूव ॥

वृत्रे हते **वज्रबाहुः इन्द्रः यातः** गच्छतः जङ्गमस्य (यातीति यात् शतृ), **अवसितस्य** अवबद्धस्य स्थावरस्य (षिञ् बन्धने), **शमस्य** शान्तस्य **शृङ्गिणः च** आयुधस्थानीयशृङ्गलक्षितदर्पयुक्तस्य **राजा** अभूत्, सर्वस्यापि चरस्य अचरस्य शान्तस्य शक्तस्य च ईश्वरोऽभूदित्यर्थः । 'शृङ्गिणः महिष-बलीवर्दादेः' इति पूर्वव्याख्यानं नोपपन्नम्, महिषादेर्जङ्गमेऽन्तर्भावात् । अथ च 'यातः अवसितस्य' इति एकं द्वन्द्वम्, 'शमस्य शृङ्गिणः' इत्यन्यद् द्वन्द्वं उक्तमवधेयम् । **सः इत्** स एव इन्द्रः (सः संहितायां सोर्लोपः छान्दसः) **चर्षणीनां** मनुष्याणां **राजा** भवन् **क्षयति** ईष्टे (क्षयतिः ऐश्वर्यकर्मा) । सः **ता** तानि पूर्वोक्तानि सर्वाणि **परि बभूव** परितो व्याप्तवान् । तत्र दृष्टान्तः । **नेमिः** रथचक्रपृष्ठं **अरान् न** नाभौ कीलितान् काष्ठविशेषान् इव, यथा रथचक्रस्य परितो वर्तमाना नेमिः नाभौ कीलितान् अरान्परितो भवति, तथा इन्द्रः सर्वं परितो भवतीत्यर्थः ॥

प्रथमाष्टके द्वितीयेऽस्मिन्नध्याये अन्तिमं सूक्तद्वयं हिरण्यस्तूपस्यार्षेयं व्याख्यातम् । तत्रैकमाग्नेयम्, ऐन्द्रमन्यत् । आग्नेयस्य व्याख्याने अङ्गिरोविचारोऽन्यत्र क्रियत इति उक्तम् । ऐन्द्रस्य व्याख्याने वृत्रकथा प्रसक्ता, तत्रापि विवरणं नोक्तम् । अत्रोभयोः विचारः कर्तव्यः । यत आङ्गिरसवृत्तानि वृत्रवृत्तान्तश्च तत्र तत्र दाशतय्यामुदाहृतानि स्थगन्ति ब्रह्मकोशस्थमितिहासवेषमार्षं रहस्यम् । परोक्षवचनैर्मन्त्रवर्णा तत्त्वगर्भितं इतिहासमाचक्षते । परोक्षवचनत्वं तादृशानां मन्त्राणामभ्युपगन्तव्यम् । तदन्तरेण स्थूलपक्षीयं सूक्ष्मार्थपक्षीयं वा तात्पर्यमसङ्गतं भवति । इदं च प्राक् प्रपञ्चितं 'यत्र ग्रावा' इति सूक्तार्थविवरणे, अन्यत्र च भूमिकायामावेदितम् । अथ पश्यामस्तावत् किंविधमङ्गिरसमधिकृत्य मन्त्रवर्णेषु वर्णनम् ॥

अङ्गिर इति सकृत् अकारान्तः शब्दोऽयं सप्तम्येकवचने प्रयुक्तः । तद्यथा 'नवग्वे अङ्गिरे दशग्वे सप्तास्ये' (४-५१-४) इत्यत्र अङ्गिरसां गणः अङ्गिर इति प्रोक्तम् । सकृत् प्रथमाबहुवचने अकारान्त एव प्रयुक्तः 'आत् अङ्गिराः प्रथमं दधिरे' इति । अत्र अङ्गिराः अङ्गिरसः । अन्यत्र सकारान्तस्यैव प्रयोगो वेदे लोके च प्रसिद्धः । उभयोश्च रूपयोरेक एव अवयवार्थः । अङ्गार-अग्निशब्दाविव अङ्गिरःशब्दोऽपि अङ्गतेर्धातोर्निष्पन्नो बोध्यः । 'अग्निमीळे' सूक्तव्याख्याने अग्निपदनिर्वचनमधिकृत्य समासेनोपन्यस्तम् । अग्न्यादीनां वक्ष्यमाणानां चतुर्णां शब्दानां व्युत्पादनेषु इमान्युणादिसूत्राण्यवधेयानि भवन्ति । 'अङ्गेर्नलोपश्च' अग्निः । 'अङ्गिमदिमन्दिभ्य आरन्' अङ्गारः । 'अङ्गतेरसिरिरुडागमश्च' अङ्गिराः । 'ऋज्रेन्द्राग्रादयः रन्नन्ताः' अग्रम् । अत एव अग्निशब्दस्य अवयवार्थकथने ब्राह्मणवाक्यबलेन अग्रणीरग्निरित्याहुः । अग्न्यङ्गाराङ्गिरसां अव्यतिरेकमामनन्ति ब्राह्मणानि । 'ये अङ्गारा आसन् ते अङ्गिरसोऽभवन्' इति । 'अङ्गारेषु यो बभूव सोऽङ्गिराः' इति नैरुक्ताः । अन्ये च 'अङ्गिरोभिः ऋषिभिः सम्पादितत्वात् अङ्गसौष्ठवाद्वा अङ्गिराः अग्निरूपः' इति । अङ्गिरसमधिकृत्य विविधं वर्णयन्ति मन्त्रवर्णाः । अग्निः प्रथमोऽङ्गिराः, अग्निपुत्राः अङ्गिरसः, अग्निरङ्गिराः शक्तिसूनुः इति च प्राहुः । 'सहसः सूनो अङ्गिरः·········ऊर्जो नपातमीमहेऽग्निम्' (८-६०-२) 'कया ते अग्ने अङ्गिर ऊर्जो नपात्' (८-८४-४) 'त्वामग्ने अङ्गिरसो गुहा हितं अन्वविन्दन् शिश्रियाणं वने वने । स जायसे मथ्यमानः सहो महत् त्वामाहुः सहसस्पुत्रमङ्गिरः' (५-११-६) ॥ इत्येवंविधैर्मन्त्रवर्णैः सर्वथा आङ्गिरसं तत्त्वं अग्निवैभवसम्बन्धीति स्पष्टं अवगम्यते । तस्मात् पावकत्व-शोचिष्मत्त्व-होतृत्व-कविक्रतुत्वादयोऽग्नेर्ये गुणाः प्रथिताः, तैः सम्पन्नः अङ्गिरा अङ्गिरसां गणो वेति ग्राह्यम् । यथा अग्निर्देवो देवानां अग्रे स्थितः, तथा 'दिवस्पुत्रासः' अङ्गिरसोऽपि ॥

अङ्गिरसो देवाश्चेत् कथं पुनरिमे पितरो मनुष्या ऋषयः प्रसिद्धा गीयन्ते ? देवा मनुष्या इति द्विधाऽपि निर्दिष्टा भवन्ति । उभयथाऽप्युपपत्तिं पश्यामः । आर्भवतत्त्वविचारे यदुक्तं तदिह स्मार्यम् । अङ्गिरस ऋषयो मनुष्याः सन्तस्तपसा यजनेन दिव्यमध्वानं अधिगम्य देवभावं प्राप्ताः । पूर्वं देवा एव स्वधामानोऽग्निविभवा ऋषिषु मनुष्येषु लब्धजन्मानः अत्रिभृगुकुत्सादय इव दिव्यभावप्राप्तिप्रदर्शनाय दृष्टान्तभूताश्चेति बोध्यम् । तत्र प्रथमं तावत् मनुष्या अङ्गिरसोऽस्माकं पितर इति मन्त्रान् कीर्तयतो कांश्चिन्निर्दि-

श्चामः । 'वीळु चिद् दृळ्हा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण । चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः' ॥ (१-७१-२) 'अस्माकमत्र पितरो मनुष्या अभि प्रसेदुर्ऋतमाशुषाणाः' (४-१-१३) 'दृळ्हं नरो वचसा दैव्येन व्रजं गोमन्तमुशिजो वि वव्रुः' (४-१-१५) एवंविधाः बहवो मन्त्रा मनुष्यानृषीन् पूर्वान् पितॄन् देवभावं प्राप्तान् मनुष्योपकारिणो देवसाहाय्यकारिणोऽपि गायन्ति ॥

अथ देवर्षयो देवा एवेमेऽङ्गिरसो बृहस्पतिभावं ब्राह्मणस्पत्यं वा प्राप्ताः इन्द्र-कार्यसाधका अभिवर्ण्यन्ते, तथा अश्विभ्यां मरुद्भिः सह कीर्तिता भवन्ति । अङ्गिरसां सप्तसङ्ख्यया कीर्तने प्रसिद्धेऽपि बृहस्पतिरूपत्वेन तेषां एकरूपप्रतिपादनं 'इमां धियं सप्तशीर्ष्णीं पिता नः' (१०-६७-१) इत्यादौ स्पष्टं द्रष्टव्यम् । 'यो अद्रिभित् प्रथमजा ऋतावा बृहस्पतिराङ्गिरसो हविष्मान्' (६-७३-१) इत्यत्रापि बृहस्पतिराङ्गिरसः । अङ्गि-रोभिरिन्द्रः श्रेष्ठोऽङ्गिरा भवतीत्यन्यत्र बहुशः प्रथितः । तथा च 'सो अङ्गिरोभिरङ्गिर-स्तमो भूद् वृषा वृषभिः सखिभिः सखा सन्' (१-१००-४) 'विश्वरूपा मरुतो न सामभिः' (१०-७८-५) 'आ युवानः कवयो यज्ञियासो मरुतो.................नक्षन्तो नरो अङ्गिरस्वत्' (६-४९-११) इत्यादौ मरुत्सम्बन्धित्वमप्यङ्गिरसामुक्तम् । तथा दिवो दुहितुरुषसः प्रस्तावे 'अभूदुषा इन्द्रतमा मघोनी अजीजनत् सुविताय श्रवांसि । वि दिवो देवी दुहिता दधात्यङ्गिरस्तमा सुकृते वसूनि' (७-७९-३) ॥ बहुभ्यो मन्त्रेभ्य आङ्गिरसप्रसङ्ग उषसः प्राप्तौ गवां लाभे अद्रिभेदने इन्द्रविजयादौ चावगम्यते । इमानि सर्वाणि एकस्यैव वृत्तान्तस्य सम्बन्धीनि भवन्ति । स च इन्द्रकृतवृत्रवधो भवति । वृत्रहतेः युगपत्फलानि चत्वारि परस्परसम्बद्धानि बोध्यानि । यद्यपि तानि बहुभिर्मन्त्रैर्बोध्यानि भवन्ति, तथाऽपि एकस्यैव पर्वतपदवेदनीय-वृत्रभञ्जनस्य युगपत् प्राप्तानि फलानि ज्ञापयन्तं मन्त्रं उदाहरामः । 'त्वमपो वि दुरो विषूचीः इन्द्र दृळ्हमरुजः पर्वतस्य । राजा भवो जगत-श्चर्षणीनां साकं सूर्यं जनयन्द्यामुषासम्' (६-३०-५) ॥ इदं मन्त्रतात्पर्यम्— हे इन्द्र, त्वं वृत्रेणावृता अपः यथा सर्वतः प्रसृता भवन्ति तथा व्यसृजः । कथमिदं शक्यमभवत्? पर्वतस्य दृढं अपां बन्धकप्रदेशं अभाङ्क्षीः, तस्मादिदं फलितम् । अन्यानि च 'साकं' युगपत् फलितानि । तानि सूर्यस्य, उषसः, दिवश्च जन्मानि । गवां विमोचनं च उषसा सूर्येण सह वा वेदे कीर्तितं बोध्यम्— 'गृणानो अङ्गिरोभिर्दस्म विवरुषसा सूर्येण गोभिरन्धः' (१-६२-५) ॥ एवं इन्द्रसाहाय्ये वृत्रवधार्थे गवामधिगमे उषःप्रादुर्भावे सूर्य-

जन्मनि च अङ्गिरःप्रस्तावस्तत्र तत्र ऋक्संहितायां श्रूयते । इन्द्रकृत्यवृत्रवधस्य गूढार्थे निर्णीते अङ्गिरसतत्त्वगुणविभवाः स्वतः स्फुटाः स्युः ॥

वृत्रकथा तर्हि निरीक्षणीया । किमनया प्रतिपिपादयिष्यते? बाह्यपक्षेऽपि गौणार्थमन्तरा न तात्पर्यसिद्धिः । अत एव गौणाः शब्दा इति शबरः । तमेव 'उपमार्थे युद्धवर्णा भवन्ति.........उपसमस्य स्वसारमाह साहचर्यात्' इति यास्कः । परोक्ष-वचनानीति ब्राह्मणानि । 'निण्यं वचः' इति ऋग्वेदः । तमेव गूढार्थं अवद्योतयन् सङ्केतरूपः शब्द इति वयम् ॥

वृत्रवृत्तान्तस्य मुख्यो विषयो यथा वृत्रवधनिष्पादितः अपामुत्सर्गो भवति, तथा आङ्गिरसकथाया गवां विमोचनमेव सारवान् विषयः । यत्र वलो मुख्यः पणयोऽन्ये च तमसस्पुत्रा असुरवीराः प्रधाना भवन्ति । इमाश्च गावो न चतुष्पात्पशवो भवन्ति, नाप्यापो भौतिकं जलम् । गावो रश्मयः बाह्या अपि अन्तःप्रकाशसङ्केतभूताः, अत एव ऋतरश्मयो बोध्याः । ऋतं च ज्योतिरुत्तमं सूर्यशब्दवाच्यं वेदे । तमसा वृत्रेण आक्रान्ता आपस्तु वृत्रवधात्परं विसृष्टाः सत्यस्यैव धारा भवन्ति । इमाश्च 'ऋतस्य धाराः' 'सप्त सिन्धवः' क्वचित् 'स्वर्वतीरप' इत्युल्लिखिताः सप्ततत्त्वात्मकविश्वधारण-सत्यशक्तिधारा भवन्ति । पर्वतो मेघो भवति । वलस्य पर्वतस्तु गुहामयः, यत्र अन्धकारमये स्थले गावश्चिद्रश्मयोऽपहृत्य वलेन निक्षिप्ता भवन्ति । अङ्गिरा आङ्गिर-सो वा बृहस्पतिः सप्तास्यो ब्रह्मणा हार्दवाग्वीर्यज्वलितेन मन्त्रेण वलेनाधिष्ठितं पर्वतं भित्त्वा गाः निर्गमयति, तथा इन्द्रेण 'युजा' सहायेन अपामुत्सर्गं निरवर्तयदिति च (२-२३-१८) बहुशो गीयते वेदे । उत्तरत्रापि प्रसक्तिवशात् तान् मुख्यान् मन्त्रवर्णान् गूढार्थपरतयैव व्याख्येयान् अन्यार्थपरतायामयुक्तान् प्रदर्शयिष्यामः । ऋक्संहितायां सर्वाणि वृत्रवधस्थलानि आङ्गिरसप्रस्तावस्थलानि च परीक्षितानि चेत्, वल-वृत्र-पणि-प्रभृतयोऽसुराः, आपः, गावः, पर्वतः इत्यादीनि अन्तर्यागपराणां ऋषीणां रहस्य-भाषितानि 'परोक्षवचनानि' 'निण्या वचांसि' इत्यसंशयं दृढं भवेदित्यलमिह विस्तरेण ॥

इति प्रथमस्य द्वितीये अष्टत्रिंशो वर्गः

प्रथमाष्टके द्वितीयोऽध्यायः समाप्तः